उद्गंकरंटंवं

ॐ नारायणः परः अव्यक्ताद् अण्डम् अव्यक्त-संभवम्। अण्डस्य अन्तः तु इमे लोकाः सप्त-द्वीपा च मेदिनी।।१।।

स भगवान् सृष्ट्वा इदं जगत् तस्य च स्थितिं चिकीर्षुः मरीच्यादीन् अग्रे सृष्ट्वा प्रजापतीन् प्रवृत्ति-लक्षणं धर्मं ग्राहयामास वेदोक्तम्। ततः अन्यान् च सनक-सनन्दनादीन् उत्पाद्य निवृत्ति-धर्मं ज्ञान-वैराग्य-लक्षणं ग्राहयामास। द्विविधः हि वेदोक्तः धर्मः, प्रवृत्ति-लक्षणः निवृत्ति-लक्षणः च। तत्र एकः जगतः स्थिति-कारणं, प्राणिनां साक्षाद् अभ्युदय-निःश्रेयस-हेतुः यः स धर्मः ब्राह्मणाद्यैः वर्णिभिः आश्रमिभिः च श्रेयोर्थिभिः अनुष्ठीयमानः दीर्घेण कालेन अनुष्टातॄणां कामोद्भवात् हीयमान-विवेक-विज्ञान-हेतुकेन अघर्मेण अभिभूयमाने धर्मे प्रवर्धमाने च अधर्मे जगतः स्थितिं परिपिपालयिषुः स आदिकर्ता नारायणाख्यः विष्णुः भौमस्य ब्रह्मणः ब्रह्मणत्वस्य रक्षणार्थं देवक्यां वसुदेवाद् अंशेन कृष्णः किल संबभूव। ब्राह्मणत्वस्य हि रक्षणेन रक्षितः स्याद् वैदिकः धर्मः तद्-अधीनत्वाद् वर्ण-आश्रम-भेदानाम्।

स च भगवान् ज्ञान-ऐश्वर्य-शक्ति-बल-वीर्य-तेजोभिः सदा संपन्नः त्रिगुणात्मिकां वैष्णवीं स्वां मायां मूलप्रकृतिं वशीकृत्य अजः अव्ययः भूतानाम् ईश्वरः नित्य-शुद्ध-बुद्ध-मुक्त-स्वभावः अपि सन् स्वमायया देहवानिव जात इव लोकानुग्रहं कुर्वन् लक्ष्यते, स्वप्रयोजनाभावे अपि भूत-अनुजिघृक्षया वैदिकं हि धर्मद्वयम् अर्जुनाय शोक-मोह-महोदधौ निमग्नाय उपदिदेश गुणाधिकैः हि गृहीतः अनुष्ठीयमानः च धर्मः प्रचयं गमिष्यतीति। तं धर्मं भगवता यथा उपदिष्टं वेदव्यासः सर्वज्ञः भगवान् गीताख्यैः सप्तभिः श्लोक-शतैः उपनिबबन्ध।

तदिदं गीताशास्त्रं समस्त-वेदार्थ-सार-संग्रहभूतं दुर्विज्ञेयार्थं तद्-अर्थ-आविष्करणाय अनेकैः विवृत-पदार्थ-वाक्यार्थ-न्यायमपि अत्यन्त-विरुद्ध-अनेकार्थत्वेन लौकिकैः गृह्यमाणम् उपलभ्य अहं विवेकतः अर्थ-निर्धारण-अर्थं संक्षेपतः विवरणं करिष्यामि।

तस्य अस्य गीता-शास्त्रस्य संक्षेपतः प्रयोजनं परं निःश्रेयसं सहेतुकस्य संसारस्य अत्यन्त-उपरम-लक्षण्म्, तच्च सर्व-कर्म-संन्यास-पूर्वकाद् आत्मज्ञान-निष्ठारूपाद् धर्माद् भवति। तथा इममेव गीतार्थ-धर्मम् उद्दिश्य भगवता एवोक्तम् - 'स हि धर्मः स पर्याप्तः ब्रह्मणः पदवेदनम्' इत्यनुगीतासु। किंच अन्यद् अपि तत्र एव उक्तम् - 'न एव धर्मी न च अधर्मी न च एव हि शुभ-अशुभी। यः स्याद् एकासने लीनः तूष्णीं किंचिद् अचिन्तयन्' इति, 'ज्ञानं संन्यास-लक्षणम्' इति च। इह अपि च अन्ते उक्तम् अर्जुनाय - 'सर्व-धर्मान् परित्यज्य माम् एकं शरणं व्रज' इति। अभ्युदय-अर्थः अपि यः प्रवृत्ति-लक्षणः धर्मः वर्ण-आश्रमान् च उद्दिश्य विहितः स च देवादि-स्थान-प्राप्ति-हेतुः अपि सन् ईश्वर-अर्पण-बुद्ध्या अनुष्ठीयमानः सत्त्व-शुद्धये भवति फल-अभिसन्धि-वर्जितः, शुद्ध-सत्त्वस्य च ज्ञान-निष्ठा-योग्यता-प्राप्ति-द्वारेण ज्ञान-

उत्पत्ति-हेतुत्वेन च निःश्रेयस-हेतुत्वमपि प्रतिपद्यते। यथा च इमम् अर्थम् अभिसंधाय वक्ष्यति - 'ब्रह्मणि आधाय कर्माणि यतचित्ताः जितेन्द्रियाः। योगिनः कर्म कुर्वन्ति संङ्गं त्यक्त्वा आत्मशुद्धये।।' इमं द्विप्रकारं धर्मं निःश्रेयस-प्रयोजनं परमार्थतत्त्वं च वासुदेवाख्यं परब्रह्म-अभिधेयभूतं विशेषतः अभिव्यञ्जयद् विशिष्ट-प्रयोजन-संबन्ध-अभिधेयवद्-गीताशास्त्रं यतः

तदर्ध-विज्ञानेन समस्त-पुरुषार्थ-सिद्धिः अतः तद् विवरणे यत्नः क्रियते मया।

समाप्ता इयं श्रीमत् शांकर-भाष्य-उपक्रमणिका।

द्वितीयोऽध्यायः

(सांख्ययोगस्य दशमश्लोकपर्यन्तं भाष्यं न वर्तते । एकादशश्लोकादारभ्य विलिख्यतेऽत्र)

'दृष्ट्वा तु पाण्डवानीकम्' इति आरभ्य 'न योत्स्य इति गोविन्दम् उक्त्वा तूष्णीं बभूव ह' इति एतद् अन्तः प्राणिनां शोक-मोहादि-संसार-बीजभूत-दोषोद्भव-कारण-प्रदर्शनार्थत्वेन व्याख्येयः ग्रन्थः, तथा हि अर्जुनेन राज्य-गुरु-पुत्र-मित्र-सुहृत्-स्वजन-संबन्धि-बान्धवेषु अहम् एषां मम एते इति एवं प्रत्यय-निमित्त-स्नेह-विच्छेदादि-निमित्तौ आत्मनः शोक-मोहौ प्रदर्शितौ 'कथं भीष्मम् अहं संख्ये' इति आदिना। शोक-मोहाभ्यां हि अभिभूत-विवेक-विज्ञानः स्वतः एव क्षात्रधर्मे युद्धे प्रवृत्तः अपि तस्माद् युद्धाद् उपरराम। परधर्मं च भिक्षा-जीवनादिकं कर्तुं प्रववृते। तथा च सर्व-प्राणिनां शोक-मोहादि-दोष-अविष्ट-चेतसां स्वभावतः एव स्वधर्म-परित्यागः प्रतिषिद्धसेवा च स्यात्। स्वधर्मे प्रवृत्तानाम् अपि तेषां वाङ्-मनः-कायादीनां प्रवृत्तिः फल-अभिसन्धिपूर्विका एव स-अहंकारा च भवति। तत्र एवं सति धर्म-अधर्म-उपचयाद् इष्ट-अनिष्ट-जन्म-सुख-दुःख-असंप्राप्ति-लक्षणः संसार अनुपरतः भवति इत्यतः संसार-बीजभूतौ शोक-मोहौ तयोः च सर्व-कर्म-सन्यास-पूर्वकाद्-आत्मज्ञानात् न अन्यतः निवृत्तिः इति। तद् उपदिदिक्षुः सर्व-लोक-अनुग्रहार्थम् अर्जुनं निमित्तीकृत्य आह भगवान् वासुदेवः - अशोच्यान् इति आदि। तत्र केचिद् आहुः, सर्व-कर्म-संन्यास-पूर्वकाद्-आत्मज्ञान-निष्ठा-मात्राद् एव केवलात् कैवल्यं न प्राप्यते एव किं तर्हि अग्निहोत्रादि-श्रौत-स्मार्त-कर्म-सहितात्-ज्ञानात् कैवल्य-प्राप्तिः इति सर्वासु गीतासु निश्चितः अर्थः इति। ज्ञापकं च आहुः अस्य अर्थस्य 'अथ चेत् त्वम् इमं धर्म्यं संग्रामं न करिष्यसि', 'कर्मणि एव अधिकारः ते', 'कुरु कर्म एव तस्मात् त्वम्' इत्यादि। हिंसादि-युक्तत्वाद् वैदिकं कर्म-अधर्माय इति इयम् अपि आशङ्का न कार्या, कथं क्षात्रं कर्म युद्ध-लक्षणं गुरु-भ्रातृ-पुत्रादि-हिंसा-लक्षणम् अत्यन्त-क्रूरतरम् अपि स्वधर्मः इति कृत्वा न अधर्माय, तद् अकरणे च 'ततः स्वधर्मं कीर्तिं च हित्वा पापम् अवाप्स्यसि' इति ब्रुवता यावत् जीवादि-श्रुति-चोदितानां स्वकर्मणां पश्वादि-हिंसा-लक्षणानां च कर्मणां प्रागेव न अधर्मत्वम् इति सुनिश्चितम् उक्तं भवति इति। तद् असत्, ज्ञान-कर्म-निष्ठयोः विभाग-वचनाद् बुद्धिद्वयाश्रययोः अशोच्यान् इति आदिना भगवता यावत् 'स्वधर्मम् अपि च अवेक्ष्य' इति एतद् अन्तेन ग्रन्थेन यत् परमार्थात् मतत्व-निरूपणं कृतं तत् सांख्यं तद् विषया बुद्धिः आत्मनः जन्मादि-षड्विक्रियाभावाद् अकर्तात्मा इति प्रकरणार्थ-निरूपणाद् या जायते सा सांख्य-बुद्धिः, सा येषां ज्ञानिनाम् उचिता भवति ते सांखायाः, एतस्याः बुद्धेः जन्मनः प्राग् आत्मनः देहादि-व्यतिरिक्तत्व-कर्तृत्वादि अपेक्षः

धर्म-अधर्म-विवेक-पूर्वकः मोक्ष-साधना-अनुष्ठान-निरूपण-लक्षणः योगः, तद् विषया बुद्धिः योग-बुद्धिः, सा येषां कर्मिणाम् उचिता भवति ते योगिनः। तथा च भगवता विभक्ते द्वे बुद्धी निर्दिष्टे 'एषा ते अभिहिता सांख्ये बुद्धिः योगे तु इमां श्रुणु' इति। तयोः च सांख्य-बुद्धयाश्रयां ज्ञान-योगेन निष्ठां सांख्यानां विभक्तां वक्षयति 'पुरा वेदात्मना मया प्रोक्ता' इति, तथाच योग-बुद्धयाश्रयां कर्म-योगेन निष्ठां विभक्तां च वक्ष्यति 'कर्म-योगेन योगिनाम्' इति, एवं सांख्य-बुद्धिं योग-बुद्धिं च आश्रित्य द्वे निष्ठे विभक्ते भगवता एव उक्ते ज्ञान-कर्मणोः कर्तृत्व-अकर्तृत्व-एकत्व-अनेकत्व-बुद्धयाश्रययोः एक-पुरुष-आश्रयत्व-असंभवं पश्यता। यथा एतद् विभाग-वचनं तथा एव दर्शितं शातपथीये ब्राह्मणे 'एतम् एव प्रव्राजिनः लोकम् इच्छन्तः ब्राह्मणाः प्रव्रजन्ति' इति सर्व-कर्म-सन्यासं विधाय तत् शेषेण 'किं प्रजया करिष्यामः येषां नः अयम् आत्मा

अयं लोकः' इति। तत्र एव च 'प्राग् दार-परिग्रहात् पुरुषः आत्मा प्राकृतः धर्म-जिज्ञासा-उत्तरकालं

लोकत्रय-साधनं पुत्रं, द्विप्रकारं च वित्तं मानुषं दैवं च, तत्र मानुषं वित्तं कर्मरूपं पितृलोक-प्राप्ति-साधनं, विद्यां च दैवं वित्तं देवलोक-प्राप्ति-साधनं, 'सः अकामयत' इति अविद्या-कामवतः एव सर्वाणि कर्माणि श्रौतादीनि दर्शितानि, 'तेभ्यः व्युत्थाय प्रव्रजन्ति' इति व्युत्थानम् आत्मानम् एव लोकम् इच्छतः अकामस्य विहितम्। तद् एतद् विभाग-वचनम् अनुपपन्नं स्यात् यदि श्रौत-कर्म-ज्ञानयोः समुच्चयः अभिप्रेतः स्याद् भगवतः। न च अर्जुनस्य प्रश्नः उपपन्नः भवति 'ज्यायसी चेत् कर्मणः ते' इति आदिः, एक-पुरुष-अनुष्ठेयत्व-असंभवं बुद्धि-कर्मणोः भगवता पूर्वम् अनुक्तं कथम् अर्जुनः अश्रुतं बुद्धेः च कर्मणः ज्यायः त्वं भगवति अध्यारोपयेत् मृषा एव ज्यायसी चेत् कर्मणः ते मता बुद्धिः इति, किं च यदि बुद्धिकर्मणोः सर्वेषां समुच्चयः उक्तः स्यात् अर्जुनस्य अपि स उक्तः एव इति 'यत् श्रेयः एतयोः एकं तत् मे ब्रूहि सुनिश्चितम्' इति कथम् उभयोः उपदेशे सति अन्यतर-विषयः एव प्रश्नः स्यात्, न हि पित्त-प्रशमार्थिनः वैद्येन

मधुरं शीतलं च भोक्तव्यम् इत्युपदिष्टे तयोः अन्यतरत् पित्त-प्रशमन-कारणं ब्रूहि इति प्रश्नो भवति। अथ अर्जुनस्य भगवद् उक्त-वचन-अर्थ-विवेक-अनवधारण-निमित्तः प्रश्नः कल्प्येत, तथा अपि भगवता प्रश्न-अनुरूपं प्रतिवचनं देयं, मया बुद्धि-कर्मणोः समुच्चयः उक्तः किमर्थम् इत्थं त्वं भ्रान्तः असि इति, न तु पुनः प्रतिवचनम् अननुरूपं, पृष्टाद् अन्यदेव द्वे निष्ठे मया पुरा प्रोक्ते इति वक्तुं युक्तम्। न अपि स्मार्तेन एव कर्मणा बुद्धेः समुच्चये अभिप्रेते विभाग-वचनादि सर्वम् उपपन्नम्, किं च क्षत्रियस्य युद्धं स्मार्तं कर्म स्वधर्मम् इति जानतः 'तत् किं कर्मणि घोरे मां नियोजयसि' इति उपालम्भः अनुपपन्नः, तस्माद् गीताशास्त्रः ईषत्-मात्रेण अपि श्रौतेन स्मार्तेन वा कर्मणा आत्म-ज्ञानस्य समुच्चयः न केनचित् दर्शयितुं शक्यः। यस्य तु अज्ञानाद् रागादि-दोषतः वा कर्मणि प्रवृत्तस्य यज्ञेन दानेन तपसा वा विशुद्ध-सत्त्वस्य ज्ञानम् उत्पन्नं परमार्थ-तत्त्व-विषयम् एकमेव इदं सर्वं ब्रह्म-अकर्तृ च इति, तस्य कर्मणि कर्म-प्रयोजने च निवृत्ते अपि लोक-संग्रहार्थं यत्न-पूर्वं यथा प्रवृत्तिस्तथैव कर्मणि प्रवृत्तस्य यत्प्रवृत्तिरूपं दृश्यते न तत्कर्म येन बुद्धेः समुच्चयः स्यात्, यथा भगवतो वासुदेवस्य क्षात्रकर्म चेष्टितं न ज्ञानेन समुच्चीयते पुरुषार्थसिद्धये तद्वत्तत्फलाभिसन्ध्यहंकाराभावस्य तुल्यत्वाद्विदुषः। तत्त्ववित्तु नाहं करोमीति मन्यते न च तत्फलमभिसन्धत्ते, यथा च स्वर्गादिकामार्थिनोऽग्निहोत्रादिकामसाधनानुष्ठानायाहिताग्नेः काम्य एवाग्निहोत्रादौ प्रवृत्तस्य सामिकृते विनष्टेऽपि कामे तदेवाग्निहोत्राद्यनुतिष्ठतोऽपि न

तत्काम्यमग्निहोत्रादि भवति, तथाच दर्शयति भगवान् 'कुर्वन्नपि न करोति न लिप्यते' इति तत्र तत्र। यच्च 'पूर्वैः पूर्वतरं कृतं', 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इति तत्तु प्रविभज्य विज्ञेयम्, तत्कथम्, यदि तावत्पूर्वे जनकादयस्तत्त्वविदोऽपि प्रवृत्तकर्मणः स्युस्ते लोकसंग्रहार्थं 'गुणा गुणेषु वर्तन्ते' इति ज्ञानेनैव संसिद्धिमास्थिताः, कर्मसंन्यासे प्राप्तेऽपि कर्मणा सहैव संसिद्धिमास्थिता न कर्मसंन्यासं कृतवन्त इत्येषोऽर्थः। अथ न ते तत्त्वविद ईश्वरसमर्पितेन कर्मणा साधनभूतेन संसिद्धिं सत्त्वशुद्धिं ज्ञानोत्पत्तिलक्षणां वा संसिद्धिमास्थिता जनकादय इति व्याख्येयम्। एतमेवार्थं वक्ष्यति भगवान्सत्त्वशुद्धये कर्म कुर्वन्तीति, 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इत्युक्त्वा सिद्धिं प्राप्तस्य च पुनर्ज्ञाननिष्ठां वक्ष्यति 'सिद्धिं प्राप्तो यथा ब्रह्म' इत्यादिना। तस्माद्गीतासु केवलादेव तत्त्वज्ञानान्मोक्षप्राप्तिः न कर्मसमुच्चितादिति निश्चितोऽर्थः। यथा

चायमर्थस्तथा प्रकरणशो विभज्य तत्र तत्र दर्शयिष्यामः। तत्रैवं धर्मसंमूढचेतसो महति शोकसागरे निमग्नस्यार्जुनस्यान्यत्रात्मज्ञानादुद्धरणमपश्यन् भगवान्वासुदेवस्ततोऽर्जुनमुद्दिधारयिषुरात्मज्ञानायावतारयन्नाह - अशोच्यानित्यादि। न शोच्या अशोच्या भीष्मद्रोणादयः सद्वृत्तत्वात्परमार्थरूपेण च नित्यत्वात्,

तानशोच्यानन्वशोचोऽनुशोचितवानसि ते म्रियन्ते मन्निमित्तमहं तैर्विनाभूतः किं करिष्यामि राज्यसुखादिनेति। त्वं प्रज्ञावतां बुद्धिमतां वादांश्च वचनानि च भाषसे। तदेतन्मौढ्यं पाण्डित्यं च विरुद्धमात्मनि दर्शयस्युन्मत्त इवेत्यभिप्रायः। यस्माद्गतासून्गतप्राणान्मृतान् अगतासूनगतप्राणाञ्जीवतश्च नानुशोचन्ति पण्डिता आत्मज्ञाः। पण्डात्मविषया बुद्धिर्येषां ते हि पण्डिताः। 'पाण्डित्यं निर्विद्य' इति श्रुतेः। परमार्थतस्तु नित्यानशोच्याननुशोचस्यतो मूढोऽसीत्यभिप्रायः।।२.११।।

कुतस्ते शोच्या यतो नित्याः। कथं न त्वेव जातु कदाचिदहं च नासं किं त्वासमेवातीतेषु देहोत्पत्तिविनाशेषु देहोत्पत्तिविनाशेषु नित्य एवाहमासमित्यभिप्रायः। तथा न त्वं नासीः किं त्वासीरेव, तथा च नेमे जनाधिपा नासन्किं त्वासन्नेव, तथा न चैव न भविष्यामः किंतु भविष्याम एव च। सर्वे वयमतोऽस्माद्देहविनाशात्परमुत्तरकालेऽपि त्रिष्वपि कालेषु नित्या आत्मस्वरूपेणेत्यर्थः। देहभेदानुवृत्त्या बहुवचनं नात्मभेदाभिप्रायेण।।२.१२।।

तत्र कथमिव नित्य आत्मेति दृष्टान्तमाह- देहिन इति। देहोऽस्यास्तीति देही तस्य देहिनो देहवदात्मनोऽस्मिन्वर्तमाने देहे यथा येन प्रकारेण कौमारं कुमारभावो बाल्यावस्था, यौवनं यूनो भावो मध्यावस्था, जरा वयोहानिर्जीर्णावस्थेत्येतास्तिस्रोऽवस्था अन्योन्यविलक्षणास्तासां प्रथमावस्थानाशे न नाशो द्वितीयतृतीयावस्थाप्राप्तिरात्मनो दृष्टा यथा, तथा तद्वदेव देहादन्यो देहान्तरं तस्य प्राप्तिर्देहान्तरप्राप्तिरविक्रियस्यैवात्मन इत्यर्थः। धीरो धीमांस्तत्रैवं सति न मुह्यति न मोहमापद्यते।।२.१३।।

यद्यप्यात्मविनाशनिमित्तो मोहो न संभवति नित्य आत्मेति विजानतस्तथापि शीतोष्णसुखदुःखप्राप्तिनिमित्तो मोहो लौकिको दृश्यते। सुखवियोगनिमित्तो मोहो दुःखसंयोगादिनिमित्तश्च शोक इत्येतदर्जुनस्य

वचनमाशङ्कयाह- मात्रास्पर्शा इति। मात्रा आभिर्मीयन्ते शब्दादय इति श्रोत्रादीनीन्द्रियाणि, मात्राणां स्पर्शाः शब्दादिभिः संयोगास्ते शीतोष्णसुखदुःखदाः शीतमुष्णं सुखं च प्रयच्छन्तीति।

अथवा स्पृश्यन्ते इति स्पर्शा विषयाः शब्दादयः, मात्राश्च स्पर्शाश्च शीतोष्णसुखदुःखदाः शीतं कदाचित् सुखं कदाचिद्दुःखं तथोष्णमप्यनियतस्वरूपं सुखदुःख पुनर्नियतरूपे यतो न व्यभिचरतोऽतस्ताभ्यां पृथक् शीतोष्णयोर्ग्रहणम्।यस्मात्ते मात्रास्पर्शादयः आगमापायिन आगमापायशीलास्तस्मादनित्या उत्पत्तिविलयरूपत्वात्। अतस्ताञ्शीतोष्णादींस्तितिक्षस्व प्रसहस्व। तेषु हर्षविषादं मा कार्षीरित्यर्थः।।२.१४।।

शीतोष्णादीन्सहतः किं स्यादिति श्रृणु- यं हीति। यं हि पुरुषं समदुःखसुखं समे दुःखसुखे यस्य तं समदुःखसुखं सुखदुःखप्राप्तौ हर्षविषादरहितं धीरं धीमन्तं न व्यथयन्ति न चालयन्ति नित्यात्मदर्शनादेते यथोक्ताः शीतोष्णादयः स नित्यानित्यस्वरूपदर्शननिष्ठो द्वन्द्वसहिष्णुरमृतत्वायामृतभावाय मोक्षायेत्यर्थः। कल्पते समर्थो भवति।।२.१५।।

इतश्च शोकमोहावकृत्वा शीतोष्णादिसहनं युक्तं यस्मात् नासत इति। नासतोऽविद्यमानस्य शीतोष्णादेः सकारणस्य न विद्यते नास्ति भावो भवनमस्तिता, नहि शीतोष्णादि सकारणं प्रमाणैर्निरूप्यमाणं वस्तु सद्भवति, विकारो हि सः, विकारश्च व्यभिचरति, यथा घटादिसंस्थानं चक्षुषा निरूप्यमाणं मृद्व्यतिरेकेणानुपलब्धेरसत्तथा सर्वो विकारः कारणव्यतिरेकेणानुपलब्धेरसज्जन्मप्रध्वंसाभ्यां प्रागूर्ध्वं चानुपलब्धेः, कार्यस्य घटादेर्मृदादिकारणस्य तत्कारणस्य च तत्कारणव्यतिरेकेणानुपलब्धेरसत्त्वं, तदसत्त्वे सर्वाभावप्रसङ्ग इति चेन्न। सर्वत्र बुद्धिद्वयोपलब्धेः सद्बुद्धिरसद्बुद्धिरिति यद्विषया बुद्धिर्न व्यभिचरति

तत्सत् यद्विषया व्यभिचरति तदसत् इति सदसद्विभागे बुद्धितन्त्रे स्थिते, सर्वत्र द्वे बुद्धी सर्वैरुपलभ्येते समानाधिकरणे न नीलोत्पलवत् सन् घटः सन् पटः सन् हस्तीत्येवं सर्वत्र।
तयोर्बुद्ध्योर्घटादिबुद्धिर्व्यभिचरति, तथा च दर्शितं, न तु सद्बुद्धिस्तस्माद्घटादिबुद्धिविषयोऽसन्, व्यभिचारात्, न तु सद्बुद्धिविषयोऽव्यभिचारात्। घटे विनष्टे घटबुद्धौ व्यभिचरन्त्यां सद्बुद्धिरपि व्यभिचरतीति चेत् न, पटादावपि सद्बुद्धिवद्घटबुद्धिरपि घटान्तरे दृश्यत इति चेन्न। पटादावदर्शनात्। सद्बुद्धिरपि नष्टे घटे न दृश्यत इति चेन्न, विशेष्याभावात् सद्बुद्धिर्विशेषणविषया सती विशेष्याभावे विशेषणानुपपत्तौ किंविषया स्यात्। ननु पुनः सद्बुद्धेर्विषयाभावादेकाधिकरणत्वं घटादिविशेष्याभावे न युक्तमिति चेन्न, सदिदमुदकमिति मरीच्यादावन्यतराभावेऽपि सामानाधिकरण्यदर्शनात्। तस्माद्देहादेर्द्वन्द्वस्य च सकारणस्यासतो न विद्यते भाव इति। तथा सतश्चात्मनोऽभावोऽविद्यमानता न विद्यते सर्वत्राव्यभिचारादित्यवोचाम, एवमात्मानात्मनोः सदसतोरुभयोरपि दृष्ट उपलब्धोऽन्तो निर्णयःसत्सदेवाऽसदसदेवेति त्वनयोर्यथोक्तयोस्तत्त्वदर्शिभिः, तदिति सर्वनाम सर्वं च ब्रह्म तस्य नाम तदिति तद्भावस्तत्त्वं ब्रह्मणो याथात्म्यं तद्द्रष्टुं शीलं येषां ते तत्त्वदर्शिनस्तैस्तत्त्वमपि तत्त्वदर्शिनां दृष्टिमाश्रित्य शोकं मोहं च हित्वा शीतोष्णादीनि नियतानियतरूपाणि द्वन्द्वानि विकारोऽयमसन्नेव मरीचिजलवन्मिथ्यावभासत इति मनसि निश्चित्य तितिक्षस्वेत्यभिप्रायः।।२.१६।।

किं पुनस्तत्सत् यत् सदेव सर्वदैवास्तीत्युच्यते-अविनाशीति। अविनाशि न विनष्टुं शीलमस्येति। तुशब्दः सतो विशेषणार्थः। तद्विद्धि विजानीहि। किं येन सर्वमिदं जगत्ततं व्याप्तं सदाख्येन ब्रह्मणा साकाशमाकाशेनेव घटादयः विनाशमदर्शनमभावमव्ययस्य न व्येत्युपचयापचयौ न यातीत्यव्ययं तस्याव्ययस्य नैतत् सदाख्यं ब्रह्म स्वेन रूपेण व्येति व्यभिचरति निरवयवत्वाद्देहादिवत्, नाप्यात्मीयेनात्मीयाभावाद् यथा देवदत्तो धनहान्या व्येति न त्वेवं ब्रह्म व्येति,

अतोऽव्ययस्यास्य ब्रह्मणो विनाशं न कश्चित्कर्तुमर्हति न कश्चिदात्मानं विनाशयितुं शक्नोतीश्वरोऽपि। आत्मा हि ब्रह्म स्वात्मनि च क्रियाविरोधात्।।२.१७।।

किं पुनस्तदसद् यत् स्वात्मसत्तां व्यभिचरतीत्युच्यते- अन्तवन्त इति। अन्तो विनाशो विद्यते येषां तेऽन्तवन्तो यथा मृगतृष्णिकोदकादौ सद्बुद्धिरनुवृत्ता प्रमाणनिरूपणान्ते विच्छिद्यते स तस्या अन्तस्तथेमे देहाः। स्वप्नमायादेहादिवच्चान्तवन्तो नित्यस्य शरीरिणः शरीरवतोऽनाशिनोऽप्रमेयस्यात्मनोऽन्तवन्त इत्युक्ता विवेकिभिरित्यर्थः। नित्यस्यानाशिन इति न पुनरुक्तं, नित्यत्वस्य द्विविधत्वाल्लोके नाशस्य च यथा देहो भस्मीभूतोऽदर्शनं गतो नष्ट उच्यते विद्यमानोऽप्यन्यथा परिणतो व्याध्यादियुक्तो जातो नष्ट उच्यते तत्रानाशिनो नित्यस्येति द्विविधेनापि नाशेनासंबन्धोऽस्येत्यर्थः। अन्यथा पृथिव्यादिवदपि नित्यत्वं स्यादात्मनस्तन्माभूदिति

नित्यस्यानाशिन इत्याह। अप्रमेयस्य न प्रमेयस्य। प्रत्यक्षादिप्रमाणैरपरिच्छेद्यस्येत्यर्थः। नन्वागमेनात्मा परिच्छिद्यते प्रत्यक्षादिना च पूर्वम्। न, आत्मनः स्वतः सिद्धत्वात्। सिद्धे ह्यात्मनि प्रमातरि प्रमित्सोः प्रमाणान्वेषणा भवति। नहि पूर्वमित्थमहमित्यात्मानमप्रमाय पश्चात्प्रमेयपरिच्छेदाय प्रवर्तते। नह्यात्मा नाम कस्यचिदप्रसिद्धो भवति। शास्त्रं त्वन्त्यं प्रमाणमतद्धर्माध्यारोपणमात्रनिवर्तकत्वेन प्रमाणत्वमात्मनि प्रतिपद्यते नत्वज्ञापकत्वेन। तथाच श्रुतिः-'यत्साक्षादपरोक्षाछ्रह्म य आत्मा सर्वान्तरः' इति। यस्मादेवं नित्योऽविक्रियश्चात्मा तस्माद् युध्यस्व। युद्धादुपरमं मा कार्षीरित्यर्थः। नह्यत्र युद्धकर्तव्यता विधीयते, युद्धे प्रवृत्त एव ह्यसौ शोकमोहप्रतिबद्धस्तूष्णीमास्ते,अतस्तस्य कर्तव्यप्रतिबन्धापनयनमात्रं भगवता क्रियते।

तस्माद्युध्यस्वेत्यनुवादमात्रं न विधिः।।२.१८।।

शोकमोहादिसंसारकारणनिवृत्त्यर्थं गीताशास्त्रं न प्रवर्तकमित्येतस्यार्थस्य साक्षिभूते ऋचावानिनाय भगवान्। यत्तु मन्यसे युद्धे भीष्मादयो मया हन्यन्ते अहमेव तेषां हन्तेत्येषा बुद्धिर्मृषैव ते, कथं-य एनमिति। य एनं प्रकृतं देहिनं वेत्ति जानाति हन्तारं हननक्रियायाः कर्तारं, यश्चैनमन्यो मन्यते हतं देहहनने हतोऽहमिति हननक्रियायाः कर्मभूतं, तावुभौ न विजानीतो न ज्ञातवन्तावविवेकेनात्मानमहंप्रत्ययविषयं हन्ताहं हतोऽस्म्यहमिति देहहननेनात्मानमहं प्रत्ययविषयं यौ विजानितस्तावात्मस्वरूपानभिज्ञावित्यर्थः। यस्मान्नायमात्मा हन्ति न हननक्रियायाः कर्ता भवति, न हन्यते न च कर्म भवतीत्यर्थः, अविक्रियत्वात्।।२.१९।।

कथमविक्रिय आत्मेति द्वितीयो मन्त्रः। न जायते नोत्पद्यते, जनिलक्षणा वस्तुविक्रिया नात्मनो विद्यत इत्यर्थः। तथा न म्रियते वा। वाशब्दश्चार्थे। न म्रियते चेत्यन्त्या विनाशलक्षणा विक्रिया प्रतिषिध्यते। कदाचिच्छब्दः सर्वविक्रियाप्रतिषेधैः संबध्यते न कदाचिज्जायते न कदाचिन्म्रियत इत्येवं यस्मादयमात्माभूत्वा भवनक्रियामनुभूयपश्चादभविता अभावं गन्ता न भूयः पुनस्तस्मान्न म्रियते, यो हि भूत्वा न भविता स म्रियत इत्युच्यते लोके, वाशब्दान्नशब्दाच्चायमात्माऽभूत्वा भविता वा देहवन्न भूयः पुनस्तस्मान्न जायते, यो ह्यभूत्वा भविता स जायत इत्युच्यते नैवमात्माऽतो न जायते। यस्मादेवं तस्मादजो यस्मान्न म्रियते तस्मान्नित्यश्च। यद्यप्याद्यन्तयोर्विक्रिययोः प्रतिषेधे सर्वा विक्रियाः प्रतिषिद्धा भवन्ति तथापि मध्यभाविनीनां विक्रियाणां स्वशब्दैरेव तदर्थैः प्रतिषेधः कर्तव्य इत्यनुक्तानामपि यौवनादिसमस्तविक्रीयाणां प्रतिषेधो यथा स्यादित्याह-शाश्वत इत्यादिना। शाश्वत इत्यपक्षयलक्षणा विक्रिया प्रतिषिध्यते। शाश्वद्भवः

शाश्वतः। नापक्षीयते स्वरूपेण। निरवयवत्वान्निर्गुणत्वाच्च। नापि गुणक्षयेणापक्षयः। अपक्षयविपरीतापि वृद्धिलक्षणा विक्रिया प्रतिषिध्यते पुराण इति। यो ह्यवयवागमेनोपचीयते स वर्धतेऽभिनव इति चोच्यते। अयं त्वात्मा निरवयवत्वान्निर्गुणत्वाच्च। नापि गुणक्षयेणापक्षयः। अपक्षयविपरीतापि वृद्धिलक्षणा विक्रिया प्रतिषिध्यते पुराण इति। यो ह्यवयवागमेनोपचीयते स वर्धतेऽभिनव इति चोच्यते। अयं त्वात्मा निरयवत्वात्पुरापि नव एवेति पुराणो न वर्धत इत्यर्थः। तथा न हन्यते न विपरिणम्यमानेऽपि शरीरे। हन्तिरत्र विपरिणामार्थो द्रष्टव्योऽपुनरुक्तताये न विपरिणम्यत इत्यर्थः। अस्मिन्मन्त्रे षड्भावविकारा लौकिकवस्तुविक्रियारहित आत्मेति वाक्यार्थः। यस्मादेवं तस्मादुभौ तौ न विजानीत इति पूर्वेण मन्त्रेणास्य संबन्धः।।२.२०।।

'य एनं वेत्ति हन्तारम्' इत्यनेन मन्त्रेण हननक्रियायाः कर्ता कर्म च न भवतीति प्रतिज्ञाय

'न जायत' इत्यनेनाविक्रियत्वे हेतुमुक्त्वा प्रतिज्ञातार्थमुपसंहरति-वेदाविनाशिनमिति। वेद विजानात्यविनाशिनमन्त्यभावविकाररहितं नित्यं विपरिणामरहितं यो वेदेति संम्बन्धः। एनं पूर्वेण मन्त्रेणोक्तलक्षणमजं जन्मरहितमव्ययमपक्षयरहितं कथं केन प्रकारेण स विद्वान् पुरुषोऽधिकृतो हन्ति हननक्रियां करोति, कथं वा घातयति हन्तारं प्रयोजयति, न कथंचित्कंचिद्धन्ति न कथंचित्कंचिद्घातयतीत्युभयत्राक्षेप एवार्थः। प्रश्नार्थसंभवात् हेत्वर्थस्याविक्रियत्वस्य च तुल्यत्वाद्विदुषः सर्वकर्मप्रतिषेध एव प्रतिकरणार्थोऽभिप्रेतो भगवतः। हन्तेस्त्वाक्षेप उदाहरणार्थत्वेन कथितः, विदुषः कं कर्मासंभवे हेतुविशेषं पश्यन्कर्माण्याक्षिपति भगवान्-कथं स पुरुष इति। ननुक्तमेवात्मनोऽविक्रियत्वं सर्वकर्मासंभवहेतुः कारणविशेषः सत्यमुक्तो नतु स कारणविशेषोऽन्यत्वाद्विदुषोऽविक्रियत्वादात्मन इति। नह्यविक्रियं स्थाणुं विदितवतः कर्म न संभवतीति चेन्न। विदुष आत्मत्वात्, न देहादिसंघातस्य विद्वित्ता,

अतः पारिशेष्यादसंहत आत्मा विद्विनविक्रिय इति तस्य विदुषः

कर्मसंभवादाक्षेपो

युक्तः-कथं स पुरुष इति। यथा बुद्ध्याद्याहृतस्य शब्दार्थस्याविक्रिय एव सन्बुद्धिवृत्त्यविवेकविज्ञानेनाविद्ययोपलब्धात्मा कल्पते एवमेवात्मानात्मविवेकज्ञानेन बुद्धिवृत्त्या विद्ययाऽसत्यरूपयैव परमार्थतोऽविक्रिय एवात्मा विद्वानुच्यते। विदुषः कर्मासंभववचनाद् यानि कर्माणि शास्त्रेण विधीयन्ते तान्यविदुषो विहितानीति भगवतो निश्चयोऽवगम्यते। ननु विद्याप्यविदुष एव विधीयते विदितविद्यस्य पिष्टपेषणवद्विद्याविधानानर्थक्यात्, तत्राविदुषः कर्माणि विधीयन्ते न विदुष इति विशेषो नोपपद्यते। न। अनुष्ठेयस्य भावाभावविशेषोपपत्तेः।
अग्निहोत्रादिविध्यर्थज्ञानोत्तरकालमग्निहोत्रादिकर्मानेकसाधनोपसंहारपूर्वकमनुष्ठेयं कर्ताहं मम कर्तव्यमित्येवंप्रकारकविज्ञानवतोऽविदुषो यथानुष्ठेयं भवति नतु तथा न जायत इत्याद्यात्मस्वरूपविध्यर्थज्ञानोत्तरकालभावि किंचिदनुष्ठेयं भवति। किंतु नाहं कर्ता न भोक्तेत्याद्यात्मैकत्वाकर्तृत्वादिविषयज्ञानादन्यन्नोत्पद्यत इत्येष विशेष उपपद्यते। यः पुनः कर्ताहमिति वेत्तयात्मानं तस्य ममेदं कर्तव्यमित्यवश्यंभाविनी बुद्धिः स्यात्तदपेक्षया सोऽधिक्रियत इति तं प्रति कर्माणि संभवन्ति। स चाविद्वान् 'उभौ तौ न विजानीतः' इति वचनाद् विशेषितस्य च विदुषः कर्माक्षेपवचनात् 'कथं स पुरुषः' इति। तस्माद्विशेषितस्याविक्रियात्मदर्शिनो विदुषो मुमुक्षोश्च सर्वकर्मसंन्यास एवाधिकारः। अतएव भगवान्नारायणः सांख्यान्विदुषोऽविदुषश्च कर्मिणः प्रविभज्य द्वे

निष्ठे ग्राहयति 'ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्' इति। तथाच पित्रायाह भगवान्व्यासो 'द्वाविमावथ पन्थानौ' इत्यादि। तथाच क्रियापथश्चैव पुरस्तात्पश्चात्संन्यासश्चेत्येतमेव विभागं पुनः पुनर्दर्शयिष्यति भगवान्। अतत्त्वविदहंकारविमूढात्मा कर्ताहमिति मन्यते, तत्त्ववित्तु नाहं करोमिति। तथाच सर्वकर्माणि मनसा संन्यस्यास्त इत्यादि। तत्र केचित्पण्डितंमन्या वदन्ति।
जन्मादिषड्भावविक्रियारहितोऽविक्रियोऽकर्तैकोऽहमात्मेति न कस्यचिज्ज्ञानमुत्पद्यते यस्मिन्सति सर्वकर्मसंन्यास उपदिश्यते। तन्न। न जायत इत्यादिशास्त्रोपदेशानर्थक्यप्रसङ्गात्। यथाच शास्त्रात्तस्यैवात्मनोऽविक्रियत्वाकर्तृत्वैकत्वादिविज्ञानं कस्मान्नोपपद्यत इति प्रष्टव्यास्ते करणागोचरत्वादिति चेन्न। 'मनसैवानुद्रष्टव्यम्' इति श्रुतेः। शास्त्राचार्योपदेशजनितशमदमदमादिसंस्कृतं मन आत्मदर्शने करणम्। तथाच तदधिगमायानुमान

आगमे च सति ज्ञानं नोत्पद्यत इति साहसमात्रमेतत्। ज्ञानं चोत्पद्यमानं तद्विपरितमज्ञानमवश्यं बाधत इत्यभ्युपगन्तव्यम्, तच्चाज्ञानं दर्शितं हन्ताहं हतोऽस्मीत्युभौ तौ न विजानीत इति, अत्र चात्मनो हननक्रियायाः कर्तृत्वं, कर्मत्वं हेतुकर्तृत्वं चाज्ञानकृतं दर्शितम्। तच्च सर्वक्रियास्वपि समानं कर्तृत्वादेरविद्याकृतत्वमविक्रियत्वादात्मनः। विक्रियावान्हिकर्तात्मनः कर्मभूतमन्यं प्रयोजयति कुर्विति। तदेतदविशेषेण विदुषः सर्वक्रियासु कर्तृत्वं हेतुकर्तृत्वं च प्रतिषेधति भगवान् विदुषः कर्माधिकाराभावप्रदर्शनार्थं 'वेदाविनाशिनं', 'कथं स पुरुष'इत्यादिना। क्क पुनर्विदुषोऽधिकार इत्येतदुक्तं पूर्वमेव 'ज्ञानयोगेन सांख्यानाम्' इति। तथाच सर्वकर्मसंन्यासं वक्ष्यति 'सर्वकर्माणि मनसा' इत्यादिना। ननु मनसेति वचनान्न वाचिकानां कायिकानां च संन्यास इति चेन्न, सर्वकर्माणीति विशेषितत्वात्। मानसानामेव सर्वकर्मणामिति चेन्न, मनोव्यापारपूर्वकत्वाद्वाक्कायव्यापाराणां मनोव्यापाराभावे तदनुपपत्तेः। शास्त्रीयाणां वाक्कायकर्मणां कारणानि मानसानि वर्जयित्वान्यानि सर्वकर्माणि मनसा संन्यसेदिति चेन्न। 'नैव कुर्वन्न

कारयन्' इति विशेषणात्। सर्वकर्मसन्यासोऽयं भगवतोक्तो मरिष्यतो न जीवत इति चेन्न। 'नवद्वारे पुरे देह्यास्ते' इति विशेषणानुपपत्तेः। नहि सर्वकर्मसंन्यासेन मृतस्य तद्देहे आसनं संभवति। अकुर्वतोऽकारयतश्च देहे संन्यस्येति संम्बन्धो न देहे आस्त इति चेन्न। सर्वत्रात्मनोऽविक्रियत्वावधारणात्। आसनक्रियायाश्चाधिकरणापेक्षत्वात्तदनपेक्षत्वाच्च संन्यासस्य। संपूर्वस्तु न्यासशब्दस्त्यागार्थो न निक्षेपार्थः। तस्माद्गीताशास्त्रात्मज्ञानवतः संन्यास एवाधिकारो न कर्मणीति तत्रतत्रोपरिष्टादात्मज्ञानप्रकरणे दर्शयिष्यामः।।२१।।

प्रकृतं तु वक्ष्यामः, तत्रात्मनोऽविनाशित्वं प्रतिज्ञातं तत्किमिवेत्युच्यते-वासांसीति। वासांसि वस्त्राणि जीर्णानि दुर्बलतां गतानि यथा लोके विहाय परित्यज्य नवीन्यभिनवानि गृह्णात्युपादत्ते नरः पुरुषोऽपराण्यन्यानि तथा तद्वदेव शरीरागि विहाय जीर्णान्यन्यानि संयाति संगच्छति नवानि देह्यात्मा पुरुशवदविक्रिय एवेत्यर्थः।।२२।।

कस्मादविक्रिय एवेत्याह-नैनं छिन्दन्तीति। एनं प्रकृतं देहिनं न छिन्दन्ति शस्त्राणि निरवयवत्वान्नावयवविभागं कुर्वन्ति शस्त्राण्यस्यादीनि, तथा नैनं दहति पावकोऽग्निरपि न भस्मीकरोति, तथा न चैनं क्लेदयन्त्यापः। अपां हि सावयस्य वस्तुन आर्द्रीभावकरणेनावयवविश्लेषापादने सामर्थ्यं तन्न निरवयव आत्मनि संभवति, तथा स्नेहवद्द्रव्यं स्नेहशोषणेन नाशयति वायुरेनं स्वात्मानं न शोषयति मारुतोऽपि।।२३।।

यत एवं तस्मात्-अच्छेद्योऽयमिति। यस्मादन्योन्यनाशहेतूनि भूतान्येनमात्मानं नाशयितुं नोत्सहन्ते तस्मान्नित्यो नित्यत्वात्सर्वतः सर्वगतत्वात्स्थाणुः, स्थाणुरिव स्थिरः। इत्येतत् स्थिरत्वादचलोऽयमात्माऽतः सनातनश्चिरंतनो न कारणात्कुतश्तिन्निष्पन्नेऽभिनव इत्यर्थः। नैतेषां श्लोकानां पौनरुक्तेयं चोदनीयम्। यत एकेनैव श्लोकेनात्मनो नित्यत्वमविक्रियत्वं चोक्तं 'न जायते म्रियते वा' इत्यादिना। तत्र यदेवात्मविषयं किंचिदुच्यते तदेतस्माच्छ्लोकार्थान्नातिरिच्यते, किंचिच्छब्दतः पुनरुक्तं किंचिदर्थत इति। दुर्बोधत्वादात्मवस्तुनः पुनः पुनः प्रसङ्गमापाद्य शब्दान्तरेण तदेव वस्तु निरूपयति भगवान्वासुदेवः, कथं नु नाम संसारिणामव्यक्तं तत्त्वं बुद्धिगोचरतामापन्नं सत्संसारनिवृत्तये स्यादिति।।२४।।

किंच अव्यक्तोऽयमिति। अव्यक्तः सर्वकरणाविषयत्वान्न व्यज्यते इत्यव्यक्तोऽयमात्मा।

अतएवाचिन्त्योऽयं, यद्धीन्द्रियगोचरं वस्तु तच्चिन्ताविषयत्वमापद्यतेऽयं त्वात्मानिन्द्रियगोचरत्वादचिन्त्योऽतएवाविकार्यः। यथा क्षीरं दध्यातञ्चनादिना विकारि न तथायमात्मा। निरवयवत्वाच्चाविक्रियः, नहि निरवयवं किंचिद्विक्रियात्मकं दृष्टम्। अविक्रियत्वादविकार्योऽयमात्मोच्यते। तस्मादेवं यथोक्तप्रकारेणैनमात्मानं विदित्वा त्वं नानुशोचितुमर्हसि हन्ताहमेषां मयैते हन्यन्ते इति।।२५।।

आत्मनोऽनित्यत्वमभ्युपगम्येदमुच्यते-अथ चैनमिति। अथ चेत्यभ्युपगमार्थः। एनं प्रकृतमात्मानं नित्यजातं लोकप्रसिद्ध्या प्रत्यनेकशरीरोत्पत्तिं जातो इति वा मन्यसे, तथा प्रतितद्विनाशं नित्यं वा मन्यसे मृतं मृतो मृत इति। तथापि तथाभाविन्यप्यात्मनि त्वं महाबाहो, नैवं शोचितुमर्हसि जन्मवतो जन्म नाशवतो नाशश्चेत्येतावश्यंभाविनाविति।।२६।।

तथाच सति-जातस्येति। जातस्य हि लब्धजन्मनो ध्रुवोऽव्यभिचारी मृत्युर्मरणं, ध्रुवं जन्म मृतस्य च तस्मादुरिङार्योऽयं जन्ममरणलक्षणोऽर्थस्तस्मिन्नपरिहार्येऽर्थे न त्वं शोचितुमर्हसि।।२७।।

कार्यकारणसंघातात्मकान्यपि भूतान्युद्दिश्य शोको न युक्तः कर्तुं, यतः-अव्यक्तादीनीति। अव्यक्तादीन्यव्यक्तमदर्शनमनुपलब्धिरादिर्येषां भूतानां पुत्रमित्रादिकार्यकारणसंघातात्मकानां तान्यव्यक्तादीनि भूतानि प्रागुत्पत्तेः इत्पन्नानि च प्राङ्नरणाह्यक्तमध्यान्यव्यक्तनिधनान्येव पुनरव्यक्तमदर्शनं निधनं मरणं येषां तान्यव्यक्तनिधनानि मरणादूर्ध्वमव्यक्ततामेव प्रतिपद्यन्त इत्यर्थः। तथाचोक्तम्-'अदर्शनादापतितः पुनश्चादर्शनं गतः। नासौ तव न तस्य त्वं वृथा का परिदेवना।।' इति। तत्र का परिदेवना को वा प्रलापोऽदृष्टदृष्टभ्रान्तिभूतेषु भूतेष्वित्यर्थः।।२८।।

दुर्विज्ञेयोऽयं प्रकृत आत्मा किं त्वामेवैकमुपालभे साधारणे भ्रान्तिनिमित्ते, कथं दुर्विज्ञेयोऽयमात्मेत्यत आह-आश्चर्यवदिति। आश्चर्यवदाश्चर्यमदृष्टपूर्वमद्भुतमकस्माद्दृश्यमानं तेन तुल्यमाश्चर्यमिवैनमात्मानं पश्यति, कश्चिदाश्चर्यवदेनं वदिति, तथैव चान्य आश्चर्यवच्चैनमन्यः श्रृणोति, श्रुत्वा दृष्ट्वोक्त्वाप्येनं वेद नचैव कश्चित्। अथवा योऽयमात्मानं पश्यति स आश्चर्यतुल्यो यो वदति यश्च श्रृणोति सोऽनेकसहस्त्रेषु कश्चिदेव भवति। अतो दुर्बोध आत्मोत्यभिप्रायः।।२९।।

अथेदानीं प्रकरणार्थमुपसंहरन्ब्रूते-देहीति। देही शरीरी नित्यं सर्वावसिथास्ववध्यो निरवयवत्वान्नित्यत्वाच्च, तत्रावध्योऽयं देहे शरीरे सर्वस्य सर्वगतत्वात्स्थावरादिषु स्थितोऽपि सर्वस्य प्राणिजातस्य देहे वध्यमानेऽप्ययं देही न वध्यो यस्मात्तस्माद्भीष्मादीनि सर्वाणि भीतान्युद्दिश्य न त्वं शोचितुमर्हसि।।३०।।

इह परमार्थतत्त्वापेक्षायां शोको वा मोहो वा न संभवतीत्युक्तं, न केवलं परमार्थतत्त्वापेक्षायामेव किंतु-स्वधर्ममिति। स्वधर्ममपि स्वो धर्मः क्षत्रियस्य धर्मो युद्धं, तमप्यवेक्ष्य त्वं न विकम्पितुं प्रचलितुं नार्हसि धर्म्यात्क्षत्रियस्य स्वाभाविकाद्धर्मादात्मस्वाभाव्यादित्यभिप्रायः, तच्च युद्धं पुथिवीजयद्वारेण धर्मार्थं प्रजारक्षणार्थं चेति धर्मादनपेतं परं धर्म्यं तस्माद्धर्म्याद्युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते। हि यस्मात्।।३१।।

कुतश्च तद्युद्धं कर्तव्यमित्युच्यते-यदृच्छयेति। यदृच्छया चाप्रार्थिततयोपपन्नं स्वर्गद्वारमपावृतमुद्घाटितं य एतदीदृशं युद्धं लभन्ते क्षत्रियाः हे पार्थ, किं न सुखिनस्त।।३२।।

अथेति। एवं कर्तव्यताप्राप्तमपि अथ त्वमिंम धर्म्यं धर्मादनपेतं विहितं संग्रामं युद्धं न करिष्यसि चेत्ततस्तदकरणात्स्वधर्मं कीर्तिं च महादेवादिसमागमनिमित्तां हित्वा केवलं

पापमवाप्स्यसि।।३३।।

अकीर्तिमितम। न केवलं स्वधर्मकीर्तिपरित्यागोऽकीर्तिं चापि भूतानि कथयिष्यन्ति ते तवाव्ययां दीर्घकालम्।धर्मात्मा शूर इत्येवमादिभिर्गुणैः संभावितस्य चाकीर्तिर्मरणादतिरिच्यते। संभावितस्य चाकीर्तेर्वरं मरणमित्यर्थः।।३४।।

किंच-भयादीति। भयात्कर्णादिभ्यो रणाद्युद्धादुपरतं निवृत्तं मंस्यन्ते चिन्तयिष्यन्ति न कृपयेति त्वां महारथा दुर्योधनप्रभृतयः। येषां च त्वां दुर्योधनादीनां बहुमतो बहुभिर्गुणैर्युक्त इत्येवं बहुमतो भूत्वा पुनः यास्यसि लाघवं लघुभावम्।।३५।।

किंच अवाच्यवादानिति। अवाच्यवादान् अवक्तव्यवादांश्च बहूननेकप्रकारान्वदिष्यन्ति तवाहिताः शत्रवो निन्दन्तः कुत्सन्यतस्तवत्वदीयं सामर्थ्यं निवातकवचादियुद्धनिमित्तम्। तस्मात्ततो निन्दाप्राप्तेर्दुःखाद्दुःखतरं नु किम्। ततः कष्टतरं दुःखं नास्तीत्यर्थः।।३६।।

हतो वेति। युद्धे पुनः क्रियमाणे कर्णादिभिर्हतो वा प्राप्तस्यसि स्वर्गं, हतः सन्स्वर्गं प्राप्स्यसि, जित्वा वा कर्णादीन् शूरान् भोक्ष्यसे महीम्, उभयथापि तव लाभ एवेत्यभिप्रायः।

यत एवं तस्मादुत्तिष्ठ कौन्तेय, युद्धाय कृतन्श्चयः। जेष्यामि शत्रून्मरिष्यामि वेति निश्चयं कृत्वेत्यर्थः।।३७।।

तत्र युद्धं स्वधर्म इत्येवं युध्यमानस्योपदेशमिमं शृणु-सुखदुःखे इति। सुखदुःखे समे तुल्ये कृत्वा रागद्वेषावप्यकृत्वेत्येतत् तथा लाभासाभौ जयाजयौ च समौ कृत्वा ततो युद्धाय युज्यस्व घटस्व, नैवं युद्धं कुर्वन्पापमवाप्यसीत्येष उपदेशः प्रासङ्गिकः।।३८।।

शोकमोहापनयनाय लौकिको न्यायः स्वधर्ममपि चावेक्ष्येत्याद्यै श्लोकैरुक्तो नतु तात्पर्येण, परमार्थदर्शनं त्विह प्रकृतं तच्चोक्तमुपसंह्रियते-एषा तेऽभिहितेति शास्त्रविषयविभागप्रदर्शनाय। इह हि दर्शिते पुनः शास्त्रविषयववभागे उपरिष्टात् 'ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्' इति निष्ठाद्वयविषयं शास्त्रं सुखं प्रवर्तिष्यते श्रोतारश्च विषयविभागेन सुखं ग्रहीष्यन्तीत्यत आह-एषा ते इति। एषा ते तुभ्यमभिहितोक्ता सांख्ये परमार्थवस्तुविवेकविषये बुद्धिर्ज्ञानं साक्षाच्छोकमोहादिसंसारहेतुदोषनिवृत्तिकारणं, योगे तु तत्प्राप्त्युपाये निःसङ्गतया द्वन्द्वप्रहाणपूर्वकमीश्वराराधनार्थे कर्मयोगे कर्मानुष्ठाने समाधियोगे च इमामनन्तरमेवोच्यमानां बुद्धिं शृणु। तां च बुद्धिं श्तौति प्ररोचनार्थम्। बुद्ध्या यया योगविषयया युक्तो हे पार्थ, कर्मबन्धं कर्मैव धर्माधर्माख्यो बन्धः कर्मबन्धस्तं प्रहास्यसीश्वरप्रसादनिमित्तज्ञानप्राप्तेरित्यभिप्रायः।।३९।।

किंचान्यत्-नेहाभीति। नेह मोक्षमार्गे कर्मयोगे अभिक्रमनाशोऽभिक्रमणमभिक्रमः प्रारम्भस्तस्य नाशो नास्ति यथा कृष्यादेर्योगविषये प्रारम्भस्य नानैकान्तिकफत्वामित्यर्थः। किंच नापि चिकित्सावत्प्रत्यवायो विद्यते किंतु भवति स्वल्पमप्यस्य योगधर्मस्यानुष्ठितं त्रायते रक्षति महतः संसारभयाज्जन्मरणादिलक्षणात्।।४०।।

येयं सांख्ये बुद्धिरुक्ता योगे च वक्ष्यमाणलक्षणा सा। व्यवसायेति। व्यवसायात्मिका निश्चयस्वभावैकैव बुद्धिरितरविपरीतबुद्धिशाखाभेदस्य बाधिका सम्यक् प्रमाणजनितत्वादिह श्रेयोमार्गे हे कुरुनन्दन, याः पुनरितरा बुद्धयो यासां ता बहुशाखा बहुभेदा इत्येतत् प्रतिशाखाभेदेन ह्यनन्ताश्च बुद्धयः केषामव्यवसायिनां प्रमाणजनितविवेकबुद्धिरहितानामित्यर्थः।।४१।।

येषां व्यवसायात्मिका बुद्धिर्नास्ति ते। यामिमां वक्ष्यमाणां पुष्पितां पुष्पितवृक्ष इव शोभमानां

श्रूयमाणरमणीयां वाचं वाक्यलक्षणां प्रवदन्ति। के अविपश्चितोऽल्पमेधसः। अविवेकिन इत्यर्थः। वेदवादरता इति। वेदवादरता बह्वर्थवादफलसाधनप्रकाशकेषु वेदवाक्येषुरताः हे पार्थ, नान्यत्स्वर्गप्रात्यादिफलसाधनेभ्यः कर्मभ्योऽस्तीत्येवंवादिनो वदनशीसाः।।४२।।

ते च कामात्मान इति। कामात्मानः कामस्वभावाः। कामपरा इत्यर्थः। स्वर्गपराः स्वर्गः परः पुरिषार्थो येषां ते स्वर्गपराः स्वर्गप्रधाना जन्मकर्मफलप्रदां कर्मणः फलं कर्मफलं जन्मैव कर्मफलं जन्मकर्मफलं तत्प्रददातीति जन्मकर्मफलप्रदा तां वाचं प्रवदन्तीत्यनुषज्यते। क्रियाविशेषबहुलां क्रियाणां विशेषाः क्रियाविशेषास्ते बहिला यस्यां वाचि तां, स्वर्गपशुपुत्राद्यर्था यया वाचा बाहुल्येन प्रकाशयन्ते, भोगैश्वर्यगतिं प्रति भोगश्चैश्वर्यं च भोगैश्वर्ये तयोर्गतिः प्राप्तिर्भोगैश्वर्यगतिस्तां प्रति साधनभूता ये क्रियाविशेषास्तद्बहुलां तां वाचं प्रवदन्तो मूढाः संसारे परिवर्तन्त इत्यभिप्रायः।।४३।।

भोगेति। तेषां च भोगैश्वर्यप्रसक्तानां भोगः कर्तव्यमैश्वर्यं चेति भोगैश्वर्ययोरेव प्रणयवतां तदात्मभूतानां तया क्रियाविशेषबहुलया वाचापहृतचेतसामाच्छादितविवेकप्रज्ञानां व्यवसायात्मिकासाख्ये योगे वाया बुद्धिः समाधौ समाधीयतेऽस्मिन्पुरुषोपभोगाय सर्वमिति समाधिरन्तःकरणं बुद्धिस्तस्मिन्समाधौ न विधीयते न भवतीत्यर्थः।।४४।।

य एवं विवेकबुद्धिरहितास्तेषां कामात्मनां यत्फलं तदाह-त्रैगुण्येति। त्रैगुण्यविषयास्त्रैगुण्यं संसारो विषयः प्रकाशयितव्यो येषां ते वेदास्त्रैगुण्यविषयास्त्रैगुण्यं संसारो विषयः प्रकाशयितव्यो येषां ते वेदास्त्रैगुण्यविषयाः त्वं तु निस्त्रैगिण्यो भवार्जुन। निष्कामो भवेत्यर्थः। निर्द्वन्द्वो सुखदुःखहेतू सप्रतिपक्षौ पदार्थौ द्वन्द्वशब्दवाच्यौ ततो निर्गतो निर्द्वन्द्वो भव। त्वं नित्यसत्त्वस्थः सदा सत्त्वगुणाश्रितो भव। तथा निर्योगक्षेमः। अनुपात्तस्योपादानं योगः, उपात्तस्य रक्षणं क्षेमः। योगक्षेमप्रधानस्य श्रेयसि प्रवृत्तिर्दुष्करेत्यतो निर्योगपक्षेमो भव, एष तवोपदेशः।।४५।।

स्वधर्ममनुतिष्ठतः सर्वेषु वेदोक्तेषु कर्मसु यान्यनन्तानि फलानि तानि नापेक्ष्यन्ते चेत् किमर्थं तानीष्वरायेत्यनुष्ठीयन्त इति, उच्यते शृणु-यावानिति। यथा लोके कूपतडागाद्यनेकस्मिन्नुदपाने परिच्छिन्नोदके यावान्यावत्परिमाणः स्नानपानादिरर्थः फलं प्रयोजनं स सर्वोऽर्थः सर्वतः संप्लुतोदकेऽपि योऽर्थस्तावानेव संपद्यते तत्रआन्तर्भवतीत्यर्थः। एवं तावांस्तावत्परिमाण एव संपद्यते सर्वेषु वेदेषु वेदोक्तेषु कर्मसु योऽर्थो यत्कर्मफलं सोऽर्थो ब्राह्मणस्य संन्यासिनः परमार्थतत्त्वं विजानतो योऽर्थो यद्विज्ञानफलं सर्वतः संप्लुतोदकस्थानीयं तस्मिंस्तावानेव संपद्यते।

तत्रैवान्तर्भवतीत्यर्थः।

'यथा कृतायविजितायाधरेयाः संयन्त्येवमेवैनं सर्वं तदभइसमेति यत्किंच प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद' इति श्रुतेः। 'सर्वं कर्माखिलम्'इति च वक्ष्यति। तस्मात्प्राग्ज्ञाननिष्ठाधिकारप्राप्तेः कर्मण्यधिकृतेन कूपतडागाद्यर्थस्थानीयमपि कर्म कर्तव्यम्।।४६।।

कर्मणीति। तव च कर्मण्येवाधिकारो न ज्ञाननिष्ठायां ते तव तत्र च कर्म कुर्वतो मा फलेषअवधिकारोऽस्तु कर्मफलप्राप्तेर्हेतुः स्याः, एवं मा कर्मफलहेतुर्भूः। यदा हि कर्मफलतृष्णाप्रयुक्तः कर्मणि प्रवर्तते तदा कर्मफलस्यैव जन्मनो हेतुर्भवेत्, यदि कर्मफलं नेष्यते किं कर्मणा दुःखरूपेणेति। मा ते तव सङ्गोऽस्त्वकर्मण्यकरणे प्रीतिर्मा भूत्।।४७।।

यदि कर्मफलंप्रयुक्तेन न कर्तव्यं कर्म कथं तर्हि कर्तव्यमित्युच्यते, योगस्थ इति। योगस्थः

सन्किरु कर्माणि केवलमीश्वरार्थं, तत्रापीश्वरो मे तुष्यत्विति सङ्गं त्यक्तवा धनंजय, फलतृष्णाशून्येन क्रियमाणे कर्मणि सत्त्वशुद्धिजा ज्ञानप्राप्तिलक्षणा सिद्धिस्तद्विपर्ययजाऽसिद्धिस्तयोः सिद्धयसिद्धियोरपि समस्तुल्यो भूत्वा कुरु कर्माणि। कोऽसौ योगो यत्रस्थः कुर्वित्युक्तमिदमेव तत्सिद्धयसिद्धयोः समत्वं योग उच्यते।।४७।।

दूरेणेति। यत्पुनः समत्वबुद्धियिक्तमीश्वराराघनार्थं कर्मैतस्मात्कर्मणो दूरेणातिविप्रकर्षेण ह्यवरं निकृष्टं कर्म फलार्थिना क्रियमाणं बुद्धियोगात्समत्वबुद्धियुक्तात्कर्मणो जन्ममरणादिहेतुत्वाद् धनंजय, यत एवं योगविषयायां बुद्धौ तत्परिपाकजायां वा सांख्यबुद्धौ शरणमाश्रयमभयप्राप्तिकारणमन्विच्छ प्रार्थयस्व। परमार्थज्ञानशरणो

भवेत्यर्थः। यतोऽवरं कर्म कुर्वाणाःकृपणा दीमाः फलहेतवः फलतृष्णाप्रयुक्ताः सन्तः 'यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रौति स कृपणः' इति श्रुतेः।।४९।।

समत्वबुद्धियुक्तः सन्स्वधर्ममनुतिष्ठन् यत्फलं प्राप्नोति तच्छृणु-बुद्धीति। बुद्धियुक्तः, स जहाति परित्यजतीहाँस्मिल्लोके उमे सुकृतदुष्कृते पुण्यपापे सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण यतस्तस्मात्समत्वबुद्धियोगाय युज्यस्व घटस्व। योगो हि कर्मसु वर्तमानस्य या सिद्धयसिद्धयोः समत्वबुद्धयास्वभावान्निवर्तन्ते तस्मात्समत्वबुद्धियुक्तो भव त्वम्।।५०।।

यस्मात् कर्मजमिति। कर्मजं फलं त्यक्त्वेति व्यवहितेन संबन्धः। इष्टानिष्टहेदप्राप्तिः कर्मजं फलं कर्मभ्यो जातम्। बुद्धियुक्ताः समत्वबुद्धियुक्ताः। हि तस्मात्फलं त्यक्त्वा परित्यज्य मनीषिणो ज्ञानिनो भूत्वा जन्मवन्धविनिर्मुक्ताः जन्मैव बन्धो जन्मबन्धस्तेन विनिर्मुक्ता जीवन्त एव जन्मबन्धविनिर्मुक्ताः सन्तः पदं परमं विष्णोर्मोक्षाख्यं गच्छन्त्यनामयं सर्वोपद्रवरहितमित्यर्थः। अथवा बुद्धियोगाद्धनंजयेत्यारभ्य परमार्थदर्शनलक्षणैव सर्वतःसंण्लुतोदकस्थानीया कर्मयोगजसत्त्वशुद्धिजनिता बुद्धिर्दर्शिता साक्षात्सुकृतदुष्कृतप्रहाणादिहेतुत्वश्रवणात्।।५१।।

योगानुष्ठानजनितसत्त्वशुद्धिजा बुद्धिः कदा प्राप्स्यत इत्युच्यते-यदेति। यदा यस्मिन्काले ते तव मोहकलिलं मोहात्मकमविवेकरूपं कालुष्यं, येनात्मानात्मविवेकबोधं कलुषीकृत्य विषयं प्रत्यन्तःकरणं प्रवर्तते, तत्ते तव बुद्धिर्व्यतितरिष्यति व्यतिक्रमिष्यति। शुद्धभावमापत्स्यत इत्यर्थः। तदा तस्मिन्काले गन्तासि प्राप्स्यसि निर्वेदं वैराग्यं श्रोतव्यस्य श्रुतस्य च तदा श्रोतव्यं श्रुतं च निष्फलं प्रतिपद्यत इत्यभइप्रायः।।५२।।

मोहकलिलात्यद्धरेण लब्धात्मविवेकजप्रज्ञः कदा कर्मयोगजं फलं परमार्थयोगमवाप्स्यसीति

चेत्तच्छ्टणु-श्रुतिविप्रतिपन्नति। श्रुतिविप्रतिपन्नानेकसाध्यसाधनसंबन्धप्रकाशनश्रुतिभिः श्रवणैर्विप्रतिपन्ना नानाप्रतिपन्ना श्रुतिविप्रतिपन्ना विक्षिप्ता सती ते तव बुद्धिर्यदा यस्मिन्काले स्थास्यति स्थिरीभूता भविष्यति निश्चला विक्षेपचलनवर्जिता सती समाधौ समाधीयते चित्तमस्मिन्काले योगमवाप्स्यसि विवेकप्रज्ञां समाधिं प्राप्स्यसि।।५३।।

प्रश्नबीजं प्रतिलभ्यार्जुन उवाच लब्धसमाधिप्रज्ञस्य लक्षणबुभुत्सया-स्थितप्रज्ञस्येति। स्थिता प्रतिष्ठिताऽहमस्मि परं ब्रह्मेति प्रज्ञा यस्य स स्थितप्रज्ञस्तस्य का भाषा किं भाषणं वचनं कथमसौ परैर्भाष्यते। समाधिस्थस्य समाधौ स्थितस्य केशव, स्थितधीः स्थितप्रज्ञः स्वयं वा किं प्रभाषेत। किमासीत व्रजेत किं भाषणं व्रजनं वा तस्य कथमित्यर्थः। स्थितप्रज्ञस्य लक्षणमनेन श्लोकेन पृच्छति।।५४।।

यो ह्यादित एव संन्यस्य कर्माणि ज्ञानयोगनिष्ठायां प्रवृत्तो यश्च कर्मयोगेन तयोः स्थितप्रज्ञस्य प्रजहातीत्यारभ्याध्यायपरिसमाप्तिपर्यन्तं स्थितप्रज्ञलक्षणं साधनं चोपदिश्यते। सर्वत्रैव ह्यध्यात्मशास्त्रे कृतार्थलक्षणानि यानि तान्येव साधनान्युपदिश्यन्ते यत्नसाध्यत्वाद् यानि यत्नसाध्यानि साधनानि लक्षणानि भवन्ति तानि श्रीभगवानुवाच-प्रजहातीति।प्रजहाति प्रकर्षेण जहाति परित्यजति यदा यस्मिन्काले सर्वान्समस्तान्कामानिच्छाभेदान् हे पार्थ, मनोगतान्मनसि प्रविष्टान्हृदि प्रविष्टान् सर्वकामपरित्यागे तुष्टिकारणाभावाच्छरीरधारणानिमित्तशेषे च सत्युन्मत्तप्रमत्तस्येव प्रवृत्तिः प्राप्तेत्यत उच्यते। आत्मन्येव प्रत्यगात्मस्वरूप एवात्माना स्वेनैव बाह्यलाभनिरपेक्षस्तुष्टः
परमार्थदर्शनामृतरसलाभेनान्यस्मादलंप्रत्ययवान्स्थितप्रज्ञः स्थिता प्रतिष्ठितात्मानात्मविवेकजा प्रज्ञा यस्य स स्थितप्रज्ञो विद्वांस्तदोच्यते। त्यक्तपुत्रवित्तलोकैषणः संन्यास्यात्माराम आत्मक्रीडः स्थितप्रज्ञ इत्यर्थः।।५५।।

किंच दुःखेष्विति। दुःखेष्वाध्यात्मिकादिषु प्राप्तेषु नोद्विग्नं न प्रक्षुभितं दुःखप्राप्तौ मनो यस्य सोऽयमनुद्विग्नमनाः, तथा सुखेषु प्राप्तेषु विगता स्पृहा तृष्णा यस्य नाद्निरिवेन्धनाद्याधाने सुखान्यनुवर्धते स विगतस्पृहः। वीतरागभयक्रोधः रागश्च भयं च क्रोधश्च वीता विगता रागभयक्रोधा यस्मात्स वीतरागभयक्रोधः स्थितधीः स्थितप्रज्ञोमुनिः संन्यासी तदोच्यते।।५६।।

किंच-यः सर्वत्रेति। यो मुनिः सर्वत्र देहजीवितादिष्वप्यनभिस्नेहः स्नेहवर्जितस्तत्तत्प्राप्य शुभाशुभं तत्तच्छुभमशुभं वा लब्ध्वा नाभिनन्दति न द्वेष्टित्यर्थः। तस्यैवं हर्षविषादवर्जितस्य विवेकजा प्रज्ञा प्रतिष्ठिता

भवति।।५७।।

किंच-यदा संहरत इति। यदा संहरते सम्यगुपसंहरते चायं ज्ञाननिष्ठायां प्रवृत्तो यतिः कूर्मोऽङ्गानीव सर्वशो यथा कूर्मो भयात्स्वान्यङ्गान्युपसंहरति सर्वत एवं ज्ञाननिष्ठ इन्द्रियाणीन्द्रियार्थेभ्यः सर्वविषयेभ्य इपसंहरते तस्य प्रज्ञा प्रतिष्ठितेत्युक्तार्थं वाक्यम्।।५८।।

तत्र विषयाननाहरत आतुरस्यापीन्द्रियाणि निवर्तन्ते कूर्माङ्गानीव संह्रियन्ते नतु तद्विषयो रागः, स कथं संह्रियत इत्युच्यते-विषया इति। यद्यपि वलिषयोपलक्षितानि विषयशब्दवाच्यानीन्द्रियाण्यथवा विषया एव निराहारस्यानाह्रियमाणविषयस्य कष्टे तपसि स्थितस्य मूर्खस्यापि निवर्तन्ते देहिनो देहवतः, रसवर्जं रसो रागो विषयेषु यस्तं वर्जयित्वा। रसशब्दो रागे प्रसिद्धः। स्वरसेन प्रवृत्तो रसिको रसज्ञ इत्यादिदर्शनात्। सोऽपि रसो रञ्जनरूपः सूक्ष्मोऽस्य यतेः

परं परमार्थतत्त्वं ब्रह्म दृष्ट्वोपलभ्याहमेव तदिति वर्तमानस्य निवर्तते। निर्बीजं वि,यविज्ञानं संपद्यत इत्यर्थः। नासति सम्यग्दर्शने रसस्योच्छेदस्तस्मात्सम्यग्दर्शनात्मिकायाः प्रज्ञायाः स्थैर्यं कर्तव्यमित्यभिप्रायः।।५९।।

सम्यगदर्शनलक्षणं प्रज्ञास्थैर्यं चिकीर्षताऽऽदाविन्द्रियाणि स्ववशे स्थापयितव्यानि यस्मात्तदनवस्थापने दोषमाह-यतत इति। यततः प्रयत्नं कुर्वतोऽपि हि यस्मात् कौन्तेय, पुरुषस्य विपश्चितो मेधाविनोऽपूतु व्यवहितेन संबन्धः। इन्द्रियाणि प्रमाथीनि प्रमथनशीलानि विषयाभिमुखं हि पुरुषं विक्षोभयन्त्याकुलीकुर्वन्ति, आकुलीकृत्य च हरन्ति प्रसभं प्रसह्य प्रकाशमेव पश्यतो विवेकविज्ञानमुक्तं मनो यतस्तस्मात्।।६०।।

तानीति। तानि सर्वाणि संयम्य संयमनं वशीकरणं कृत्वा युक्तः समाहितः सन्नासीत।

मत्परोऽहं वासुदेवः सर्वप्रत्यगात्मा परो यस्य स मत्परो नान्योऽहं तस्मादित्यासीतेत्यर्थः। एवमासीनस्य यतेर्वशे हि यस्येन्द्रियाणि वर्तन्तेऽभ्यासबलात्तस्य प्रज्ञा प्रतिष्ठिता।।६१।।

अथेदानीं पराभविष्यतः सर्वानर्थमूलमिदमुच्यते-ध्यायत इति। ध्यायतश्चिन्तयतो विषयाञ्शब्दादिविषयविशेषानालोचयतः पुंसः पुरुषस्य सङ्ग आसक्तिः प्रीतिस्तेषु विषयेषूपजायते, सङ्गत्प्रीतेः कामः संजायते समुत्पद्यते, कामस्तृष्णा, तस्मात्कामात्कुतश्चित्प्रतिहतात्क्रोधोऽभिजायते।।६२।।

क्रोधाद्भवति संमोहः संमोहोऽविवेकः कार्याकार्यविषयः भवतीति संबङ्यते। क्रुद्धो हि संमूढः सन्गुरुमप्याक्रोशति, संमोहात्स्मृतिविभ्रमः शास्त्राचार्योपदेशाहितसंस्कारजनितायाः स्मृतेः स्याद्विभ्रमो भ्रंशः स्मृत्युत्पत्तिनिमित्तप्राप्तावनुत्पत्तिः। ततः स्मृतिभ्रंशात्तु बुद्धेर्नाशः कार्याकार्यविषयविवेकायोग्यतान्तःकरणस्य बुद्धेर्नाश उच्यते, बुद्धिनाशात्प्राणश्यति तावदेव हि पुरुषो यावदन्तःकरणं तदीयं कर्याकार्यविषयविवेकयोग्यं, तदयोग्यत्वे नष्ट एव पुरुषो भवत्यतस्यान्तःकरणस्य बुद्धेर्नाशात्प्राणश्यति। पुरुषार्थायोग्यो

भवतीत्यर्थः।।६३।।

सर्वानर्थस्य मूलमुक्तं विषयाभिध्यानम्। अथेदानीं मोक्षकारणमिदमुच्यते-रागद्वेषेति। रागद्वेषवियुक्तै रागश्च द्वेषश्च रागद्वेषौ तत्पुरःसरा हीन्द्रियाणां प्रवृत्तिः स्वाभाविकी तत्र यो मुमुक्षुर्भवति स ताभ्यां वियुक्तैः श्रोत्रादिभिरिन्द्रियैर्विषयानवर्जनीयांश्चरन्नुपलभमान आत्मवश्यैरात्मनो वश्यानि वशीभूतीनि तैरात्मवश्यैर्विधेयात्मेच्छातो विधेय आत्मान्तःकरणं यस्य सोऽयं प्रसादमधिगच्छति। प्रसादः प्रसन्नता स्वास्थ्यम्।।६४।।

प्रसादे सति किं स्यादित्युच्यते-प्रसाद इति। प्रसादे सर्वदुःखानामाध्यात्मिकादीनां हानिर्विनाशोऽस्य यतेरुपजायते। किंच प्रसन्नचेतसः स्वच्छआन्तःकरणस्य हि यस्मादाशु शीघ्रं बुद्धिः पर्यवतिष्ठते। आत्मरीपेणैव निश्चलीभवतीत्यर्थः। एवं प्रसन्नचेतसोऽवस्थितबुद्धेः कृतकृत्यता यतस्तस्माद्रागद्वेषवियुक्तैरिन्द्रियैः शास्त्राविरुद्धेष्ववर्जनीयेषु युक्तः समाचरेदिति वाक्यार्थः।।६५।।

सेयं प्रसन्नता स्तूयते-नास्तीति। नास्ति न विद्यते। न भवतीत्यर्थः।

बुद्धिरात्मस्वरूपविषयायुक्तस्यासमाहितान्तःकरणस्य। न चायुक्तस्येति। न चास्त्ययुक्तस्य भावनात्मज्ञानाभिनिवेशस्तथा न चास्य भावयत आत्मज्ञानाभिनिवेशं कुर्वतः शान्तिरुपशमो न विद्यते, अशान्तस्य कुतः सुखम्। इन्द्रियाणां हि विषयसेवातृष्णातो निवृत्तिर्या तत् सुखं न विषयविषया तृष्णा दुःखमेव हि सा, न तृष्णायां सत्यां सुखस्य गन्धमात्रमुत्पद्यत इत्यर्थः।।६६।।

अयुक्तस्य कस्माद्बुद्धिर्नास्तीत्युच्यते-इन्द्रियाणामिति इन्द्रियाणां हि यस्माच्चरतां स्वस्वविषयेषु प्रवर्तमानानां यन्मनोऽनुप्रवर्तते तदिन्द्रियविषयविकल्पनेन प्रवृत्तं मनोऽस्य यतेर्हरति प्रज्ञामात्मानात्मविवेकजां नाशयति। कथम्,

वायुर्नावमिवाम्भस्युदके जिगमिषतां मार्गादुद्धृत्योन्मार्गे यथा वीयुर्नावं प्रवर्तयत्येवमात्मविषयां प्रज्ञां हृत्वा मनो विषयविषयां कल्पनां करोति।।६७।।

यततो ह्यपीत्युपन्यस्तस्यार्थस्यानेकधोपपत्तिमुक्त्वा तं चार्थमुपपाद्योपसंहरति-तस्मादिति। इन्द्रियाणां प्रवृत्तौ दोष उपपादितो यस्मात्तस्माद् यस्य यतेः हे महाबाहो, निगृहीतानि सर्वशः सर्वप्रकारैर्मानसादिभेदैरिन्द्रियाणीन्द्रियार्थेभ्यः शब्दादुभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ।।६८।।

योऽयं लौकिको वैदिकश्च व्यवहारः समुत्पन्नविवेकज्ञानस्य

स्थितप्रज्ञस्याविद्याकार्यत्वादविद्यानिवृत्तौ निवर्ततेऽविद्यायाश्च विद्याविरोधान्निवृत्तिरित्येतमर्थे स्फुटीकुर्वन्नाह-या निशेति। या निशा रात्रिः सर्वपदार्थानामविवेककरी तमःस्वभावत्वान्निशासर्वेषां भूतानां सर्वभूतानाम्। किं तत्परमार्थतत्त्वं स्थितप्रज्ञस्य विषयो यथा नक्तंचराणामहरेव सदन्येषां निशा भवति तद्वन्नक्तंचरस्थानीयानामज्ञानिनां सर्वभूतानां निशेव निशा परमार्थतत्त्वागोचरत्वात्तदद्बुद्धीनां, तस्यां परमार्थतत्त्वलक्षणायामज्ञाननिद्रायां प्रबुद्धो जागर्ति संयमी संयमवान् जितेन्द्रियो योगित्यर्थः। यस्यां ग्राह्यग्राहकभेदलक्षणायामविद्यनिद्रायां प्रसुप्तान्येव भूतानि जाग्रतीत्युच्यते यस्यां निशायां प्रसुप्ता इव स्वप्नदृशः सा निशाविद्यारूपत्वात्परमार्थतत्त्वं पश्यतो मुनेरतः कर्माण्यविद्यावस्थायामेव चोद्यन्ते न विद्यावस्थायां, विद्यायां हि सत्यामुदिते सवितरि शार्वरमिव तमः प्रणाशमुपगच्छत्यविद्या, प्राग्विद्योत्पत्तेविद्या

प्रमाणबुद्धया गृह्यमाणा क्रियाकारकफलभेदरूपा सती सर्वकर्महेतुत्वं प्रतिपद्यते नाप्रमाणायाः कर्महेतुत्वोपपत्तिः प्रमाणभूतेन वेदेन मम चोदितं कर्तव्यं कर्मेति नहि, कर्मणि कर्ता प्रवर्तते नाविद्यामात्रमिदं सर्वं निशेवेति। यस्य तु पुनर्निशेवाविद्यामात्रमिदं सर्वं भेदजातमिदं ज्ञानं तस्यात्मज्ञस्य सर्वकर्मसंन्यास एवाधिकारो न प्रवृत्तौ। तथा दर्शयिष्यति 'तद्बुद्धयस्तदात्मानः' इत्यादिना, ज्ञाननिष्ठायामेव तस्याधिकारः। तत्रापि प्रवर्तकप्रमाणाभावे प्रवृत्तेरनुपपत्तिरिति चेत्, न। स्वात्मविषयत्वादात्मविज्ञानस्य। न ह्यात्मनः स्वात्मनि प्रवर्तकप्रमाणापेक्षतात्मत्वादेव तदन्तत्वाच्च सर्वप्रमाणानां प्रमाणत्वस्य। नह्यात्मस्वरूपाधिगमे सति पुनः प्रमाणप्रमेयव्यवहारः संभवति, प्रमातृत्वं ह्यात्मनो निवर्तयत्यन्तं प्रमाणं निवर्तयदेव चाप्रमाणीन्नात्मविदः कर्मण्यधिकार इति सिद्धम्।।६९।।

विदुषस्त्यक्तैषणस्य स्थितप्रज्ञस्य यतेरेव मोक्षप्राप्तिर्नत्वसंन्यासिनः कामकामिन इत्येतमर्थं दृष्टान्तेन प्रतिप३दयिष्यन्नाह-आपूर्येति। आपूर्यमाणमद्भिर चलप्रतिष्ठमचलतया प्रतिष्ठावस्थितिर्यस्य तमचलप्रतिष्ठं समुद्रमापः सर्वतो गताः प्रविशन्ति स्वात्मस्थमविक्रियमेव सन्तं यद्वत्तद्वत्कामा विषयसंनिधावपि सर्वत इच्छाविशेषा यं समुद्रमिवापो विकुप्वन्तः प्रविशन्ति सर्वे आत्मन्येव प्रलीयन्ते न स्वात्मवशं कुर्वन्ति स शान्तिं मोक्षं प्राप्नोति नेतरः कामकामी काम्यन्त इति विशयास्तान्कामयितुं शीलं यस्य स कामकामी नैव प्राप्नोतीत्यर्थः।।७०।।

यस्मादेवं तस्मात् विहायेति। विहाय परित्यज्य कामान् यः संन्यासी सर्वनशेषतः कात्स्र्येन चरति। जीवनमात्रचेष्टाशेषः पर्यटतीत्यर्थः। निःस्पृहः शरीरजीवनमात्रेऽपि निर्गता स्पृहा यस्य स निःस्पृहः सन् निर्मम इति ममत्ववर्जितः शरीरजीवनमात्राक्षिप्तपरिग्रहेऽपि

ममेत्यभिनिवेशवर्जितःनिरहंकारो विद्यावत्त्वादिनिमित्तात्मसंभावनारहित अत्यर्थः। स एवंभूतः स्थितप्रज्ञो ब्रह्मविच्छान्तिं सर्वसंसारदुःखोपरमत्वलक्षणां निर्वाणाख्यामधिगच्छति प्राप्नोति। ब्रह्मभूतो भवतीत्यर्थः।।७१।।

सैषा ज्ञाननिष्ठा स्तूयते-एषा ब्रह्मीति। एषा यथोक्ता ब्राह्मी ब्रह्मणि भवेयं स्थितिः सर्वकर्म संन्यस्य ब्रह्मरूपेणैवावस्थानमित्येतद् हे पार्थ, नैनां स्थितिं प्राप्च लब्धा विमुह्यति न मोहं प्राप्नोति। स्थित्वास्यां स्थितौ ब्राह्मयां यथोक्तायामन्तकालेऽन्ते वयस्यपिं ब्रह्मनिर्वाणं ब्रह्मनिर्वृतिं मोक्षमृच्छति, किमु वक्तव्यं ब्रह्मचर्यादेव संन्यस्य यावज्जीवम यो ब्रह्मण्येवावतिष्ठते स ब्रह्मनिर्वाणमृच्छतीति।।७२।।

इति श्रीमच्छंकरभगवतः कृतौ गीताभाष्ये द्वितीयोऽध्यायः।।२।।

तृतीयोऽध्यायः

शास्त्रस्यप्रवृत्तिनिवृत्तिविषयभूते द्वे बुद्धि भगवता निर्दिष्टे सांख्ये बुद्धिर्योगे बुद्धिरिति च। तत्र 'प्रजाहाति यदा कामान्'इत्यारभ्याध्यायपरिसमाप्तेः सांख्यबुद्धयाश्रितानां संन्यासं कर्तव्यमुक्त्वा तेषां तन्निष्ठतयैव च कृतार्थतोक्ता 'एषा ब्राह्मी स्थिति' रिति। अर्जुनाय च 'कर्मण्येवाधिकारस्ते','मा ते सङ्गऽस्त्वकर्मणि' इति कर्मैव कर्तव्यमुक्तवान् योगबुद्धिमाश्रित्य, न तत एव श्रेयःप्राप्तिमुक्तवान्, तदेतदालक्ष्य पर्याकुलीभूतबुद्धिरर्जुन उवाच। कथं भक्ताय श्रेयोर्थिने यत् साक्षाच्छ्रेयःसाधनं साख्यबुद्धिनिष्ठां श्रावयित्वा मां कर्माणि दृष्टानेकानर्थयुक्ते पारंपर्येणाप्यनैकान्तिकश्रेयः प्राप्तिफले नियुञ्ज्यादिति युक्तः पर्याकुलीभावोऽर्जुनस्य, तदनुरूपश्च प्रश्नो 'ज्यायसी चेत्' इत्यादिः। प्रश्नापाकरणवाक्यं च भगवतोक्तं यथोक्तविभागविषये शास्त्रे। केचित्त्वर्जुनस्य प्रश्नार्थमन्यथा कल्पयित्वा तत्प्रतिकूलं भगवतः प्रतिवचनं वर्णयन्ति,यथा चात्मना संबन्धग्रन्थे गीतार्थो निरूपितस्तत्प्रतिकूलं चेह पुनः प्रश्नप्रतिवचनयोरर्थं निरूपयन्ति। कथं तत्र संबन्धग्रन्थे तावत् सर्वेषामाश्रमिणां ज्ञानकर्मणोः समुच्चयो गीताशास्त्रे निरूपितोऽर्थ इत्युक्तं पुनर्विशेषितं च यावज्जीवं श्रुतिचोदितानि कर्माणि परित्यज्य केवलादेव ज्ञानान्मोक्षः प्राप्यत इत्येतदेकान्तेनैव प्रतिषिद्धमिति। इह त्वाश्रमविकल्पं दर्शयता यावज्जीनश्रुतिचोदितानामेव कर्मणां परित्याग उक्तः, तत् कथमीदृशं विरुद्धमर्थमर्जुनाय ब्रूयाद्भगवान्, श्रोता वा कथं विरुद्धमर्थमवधारयेत्। तत्रैतत् स्यादृहस्थानामेव श्रौतकर्मपरित्यागेन केवलादेव ज्ञानान्मोक्षः प्रतिषिध्यते नत्वाश्रमान्तराणामित्येतदपि पूर्वोत्थरविरुद्धमेव। कथं,सर्वाश्रमिणां ज्ञानकर्मणोः समुच्चयो गीताशास्त्रे निश्चितोऽर्थ इति प्रतिज्ञायेह कथं तद्विरुद्धं केवलादेव ज्ञानान्मोक्षं ब्रूयादाश्रमान्तराणाम्। अथ मतं श्रौतकर्मापेक्ष्यैतद्वचनं केवलादेव ज्ञानाच्छ्रौतकर्मरहितादृहस्थानां मोक्षःप्रतिषिध्यत इति, तत्र गृहस्थानां विद्यमानमपि स्मार्तं कर्माविद्यमानवदुपेक्ष्य ज्ञानादेव केवलादित्युच्यत इति एतदपि विरुद्धम्, कथं गृहस्थस्यैव स्मार्तकर्माणा समुच्चिताज्ज्ञानान्मोक्षः प्रतिषिध्यते नत्वाश्रमान्तराणामिति कथं विवेकिभिः शक्यमवधारयितुम्। किंच यदि मोक्षसाधनत्वेन स्मार्तानि कर्माण्यूर्ध्वरेतसां समुच्चीयन्ते तथा गृहस्थस्यापीष्यतां स्मार्तैरेव समुच्चयो न श्रौतैः। अथ श्रौतैः स्मार्तैश्च गृहस्थस्यैव समुच्चयो मोक्षायोर्ध्वरेतसां तु स्मार्तकर्ममात्रसमुच्चिताज्ज्ञानान्मोक्ष इति, तत्रैवं सति गृहस्थस्यायासबाहुल्याच्छ्रौतं स्मार्तं च बहुदुःखरूपं कर्म शिरस्यारोपितं स्यात्। अथ

गृहस्थस्यैवायासबाहुल्यकारणान्मोक्षः स्यान्नाश्रमान्तराणां श्रौतनित्यकर्मरहितत्वादिति, तदप्यसत्, सर्वोपनिषत्स्वितिहासपुराणयोगशास्त्रेषु च ज्ञानाङ्गत्वेन मुमुक्षोः सर्वकर्मसंन्यासविधानादाश्रमविकल्पसमुच्चयविधानाच्च श्रुतिस्मृत्योः सिद्धस्तर्हि सर्वाश्रमिणां ज्ञानकर्मणोः समुच्चयः। न, मुमुक्षोः सर्वकर्मसंन्यासविधानात्। 'व्युत्थायाथ भिक्षाचर्यं चरन्ति तस्मात् संन्यासमेषां तपसामतिरिक्तमाहुः। न्यास एवात्यरेचयत्' इति 'न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुः' इति च। 'ब्रह्मचर्यादेव प्रव्रजेत्' इत्याद्याः श्रुतयः, 'त्यज दर्ममधर्मं च उभे सत्यानृते त्यज। उमे सत्यानृतेत्यक्त्वा येन त्यजसि तत्त्यज','संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया। प्रव्रजन्त्यकृतोद्वाहाः परं वैराग्यमाश्रिताः' इति बृहस्पतिः। 'कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते। तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः' इति शुकानुशासनम्। इहापि

च 'सर्वकर्माणि मनसा संन्यासे' त्यादि, मोभस्य चाकार्यत्वान्मुमुक्षोः कर्मानर्थक्यम्। नित्यानि प्रत्यवायपरिहारार्थमनुष्ठेयानीति चेत्, न, असंन्यासिविषयत्वात् प्रत्यवायप्राप्तेः। नह्यग्निकार्याद्यकरणात्संन्यासिनः प्रत्यवायः कल्पयितुं शक्यो यथा ब्रह्मचारिणामसंन्यासिनामपि कर्मिणाम्। न तावन्नित्यानां कर्मणामभावादेव भावरूपस्य प्रत्यवाय स्योत्पत्तिः कल्पयितुं शक्या युक्ता च। 'कथमसतः

सज्जायेत' इत्यसतः सज्जन्मासंभवश्रुतेः, यदि विहिताकरणादसंभाव्यमपि प्रत्यवायं ब्रूयाद्वेदस्तदानर्थकरो वेदोऽप्रमाणमित्युक्तं स्यात्, विहितस्य करणाकरणयोर्दुःखमात्रफलत्वात्। तथाच कारकं शास्त्रं न ज्ञापकमित्यनुपपन्नार्थं कल्पितं स्यात्। नचैतदिष्टम्। तस्मान्न संन्यासिनां कर्माण्यतो ज्ञानकर्मणोः समुच्चयानुपपत्तिः, 'ज्यायसी चेत्कर्मणस्ते मता बुद्धिः' इत्यर्जुनस्य प्रश्नानुपपत्तेश्च। यदि हि भगलता

द्वितीयेऽध्याये ज्ञानं कर्म च समुच्चयेन त्वयानुष्ठेयमित्युक्तं स्यात् ततोऽर्जुनस्य प्रश्नोऽनुपपन्नो 'ज्यायसी चेत् कर्मणस्ते मता बुद्धि' रिति। अर्जुनाय चेत् बुद्धिकर्मणी त्वयानुष्ठेये इत्युक्ते या कर्मणो ज्यायसी बुद्धिः साप्युक्तैवेति 'तत् किं कर्मणि घोरे मां नियोजयसि केशव' इति प्रश्नो न कथंचनोपपद्यते। न चार्जुनस्यैव ज्यायसी बुद्धइर्नानुष्ठेयेति भगवतोक्तं पूर्वमिति कल्पयितुं युक्तं येन 'ज्यायसी चे' दिति प्रश्नः स्याद्, यदि पुनरेकस्यपुरुषस्य ज्ञानकर्मणोर्विरोधाद्युगपदनुष्ठानं न संभवतीति भिन्नपुरुषानुष्ठेयत्वं भगवता पूर्वमुक्तं स्यात् ततोऽयं प्रश्न उपपन्नो ज्यायसी चेदित्यादिः। अविवेकतः प्रळ्नकल्पनायामपि भिन्नपुरुशानुष्ठेयत्वेन भगवतः प्रतिवचनं नोपपद्यते। नचाज्ञाननिमित्तं भगवत्प्रतिवचनं कल्प्यम्। अस्माच्च भिन्नपुरुषानष्ठेयत्वेन ज्ञानकर्मनिष्ठयोर्भगवतःप्रतिवचनदर्शनात् ज्ञानकर्मणोः समुच्चयानुपपत्तिः। तस्मात्केवलादेव ज्ञानान्मोक्ष इत्येषोऽर्थो निश्चितो गीतासु सर्वोपनिषत्सु च। ज्ञानकर्मणोरेकं वद निश्चित्येति चैकविषयैव प्रार्थनानुपपन्नोभयोः समुच्चयसंभवे। कुरु कर्मैव तस्मात्त्वमिति च ज्ञाननिष्ठासंभवमर्जुनस्यावधारणेन दर्शयिष्यति-ज्यायसी चेदिति। ज्यायसी श्रेयसी चेद्यदि कर्मणः सकाशात्ते तव मताभिप्रेता बुद्धिर्ज्ञानं हे जनार्दन, यदि बुद्धिकर्मणी समुच्चते इष्टे तदैकं श्रेयःसाधनमिति कर्मणो ज्यायसी बुद्धिरिति कर्मणोऽतिरिक्तकरणं बुद्धेरनुपपन्नमर्जुनेन कृतं स्यान्न हि तदेव तस्मात् फलतोऽतिरिक्तं स्यात्। तथाच कर्मणः श्रेयस्करी भगवतोक्ता बुद्धिरश्रेयस्करं च कर्म कुर्विति मां प्रतिपइदयति तत् किं नु कारणमिति बगवत उपालम्भमिव कुर्वन् तत् किं कस्मात् कर्मणि भोरे क्रूरे हिंसालक्षणे मां नियोजयसि केशवेति च यदाह तच्च नोपपद्यते।।१।।

अथ स्मार्तेनैव कर्मणा समुच्चयः सर्वेषां भगवतोक्तोऽर्जुनेन चावधारितश्चेत् तत्किं कर्मणि घोरे मां नियोजयसीत्यादि कथं युक्तं वचनं, किंच-व्यामिश्रेणेति। व्यामिश्रेणेव यद्यपि विविक्ताभिधायी भगवांस्तथापि मम मन्दबुद्धेर्व्यामिश्रमिव भगवद्वाक्यं प्रतिभाति। तेन मम बुद्धिं मोहयसीव। मम मन्दबुद्धिव्यामोहापनयाय हि प्रवृत्तस्त्वं तु कथं मोहयस्यतो ब्रवीमि बुद्धिं मोहयसीव मे ममेति। त्वं तु भिन्नकर्तृकयोर्ज्ञानकर्मणोरेकपुरुषानुष्ठानासंभवं यदि मन्यसे तत्रैवं सति तत्तयोरेकं बुद्धिं कर्म वेदमेवार्जुनस्य योग्यं बुद्धिशक्तयवस्थानुरूपमिति निश्चित्य वद ब्रूहि। येन ज्ञानेन कर्मणा वान्यतरेण श्रेयोऽहमाप्नुयां प्राप्नुयाम्। यदि हि कर्मनिष्ठायां गुणभूतमपि ज्ञानं भगवतोक्तं स्यात्तत् कथं तयोरेकं वदेत्येकविषयैवार्जुनस्य शुश्रूषा स्यात्, नहि भगवतोक्तमन्यतरदेव ज्ञानकर्मणोर्वक्ष्यामि नैव द्वयमिति। येनोभयप्राप्त्यसंभवमात्मनो मन्यमान एकमेव प्रार्थयते।।२।।

प्रश्नानुरूपमेव प्रतिवचनं श्रीभगवानुवाच-लोकेऽस्मिन्निति। लोकेऽस्मिन् शास्त्रार्थानुष्ठानाधिकृतानां द्विविधा द्विप्रकारा निष्ठा स्थितिरनुष्ठेयतात्पर्यं पुरा पूर्वं सर्गादौ प्रजाः सृष्ट्वा तासामभ्युदयनिःश्रेयसप्राप्तिसाधनं वेदार्थसंप्रदायमाविष्कुर्वता प्रोक्ता मया सर्वज्ञेनेश्वरेण। हेऽनघापाप, तत्र का सा द्विविधा निष्ठेत्याह-तत्र ज्ञानयोगेन ज्ञानमेव योगस्तेन साख्यानामात्मविषयविवेकज्ञानवतां ब्रह्मचर्याश्रमादेव कृतसंन्यासानां वेदान्तविज्ञानसुनिश्चितार्थानां परमहंसपरिव्राजकानां ब्रह्मण्येवावस्थितानां निष्ठा प्रोक्ता, कर्मयोगेन कर्मैव योगः कर्मयोगस्तेन कर्मयोगेन योगिनां कर्मिणां निष्ठा प्रोक्तेत्यर्थः। यदि चैकेन पुरुषेणैकस्मै पुरुषार्थाय ज्ञानं कर्म च समुच्चित्यानुष्ठेयं भगवतेष्टमुक्तं वक्ष्यमाणं वा गीतासु वेदेषु चोक्तं कथमिहार्जुनायोपसन्नाय

प्रियाय विशिष्टभिन्नपुरुषकर्तृके एव ज्ञानकर्मनिष्ठे ब्रूयात्। यदि पुनरर्जुने ज्ञानं कर्म च द्वयं श्रुत्वा स्वयमेवानुष्ठास्यत्यन्येषां तु भिन्नपुरुषानुष्ठेयतां वक्ष्यामिति मतं भगवतः कल्प्येत तदा रागद्वेषवानप्रमाणभूतो भगवान्कल्पितः स्यात्। तच्चायुक्तं, तस्मात् कयापि युक्त्या न समुच्चयोज्ञानकर्मणोः।।३।।

यदर्जुनेनोक्तं कर्मणो ज्यायस्त्वं बुद्धेस्तच्च स्थितमनिराकरणात्। तस्याश्च ज्ञानानिष्ठायाः संन्यासिनामेवानुष्ठेयत्वं भिन्नपुरुषानुष्ठेयत्ववचनाच्च भगवत एवमेवानुमतमिति गम्यते। मां च बन्धकारणे कर्मण्येव नियोजयसीति विषण्णमनसमर्जुनं कर्म नारभ इत्येवंमन्वानमालक्ष्याहभगवान्-न कर्मणामनारम्भादिति। अथवा ज्ञानकर्मनिष्ठयोः परस्परविरोधादेकेन पुरुषेण युगपदनुष्ठातुमशक्यत्वे सतीतरेतरानपेक्षयोरेव पुरुषार्थहेतुत्वे प्राप्ते कर्मनिष्ठाया ज्ञाननिष्ठप्राप्तिहेतुत्वेन पुरुषार्थहेतुत्वं न स्वातन्त्र्येण, ज्ञाननिष्ठा तु

कर्मनिष्ठोपायलब्धात्मिका सती स्वातन्त्रयेण पुरुषार्थहेतुरन्यानपेक्षेत्येतमर्थं दर्शयिष्यन्नाह भगवान्ष न कर्मणामनारम्भादप्रारम्भात् कर्मणां क्रियाणां यज्ञादीनामिह जन्मनि जन्मान्तरे वानुष्ठितानामुपात्तदुरितक्षयहेतुत्वेन सत्त्वशुद्धिकारणानां तत्कारणत्वेन नैष्कर्म्यलक्षणां पुरुषो नाधिगतच्छतीति हेत्वाकाङ्क्षायामाह-नहिति। न हि यस्मात् क्षणमपि कालं जातु कदाचित् कश्चित्तिष्ठत्यकर्मकृत् सन्। कस्मात् कार्यते हि यस्मादवश एव कर्म सर्वः प्राणी प्रकृतिजैः प्रकृतितो जातैः सत्त्वरजस्तमोभिर्गुणैः। अज्ञ इति वाक्यशेषः। यतो वक्ष्यति 'गुणैर्यो न विचाल्यते' इति। साख्यानां पृथक्करणादज्ञानामेव हि कर्मयोगो न ज्ञानिनाम्। ज्ञानिनां। तु गुणैरचाल्यमानानां स्वश्चलनाभावात्कर्मयोगो नोपपद्यते। तथाच व्याख्यातं वेदाविनाशिनमित्यत्र।।५।।

यस्त्वनात्मज्ञश्चोदितं कर्म नारभत इति तदसदेवेत्याह-कर्मेन्द्रियाणीति। कर्मेन्द्रियाणि हस्तादिनि संयम्य संहृत्य य आस्ते तिष्ठति मनसा स्मरंश्चिन्तयन्निन्द्रियार्थान्विषयान् विमूढात्मा विमूढान्तःकरमो मिथ्याचारो मृषाचारः पापाचारः स उच्यते।।६।।

यस्त्विति। यस्तुपुनः कर्मण्यधिकृतोऽज्ञोबुद्धइन्द्रियाणि मनसा नियम्यारभतेऽर्जुन कर्मेन्दियैर्वाक्पाण्यादिभिः। किमारभत इत्याह। कर्मयोगमसक्तः सन् स विशिष्यत इतरस्मान्मिथ्याचारात्।।७।।

यत एवमतः-नियममिति। नियतं नित्यं यो यस्मिन्कर्मण्यधिकृतः फलाय चाश्रुतं तन्नियतं कर्म तत् कुरु त्वं हेऽर्जुन, यतः कर्म ज्यायोऽधिकतरं फलतो हि यस्मात्तदकर्मणोऽकरणादनारम्भात्। कथं शरीरयात्रा शरीरस्थितिरपि च ते तव न प्रसिद्धिं न

गच्छेदकर्मणोऽकरणात्। अतो दृष्टः कर्माकर्मणोर्विशेषो लोके ।।८।।

यच्च मन्यसे बन्धार्थत्वात्कर्म न कर्तव्यमिति तदप्यसत्, कथं-यज्ञार्थादिति। 'यज्ञो वै विष्णुः' इति श्रुतेर्यज्ञ ईश्वरस्तदर्भं यत्क्रियते तद्यज्ञार्थं कर्म, तस्मात्कर्मणोऽन्यत्रान्येन कर्मणा लोकोऽयमधिकृतः कर्मकृत् कर्मबन्धनः कर्म बन्धनं यस्य सोऽयं कर्मबन्धनो लोको नतु यज्ञार्थादतस्तदर्थं यज्ञार्थं कर्म कौन्तेय, मुक्तसङ्गः कर्मफलसङ्गवर्जितः सन् समाचर निर्वर्तय।।९।।

इतश्चाधिकृतेन कर्म कर्तव्यं-सहेति। सहयज्ञा यज्ञसहिताः प्रजास्त्रयो वर्णास्ताः सृष्ट्वोत्पाद्य पुरा पूर्वं सर्गादावुवाचोक्तवान्प्रजापतिः प्रजानां स्त्रष्टा, अनेन यज्ञेन प्रसविष्यध्वं प्रसवो वृद्धिरुत्पत्तिस्तां कुरुध्वम्। एष यज्ञो वो युष्माकमस्तु भवत्विष्टकामधुगिष्टानभिप्रेतान्कामान्फलविशेषान्दोग्धीतीष्टकामधुक्।।१०।।

कथं-देवानिति। देवानिन्द्रादीन् भावयत वर्धयतानेन यज्ञेन, ते देवा भावयन्त्वाप्याययन्तु वृष्ट्यदिना वो युष्मान्, एवं परस्परमन्योन्यं भावयन्तः श्रेयः परं ज्ञानप्राप्तिक्रमेणावाप्स्यथ, स्वर्गं वा परं श्रेयोऽवाप्स्यथ।।११।।

किंच-इष्टान्भोगानिति। इषअटानभिप्रेतान्भोगान् हि वो युष्मभ्यं देवा दास्यन्ते वितरिष्यन्ति स्त्रीपशुपुत्रादीन् यज्ञभाविता यज्ञैर्वर्धितास्तोषिता इत्यर्थः। तैर्दैवैर्दत्तान्भोगानप्रदायात्त्वानृण्यमकृत्वेत्यर्थः, एभ्यो देवेभ्यो यो भुङ्क्ते स्वदेहेन्द्रियाण्येव तर्पयति स्तेन एव तस्कर एव स देवादिस्वापहारी।।१२।।

यज्ञेति। ये पुनर्देवयज्ञादीन्निर्वर्त्य तच्छिष्टमशनममृताख्यमशितुं शीलं येषां ते यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः सर्वपापैश्चुल्लयादिपञ्चसूनाकृतैः प्रमादकृतहिंसादिजनितैश्चान्यैः। ये त्वात्मम्भरयो भुञ्जते ते त्वघं पापं स्वयमपि पापा ये पचन्ति पाकंनिर्वर्तयन्त्यात्मकारणादात्महेतोः।।१३।।

इतश्चाधिकृतेन कर्म कर्तव्यम्। जगच्चक्रप्रवृत्तिहेतुर्हि कर्म। कथमिति उच्यते-अन्नाद्भवन्तीति। अन्नाद्भुक्ताल्लोहितरेतः परिणतात्प्रत्यक्षं भवन्ति जायन्ते भूतानि, पर्जन्याद्वृष्टेरन्नस्य संभवोऽन्नसंभवः, यज्ञाद्भवति पर्जन्यः 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' इति स्मृतेः। यज्ञोऽपूर्वं स च यज्ञः कर्मसमुद्भव ऋत्विग्यजमानयोश्च व्यापारः कर्म ततः समुद्भवो यस्य यज्ञस्यापूर्वस्य स यज्ञः

कर्मसमुद्भवः।।१४।।

तच्च कर्मेति। कर्म ब्रह्मोद्भवं ब्रह्म वेदः स उद्भवः कारणं यस्य तत् कर्म ब्रह्मोद्भवं विद्धि जानीहि। ब्रह्म पुनर्वेदाख्यमक्षरसमुद्भवम्। अक्षरं ब्रह्म परमात्मा समुद्भवो यस्य तदक्षरसमुद्भवं ब्रह्म वेद इत्यर्थः।यस्मात्साक्षात्परमात्माख्यादक्षरात्पुरुषनिःश्वासवत् समुद्भुतं ब्रह्म तस्मात्सर्वार्थप्रकाशकत्वात्सर्वगतम्।

सर्वगतमपि सन्नित्यं सदा यज्ञविधिप्रधानत्वाद् यज्ञे प्रतिष्ठितम्।।१५।।

एवमिति। एवमित्थमीश्वरेण वेदयज्ञपूर्वकं जगच्चक्रं प्रवर्तितं नानुवर्तयतीह लोके यः कर्मण्यधिकृतः सन्नघायुरघं पापमायुर्जीवनं यस्य योऽघायुः पापजीवन इति यावत्, इन्द्रियाराम इन्द्रियैराराम आरमणमाक्रीडा विषयेषु यस्य स इन्द्रियारामो मोघं वृथा हेपार्थ, स जीवति।

तस्मादज्ञेनाधिकृतेन कर्तव्यमेव कर्मेति प्रकरणार्थः। प्रागात्मज्ञाननिष्ठायोग्यताप्राप्तेस्तादर्थ्येन कर्मयोगनुष्ठानमधिकृतेनानात्मज्ञेन कर्तव्यमेवेत्येतत् 'न कर्मणामनारम्भाद्' इत्यत आरभ्य 'शरीरयात्रापि च ते न प्रसिध्येदकर्मणः' इत्येवमन्तेन प्रतिपाद्य 'यज्ञार्थात्कर्मणोऽन्यत्र' इत्यादिना 'मोघं पार्थ स जीवति' इत्येवमन्तेनापि ग्रन्थेन प्रासङ्गिकमधिकृतस्यानात्मविदः कर्मानिष्ठाने बहुकारणमुक्तं तदकरणे च दोषसंकीर्तनं कृतम्।।१६।।

एवं स्थिते किमेवं प्रवर्तितं चक्रं सर्वेणानुवर्तलीयमाहोस्वित्पूर्वोक्तकर्मयोगानुष्ठानोपायप्राप्यानात्मविदो ज्ञानयोगेनैव निष्ठामात्मविद्भिः साख्यैरनुष्ठेयामप्राप्तेनैवेत्येवमर्थमर्जुनस्य प्रश्नमाशङ्क्य स्वयमेव वा शास्त्रार्थस्य विवेकप्रतिपत्त्यर्थमेव तं वैतमात्मानं विदित्वा निवृत्तमिथ्याज्ञानाः सन्तो ब्राह्मणा मिथ्याज्ञानवद्भिरवश्यं कर्तव्येभ्यः पुत्रैषणादिभ्यो व्युत्थायाथ भिक्षाचर्ये शरीरस्थितिमात्रप्रयुक्तं चरन्ति न

तेषामात्मज्ञाननिष्ठाव्यतिरेकेणान्यत्कार्यमस्तीत्येवं श्रुत्यर्थमिह गीताशास्त्रे प्रतिपादयिषितमाविष्कुर्वन्नाह भगवान्-यस्त्विति। यस्तु सांख्य आत्मज्ञाननिष्ठ आत्मरतिरात्मन्येव रतिर्न विषयेषु यस्य स आत्मरतिरेव स्याद्भवेदात्मतृप्तश्चात्मनैव तृप्तो नान्नरसादिना स मानवो मनुष्यः संन्यास्यात्मन्येव च संतुष्टः। संतोषो हि बाह्यार्थलाभेन सर्वस्य भवति तमनपेक्ष्यात्मन्येव च संतुष्टः सर्वतो वीततृष्ण इत्येतद्। य ईदृश आत्मवित्तस्य कार्यं करणीयं न विद्यते नास्तात्यर्थः।।१७।।

किंच नैवेति। नैव तस्य परमात्मरतेः कृतेन कर्मणार्थः प्रयोजनमस्ति। अस्तु तर्ह्यकृतेनाकरणेन प्रत्यवायाख्योऽनर्थो नाकृतेनेह लोके कश्चन कश्चिदपि प्रत्यवायप्राप्तिरूप आत्महानिलक्षणो वा नैवास्ति। न चास्य सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु भूतेषु कश्चिदर्थव्यपाश्रयः प्रयोजननिमित्तक्रियासाध्यो व्यापाश्रयो व्यपाश्रयणम्। कंचिद्भूतविशेषमाश्रित्य न साध्यः कश्चिदर्थोऽस्ति। येन तदर्थाक्रियानुष्ठेया स्यात्।न त्वमेतस्मिन् सर्वतः संण्लुतोदकस्थानीये सम्यग्दर्शने वर्तसे।।१८।।

यत एवं तस्मादिति। तस्मादसक्तः सङ्गवर्जितः सततं सर्वदा कार्यं कर्तव्यं नित्यं कर्म समाचर निर्वर्तय। आसक्तो हि यस्मात् समाचारन्नीश्वराप्थं कर्म कुर्वन् मोक्षमाप्नोति पूरुषः सत्त्वशुद्धिद्वारेणेत्यर्थः।।१९।।

यस्माच्च कर्मणैवेति। कर्मणैव हि तस्मात् पूर्वे क्षत्रिया विद्वांसः संसिद्धिं मोक्षं गन्तुमास्थिताः

प्रवृत्ता जनकादयो जनकाश्वपतिप्रभृतयः। यदि ते प्राप्तसम्यग्दर्शनास्ततो लोकसंग्रहार्थं प्रारब्धकर्मत्वात् कर्मणा सहैवासंन्यस्यैव कर्म संसिद्धिमास्थिता इत्यर्थः। अथाप्राप्तसम्यग्दर्शना जनकादयस्तदा कर्मणा सत्त्वशुद्धिसाधनभीतेन क्रमेण संसिद्धिमास्थिता इति व्याख्येयः श्लोकः। अथ मन्यते पूर्वैरपि जनकादिभिरप्यजानद्भिरेव कर्तव्यं कर्म कृतं तावता नावश्यमन्येन कर्तव्यं सम्यग्दर्शनवता कृतार्थेनेति, तथापि प्रारब्धकर्मायत्तस्त्वं लोकसंग्रहमेवा लोकस्योन्मार्गप्रवृत्तिनिवारणं लेकसंग्रहस्तमेवापि प्रयोजनं संपश्यन्कर्तुमर्हसि।।२०।।

लोकसंग्रहं कः कर्तुमर्हति कथं चेत्युच्यते-यद्यदिति। यद्यत् कर्माचरति येषु येषु श्रेष्ठः प्रधानभूतस्तत्तदेव

कर्माचरतीतरोऽन्यो जनस्तदनुगतः। किंच श्रेष्ठो यत्प्रमाणं कुरुते लौकिकं वैदिकं वा

लोकस्तदनुवर्तते तदेव प्रमाणीकरोतीत्यर्थः।।२१।।

यद्यत्रते लोकसंग्रहकर्तव्यतायां विप्रतिपत्तिस्तर्हि मां किं न पश्यसि-न मे इति। न मे मम पार्थ, नास्ति न विद्यते कर्तवेयं त्रिष्वपिलोकेषु किंचिन किंचिदपि। कस्मान्नानवाप्तमप्राप्तमवाप्तव्यं प्रापणीयं तथापि वर्त एव च कर्मण्यहम्।।२२।।

यदि हि पुनरहं न वर्तेयं जातु कदाचित्कर्मण्यतन्द्रितोऽनलसः सन् मम श्रेष्ठस्य सतो वर्त्म मार्गमनुवर्तन्ते मनुष्याः हे पार्थ, सर्वशः सर्वप्रकारैः।।२३।।

तथाच को दोष इत्याह-उदिति। उत्सीदेयुर्विनष्येयुरिमे सर्वे लोका लोकस्थितिनिमित्तस्य कर्मणोऽभावात्

न कुर्यां कर्म चेदहम्, किंच संकरस्य च कर्ता स्याम्। तेन कारणेनोपहन्यामिमाः प्रजाः प्रजानामनुग्रहाय प्रवृत्त उपहतिमुपहननं कुर्यामित्यर्थः। ममेश्वरस्याननुरूपमापद्येत यदि पुनरहमिव त्वं कृतार्थबुद्धिरात्मविदन्यो वा तस्याप्यात्मनः कर्तव्याभावेऽपि परानुग्रह एव कर्तव्य इति।।२४।।

सक्ता इति। सक्ताः कर्मण्यस्य कर्मण फलं मम भविष्यतीति केचिदविद्वांसो यथा कुर्वन्ति भारत, कुर्याद्विद्वानात्मवित्तथासक्तः सन्। तद्वत् किमर्थं करोति तच्छृणु चिकीर्षुर्यथा कर्तुमिच्छुर्लोकसंग्रहम्।।२५।।

एवं लोकसंग्रहं चिकीर्षोर्ममात्मविदो न कर्तव्यमस्त्यन्यस्य वा लोकसंग्रहं मुक्त्वा ततस्तस्यात्मविद इदमुपदिष्यते-नेति। दुद्धेर्भेदो दुद्धिभेदो भयेदं कर्तव्यं भोक्तव्यं चास्य कर्मणः फलमिति निश्चितरीपाया बुद्धेर्भेदनं चालनं बुद्धिभेदस्तं न जनयेन्नोत्पादयेदज्ञानामविवेकिनां कर्मसङ्गिनां कर्मण्यासक्तानामासङ्गवतां, किंतु कुर्याच्चोषयेत्कारयेत् सर्वकर्माणि विद्वन्स्वयं तदेवाविदुषां कर्म युक्तोऽभियुक्तः समाचरन्।।२६।।

अविद्वानज्ञः कथं कर्मसु सज्जत इत्याह-प्रकृतेरिति। प्रकृतेः प्रकृतिः प्रधआनं सत्त्वरजस्तमसां गुणानां साम्यावस्था तस्याः प्रकृतेर्गुणैर्विकारैः कार्यकरणरीपैः क्रियमाणानि कर्माणि लौकिकानि शास्त्रीयाणि च सर्वशः सर्वप्रकारैरहंकारविमूढात्मा कार्यकरणसंघात आत्मप्रत्ययोऽहंकारस्तेन विविधं नानाविधं मूढ आत्मान्तःकरणं यस्य सोऽयं कार्यकरणधर्मा कार्यकरणाभिमान्यविद्यया कर्माण्यात्मनि मन्यमानस्तत्तत्कर्मणामहं कर्तेति मन्यते।।२७।।

यः पुनर्विद्वान् तत्त्वविदिति। तत्त्ववित्तु महाबाहो, कस्य तत्त्वविद् गुणकर्मविभागयोर्गुणविभागस्य कर्मविभागस्य च तत्त्वविदित्यर्थः। गुणाः करणात्मका गुणेषु

विषयात्मकेषु वर्तन्ते नात्मेति मत्वा न सज्जते सक्तिं न करोति।।२८।।

ये पुनः प्रकृतेरिति। प्रकृतेर्गुणैः सम्यङ् मूढाः संमोहिताः सन्तः सज्जन्ते गुणानां कर्मसु गुणकर्मसु वयं कर्म कुर्मः फलायेति, तान् कर्मसङ्गिनोऽकृत्स्नविदः कर्मफलमात्रदर्शिनो मन्दान्मन्दप्रज्ञान्कृत्स्नविदात्मवित्स्वयं न विचालयेद् बुद्धिभेदकरणमेव चालनं तन्न कुर्यादित्यर्थः।।२९।।

कथं पुनः कर्मण्यधिकृतेनाज्ञेन मुमुक्षुणा कर्म कर्तव्यमित्युच्यते-मयीति। मयि वासुदेवे परमेश्वरे सर्वज्ञे सर्वात्मनि सर्वाणि कर्माणि संन्यस्य निक्षिप्यध्यात्मचेतसा विवेकबुद्धयाहं कर्तेशवराय भृत्यवत्करोमीत्यनया बुद्धया। किंच निराशीस्त्यक्ताशीर्निर्ममो ममभावश्च निर्गतो यस्य तव स त्वं निर्ममो भूत्वा युध्यस्व विगतज्वरो विगतज्वरो विगतसंतापो विगतशोकः

सन्नित्यर्थः।।३०।।

यदेतन्मतं कर्म कर्तव्यमिति सप्रमाणमुक्तं तत्था-ये म इति। येमे मदीयमिदं मतमनुतिष्ठन्त्यनुवर्तन्ते मानवा मनुष्याः श्रद्धावन्तः श्रद्दधाना अनसूयन्तोऽसूयां च मयि गुरौ वासुदेवेऽकुर्वन्तो मुच्यन्ते तेऽप्येवभूताः कर्मभिर्धर्माधर्माख्यैः।।३१।।

ये त्विति। ये तु तद्विपरीता एतन्मम मतमभ्यसूयन्तो नानुतुष्ठन्ति नानुवर्तन्ते मे मतं सर्वेषु ज्ञानेषु विविधं मूढास्ते सर्वज्ञानविमूढांस्तान्विद्धि नष्टान् नाशं गतानचेतसोऽविवेकिनः।।३२।।

कस्मात् पुनः कारणात्त्वदीयं मतं नानुतिष्ठन्ति परधर्माननुतिष्ठन्ति, स्वधर्मं च नानुवर्तन्ते, त्वत्प्रतिकूलाः कथं न बिभ्यति त्वच्छासनातिक्रमदोषात्, तत्राह-सद्दशमिति। सद्दशमनुरूपं चेष्टते। कस्याः? स्वस्याः स्वकीयायाः प्रकृतेः। प्रकृतिर्नाम पूर्वकृतधर्माधर्मादिसंस्कारो वर्तमानजन्मादावभिव्यतक्तः सा प्रकृतिस्तस्याः सद्दशमेव सर्वो जन्तुर्ज्ञानवानपि किं पुनर्मूर्खः। तस्मात् प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति मम

वान्यस्य वा।।३३।।

यदि सर्वो जन्तुरात्मनः प्रकृतिसदृशमेव चेष्टते नच प्रकृतिशून्यः कश्चिदस्ति ततः पुरुषकारस्य विषयानुपपत्तेः शास्त्रानर्थक्यप्राप्ताविदमुच्यते-इन्द्रियस्येति। इन्द्रियस्येन्द्रयस्यार्थे सर्वेन्द्रियाणामर्थे शब्दादिविषये इष्टे रागोऽनिष्टे द्वेष इत्येवं प्रतीन्द्रियार्थे रागद्वेषाववश्यंभाविनौ। तत्रायं पुरुषकारस्य शास्त्रार्थस्य च विषय उच्यते। शास्त्रार्थे प्रवृत्तः पूर्वमेव रागद्वेषयोर्वशं नागच्छेत्, या हि पुरुषस्य प्रकृतिः सा रागद्वेषपुरःसरैव स्वकार्ये पुरुषं प्रवर्तयति तदा स्वधर्मपरित्यागः परधर्मानुष्ठानं च भवति, यदा पुना रागद्वेषौ तत्प्रतिपक्षेण नियमयति तदा शास्त्रदृष्टिरेव पुरुषो भवति न प्रकृतिवशः, तस्मात्तयो रागद्वेषयोर्वशं न गच्छेत्। यतस्तौ ह्यस्य पुरुषस्य

परिपन्थिनौ श्रेयोमार्गस्य विघ्नकर्तारौ तस्करावित्यर्थः३४।।

तत्र रागद्वेषप्रयुक्ते मन्यते शास्त्रार्थमप्यन्यथा परधर्मोऽपि धर्मत्वादनुष्ठेय एवेति तदसत्-श्रेयानिति। श्रेयान्प्रशस्यतर

स्वो धर्मः स्वधर्मो विगतगुणोऽप्यनुष्ठीयमानः परधर्मात् स्वनुष्ठितात् साङ्गुण्येन संपादितादपि, स्वधर्मे स्थितस्य निधनं मरणमपि श्रेयः परधर्मे स्थितस्य जीवितात्, कस्मात् परधर्मो भयावहः, नरकादिलक्षणं भयमावहति यतः।।३५।।

यद्यप्यनर्थमूलं ध्यायतो विषयान्पुंसो रागद्वेषौ ह्यस्यपरिपन्थिनाविति‌चोक्तं विक्षिप्तमनवधारितं च यदुक्तं तत्संक्षिप्तं निश्चितं चेदमेवेति ज्ञातुमुच्छन्नर्जुन उवाच। ज्ञाते हि तस्मिंस्त दुच्छेदाय यत्नं

कुर्यामिति-अथेति। अथ केन हेतुभूतेन प्रयुक्तः सन् राज्ञेव भृत्योऽयं पापं कर्म चरत्याचरति पुरुषः स्वयमिच्छन्नपि हे वार्ष्णेय, वृष्णिकुलप्रसूत, बलादिव नियोजितो राज्ञेवेत्युक्तो दृष्टान्त।।३६।।

शृणु त्वं तं वैरिणं सर्वानर्थकरं यं त्वं पृच्छसि-श्रीभगवानुवाच। 'ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः। वैराग्यस्याथ मोक्षस्य षण्णां भग इतीङ्गना'। ऐश्वर्यादिषट्कं यस्मिन् वासुदेवे नित्यमप्रतिबन्धत्वेन सामस्त्येन च वर्तते 'उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम्। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति'। उत्पत्यदिविषयं च विज्ञानं यस्य स वासुदेवो वाच्यो भगवानिति। काम इति। काम एष सर्वलोकशत्रुर्यन्निमित्ता सर्वानर्थप्राप्तिः प्राणिनां स एष कामः प्रतिहतः केनचित्क्रोधत्वेन परिणमते। अतः क्रोधोऽप्येष एव। रजोगुणसमुद्भवो रजश्च तद् गुणश्च रजोगुणः समुद्भवो यस्य स कामो रजोगुणसमुद्भवो रजोगुणस्य वा समुद्भवः, कामो ह्युद्भूतो

रजः प्रवर्तयन् पुरुषं प्रवर्तयति। तृष्णया ह्यहंकारित इति दुःखितानां रजःकार्ये सेवादौ प्रवृत्तानां प्रलापः श्रूयते। महाशनो महदशनमस्येति महाश्नोऽतएव महापाप्मा कामेन प्रेरितो जन्तुः पापं करोति। अतो विद्धयेनं काममिह संसारे वैरिणम्।।३७।।

कथं वैरीति दृष्टान्तैः प्रत्याययति-धूमेनेति। धूमेन सहजेनाव्रियते वह्निः प्रकाशात्मकोऽप्रकाशात्मकेन यथा वाऽऽदर्शो मलेन च यथोल्बेन गर्भवेष्टनेन जरायुणावृत आच्छादितो गर्भस्तथा तेनेदमावृतम्।।३८।।

किं पुनस्तदिदंशब्दवाच्यं यत् कामेनावृतमित्युच्यते-आवृतमिति। आवृतमेतेन ज्ञानं ज्ञानिनो नित्यवैरिणा। ज्ञानी हि जानात्यनेनाहमनर्थे प्रयुक्तः पूर्वमेवेति। दुःखी च भवति नित्यमेव, अतोऽसौ ज्ञानिनो नित्यवैरी नतु

मूर्खस्य। स हि कामं तृष्णाकाले मित्रमिव पशयंस्तत्कार्ये दुःखे प्राप्ते जानाति तृष्णायाहं दुःखित्वमापादित इति न पूर्वमेवातो ज्ञानिन एव नित्यवैरी। किंरूपेण, कामरूपेण काम इच्छैव रूपमस्येति कामरूपस्तेन दिष्पूरेण दुःखेन पूरणमस्येति दुष्पूरस्तेनानलेन नास्यालं पर्याप्तिर्विद्यत इत्यनलस्तेन।।३९।।

किमधिष्ठानः पुनः कामो ज्ञनस्यावणत्वेन वैरी सर्वस्येत्यपेक्षायामाह, ज्ञाते हि शत्रोरधिष्ठाने सुख्न शत्रुनिबर्हणं कर्तुं शक्यत इति-इन्द्रियाणीति। इन्द्रियाणि मनो बुद्धिश्चास्य कामस्याधिष्ठानमाश्रय उच्यते, एतैरिन्द्रियादिभिराश्रयैर्विमोहयति विविधं मोहयत्येष कामो ज्ञानमावृत्याच्छद्य देहिनं शरीरिणम्।।४०।।

यत एवं-तस्मादिति। तस्मात्त्वमिन्द्रियाण्यादौ पूर्वं नियम्य वशीकृत्य भरतर्षभ, पाप्मानं कामं प्रजहिहि परित्यज, एनं प्रकृतं वैरिणं ज्ञानविज्ञाननाशनं ज्ञानं शास्त्रत आचार्यतश्चात्मादीनामबरोधः विज्ञानं विशेषस्तदनुभवस्तयोर्ज्ञानविज्ञानयोः श्रेयःप्राप्तिहेत्वोर्नाशनं प्रजहिब्यात्मनः परित्यजेत्यर्थः।।४१।।

इन्द्रियाण्यादौ नियम्य कामं शत्रुं जहिहीत्युक्तं तत्र किमाश्रयः कामं जह्यादित्युच्यते-इन्द्रियाणीति। इन्द्रियाणि श्रोत्रादीनि पञ्च देहम स्थूलं ब३ह्यं परिच्छिन्नं चापेक्ष्य सौक्ष्म्यान्तरस्थत्वव्यापित्वाद्यपेक्ष्य पराणि प्रकृष्टान्याहुः पण्डिताः। तथेन्द्रियेभ्यः परं मनः संकल्पविकल्पात्मकम्। तथा मनसस्तु परा बुद्धिर्निश्चयात्मिका। तथा यः सर्वदृश्येभ्यो बुध्द्यन्तेभ्योऽभ्यनतरो यं देहिनमिन्द्रियादिभिराश्रयैर्युक्तञ्च कामो ज्ञानावरणद्वारेण मोहयतात्युक्तं स हुद्धेर्द्रष्टा परमात्मा।।४२।।

एवमिति। एवं बुद्धेः परमात्मानं बुद्ध्वा ज्ञात्वा संस्तभ्य सम्यक्स्तम्भनं कृत्वा स्वेनैवात्मना संस्कृतेन मनसा सम्यक्समाधायेत्यर्थः। जह्येनं शत्रुं हे महाबाहो, कामरूपं दुरासदं दुःखेनासद आसादनं प्राप्तिर्यस्य तं दुरासदं दुर्विज्ञेयानेकविशेषमिति।।४३।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यपूज्यपादश्रीशंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये कर्मप्रशंसायोगो नाम तृतीयोऽध्यायः।।३।।

चतुर्थोऽध्यायः।

योऽयं योगोऽध्यायद्वयेनोक्तो ज्ञाननिष्ठालक्षणः ससंन्यासः कर्मयोगोपायो यस्मिन् वेदार्थः परिसमाप्तः प्रवृत्तिलक्षणो निव-त्तिलक्षणश्च, गीतासु च सर्वास्वयमेव योगो विवक्षितो भगवताऽतः परिसमाप्तं वेदार्थं मन्वानस्तं वंशकथनेन स्तौति श्रीभगवान्। इममध्यायद्वयेनोक्तं योगं विवस्वत आदित्याय सर्गादौ प्रोक्तवानहं जगत्परिपालयितृणां क्षत्रियाणां बलाधानाय। तेन योगबलेन युक्ताः समर्था भवन्ति ब्रह्म परिरक्षितुम्। ब्रह्मक्षत्रे परिपालिते जगत्परिपालयितुमसम्। अव्ययमव्ययफलत्वात्। नह्यस्य सम्यग्दर्शननिष्ठालक्षणस्य मोक्षाख्यं फलं व्येति। स च विवस्वान्मनवे प्राह। मनुरिक्ष्वाकवे

स्वपुत्रायादिराजायाब्रवीत्।।१।।

एवमिति। एवं क्षत्रियपरंपराप्राप्तमिमं राजर्षयो राजानश्च त ऋषयश्च राजर्षयो विदुरिमं योगम्। स योगः कालेनेह महता दीर्घेण नष्टो विच्छिन्नसंपआदायः संवृत्तः। हे परंतप, आत्मनो विपक्षभूताः पर उच्यन्ते तान् शौर्यतेजोगभस्तिभिर्भानुरिव तापयतीति परंतपः शत्रुतापन इत्यर्थः।।२।।

दुर्बलानजितेनद्रियान्प्राप्य नष्टं योगमिममुपलभ्य लोकं चापुरुषार्थसंबन्धिनं-स एवायमिति। स एवायं मया ते तुभ्यमद्येदानीं योगः प्रोक्तः पुरातनः, भक्तोऽसि मे सखा चासीति। रहस्यं हि यस्मादेतदुत्तमं योगो ज्ञानमित्यर्थः।।३।।

भगवता विप्रतिषिद्धमुक्तमिति मा भूत्कस्यचिद्बुद्धिरिति परिहारार्थं चोद्यमिव कुर्वन्नर्जुन उवाच-अपरमिति। अपरमर्वाग् वसुदेवगृहे भवतो जन्म, परं पूर्वं सर्गादौ जन्मोत्पत्तिर्विवस्वत आदित्यस्य तत्कथमेतद्विजानीयामविरुद्धार्थतया यस्त्वमैवादौ प्रोक्तवानिमं योगं स एव त्वसिदानीं मह्यं प्रोक्तवानसीति।।४।।

या वासुदेवेऽनीश्वरासर्वज्ञाशङ्का मूर्खाणां तां परिहरन् श्रीभगवानुवाच यदर्थो ह्यर्जुनस्य प्रश्नः- बहूनीति। बहूनि मे मम व्यतीतान्यतिक्रान्तानि जन्मानि तव च हेऽर्जुन, तान्यहं वेद जाने सर्वाणि। न त्वं वेत्थ न जानीषे। धर्माधर्मादिप्रतिबद्धज्ञानशक्तित्वात्। अहं पुनर्नित्य शुद्धबुद्धमुक्त स्वभावत्वादनावरणज्ञानशक्ति रिति वेदाहं हे परंतप।।५।। कथं तर्हि तव न्त्येश्वरस्य धर्माधर्माभावेऽपि जन्मेत्युच्यते-अजोऽपीति। अजोऽपि जन्मरहितोऽपि संस्तथाऽव्ययात्माऽक्षीणज्ञानशक्तिस्वभावोऽपि संस्तथा भूतानां ब्रह्मादिस्तम्बपर्यन्तानामीशवर ईशनशीलोऽपि सन् प्रकृतिं स्वां मम वैष्णवीं मायां त्रिगुणात्मिकां यस्या वशे सर्वं जगद्वर्तते यया मोहितं ,त् स्वमात्मानं वासुदेवं न जानाति तां प्रकृतिं स्वामधिष्ठाय वशीकृत्य संभवामि देहवानिव भवामि जात इवात्ममाययात्मनो मायया न परमार्थतो लोकवत्।।६।।

तच्च जन्मं कदा किमर्थं चेत्यिच्यते-यदेति। यदा यदा हि धर्मस्य ग्लानिर्हानिर्वर्णाश्रमादिलक्षणस्य प्राणिनामभ्युदयनिःश्रेयससाधनस्य भवति भारत, अभ्युत्थानमुद्भवोऽधर्मस्य तदा तदात्मानं सृजाम्यहं मायया।।७।।

किमर्थं-परित्राणायेति। परित्राणाय परिरक्षणाय साधूनां सन्मार्गस्थानां, विनाशाय च दुष्कृतां पापकारिणाम्। किंच धर्मसंस्थापन्र्थाय धर्मस्य सम्यक्स्थापनं तदर्थे संभवामि युगे युगे प्रतियुगम्।।८।।

तत्-जन्मेति। जन्म मायारूपं, कर्म च साधुपरित्राणादि, मे मम दिव्यमप्राकृतमैश्वरमेवं यथेक्तं यो वेत्ति

तत्तवतस्तत्त्वेन यथावत्त्यक्त्वा देहमिमं पुनर्जन्म पुनरुत्पत्तिं नैति न प्राप्नोति मामेत्यागच्छति स मुच्यते हेऽर्जुन।।९।।

नैष मोक्षमार्ग इदानीं प्रवृत्तः किं तर्हि पूर्वमपि-वीतरागेति। वीतरागभयक्रोधा रागश्च भयं च क्रोधश्च वीता विगता येभ्यस्ते वीतरागभयक्रोधा मन्मया ब्रह्मविद ईश्वराभेददर्शिनो मामेव परमेश्वरमुपाश्रिताः। केवलज्ञाननिष्ठा इत्यर्थः। बहवोऽनेके ज्ञानतपसा ज्ञानमेव च परमात्मविषयं तपस्तेन ज्ञानतपसा पूताः परां

शुद्धिं गताः सन्तो मद्भावमीश्वरभावं मोक्षमागताः समनुप्राप्ताः। इतरतपोनिरपेक्षज्ञाननिष्ठा इत्यस्य लिङ्गं ज्ञानतपसेति विशेषणम्।।१०।।

तव तर्हि रागद्वेषौ स्तः, येन केभ्यश्चिदेवात्मभावं प्रयच्छसि न सर्वेभ्य इत्युच्यते-ये यथेति। ये यथा येन प्रकारेण येन प्रयोजनेन यत्फलार्थितया मां प्रपद्यन्ते तास्तथैव तत्फलादानेन भजाम्यनुगृह्णाम्यहमित्येतत्। तेषां मोक्षं प्रत्यनर्थित्वाद्। नह्येकस्य मुमुक्षुत्वं फलार्थित्वं च युगपत्संभवति। अतो ये फलार्थिनस्तान्फलप्रदानेन, ये यथोक्तकारिणस्त्वफलार्थिनो मुमुक्षवश्च तान्ज्ञानप्रदानेन, ये ज्ञानिनः संन्यासिनो मुमुक्षवश्च तान्मोक्षप्रदानेन, तथार्तानार्तिहरणेनेत्येवं यथआ प्रपद्यन्ते ये तांस्तथैव भजामात्यर्थः। न पुना रागद्वेषनिमित्तं मोहनिमित्तं वा कंचिद्भजामि। सर्वथापि सर्वावस्थस्य ममेश्वरस्य वर्त्म मार्गमनुवर्तन्ते मनुष्याः। यत्फसार्थितया यस्मिन्कर्मण्यधिकृता ये प्रयतन्ते ते मनुष्या उच्यन्ते। हेपार्थ, सर्वशः सर्वप्रकारैः।।११।।

यदि तवेश्वरस्य रागादिदोषाभावात्सर्वप्राणिष्वनुजिघृक्षायां तुल्यायां सर्वफलप्रदानसमर्थे च त्वयि सति वासुदेवः सर्वमिति ज्ञानेनैव मुमुक्षवः सन्तः कस्मात्त्वामेव सर्वे न प्रतिपद्यन्त इति शृणु तत्र कारणं-काङ्क्षन्तोऽभीप्सन्तः कर्मणां सिद्धिं फलनिष्पत्तिं प्रर्थयन्तो यजन्त इहास्मिंलोके देवता इन्द्राग्नयाद्याः, 'अथ योऽन्यां देवतामुपास्तेऽन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानाम्' इति श्रुतेः। तेषां हि भिन्नदेवतायाजिनां फलाकाङ्क्षिणां क्षिप्रं शीघ्रं हि यस्मान्मनुषे लोके मनुष्यलोके हि शास्राधिकारः। क्षिप्रं हि मानुषे लोक इति विशेषणादन्येष्वपि कर्मफलसिद्धिं दर्शयति भगवान्। मानुषे लोके वर्णाश्रमादिकर्माणीति शेषः, तेषां वर्णाश्रमाद्यधिकारिकर्मणां फलसिद्धिः क्षिप्रं भवति। कर्मजा कर्मणो जाता।।१२।।

मानुष एव लोके वर्णाश्रमादिकर्माधिकारो नान्येषु सोकेष्विति नियमः किंनिमित्त इति, अथवा वर्णाश्रमादिप्रविभागोपेता मनुष्या मम वर्त्मानुवर्तन्ते सर्वश इत्युक्तं कस्मात्पुनः कारणान्नियमेन तवैव वर्त्मानुवर्तन्ते नान्यस्येत्युच्यते-चातुर्वर्ण्यं चत्वार एव वर्णाश्चातुर्वर्ण्यं मयेश्वरेण सृष्टमुत्पादितं 'ब्राह्मणोऽस्य मुखमासीत्' इत्यादिश्रुतेः, गुणकर्मविभागशो गुणविभागशः कर्मविभागशश्च। गुणाः

सत्त्वरजस्तमांसि। तत्र सात्त्विकस्य सत्त्वप्रधानस्य ब्राद्मणस्य शमो दमस्तप इत्यादीनि कर्माणि। सत्त्वोपसर्जनरजः प्रधानस्य क्षत्रियस्य शौर्यतेजः प्रभृतीनि कर्माणि। तम उपसर्जनरजःप्रधानस्य वैश्यस्य कृष्यादीनि कर्माणि। रजउपसर्जनतमः प्रधानस्य शूद्रस्य शुश्रूषैव कर्मेत्येवं गुणकर्मविभागशश्चातुर्वर्ण्य मया सृष्टमित्यर्थः। तच्चेदं चातुर्वर्ण्यं नान्येषु लोकेष्वतो मानुषे लोके इति विशेषणम्। हन्त तर्हि चातुर्वर्ण्यसर्गादेः कर्मणः कर्तृत्वात्तत्फलेषु युज्यसेऽतो न त्वं नियुक्तमुक्तो नित्येश्वर इति। उच्यते। यद्यपि मायासंव्यवहारेण तस्य कर्मणः कर्तारमपि सन्तं मां परमार्थतो

विद्धयकर्तारम् अतएवाव्ययमसंसारिणं च मां विद्धि।।१३।।

येषां तु कर्मणां कर्तारं मां मन्यसे परमार्थतस्तेषामकर्तैवाहं यतः-नेति। न मां कर्माणि लिम्पन्ति देहाद्यारम्भकत्वेनाहंकाराभावात्। नच तेषां कर्मणां फलेषु मे स्पृहा तृष्णा। येषां तु संसारिणामहं कर्तेत्यभिमानः कर्मसु स्पृहा तत्फलेषु च तान्कर्माणि लिम्पन्तीति युक्तं तदभावान्न मां कर्माणि लिम्पन्तीति, एवं योऽन्योऽपि मामात्मत्वेनाभिजानाति नाहं कर्ता न मे कर्मफले स्पृहेति स कर्मभिर्न बध्यते। तस्यापी न देहाद्यारम्भकाणि कर्माणि भवन्तीत्यर्थः।।१४।।

नाहं कर्ता न मे कर्मफले स्पृहेति-एवमिति। एवं ज्ञात्वा कृतं कर्म पूर्वैरप्यतिक्रान्तैर्मुमुक्षुभिः, कुरु तेन कर्मैव त्वं न तूष्णीमासनं नापि संन्यासः कर्तव्यस्तस्मात्त्वं पूर्वैरप्यनुष्ठितत्वाद्यद्यनात्मज्ञस्त्वं तदात्मशुद्धयर्थं तत्त्वविच्चेल्लोकसंग्रहार्थं पूर्वैर्जनकादिभिः पूर्वतरं कृतं नाधुनातनं कृतं निर्वर्तितम्।।१५।।

तत्र कर्म चेत्कर्तव्यं त्वद्वचनादेव करोम्यहंकिं विशेषितेन पूर्वैः पूर्वतरं कृतमित्युच्यते यस्मान्महद्वैषम्यं कर्मणि, कथं-किं कर्मेति। किं कर्म किं चाकर्मेति कवयो मेधाविनोऽप्यत्रास्मिन्कर्मादिविषये मोहिता मोहं गताः अतस्ते तुभ्यमहं कर्माकर्म च प्रवक्ष्यामि। यज्ज्ञात्वा विदित्वा कर्मादि मोक्ष्यसेऽशुभात्संसारात्।।१६।।

न चैतत्त्वया मन्तव्यं, कर्म नाम देहादिचेष्टा लोकप्रसिद्धम्, अकर्म तदक्रिया तीष्णीमासनं, किं तत्र बोद्धव्यमिति। कस्मादुच्यते-कर्मण इति। कर्मणः शास्त्रविहितस्य हि यस्मादप्यस्ति बोद्धव्यं, बोद्धव्यं चास्त्येव विकर्मणः प्रतिषिद्धस्य तथाऽकर्मणश्च तूष्णींभावस्य बोद्धव्यमस्तीति त्रिष्वप्यध्याहारः कर्तव्यो यस्माद् गहना

विषमा दुर्ज्ञाना, कर्मण इत्युपलक्षणार्थं, कर्मादीनां कर्माकर्मविकर्मणां गतिर्याथात्म्यं तत्त्वमित्यर्थः।।१७।।

किं पुनस्तत्त्वं कर्मादेर्यद्बोद्धव्यं वक्ष्यामीति प्रतिज्ञातमुच्यते-कर्मणीति। कर्मणि कर्म क्रियत इति व्यापारमात्रं तस्मिन्कर्मण्यकर्म कर्माभावं यः पश्येदकर्मणि च कर्माभावे कर्तृतन्त्रत्वात्प्रवृत्तिनिवृत्त्योर्वस्त्वप्राप्यैव हि सर्व एव क्रियाकारकादिव्यवहारोऽविद्यभूमावेव कर्मयः पश्येत्पश्यति स बुद्धिमान् मनुष्येषु स युक्तो योगी कृत्स्नकर्मकृत्समस्तकर्मकृच्च स इति स्तूयते कर्माकर्मणोरितरेतरदर्शी। ननु किमिदं विरुद्धमुच्यते कर्मण्यकर्म यः पश्येदित्यकर्मणि च कर्मेति। नहि कर्माकर्म स्यादकर्म वा कर्म, तत्र विरुद्धं कथं पश्येद्द्रष्टा। नन्वकर्मैव परमार्थतःसत्कर्मवदवभासते मूढदृष्टेर्लोकस्य तथा कर्मैवाकर्मवत् तत्र यथाभूतदर्शनार्थमाह भगवान्-कर्मण्यकर्म यः पश्येदित्यादि। अतो न विरुद्धम्। बुद्धिमत्त्वाद्युपपत्तेश्च बोद्धव्यमिति च यथाभूतदर्शनमुच्यते । नच विपरीतज्ञानादशुभान्मोक्षणं स्याद्यज्ज्ञात्वा मोक्ष्यसेऽशुभादिति चोक्तम्।

तस्मात्कर्माकर्मणी त्यादि। अत्र च कर्म कर्मैव सत् कर्यकरणाश्रयं कर्मरहितेऽक्रिय आत्मनि सर्वैरध्यस्तं यतः पण्डितोऽप्यहं करोमीति मन्यते। अत आत्मसमवेततया सर्वलोकप्रसिद्धे कर्मणि नदीकूलस्थेष्विव वृक्षेषु गतिः प्रातिलोम्येनाकर्म कर्माभावं यथाभावं यथाभूतं गत्यभावमिव वृक्षेषु यः पश्येदकर्मणिच कार्यकरणव्यापारोपरमे कर्मवदात्मन्यध्यारोपिते तूष्णीमकुर्वन्सुखमास इत्यहंकाराभिसंधिहेतुत्वात्तस्मिन्नकर्मणि च कर्म यः पश्येत्। य एवं कर्माकर्मविभागज्ञः स बुद्धिमान्पण्डितो मनुष्येषु स युक्तो योगी कृत्स्नकर्मकृच्च सोऽशुभान्मोक्षितः कृतकृत्यो भवतीत्यर्थः।

अयं श्लोकोऽन्यथा व्याख्यातः कैश्चित्-कथं, नित्यानां किल कर्मणामीश्वरार्थेऽनुष्ठीयमानानां तत्फलाभावादकर्माणि तान्युच्यन्ते गौण्या वृत्त्या। तत्र नित्ये कर्मण्य कर्म यः पश्येत् फलाभावाद्यथा धेनुपरि गौरगौरुच्यते क्षीराख्यं फलं न प्रयच्छतीति तद्वत्। तथा नित्याकरणे त्वकर्मणि कर्म यः पश्येन्नरकादिप्रत्यवायफलं प्रयच्छतीति। नैतद्युक्तं व्याख्यानमेवंज्ञानादशुभान्मोक्षानुपपत्तेर्यज्ज्ञात्वा

मोक्ष्यसेऽशुभादिति भगतोक्तं वचनं बाध्येत। कथं, नित्यानामनुष्ठानादशिभात्स्यान्नाम मोक्षणं नतु तेषां फलाभावज्ञानात्। नहि नित्यानां फलाभावज्ञानमशुभमुक्तिफलत्वेन चोदितं नित्यकर्मज्ञानं वा। नच भगवतैवेहोक्तम्। एतेनाकर्मणि कर्मदर्शनं प्रत्युक्तम्। नह्यकर्मणि कर्मेति दर्शनं कर्तव्यतयेह चोद्यते, नित्यस्य तु कर्तव्यतामात्रम्। नचाकरणान्नित्यस्य प्रत्यवायो भवतीति विज्ञानात्किंचित्फलं स्यात्। नापि नित्याकरणं ज्ञेयत्वेन चोदितम्। नापि कर्माकर्मेति मिथ्यादर्शनादशुभान्मोक्षणं बुद्धिमत्त्वं युक्तता कृत्स्नकर्मकृत्त्वादि च फलमुपपद्यते स्तुतिर्वा। मिथ्याज्ञानमेव हि साक्षादशुभरूपं कुतोऽन्यस्मादशुभान्मोक्षणम्। नहि तमस्तमसो निवर्तकं भवति। ननु कर्मणि यदकर्मदर्शनमकर्मणि वा कर्मदर्शनं न तन्मिथ्याज्ञानं किं तर्हि गौणं फलभावाभावनिमित्तम्। न कर्माकर्मविज्ञानादपि गौणात्फलस्याश्रवणात्। नारि श्रुतहान्यश्रुतपरिकल्पनया कश्चिद्विशेषो लभ्यते। स्वशब्देनापि शक्यं वक्तुं नित्यकर्मणां फलं नास्त्यकरणाच्च तेषां नरकपातः स्यादिति। तत्र व्याजेन परव्यामोहरूपेण कर्मण्यकर्म यः पश्येदित्यादिना किं, तत्रेवंव्याचक्षाणेन भगवतोक्तं वाक्यं लोकव्यामोहार्थमिति व्यक्तं कल्पितं स्यात्। नचैतच्छद्भरूपेण वाक्येन रक्षणीयं वस्तु, नापि शब्दान्तरेण पुनः पुनरुच्यमानं सुबोधं स्यादित्येवं वक्तुं युक्तम्। कर्मण्येवाधिकारस्त इत्यत्र हि स्फुटतर उक्तोऽर्थो न पुनर्वक्तव्यो भवति। सर्वत्र च पशस्तं बोद्धव्यं च कर्तव्यमेव न निष्प्रयोजनं बोद्धव्यमित्युच्यते। नच मिथ्याज्ञानं बोद्धव्यं भवति तत्प्रत्युपस्थापितं चावस्थाभासम्। नापि नित्यानामकरणादभावात्प्रत्यवायोत्पत्तिर्नासतो विद्यते भाव इति वचनात् 'कथमसतः सज्जायेत' इति च दर्शितम्। असतः सज्जन्मप्रतिषेधादतः सदुत्पत्तिं ब्रुवताऽसदेव सद्भवेत्सच्चासद्भवेदित्युक्तं स्यात्। तच्चाप्ययुक्तं सर्वप्रमाणविरोधात्। नच निष्फलं विदध्यात्कर्मशास्त्रं दुःखरूपत्वाद् दुःखस्य च बुद्धिपूर्वकतया कार्यत्वानुपपत्तेः। तदकरणे च नरकपाताभ्युपगमेऽर्थायैवोभयथापि करणेऽकरणे च शास्त्रं निष्यफलं कल्पितं स्यात्। स्वाभ्युपगमविरोधश्च नित्यं निष्फलं कर्मेत्यभ्युपगम्य मोक्षफलायेति ब्रुवतः। तस्माद्यथाश्रुत एवार्थः कर्मण्यकर्मेत्यादेः। तथाच व्याख्यातोऽस्माभिः श्लोकः।।१८।।

तदेतत्कर्मण्यकर्मादि यथोक्तदर्शित्वं स्तूयते-यस्येति। यस्य यथोक्तदर्शिनः सर्वे यावन्तः समारम्भाः सर्माणि कर्माणि समारभ्यन्त इति समारम्भाः कामसंकल्पवर्जिताः कामैस्तत्कारणैश्च संकल्पैर्वर्जिताः मुधैव चेष्टामात्रा अनुष्ठायन्ते प्रवृत्तेन चेल्लोकसंग्रहार्थं निवृत्तेन चेज्जीवनमात्रार्थं तं ज्ञानाग्निदग्धकर्माणं कर्मादावकर्मादिदर्शनं

ज्ञानं तदेवाग्निस्तेन ज्ञानाग्निना दग्धानि शुभाशुभलक्षणानि कर्माणि यस्य तमाहुः परमार्थतः पण्डितं वुधा ब्रह्मविदः।।१९।।

यस्त्वकर्मादिदर्शी सोऽकर्मादिदर्शनादेव निष्कर्मा संन्यासी जीवनमात्रार्थचेष्टः सन्कर्मणि न प्रवर्तते, यद्यपि प्राग्विवेकतः प्रवृत्तो यस्तु प्रारब्धकर्मा सन्नुत्तरकालमुत्पन्नात्मसम्यग्दर्शनः स्यात् स कर्मणि तत्फले च सङ्गरहिततया स्वप्रयोजनाभावाल्लोकसंग्रहार्थं पूर्ववत्कर्मणि प्रवृत्तोऽपि नैव किंचित्करोति। ज्ञानाग्निदग्धकर्मत्वात्। तदीयं कर्माकर्मैव संपद्यत इत्येतदर्थं

दर्शयिष्पन्नाह-त्यक्त्वेति। त्यक्त्वा कर्मस्वभिमानं फलासंङ्ग च यथोक्ते ज्ञाने नित्यतृप्तो निराकाङ्क्षो विषयेष्वित्यर्थः। निराश्रय आश्रयरहितः। आश्रयो नाम यदाश्रित्य पुरुषार्थं सिसाधयिषति। दृष्टादृष्टेष्टफलसाधनाश्रयरहित इत्यर्थः। विदुषा क्रियमाणं कर्म परमार्थतोऽकर्मैव तस्य निष्क्रियात्मदर्शनसंपन्नत्वात्। तेनैवंभूतेन स्वप्रयोजनाभावात्ससाधनं कर्म परित्यक्तव्यमेवेति प्राप्ते ततो निर्गमासंभवाल्लोकसंग्रहचिकीर्षया शिष्टविगर्हणापरिजिहीर्षया वा पूर्वत्कर्मण्यभिप्रवृत्तोऽपि

निष्क्रियात्मदर्शनसंपन्नत्वान्नैव किंचित्करोति सः।।२०।।

यः पुनः पूर्वोक्तविपरीतः प्रागेव कर्मारम्भाद्ब्रह्मणि सर्वान्तरे प्रत्यगात्मनि निष्क्रये संजातात्मदर्शनः स दृष्टादृष्टेष्टविषयाशीर्विवर्जिततया। दृष्टादृष्टार्थे कर्मणि प्रयोजनमपश्यन्ससाधनं कर्म संन्यास शरीरयात्रामात्रचेष्टो यतिर्ज्ञाननिष्ठो मुच्यत इत्येतमर्थं दर्शयितुमाह-निरिति। निराशीर्निर्गता आशिषो यस्मात्स निराशीः, यतचित्तात्मा चित्तमन्तः करणमात्मा बाह्यः कार्यकरणसंधातस्तावुभावपि यतौ संयतौ येन स यतचित्तात्मा, त्यक्तसर्वपरिग्रहस्त्यक्तः सर्वः परिग्रहो येन स त्यक्तसर्वपरिग्रहः, शारीरं शरीरस्थितिमात्रप्रयोजनं केवलं कर्म तत्राप्यभिमानवर्जितं कर्म कुर्वन्नाप्नोति न प्राप्नोति किल्बिषमनिष्टरूपं पापं धर्मं च। धर्मोऽपि मुमुक्षोरनिष्टरूपत्वात्किल्बिषमेव बन्धापादकत्वात्। किंच शारीरं केवलं कर्मेत्यत्र किं शरीरनिर्वर्त्यं शारीरं कर्म यदि वा शरीरस्थितिमात्रप्रयोजनं शारीरमित्युच्यते। यदा शरीरनिर्वर्त्यं कर्म शारीरमभिप्रेतं स्यात्तदा दृष्टादृष्टप्रयोजनं कर्म प्रतिषिद्धमपि शरीरेण कुर्वन्नाप्नोति किल्बिषमिति ब्रुवतो विरुद्धाभिधानं प्रसज्येत, शास्त्रीयं च कर्म दृष्टादृष्टप्रयोजनं शरीरेण कुर्वन्नाप्नोति किल्बिषमित्यपि ब्रुवतोऽप्राप्तप्रतिषेधप्रसङ्गः शारीरं कर्म कुर्वन्निति विशेषणात् केवलशब्दप्रयोगाच्च वाङ्मनसनिर्वर्त्यं क्म विधिप्रतिषेधविषये धर्माधर्मशब्दवाच्यं कुर्वन्नाप्नोति किल्बिषमित्यिक्तं स्यात्। तत्रापि वाङमनोभ्यां विहितानुष्ठानपक्षे किल्बिषप्राप्तिवचनं विरुद्धमापद्येत, प्रतिषिद्धसेवापक्षेऽपि भूतार्थानुवादमात्रमनर्थकं स्यात्, यदा तु शरीरस्थितिमात्रप्रयोजनं शारीरं कर्माभिप्रेतं भवेत्तदा दृष्टादृष्टप्रयोजनं कर्म विधिप्रतिषेधशास्त्रगम्यं शरीरवाङ्मनोनिर्वर्त्यमन्यदकुर्वंस्तैरेव शरीरादिभिः शरीरस्थितिमात्रप्रयोगादहं करोमात्यभिमानवर्जितः शरीरादिचेष्टामात्रं लोकदृष्टया कुर्वन्नाप्नोति किल्बिषम्। एवंभूतस्य पापशब्दवाच्यकिल्बिषप्राप्त्यसंभवात् किल्बिषं संसारं नाप्नोति। ज्ञानाग्निदग्धसर्वकर्मत्वादप्रतिबन्धेन मुच्यत एवेति पूर्वोक्तसम्यग्दर्शनफलानुवाद एवैषः। एवं शारीरं केवलं कर्मेत्यस्यार्थस्य परिग्रहे निरवद्यं भवति।।२१।।

त्यक्तसर्वपरिग्रहस्य यतेरन्नादेः शरीरस्थितिहेतोः परिग्रहस्याभावाद्याचनादिना शारीरस्थितौ कर्तव्यतायां प्राप्तायाम् 'अयाचितमसंक्लृप्तमुपपन्नं यदृच्छया' इत्यादिना वचनेनानुज्ञातं यतेः शरीरस्थितिहेतोरन्नादेः प्राप्तिद्वारमाविष्कुर्वन्नाह-यदृच्छेति। यदृच्छालाभसंतुष्ट अप्रार्थितोपनतो लाभो

यदृच्छालाभस्तेन संतुष्टः संजातालंप्रत्ययः। द्वन्द्वातीतः द्वन्द्वैः शीतोष्णादिभिर्हन्यमानोऽविश्ण्णचित्तो द्वन्द्वातीत उच्यते। विमत्सरोविगतमत्सरो निर्वैरबुद्धिः समस्तुल्यो यदृच्छया लाभस्यापि सिद्धावसिद्धौ च य एवंभूतो यतिरन्नादेःशरीरस्थितिहेतोर्लाभालाभयोः समो हर्षविषादवर्जितः कर्मादावकर्मादिदर्शी यथाभूतीत्मदर्शननिष्ठः शरीरस्थितिमात्रप्रयोजने भिक्षाटनादिकर्माणि शरीरादिनिर्वर्त्यं नैव किंचित्करोम्यहं 'गुणा गुणेषु वर्तन्ते' इत्येवं सदा संपरिचक्षाण आत्मनः कर्तृत्वाभावं पश्यन्नैव किंचिद्भिक्षाटनादिकं कर्म करोति, लोकव्यवहारसामान्यदर्शनेन तु

लौकिकैरारोपितकर्तृत्वे भिक्षाटनादौ कर्मणि कर्ता भवति, भिक्षाटनादिचेष्टास्वप्यकर्तृत्वाद्यनुसंधानमेव विदुषः स्वानुभवेन तु शास्त्रप्रमाणादिजनितेनाकर्तैव, स एवं पराध्यारोपितकर्तृत्वं शरीरस्थितिमात्रप्रयोजनं भिक्षाटनादिकं कर्म कृत्वापि न निबध्यते बन्धहेतोः कर्मणः

सहेतुकस्य ज्ञानाग्निना दग्धत्वादित्यनिवाद एवैषः।।२२।।

त्यकत्वा कर्मफलासङ्गमित्यनेन शेलोकेन यः प्रारब्धकर्मा सन् यदा निष्क्रियब्रह्मात्मदर्शनसंपन्नः स्यात्तदा तस्यात्मनः कर्तृककर्मप्रयोजनाभावदर्शिनः कर्मपरित्यागे प्राप्ते कुतश्चिन्निमित्तदसंभवे सति

पूर्ववत्तस्मिन्कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति स इति च कर्माभावः प्रदर्शितः, यस्यैवं कर्माभावो दर्शितस्तस्यैव गतसङ्गस्य सर्वतोऽनिवृत्तासक्तेर्मुक्तस्य निवृत्तधर्माधर्मादिबन्धस्य ज्ञानावस्थितचेतसो ज्ञाने एवावस्थितं चेतो यस्य सोऽयं ज्ञानावस्थितचेतास्तस्य यज्ञाय यज्ञनिर्वृत्त्यर्थमाचरतो निर्वर्तयतः कर्म समग्रं सहाग्रेण कर्मफलेन वर्तत इति समग्रं कर्म तत्समग्रं प्रविलीयते विनश्यतीत्यर्थः।।२३।।

ब्रह्मेति। कस्मात्पुनः कारणात्क्रियमाणं कर्म स्वकार्यारम्भमकुर्वत्समग्रं प्रविलीयत इत्युच्यते, यतो ब्रह्मार्पणं येन करणेन प्रकारेण ब्रह्मविद्धविरग्नावर्पयति तह्रह्मैवेति पश्यति तस्यात्मव्यतिरेकेणाभावं पश्यति यथा शुक्तिकायां रजताभावं पश्यति तद्वदुच्यते ब्रह्मैवार्पणमिति। यथा यद्रजतं तच्छुक्तिकैवेति। ब्रह्म अप्पणमित्यसमस्ते पदे, यदर्पणबुद्धया गृह्यते लोके तदस्य ब्रह्मविदे ब्रह्मैवेत्यर्थः। बॅह्म हविस्तथा यद्धविर्बुद्धया गृह्यमाणं तह्रह्मैवास्य। तथा ब्रह्माग्नाविति समस्तं पदम्। अग्निरपि ब्रह्मैव यत्र हूयते ब्रह्मणा कर्ता। ब्रह्मैव कर्तेत्यर्थः। यत्तेन हुतं हवनक्रियापि तद्ब्रह्मैव, यत्तेन गन्तव्यं फलं तदपि ब्रह्मैव, ब्रह्मकर्मसमाधिना ब्रह्मैव कर्मब्रह्मकर्म तस्मिन्समाधिर्यस्य स ब्रह्मकर्मसमाधिस्तेन ब्रह्मकर्मसमाधिना ब्रह्मैव गन्तव्यम्। एवं लोकसंग्रहं चिकीर्षुणापि क्रियमाणं कर्म परमार्थतोऽकर्म ब्रह्मबुध्द्युपमृदित्वात्। तदेवं सति निवृत्तकर्मणोऽपि सर्वकर्मसंन्यासिनः सम्यग्दर्शनस्तुत्यर्थं यज्ञत्वसंपादनं ज्ञानस्य सुतरामुपपद्यते यदर्पणाद्यधियज्ञे प्रसिद्धं तदस्याध्यात्मं ब्रह्मैव परमार्थदर्शिन इति। अन्यथा सर्वस्य ब्रह्मत्वेऽर्पणादीनामेव विशेषतो ब्रह्मत्वाभिधानमनर्थकं, तस्माद्ब्रह्मैवेदं सर्वमित्यभिजानतो विदुषः सर्वकर्माभावः कारकबुद्धिरहितं यज्ञाख्य कर्म दृष्टं, सर्वमेवाग्निहोत्रादिकं कर्म
शब्दसमर्पितदेवताविशेषसंप्रदानादिकारकबुद्धिमत्कर्त्रभिमानफलाभिसंभिमच्च दृष्टं
नोपमृदितक्रियाकारककर्मफलभेदबुद्धिमत् कर्तत्वाभिमानफलाभिसंधिरहितं च, इदं तु ब्रह्मबुध्द्युपमृदितार्पणादिकारकक्रियाफलभेदवुद्धिमत् कर्मातोऽकर्मैव तत्। तथाच दर्शितं 'कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः। गुणा गुणेषु वर्तन्ते', 'नैव किंचित्करोमीति युक्तो मन्यते तत्त्ववित्' इत्यादिभिः, तथा च दर्शयंस्तत्र तत्र क्रियाकारकफलभेदबुध्द्युपमर्दं करोति, दृष्टा

च काम्याग्निहोत्रादौ कामोपमर्देन काम्याग्निहोत्रादिहानिस्तथा मतिपूर्वकामतिपूर्वकत्वादीनां कर्मणां कार्यविशेषस्यारब्धत्वं दृष्टं तथेहापि ब्रह्मबुध्द्युपमृदितार्पणादिकारकक्रियाफलभेदबुद्धेष्बाह्यचेष्टामात्रेण कर्मापि विदुषोऽकर्म संपद्यतेऽत उक्तं समग्रं प्रविलीयत इति। अत्र केचिदाहुर्यद्ब्रह्म तदर्पणादीति ब्रह्मैव किलार्पणादिना पञ्चविधेन कारकात्मना व्यवस्थितं सत्तदेव कर्म करोति। तत्र नार्पणादिबुद्धिर्निवर्तते किंत्वर्फणादिषु ब्रह्मबुद्धिराधीयते, यथा प्रतिमादौ विष्ण्वादिबुद्धिर्यथा च नामादौ ब्रह्मबुद्धिरेवं, सत्यमेवमपि स्याद् यदि ज्ञानयज्ञस्तुत्यर्थं प्रकरणं न स्यात्, अत्र तु

सम्यग्दर्शनं ज्ञानयज्ञशब्दितमनेकान्यज्ञशब्दितान्क्रियाविशेषानुपन्यस्य 'श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः' इति ज्ञानं स्तौति। अत्र च समर्थमिदं वचनं ब्रह्मार्पणमित्यादि ज्ञानस्य यज्ञत्वसंपादनेऽन्यथा सर्वस्य ब्रह्मत्वेऽर्पणादीनामेव विशेषतो ब्रह्मत्वाभिधानमनर्थकं स्यात्। ये त्वर्पणादिषु प्रतिमायां विष्णुदृष्टिवद्ब्रह्मदृष्टिः क्षिप्यते नामादिष्विव चेति ब्रवते न तेषां ब्रह्मविद्योक्तेह विवक्षिता स्यादर्पणादिविषयत्वाज्ज्ञानस्य। नच दृष्टिसंपादनज्ञानेन मोक्षफलं प्राप्यते 'ब्रह्मैव तेन गन्तव्यम्' इति चोच्यते। विरुद्धं च सम्यग्दर्शनमन्तरेण मोक्षफलं प्राप्यत इति। प्रकृतविरोधश्च। सम्यग्दर्शनं च प्रकृतं 'कर्मण्यकर्म यः पश्येत्' इत्यत्रान्ते च ,म्यग्दर्षनं तस्यैवोपसंहारात्। 'श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः', 'ज्ञानं लब्ध्वा परां शान्तिम्'इत्यादिना सम्यग्दर्शनस्तुतिमेव कुर्वन्नुपक्षीणोऽध्यायः। तत्राकस्मादर्पणादौ ब्रह्मदृष्टिरप्रकरणे प्रतिमायामिव विष्णुदृष्टिरुच्यत इत्यनुपपन्नम्। तस्माद्यथाव्याख्यातार्थ एवायं

श्लोकः।।२४।।

तत्राधुना सम्यग्दर्शनस्य यज्ञत्वं संपाद्य तत्स्तुत्यर्थमन्येऽपि यज्ञा उपक्षिप्यन्ते-दैवमेवेत्यादिना। दैवमेव देवा इज्यन्ते येन यज्ञनासौ दैवो यज्ञस्तमेवापरे यज्ञं योगिनः कर्मिणः पर्युपासते कुर्वन्तीत्यर्थः। ब्रह्माग्नौ 'सत्यंज्ञानमनन्तं ब्रह्म', 'विज्ञानमानन्दं ब्रह्म', 'यत्साक्षादपरोक्षाद्ब्रह्म', 'य आत्मा

सर्वन्तरः'इत्यादिवचनोक्तमशनायादिसर्वसंसारधर्मवर्जितं 'नेति नेति'इति निरस्ताशेषविशेषं ब्रह्मशब्देनोच्यते। ब्रह्म च तदग्निश्च स होमाधिकरणत्वविक्षया ब्रह्माग्निस्तस्मिन्ब्रह्माग्नावपरेऽन्ये ब्रह्मविदो यज्ञं यज्ञशब्दवाच्य आत्मा आत्मनामसु यज्ञशब्दस्य पाठात्तमात्मानं यज्ञं परमार्थतः परमेव ब्रह्म संन्तं बुद्धयाद्युपाधिसंयुक्तमध्यस्तसर्वोपाधिधर्मकमाहुतिरूपं यज्ञेनैवोक्तलक्षणेनोपजुह्वति प्रक्षिपन्ति। सोपाधिकस्यात्मनो निरुपाधिकेन परब्रह्मस्वरूपेणैव यद्दर्शनं स तस्मिन्होमस्तं कुर्वन्ति। ब्रह्मात्मैकत्वदर्शननिश्ठाः संन्यासिन इत्यर्थः। सोऽयं सम्यग्दर्शलक्षणो यज्ञो दैवयज्ञादिषु यज्ञेषूपक्षिप्यते ब्रह्मार्पणमित्यादिश्लोकैः 'श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप' इत्यादिस्तुत्यर्थम्।।२५।।

श्रोत्रादीनीति। श्रोत्रादीनीन्द्रियाण्यन्ये योगिनः संयमाग्निषु। प्रतीन्द्रियं संयमो भिद्यत इति बहुवचनम्। संयमा एवाग्नयस्तेषु जुह्वति। इन्द्रियसंयममेव कुर्वन्तीत्यर्थः। 'शब्दादीन्विषयानन्य इन्द्रियाग्निषु जिह्वति' इन्द्रियाण्येवाग्नयस्तेष्विन्द्रियाग्निषु जुह्वति श्रोत्रादिभिरविरुद्धविषयग्रहणं पोमं मन्यन्ते।।२६।।

किंच-सर्वाणीन्द्रियकर्माणीन्द्रियाणां कर्माणीन्द्रियकर्माणि तथा प्राणकर्माणि प्राणो वायुराध्यात्मिकस्तत्कर्माण्याकुञ्चनप्रसारणादीनि तानि चापर आत्मसंयमयोगाग्नावात्मनि संयम आत्मसंयमः स एव योगाग्निस्तस्मिन्नात्मसंयमयोगाग्नौ जुह्वति प्रक्षिपन्ति ज्ञानदीपिते स्नेहेनेव

प्रदीपिते विवेकविज्ञानेनोज्जवलभावमापादिते प्रविलापयन्तात्यर्थः।।२७।।

द्रव्येति। द्रव्ययज्ञास्तीर्थेषु द्रव्यविनियोगं यज्ञबुद्धया कुर्वन्ति ये ते द्रव्ययज्ञाः, तपोयज्ञास्तपो यज्ञो योषां तपस्विनां ते तपोयज्ञाः, योगयज्ञाः प्राणायामप्रत्यहारादिलक्षणो योगो योषां ते योगयज्ञास्तथापरे स्वाध्यायज्ञानयज्ञाश्च स्वाध्यायो यथाविधि ऋगाद्यभ्यासो यज्ञो येषां ते स्वाध्याययज्ञाः, ज्ञानयज्ञा ज्ञानं शास्त्रार्थपरिज्ञानं यज्ञो येषां ते ज्ञानयज्ञाश्च यतयो यतनशीलाः संशितव्रताः सम्यक् शितानि तनूकृतानि तीक्ष्णीकृतानि व्रतानि येषां ते संशितव्रताः।।२८।।

किंच-अपान इति। अपानेऽपानवृत्तौ जुह्वति प्रक्षिपन्ति प्राणं प्राणवृत्तिम्। पूरकाख्यं प्राणायामं कुर्वन्तीत्यर्थः। प्राणेऽपानं तथापरे जुह्वति रेचकाख्यं च प्राणायामं कुर्वन्तीत्यतत्, प्राणापानगती मुखनासिकाभ्यां वायोर्निर्गमनं प्राणस्य गतस्तद्विपर्ययेणाधोगमनमपानस्य ते प्राणापानगती एते रुद्ध्वा निरुध्य प्राणायामपरायणाः प्राणायामतत्पराः कुम्भकाख्यं प्राणायामं कुर्वन्तीत्यर्थः।।२९।।

किंच-अपर इति। अपरे नियताहारा नियतः परिमित आहारो येषां ते नियताहाराः सन्तः प्राणान्वायुभेदान्प्राणेष्केव जुह्वति, यस्त यस्य वायोर्जयः क्रियत इतरान्वायुभेदांस्तस्मिञ्जुह्वति ते तत्र प्रविष्टा इव भवन्ति। सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषा यज्ञैर्यथोक्तैः क्षपितो नाशितः कल्मषो येषां ते यज्ञक्षपितकल्मषाः।।३०।।

एवं यथोक्तान्यज्ञान्निर्वर्त्य यज्ञशिष्टामृतभुजो यज्ञानां शिष्टं यज्ञशिष्टं यज्ञशिष्टं च तदमृतं च यज्ञशिष्टामृतं

तद्भुञ्जत इति यज्ञशिष्टामृतभुजो यथोक्तान्यज्ञान्कृत्वा तच्छिष्टेन कालेन यथाविधि कालेन यथाविधि चोदितमन्नममृताख्यं भुञ्जत इति यज्ञशिष्टामृतभुजो यान्ति गच्छन्ति ब्रह्म सनातनं चिरंतनं, मुमुक्षवश्चेत्कालातिक्रमापेक्षयेति सामर्थ्याद्गम्यते। नायं लोकः सर्वप्राणिसाधनसाध्यः कुरुसत्तम।।३१।।

एवमिति। एवं यथोक्ता बहुविधाबहुप्रकारा यज्ञां विताता विस्तीर्णा ब्रह्मणो वेदस्य मुखे द्वारे, वेदद्वारेणावगम्यमाना ब्रद्मणो मुखे विताता उच्यन्ते, तद्यथा 'वाचि हि प्राणं जुहुमः' इत्यादयः। कर्मजान्कायिकवाचिकमानसकर्मोद्भवान्विद्धि तान्सर्वाननात्मजान्। निर्व्यापारो ह्यात्मा। अत एवं ज्ञात्वा विमोक्ष्यसेऽशुभात्, न मह्यापारा इमे निर्व्यापारोऽहमुदासीन इत्येवं ज्ञात्वास्मात्सम्यग्दर्शनान्मोक्ष्यसे संसारबन्धनादित्यर्थः।।३२।।

ब्रह्मार्पणमित्यादिश्लोकेन सम्यग्दर्शनभ्य यज्ञत्वं संपादितं यज्ञाश्चानेक उपदिष्टास्तैः सिद्धपुरुषार्थप्रयोजनैर्ज्ञानं स्तूयते। कथं-श्रेयानिति। श्रेयान्द्रव्यमयाद्द्रव्यसाधनसाध्याद्यज्ज्ञानयज्ञो हे परंतप। द्रव्यमयो हि यज्ञः फलस्यारम्भको ज्ञानयज्ञो न फलारम्भकोऽतः श्रेयान्प्रशस्यतरः। कथं, यतः सर्वं कर्म समस्तमखिलमप्रतिबद्धं पार्थ, ज्ञाने मोक्षसाधने सर्वतः संप्लुतोदकस्थानीये परिसमाप्यते। अन्तर्भवतीत्यर्थः।

'यथा कृताय विजितायाधरेयाः संयन्त्येवमेनं सर्व तदभिसमेति यत्किंतित्प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद'इति श्रुतेः।।३३।।

तदेतद्विशिष्टं ज्ञानं तर्हि केन प्राप्यत इत्युच्यते-तद्विद्धीति। तद्विद्धि विजानीहि येन विधिना प्राप्यत इत्याचार्यानभिगम्य प्रणिपातेन प्रकर्षेण नीचैः पतनं प्रणिपातो दीर्घनमस्कारस्तेन, कथं बन्धः का विद्या का चाविद्येति परिप्रश्नेन, सेवया गुरुशुश्रूषयैवमादिना प्रश्नयेणापर्जिता आचार्या

उपदेक्ष्यन्ति कथयिष्यन्ति ते ज्ञानं यथोक्तविशेषणं ज्ञानिनो ज्ञानवन्तोऽपि केचिद्यथावत्तत्त्वदर्शनशीला अपरे नातो विशिनष्टि-तत्त्वदर्शिन इति। ये सम्यग्दर्शिनस्तैरुपदिष्टं ज्ञानं कार्यक्षमं भवति नेतरदिति। भगवतो मतम्।।३४।।

तथाच सतीदमपि समर्थं वचनं-यदिति। यज्ज्ञात्वा यज्ज्ञानं तैरुपदिष्टमधिगम्य प्राप्य पुनष्भूयो मोदमेवं यथेदानीं मोहं गतोऽसि पुनरेवं न यास्यसि हे पाण्डव। किंच येन ज्ञानेन भूतान्यशेषेण ब्रह्मादीनि स्तम्बपर्यन्तानि द्रक्ष्यसि साक्षादात्मनि प्रत्यगात्मनि मत्संस्थानीमानि

भूतानीति, अथो अपि मयि वासुदेवे परमेश्वरे चेमानीति क्षेत्रज्ञेश्वरैकत्वं सर्वोपनिषत्प्रसिद्धं द्रक्ष्यसीत्यर्थः।।३५।।

किं चैतस्य ज्ञानस्य माहात्म्यम्-अपीति। अपिचेदसि पापेभ्यः पापकृद्भ्यः सर्वेभ्योऽतिशयेन पापकृत्पारकृत्तमः सर्वं ज्ञानण्लवेनैव ज्ञानमेव प्लवं कृत्वा वृजिनं वृजिनार्णवं पापं संतरिष्यसि, धर्मोऽपीह मुमुक्षोः पापमुच्यते।।३६।।

ज्ञानं कथं नाशयति पापमिति सदृष्टान्तमुच्यते-यथेति। यथैधांसि काष्ठानि समिद्धः सम्यगिद्धो दीप्तोऽग्निर्भस्मसाद्भस्मीभावं कुरुतेऽर्जुन एवं ज्ञानमेवाग्निर्ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा। निर्बीजीकरोतीत्यर्थः। नहि साक्षादेव ज्ञानग्निस्तानि कर्माणीन्धनवद्भस्मीकर्तुं शक्नोति, तस्मात्सम्यग्दर्शनं सर्वकर्मणां निर्बीजत्वे कारणमित्यभिप्रायः। समार्थ्याद्येन कर्मणा शरीरमारब्धं तत्प्रवृत्तफलत्वादुपभोगेनैव

क्षीयतेऽतो यान्यप्रवृत्तफलानि ज्ञानोत्पत्तेः प्राक्कृतानि ज्ञानसहभावीनि चातीतानेकजन्मकृतानि च तान्येव सर्वाणि भस्मसात्कुरुते।।३७।।

यत एवमतो-नहीति। नहि ज्ञानेन सदृशं तुल्यं पवित्रं पावनं शुद्धिकरमिह विद्यते। तज्ज्ञानं स्वयमेव योगसंसिद्धो योगेन कर्मयोगेन समाधियोगेन च संसिद्धः संस्कृतो योग्यतामापन्नो मुमुक्षुः कालेन महता त्मनि विन्दति। लभत इत्यर्थः।।३८।।

येनैकान्तेन ज्ञानप्राप्तिर्भवति स उपाय उपदिश्यते-श्रद्धावानिति। श्रद्धावाञ्श्रद्धालुर्लभते ज्ञानम्। श्रद्धालुत्वेऽपि भवति कश्चिन्मन्दप्रस्थानोऽत आह। तत्परो गुरूपासनादावभियुक्तो ज्ञानलब्ध्युपाये श्रद्धावास्तत्परोऽप्यजितेन्द्रियः स्यादित्यत आह। संयतेन्द्रियः संयतानि विषयेभ्यो निवर्तितानि यस्येन्द्रियाणि स संयतेन्द्रियः य एवंभुतः श्रद्धावांस्तत्परः संयतेन्द्रियश्च सोऽवश्यं ज्ञानं लभते। प्रणिपातादिस्तु बाह्योनैकान्तिकोऽपि भवति मायावित्वादिसंभवान्नतु तथा तच्छ्रद्धावत्त्वादावित्येकान्ततो ज्ञानलब्धियपायः। किं पुनर्ज्ञानलाभात्स्यादित्युच्यते। ज्ञानं लब्ध्वा परां मोक्षाख्यां शान्तिमुपरतिमचिरेण क्षिप्रमेवाधिगच्छति। सम्यग्दर्शनात्क्षिप्रं मोक्षो भवतीति सर्वशास्त्रन्यायप्रसिद्धः सुनिश्चितोऽर्थः।।३९।।

अत्र संशयो न कर्तव्यः। पापिष्ठो हि संशयः कथमित्युच्यते-अज्ञश्चेति। अज्ञश्चानात्मज्ञोऽश्रद्दधानश्च संशयात्मा च विनश्यति, अज्ञाश्रद्दधानौ यद्यपि विनश्यतस्तथापि न तथा यथा संशयात्मा, संशयात्मा तु पापिष्ठः सर्वेषां, कथं, नायं साधारणोऽपि लोकोऽस्ति सथा न परो लोको न सुखं तत्रापि संशयोपपत्तेः। संशयात्मनः संशयचित्तस्य। तस्मात्संशयो न कर्तव्यः।।४०।।

कस्मात्-योगेति। योगसंन्यस्तकर्माणं परमार्थदर्शनलक्षणेन योगेन संन्यस्तानि कर्माणि येन परमार्थदर्शिना धर्माधर्माख्यानि तं योगसंन्यस्तकर्माणम्। कथं योगसंन्यस्तकर्मेत्याह

ज्ञानेनात्मेश्वरकत्वदर्शनलक्षणेन संच्छिन्नः संशयो यस्य स ज्ञानसंच्छिन्नसंशयः। य एवं योगसंन्यस्तकर्मा तमात्मवन्तमप्रमत्तं गुणचेष्टारूपेण दृष्टानि कर्माणि न निबन्धन्त्यनिष्टादिरूपं फलं नारभन्ते हे धनंजय।।४१।।

यस्मात् कर्मयोगानुष्ठानादशुद्धिक्षयहेतुकज्ञानसंच्छिन्नसंशयो न निबध्यते कर्मभिर्ज्ञानाग्निदग्धकर्मत्वादेव यस्माच्च ज्ञानकर्मानुष्ठानविषये संशयवान्विनश्यति-तस्मादिति।
तस्मात्पापिष्ठमज्ञानसंभूतमज्ञानादविवेकाज्जातं

हृत्स्थं हृदि बुद्धौ स्थितं ज्ञानासिना शोकमोहादिदोषहरं सम्यग्दर्शनं ज्ञानं तदेवासिः खड्गस्तेन ज्ञानासिनात्मनः स्वस्यात्मविषयत्वात्संशयस्य। नहि परस्य संशयः परेण छेत्तव्यतां प्राप्तो येन स्वस्येति विशेष्यतेऽत आत्मविषयोऽपि स्वस्यैव भवति। छित्त्वैनं संशयं स्वविनाशहेतुभूतं योगं सम्यग्दर्शनोपायं कर्मानुष्ठानमातिष्ठ कुर्वित्यर्थः। उत्तिष्ठ चेदानीं युद्धाय भारतेति।।४२।।

इति श्रीभगवद्गीताभाष्ये पूज्यपादश्रीशंकरभगवतः कृतौ ज्ञानकर्मसंन्यासयोगोनाम चतुर्थोऽध्यायः।।४।।

पञ्चमोऽध्यायः।

'कर्मण्यकर्म यः पश्येत्'इत्यारभ्य 'स युक्तः कृत्स्नकर्मकृत्', 'ज्ञानाग्निदग्धकर्माणं', 'शारीरं केवलं कर्म कुर्वन्', 'यदृच्छालाभसंतुष्टो', 'ब्रह्मार्पणं ब्रह्म हविः', 'कर्मजान्विद्धि तान्सर्वान्', 'सर्वं कर्माखिलं पार्थ', 'ज्ञानाग्निः सर्वकर्माणि', 'योगसंन्यस्तकर्माणम्' इत्यन्तैर्वचनैः सर्वकर्मसंन्यासमवोचद्भगवान् 'छित्तवैनं संशयं योगमातिष्ठ' इत्यनेन वचनेन योगं च कर्मानुष्ठानलक्षणमनुतिष्ठेत्युक्तवान्। तयोरुभयोश्च कर्मानुष्ठानकर्मसंन्यासयोः स्थितिगतिवत्परस्परविरोधादेकेन सह कर्तुमशक्यत्वात्कालभेदेन चानुष्ठानविधानाभावादर्थादेतयोरन्यतरकर्तव्यताप्राप्तौ सत्यां यत्प्रशस्यतरमेतयोः कर्मानुष्ठानकर्मसंन्यासयोस्तत्कर्तव्यं नेतरदित्येवं मन्यमानः प्रशस्यतरबुभुत्सयार्जुन उवाच-संन्यासं कर्मणां कृष्णेत्यादिना। ननु चात्मविदो ज्ञानयोगेन निष्ठां प्रतिपादयिष्यन्पूर्वोदाहृतैर्वचनैर्भगवान्सर्वकर्मसंन्यासमवोचन्न त्वनात्मज्ञस्य। अतश्च कर्मानुष्ठानकर्मसंन्यासयोर्भिन्नपुरुषविषयत्वादन्यतरस्य प्रशस्यतरत्वबुभुत्सया प्रश्नोऽनुपपन्नः। सत्यमेव त्वदभिप्रायेण प्रश्नो नोपपद्यते प्रष्टुः स्वाभिप्रायेण पुनः प्रश्नो युज्यत एवेति वदामः। कथं, पूर्वोदाहृतैर्वचनैर्भगवता कर्मसंन्यासस्य कर्तव्यतया विवक्षितत्वात्प्राधान्यमन्तरेण च कर्तारं तस्य कर्तव्यत्वासंभवादनात्मविदपि कर्ता पक्षे प्राप्तोऽनूद्यत इति न पुनरात्मवित्कर्तृकत्वमेव संन्यासय विवक्षितमित्येवं मन्वानस्यार्जुनस्य कर्मानुष्ठानकर्मसंन्यासयोरविद्वत्पुरुषकर्तृकत्वमप्यस्तीति पूर्वोक्तेन प्रकारेण तयोः परस्परविरोधादन्यतरस्य कर्तव्यत्वे प्राप्ते प्रशस्यतरं च कर्तव्यं नेतरदिति प्रशस्यतरविविदिषया प्रश्नो नानुपपन्नः। प्रतिवचनवाक्यार्थनिरूपणेनापि प्रष्टुरभिप्राय एवमेवेति गम्यते। कथं संन्यासकर्मयोगौ निःश्रेयसकरौ, 'तयोस्तु-कर्मयोगो विशिष्यते' इति प्रतिवचनमेतन्निरूप्यं, किमानेनात्मावित्कर्तृकयोः संन्यासकर्मयोगयोर्निःश्रेयसकरत्वं प्रयोजनमुक्त्वा तयोरेव कुतश्चिद्विशेषात्कर्मसंन्यासात्कर्मयोगस्य विशिष्टत्वमुच्यत आहोस्विदनात्मवित्कर्तृकयोः संन्यासकर्मयोगयोस्तदुभमुयच्यत इति। किंचातो यद्यात्मवित्कर्तृकयोः

कर्मसंन्यासकर्मयोगयोर्निःश्रेयसकरत्वं तयोस्तु कर्मसंन्यासात्कर्मयोगस्य विशिष्टत्वमुच्यते यदि वानात्मवित्कर्तृकयोः संन्यासकर्मयोगयोस्तदिभयमुच्यत इति। अत्रोच्यते-आत्मवित्कर्तृकयोः संन्यासकर्मयोगयोरसंभवात्तयोर्निःश्रेयसकरत्ववचनं तदीयाच्च कर्मसंन्यासात्कर्मयोगस्य विशिष्टत्वाभिधानमित्येतदुभयमनुपपन्नम्। यद्यनात्मविदः कर्मसंन्यासस्तत्प्रतिकूलश्च कर्मानुष्ठानलक्षणः कर्मयोगः संभवेतां तदा तयोर्निःश्रेयसकरत्वोक्तिः कर्मयोगस्य च कर्मसंन्यासाद्विशिष्टत्वाभिधानमित्येतदुभयमुपपद्येत, आत्मविदस्तु संन्यासकर्मयोगयोरसंभवात्तयोर्निःश्रेयसकरत्वाभिधानं कर्मसंन्यासाच्च कर्मयोगो विशिष्यत इति चानुपपन्नम्। अत्राह, किमात्मविदः संन्यासकर्मयोगयोरप्यसंभव आहोस्विदन्यतरस्यासंभवः, यदा चान्यतरस्यासंभवस्तदा किं कर्मसंन्यासस्योत कर्मयोगस्येत्यसंभवे कारणं च वक्तव्यमिति। अत्रोच्यते, आत्माविदो निवृत्तमिथ्याज्ञानत्वाद्विपर्ययज्ञानमूलस्य कर्मयोगस्यासंभवः स्याज्जन्मादिसर्वविक्रियारहितत्वेन निष्क्रियमात्मानमात्मत्वेन यो वेत्ति तस्यात्मविदः सम्यग्दर्शनेनापास्तमिथ्याज्ञानस्य निष्क्रियात्मरूपावस्थानलक्षणं सर्वकर्मसंन्यासमुक्त्वा तद्विपरीतस्य मिथ्याज्ञानमूलककर्तृत्वाभिमानपुरःसरस्य सक्रियात्मास्वरूपावस्थानरूपस्य कर्मयोगस्येह

कर्मयोगस्येह शास्त्रे तत्रतत्रात्मस्वरूपनिरूपणप्रदेशेषु सम्यग्ज्ञानमिथ्याज्ञानतत्कार्यविरोधादभावः प्रतिपाद्यते यस्मात्तस्मादात्मविदो निवृत्तमिथ्याज्ञानस्य विपर्ययज्ञानमूलः कर्मयोगो न संभवतीति युक्तमुक्तं स्यात्, केषु केषु पुनरात्मस्वरूपणप्रदेशेष्वात्मविदः

कर्माभावः प्रतिपाद्यत इति। अत्रोच्यते 'अविनाशि तु तद्विद्धि' इति प्रकृत्य 'य एनं वेत्ति हन्तारं', 'वेदाविनाशिनं नित्यम्' इत्यादौ तत्र तत्रात्मविदः कर्माभाव उच्यते। ननु च कर्मयोगोऽप्यात्मस्वरूपणप्रदेशेषु तत्र तत्र प्रतिपाद्यत एव, तद्यथा 'तस्माद्युध्यस्व भारत', 'स्वधर्ममपि चावेक्ष्य', 'कर्मण्येवाधिकारस्ते', इत्यादावतश्च कथमात्मविदः कर्मयोगस्यसंभवः स्यादिति। अत्रोच्यते-सम्यग्ज्ञानमिथ्याज्ञानतत्कार्यविरोधात्। 'ज्ञानयोगेन साख्यानाम्' इत्येनन साख्यानामात्मतत्त्वविदामनात्मवित्कर्तृककर्मयोगनिष्ठातो निष्क्रियात्मस्वरूपावस्थानलक्षणाया ज्ञानयोगनिष्ठायाः पृथक्करणात्कृतकृत्यत्वेनात्मविदः प्रयोजनान्तराभावात् 'तस्य कार्यं न विद्यते' इति कर्तव्यान्तराभाववचनाच्च 'न कर्मणामनारम्भात्', 'संन्यासस्तु महाबाहो दुःखमाप्रमयोगतः' इत्यावचनाच्चात्मज्ञानाङ्गत्वेन कर्मयोगस्य विधानात्, 'योगारूढस्य तस्यैव शमः कारणमुच्यते' इत्यनेन चोत्पन्नसम्यग्दर्शनस्य कर्मयोगाभाववचनात्, 'शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्' इति च शरीरस्थितिमात्रप्रयुक्तेष्वपि दर्शनश्रवणादिकर्मस्वात्मयाथात्मयविदः करोमात् प्रत्ययस्य समाहितचेतस्तया सदाऽकर्तव्यत्वोपदेशादात्मतत्त्वविदः सम्यग्दर्शनविरुद्धो मिथ्याज्ञानहेतुकः कर्मयोगः स्वप्नेऽपि न संभावयितुं शक्यते यस्मात्तस्मादनात्मवित्कर्तृकसर्वकर्मसंन्यासविलक्षणात्सत्येव कर्तृत्वविज्ञाने कर्मैकदेशविषयाद्यमनियमादिसहितत्वेन च दुरनुष्ठेयत्वात्सुकरत्वेन च कर्मयोगस्य विशिष्टत्वाभिधानमित्येवं प्रतिवचनवाक्यार्थनिरूपणेनापि पूर्वोक्तः प्रष्टुरभिप्रायो निश्चीयत इति स्थितम्। 'ज्यायसी चेत्कर्मणस्ते' इत्यत्र ज्ञानकर्मणोः सहाऽसंभवे 'यच्छ्रेय एतयोस्तन्मे ब्रूहि' इत्येवं पृष्टोऽर्जिनेन भगवान्सांख्यानां संन्यासिनां ज्ञानयोगेन निष्ठा पुनः कर्मयोगेन योगिनां निष्ठा प्रोक्तेति निर्णयं चकार। नच संन्यासनादेव केवलात्सिद्धिं समधिगच्छतीति वचनाज्ज्ञानसहितस्य तस्य

सिद्धिसाधनत्वमिष्टं कर्मयोगस्य च विधानात्। ज्ञानरहितस्य संन्यासः श्रेयान्तिं वा कर्मयोगः श्रेयानित्येतयोर्विशेषबुभुत्सयार्जुन उवाच-संन्यासं परित्यागं कर्मणां शास्त्रीयाणामनुष्ठानविशेषाणां शंससि कथयसीत्येतत्। पुनर्योगं च तेषामेवानुष्ठानमवस्यकर्तव्यं शंसस्यतो मे कतरच्छ्रेय इति संशयः किं कर्मानुष्ठानां श्रेयः किं वा तद्धानमिति प्रशस्यतरं चानिष्ठेयमतश्च यच्छ्रेयः प्रशस्यतरमेतयोः कर्मसंन्यासकर्मानुष्ठानं श्रेयः किं वा तद्धानमिति प्रशस्यतरं चानुष्ठेयमतश्च यच्छ्रेयः प्रशस्यतरमेतयोः कर्मसंन्यासकर्मानुष्ठानयोर्यदनुष्ठानाच्छ्रेयोवाप्तिर्मम स्यादिति मन्यसे तदेकमन्यतरत्सहैकपुरुषानुष्ठेयत्वासंभवान्मे ब्रूहि सुनिश्चितमभिप्रेतं तवेति।।१।।

स्वाभिप्रायमाचक्षाणो निर्णयाय क्षीभगवानुवाच। संन्यासः कर्मणां परित्यागः कर्मयोगश्च तेषामनुष्ठानं तावुभावति निःश्रेयसकरौ निःश्रेयसं मोक्षं कुर्वाते ज्ञानोत्पत्तिहेतुत्वेनोभौ यद्यपि निःश्रेयसकरौ तथापि तयोस्तु निःश्रेयसहेत्वोः कर्मसंन्यासात्केवलात्कर्मयोगो विशिष्यत इति कर्मयोगं स्तौति।।२।।

कस्मादित्याह-ज्ञेय इति। ज्ञेयो ज्ञातव्यः स कर्मयोगी नित्यसंन्यासीति यो न द्वेष्टि किंचिन्न काङ्क्षति दुःखसुखे तत्साधने यः कर्मणि वर्तमानोऽपि स नित्यसमन्यासीति ज्ञातव्य इत्यर्थः।

निर्द्वन्द्वो द्वन्द्ववर्जितो हि यस्मान्महाबाहो सुखं बन्धादनायासेन प्रमुच्यते।।३।।

संन्यासकर्मयोगयोर्भिन्नपुरुषानुष्ठेययोर्विरुद्धयोः फलेऽति विरोधो युक्तो नतूभयोर्निःश्रेयसकरत्वमेघेति प्राप्त आदमुच्यते-साख्ययोगाविति। साख्ययोगौ पृथग्विरुद्धभिन्नफलौ बालाः प्रवदन्ति न पण्डिताः। पण्डितास्तु ज्ञानिन एकं फलमविरुद्धमिच्छन्ति। कथमेकमपि साख्ययोगयोः सम्यगास्थितः सम्यगनुष्ठितवानित्यर्थः। उभयोर्विन्दते फलमुभयोस्तदेव हि निःश्रेयसं फलभतो न फले विरोधोऽस्ति। ननु संन्यास कर्मयोगं च

केवलमभिप्रेत्य प्रश्नः कृतो भगवांस्तु तदपरित्यागेनैव स्वाभिप्रेतं च विशेषं संयोच्य शब्दन्तरवाच्यतया प्रतिवचनं ददौ साख्यायोगाविति। तावेव संन्यासकर्मयोगौ ज्ञानतदिपायसमबुद्धित्वादिसंयुक्तौ सांख्ययोगशब्दवाच्याविति भगवतो मतमतो नाप्रकृतप्रक्रियेति।।४।।

एकस्यापि सम्यगनुष्ठानात्कथमुभयोः फलं विन्दत इत्युच्यते-यदिति। यत्साथ्यैर्ज्ञाननिष्ठैः फलमनभिसंधायानुतिष्ठन्ति ये ते योगिनस्तैरपि परमार्थज्ञानसंन्यासप्राप्तिद्वारेण गम्यत इत्यभिप्रायोऽत एकं सांख्यं योगं च यः पश्यति फलैकत्वात्स सम्यक्पश्यतीत्यर्थः।।५।।

एवं तर्हि योगात्संन्यास एव विशिष्यते कथं तर्हिदमुक्तं तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यत इति।

श्रृणु तत्र कारणम्। त्वया केवलं कर्मसंन्यासं कर्मयोगं चाभिप्रेत्य तयोरन्यतरः कः श्रेयान् तदनुरूपं प्रतिवचनं मयोक्तं कर्मसंन्यासात्कर्मयोगो विशिष्यत इति ज्ञानमनपेक्ष्य। ज्ञानापेक्षस्तु संन्यासः सांख्यमिति मयाभिप्रेतः। परमार्थयोगश्च स एव। यस्तु कर्मयोगो वैदिकः स च तादर्थ्याग्योगः संन्यास इति चोपचर्यते। कथं तादर्थ्यमित्युच्यते-संन्यासस्तु पारमार्थिको दुःखमाप्तुं प्राप्तुमयोगतो योगेन विना। योगयुक्तो वैदिकेन कर्मयोगेनेश्वरसमर्पितरूपेण फलनिरपेक्षेण युक्तो मुनिर्मननादीश्वरस्वरूपस्य मुनिर्ब्रह्म परमात्मज्ञाननिष्ठालक्षणत्वात्प्रकृतः संन्यासो ब्रह्मोच्यते "न्यास इति ब्रह्म। ब्रह्म हि परः" इति श्रुतेः। ब्रह्म परमार्थसंन्यासं परमात्मज्ञाननिष्ठालक्षणं नचिरेण क्षिप्रमेवाधिगच्छति प्राप्नोत्यतो मयोक्तं कर्मयोगो विशिष्यत इति।।६।।

योगेति। यदा पुनरयं सम्यग्दर्शनप्राप्त्युपायत्वेन योगेन युक्तो विशुद्धात्मा विशुद्धसत्त्वो विजितात्मा विजितदेहो जितेन्द्रियश्च सर्वभूतात्मभूतात्मा सर्वेषां ब्रह्मादीनां स्तम्बपर्यन्तानां भूतानामात्मभूत आत्मा प्रत्यक्चेतनो यस्य स सर्वभूतात्मभूतात्मा। सम्यगदर्शीत्यर्थः। स तत्रैवं वर्तमानो लोकसंग्रहाय कर्म कुर्वन्नपि न लिप्यते। न कर्मभिर्बध्यत इत्यर्थः।।७।।

नैवेति। न चासौ परमार्थतः करोत्यतो नैव किंचित्करोमीति युक्तः समाहित सन्मन्येत चिन्तयेत्। तत्त्वविदात्मनो यथात्म्यं तत्त्वं वेत्तीति तत्त्ववित्। परमार्थदर्सीत्यर्थः।।८।।

कदा कथं वा तत्त्वमवधारयन्मन्येतेत्युच्यते-पश्यन्निति। मन्येतेति पूर्वेण संबन्धः। यस्यैवं तत्त्वविदः सर्वकार्यकरणचेष्टासु कर्मस्वकर्मैव पश्यतः सम्यग्दर्शिनसितस्य सर्वकर्मसंन्यास एवाधिकारः कर्मणोऽभावदर्शनात्। नहि मृगतृष्णिकायामुदकबुद्धया पानाय प्रवृत्त उदकाभावज्ञानेऽपि तत्रैव पानप्रयोजनाय प्रवर्तते।।९।। यस्तु पुनस्तत्त्ववित्प्रवृत्तश्च कर्योगे ब्रह्मणीश्वर आधाय निक्षिप्य तदर्भं करोमीति भृत्य इव स्वाम्यर्थं सर्वाणि कर्माणि मोक्षेऽपि फलं संङ्ग त्यक्त्वा करोति यः सर्वकर्मामि, लिप्यते न स पापेन न संबध्यते पद्मपत्रमिवाम्भसोदकेन।।१०।।

केवलं सत्त्वशुद्धिमात्रफलमेव तस्य कर्मणः स्यात्, यस्मात्-कायेन देहेन मनसा बुद्धया च

केवलैर्ममत्ववर्दितैरपीश्वरायैव कर्म करोमि न मम फलायेति ममत्वबुद्धिशून्यैरीन्द्रियैरपि। केवलशब्दः कायादिभिरपि प्रत्येकं संबध्यते सर्वव्यापारेषु ममतावर्जनाय, योगिनः कर्मिणः कर्म कुर्वन्ति संङ्ग त्यक्त्वा फलविषयमात्मशुद्धये। सत्त्वशुद्धय इत्यर्थः। तस्मात्तत्रैव तवाधिकार इति कुरु कर्मैव।।११।।

यस्माच्च-युक्त ईश्वराय कर्माणि करोमि न मम फलायेत्येवं समाहितः सन्कर्मफलं त्यक्त्वा परित्यज्य शान्तिं

मोक्षाख्यामाप्नोति नैष्ठिकिं निष्ठायां भवा सत्त्वशुद्धुज्ञानप्राप्तिसर्वकर्मसंन्यासज्ञाननिष्ठाक्रमेणेति वाक्यशेषः। यस्तु पुनरयुक्तेऽसमाहितः कामकारेण करणं कारः कामस्य कारः कामकारस्तेन कामकारेण। कामप्रेरिततयेत्यर्थः। मम फलायेदं करोमि कर्मेत्येवं फले सक्तो निबध्यतेऽतस्त्वं युक्तो भवेत्यर्थः।।१२।।

यस्तु परमार्थदर्शी सः। सर्माणि कर्माणि कर्वकर्माणि संन्यस्य परित्यज्य नित्यं नैमित्तिकं कान्यं प्रतिषिद्धं च सर्वकर्माणि तानि मनसा विवेकबुद्धया। कर्मादावकर्मसंदर्शनेन संत्यज्येत्यर्थः। आस्ते तिष्ठति सुखं त्यक्तवाङ्मनःकायचेष्टो यतिर्निरायासः प्रसन्नचित्त आत्मनोऽन्यत्र आत्मनोऽन्यत्र निवृत्तबाह्यसर्वप्रयोजन इति सुखमास्त इत्युच्यते। वशी जितेन्द्रिय इत्यर्थः। क्क कथमास्त इत्याह-नवद्वारे पुरे सप्तशीर्षण्यान्यात्मन उपलब्धिद्वाराण्यर्वाग्द्वे मूत्रपुरीषविसर्गार्थे तैर्द्वारैर्नवद्वारं पुरमुच्यते, शरीरं पुरमिव पुरमात्मैकस्वामिकं तदर्थप्रयोजनैश्चेन्द्रियमनोबुद्धिविषयैरनेकफलविज्ञानस्योत्पादकैः पौरैरिवाधिष्ठतं तस्मिन्नवद्वारे पुरे देही सर्वं कर्म संन्यस्यास्ते। किं विशेषणेन, सर्वो हि देहि संन्यास्यसंन्यासी वा देह एवास्ते, तत्रानर्थकं विश्षणमिति। उच्यते, यस्त्वज्ञो देही देहेन्द्रियसंघातमात्रात्मदर्शी स सर्वोऽपि गेहे भूमावासने वास इति मन्यते। नहि देहमात्रान्मदर्शिनो गेह इव देह आस इति प्रत्ययः संभवति। देहादिसंघातव्यतिरिक्तत्मदर्शिनस्तु देह आस इति प्रत्यय उपपद्यते। परकर्माणां च परस्मिन्नात्मन्यविद्ययाध्यारोपितानां विद्यया विवेकज्ञानेन मनसा संन्यास उपपद्यते। उत्पन्नविवेकविज्ञानस्य सर्वकर्मसंन्यासिनोऽपि गेह इव देह एव नवद्वारे पुरे आसनं

प्ररब्धफलकर्मसंस्कारशेषानुवृत्त्या देह एव विशेषविज्ञानोत्पत्तेर्देह एवास्त इत्यस्त्येव विशेषणफलं

विद्वदविद्वत्प्रत्ययभेदापेक्षत्वात्। यद्यपि कार्यकरणकर्माण्यविद्ययात्मन्यध्यारोपितानि संन्यस्यास्त इत्युक्तं तथाप्यात्मसमवासि तु कर्तृत्वं कारयितृत्वं च देहिनः स्वात्मसमवायि सत्संन्यासान्न संभवति यथा गच्छतो गतिर्गमनव्यापार परित्यागे न स्यात्तद्वत्, किंवा स्वत एवात्मनो नास्तीति। अत्रोच्यते-नास्त्यात्मनः स्वतः कर्तृत्वं कारयितृत्वं च। उक्तं हि-'अविकार्योऽयमुच्यते', 'शरीरस्थोऽपि न करोति न लिप्यते' इति, 'ध्यायतीव लेलायतीव' इति श्रुतेः।।१३।।

न कर्तृत्वमिति। न कर्तृत्वं स्वतः कुर्विति नापि कर्माणि रथघटप्रासादादीनीप्सिततमानि लोकस्य सृजत्युत्पादयति प्रभुरात्मा नापि रथादिकृतवतस्तत्फलेन संयोगं न कर्मफलसंयोगम्। यदि किंचिदपि स्वतो न करोति न कारयति च देही कस्तर्हि कुर्वन्कारयंश्च प्रवर्तत इत्युच्यते। स्वभावस्तु स्वो भावः स्वभावोऽविद्यालक्षणा प्रकृतिर्माया प्रवर्तते दैवी हीत्यदिना वक्ष्यमाणा।।१४।।

परार्थतस्तु-नादत्ते नच गृह्णति भक्तस्यापि कस्याचित्पापं न चैवादत्ते सुकृतं भक्तैः प्रयुक्तं विभुः। किमर्थं तर्हि भक्तैः पूजादिलक्षणं यागदानहोमादिकं च सुकृतं प्रयुज्यत इत्याह-अज्ञानेनावृतं ज्ञानं विवेकविज्ञानं तेन विवेकविज्ञानं तेन मुह्यन्ति करोमि कारयामि भोक्ष्ये भोजयामीत्येवं मोहं

गच्छन्त्यविवेकिनः संसारिणो जन्तूनां विवेकज्ञानेनात्मविषयेण नाशितमात्मनो भवति तेषामादित्यवद्यथादित्यःसमस्तं रूपजातमवभासयति तद्वज्ज्ञानं ज्ञेयं च वस्तु सर्वं प्रकाशयति तत्परमार्थतत्त्वम्।।१६।।

यत्परं ज्ञानं प्रकाशितं तस्मिन्गता बुद्धिर्योषां ते तद्बुद्धयस्तदात्मानस्तदेव परं ब्रह्मात्मा येषां ते तन्निष्ठास्तत्परायणाश्च। तदेव परमयनं परा गतिर्येषां भवति ते तत्परायणाः। केवलात्मरतय इत्यर्थः। येषज्ञानेन नाशितमात्मनोऽज्ञानं ते गच्छन्त्येवंविधा अपुनरावृत्तिमपुनर्देहसंबन्धं ज्ञाननिर्धूतकल्मषा यथोक्तेन ज्ञानेन निर्धूतो नाशितः कल्मषः पापादिसंसारकारणदोषो येषां ते ज्ञाननिर्धूतकल्मषा यतय इत्यर्थः।।१७।।

येषां ज्ञानेन नाशितमात्मनोऽज्ञानं ते पण्डिताः कथं तत्त्वं पश्यन्तीत्युच्यते-विद्येति। विद्याविनयसंपन्ने विद्या च विनयश्च विद्याविनयौ विनय उपशमस्ताभ्यां विद्याविनयाभ्यांसंपन्नो विद्याविनयसंपन्नो विद्वान्विनीर्तश्च यो ब्राह्मणस्तस्मिन्ब्राह्मणे गवि हस्तिनि शुनि चाव श्वपाके च पण्डिताः समदर्शिनो विद्याविनयसंपन्न उत्तमसंस्कारवति ब्राह्मणे सात्त्विके मध्यमायां च राजस्यां गवि संस्कारहीनायामत्यन्तमेव केवलतामसे हस्त्यादौ च सत्त्वादिगुणैस्तज्जैश्च संस्कारैस्तथा राजसैस्तथा तामसैश्च संस्कारैरत्यन्तमेवास्पृष्टं सममेकमविक्रियं ब्रह्म द्रष्टुं शीलं येषां ते पण्डिताः संदर्शिनः।।१८।।

नन्वभोज्यान्नास्ते दोषवन्तः 'समासमाभ्यां विषमसमे पूजातः'इति स्मृतेर्न ते दोषवन्तः। कथम्-इहैव जीवद्भिरेव तैः समदर्शिभिः पण्डितैर्जितो वशीकृतः सर्गो जन्म येषां साम्ये सर्वभूतेषु ब्रह्मणि समभावे स्थितं निश्चलीभूतं स्थितं निश्चलीभूतं मनोऽन्तःकरणं निर्देषम। यद्यपि दोषवत्सु श्वपाकादिषु मूढैस्तद्दोषैर्दोषवदिव विभाव्यते तथापि तद्दोषैरसंस्पृष्टमिति निर्दोषं दोषवर्जितं, हि यस्मान्नापि स्वगुणभेदभिन्नं निर्गुणत्वाच्चैतन्यस्य। वक्ष्यतिच भगवानिच्छादीनां क्षेत्रधर्मत्वमनादित्वान्निर्गुणत्वादिति च। नाप्यन्त्या विशेषा आत्मनो भेदकाः सन्ति प्रतिशरीरं तेषां सत्त्वे प्रमाणानुपपत्तेरतः समं ब्रह्मैकं च। यस्माद्ब्रह्मण्येव ते स्थितास्तस्मान्न दोषगन्धमात्रमपि

तान्स्पृशति देहादिसंघातात्मदर्शनाभिमानाभावात्। देहादिसेघातात्मदर्शनाभिमानवद्विषयं तु तत्सुत्रं 'समासमाम्यां विषमसमे पूजातः' इति पूजाविषयत्वविशेषणात्। दृश्यते हि ब्रह्मवित्षडङ्गविच्चतुर्वेदविदिति पूजादानादौ गुणविशेषसंबन्धः कारणं ब्रह्म तु सर्वगुणदोषसंबन्धवर्जितमित्यतो ब्रह्मणि ते स्थिता इति युक्तम्। कर्मिविषयं च समासमाभ्यामित्यादीदं तु सर्वकर्मसंन्यासिविषयं प्रस्तितं सर्वकर्माणि मनसेत्यारभ्याद्यायपरिसमाप्तेः।।१९।।

यस्मान्निर्दोषं समं ब्रह्मात्मा तस्मात्-न प्रहृष्येन्न हर्षं कुर्यात्प्रियमिष्टं प्राप्य लब्ध्वा नोद्विजेत्प्राप्यैव चाप्रियमनिष्टं सब्ध्वा। देहमात्रात्मदर्शिनां हि प्रियाप्रियप्राप्ती हर्षविषादस्थाने न केवलात्मदर्शिनस्तस्य प्रियाप्रियाप्राप्त्यसंभवात्। किंच सर्वभूतेष्वेकः समो निर्दोष आत्मेति स्थिरा निर्विचिकित्सा बुद्धिर्यस्य स स्थिरबुद्धिरसंमूढः संमोहवर्जितश्च स्याद्यथोक्तब्रह्मवुद्द्रह्मणि स्थितोऽकर्मत्सर्वकर्मसंन्यासीत्यर्थः।।२०।।

किंच ब्रह्मणि स्थितो बाह्यस्पर्शेषु बाह्याश्च ते स्पर्शाश्च बाह्यस्पर्शाः स्पृश्यन्त इति स्पर्शाः शब्दादयो

विषयास्तेषु बाह्यस्पर्शेष्वासक्त आत्मान्तःकरणं यस्य सोऽयमसक्तात्मा विषयेषु प्रीतिवर्जितः सन्विन्दति लभते आत्मनि यत्सुखं तद्विन्दतीत्येतत्। स ब्रह्मयोगयुक्तात्मा ब्रह्मणि योगः समाधिर्ब्रह्मयोगस्तेन ब्रह्मयोगेन युक्तः समाहितस्तस्मिन्व्यापृत आत्मान्तःकरणं यस्य स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते प्राप्नोति। तस्माद्बाह्यविषयप्रीतेः क्षणिकाया इन्द्रियाणि निवर्तयेदात्मन्यक्षयसुखार्थीत्यर्थः।।२१।।

इतश्च निवर्तयेत्-ये हि यस्मात्संस्पर्शजा विषयेन्द्रियसंस्पर्शेभ्यो जाता भोगा भुक्तयो दुःखयोनय एव तेऽविद्याकृतत्वात्। दृश्यन्ते ह्याध्यात्मिकादीनि दुःखानि तन्निमित्तान्येव। यथेह लोके तथा परलोकेऽपीति गम्यत एवशब्दात्। न संसारे सुखस्य गन्धमात्रमप्यस्तीति बुद्ध्वा विषयमृगतृष्णिकाया इन्द्रियाणि निवर्तयेत्। न केवलं दुःखयोनय आद्यन्तवन्तश्चादिर्विषयेन्द्रियसंयोगो भोगानामन्तश्च तद्वियोग एवात आद्यन्तवन्तोऽनित्या मध्यक्षणभावित्वादित्यर्थः। कौन्तेय, न तेषु रमते बुधो भोगेषु विवेक्यवगतपरमार्थतत्त्वोऽत्यन्तमूढानामेव हि विषयेषु रतिर्दृश्यते यथा पशुप्रभृतीनाम्।।२२।।

अयं च श्रेयोमार्गप्रतिपक्षी कष्टतमो दोषः सर्वानर्थप्राप्तिहेतुर्दुर्निवार्यश्चेति तत्परिहारे यत्नाधिक्यं

कर्तव्यमित्याह भगवान्-शक्नोत्युत्सहत इहैव जीवन्नेव यः सोढुं प्रसहितुं प्राक्पूर्वं शरीरविमोक्षणादा मरणात्, मरणसीमाकरणं जीवतोऽवश्यंभावी हि कामक्रोधोद्भवो वेगोऽनन्तनिमित्तवान्हि स इति। यावन्मरणं तावन्न विश्रम्भणाय इत्यर्थः। काम इन्द्रियगोचरप्राप्त इष्टे विषये श्रूयमाणे स्मर्यमाणे वानुभुते सिखहेतौ या गर्धिस्तृष्णा स कामः, क्रोधश्चात्मनः प्रतिकूलेषु दुःखहेतुषु दृश्यमानेषु श्रूयमाणेषु वा यो द्वेषः स क्रोधस्तौ कामक्रोधावुद्भवो यस्य वेगस्य स कामक्रोधोद्भवो वेगः,
रोमाञ्चनह्रष्टनेत्रवदनादिलिङ्गोऽन्तःकरणप्रक्षोभरूपः कामोद्भवो वेगो
गात्रप्रकम्पप्रस्वेदसंदष्टौष्ठपुटरक्तनेत्रादिलिङ्गः क्रोधोद्भवो वेगस्तं कामक्रोधोद्भवं वेगं य उत्सहते सोढुं प्रसहितुं स युक्तो योगी सुखी चेह लोके नरः।।२३।।

कथंभूतश्च ब्रह्मणि स्थितो ब्रह्म प्राप्नोतात्याह-योऽन्तसुखोऽन्तरात्मनि सुखं यस्य

सोऽन्तःसुखस्तथान्तरेवात्मन्याराम आक्रीडा यस्य सोऽन्तरारामस्तथैवान्तरात्मैव ज्योतिः प्रकाशो यस्य सोऽन्तर्ज्योतिरेव। य ईदृशः स योगी ब्रह्मनिर्वाणं ब्रह्मणि निर्वृतिं मोक्षमिह जीवन्नेव ब्रह्मभूतः सन्नधिगच्छति प्राप्नोति।।२४।।

किंच लभन्ते ब्रह्मनिर्वाणं मोक्षमृषयः सम्यग्दर्शिनः समन्यासिनः क्षीणपापादिदोषाश्छन्नद्वैधाश्छन्नसंशया यतात्मानः संयतेन्द्रियाः सर्वभूतहिते रताः सर्वेषां भूतानां हित आनुकूल्ये रता अहिंसका इत्यर्थः।।२५।।

किंच कामक्रोधवियुक्तानां कामश्च क्रोधश्च कामक्रोधौ ताभ्यां वियुक्तानां यतीनां संन्यासिनां यतचेतसां संयतान्तःकरणानामभित उभयतो जीवतां मृतानां च ब्रह्मनिर्वाणं मोक्षो वर्तते, विदितात्मानां विदितो ज्ञात आत्मा येषां ते विदितात्मानस्तेषां विदितात्मनां सम्यगदर्शिनामित्यर्थः।।२६।।

सम्यग्दर्शननिष्ठानां संन्यासिनां सद्योमुक्तिरुक्ता कर्मयोगश्चेश्वरार्पितसर्वभावेनेस्वरे ब्रह्मण्याधाय क्रियमाणः सत्त्वशुद्धिज्ञानप्राप्तिसर्वकर्मसंन्यासक्रमेण मोक्षायेति भगवान्पदे पदेऽब्रवीद्वक्ष्यति च। अथेदानीं ध्यानयोगं सम्यगदर्शनस्यान्तरङ्गं विस्तरेण वक्ष्यामीति तस्य

सूत्रस्थानीयाञ्श्लोकानुपदिशति स्मस्पर्शाञ्शब्दादीन्कृत्वा बहिर्बाह्यान् श्रोत्रादिद्वारेणान्तर्बुद्धौ प्रवेशिताः शब्दादयो विषयास्तानचिन्तयतो बाह्या बहिरेव कृता भवन्ति। तानेवं बहिः कृत्वा चक्षुश्चैवान्तरे भ्रुवोः, कृत्वेत्यनुषज्यते। तथा प्राणापानौ नासाभ्यन्तरचारिणौ समौ कृत्वा।।२७।।

यतेन्द्रिय इति। यतेन्द्रियमनोबुद्धिर्यतानि संयतानीन्द्रियाणि मनो बुद्धिश्च यस्य स
यतेन्द्रियमनोबुद्धिर्मननान्मुनिः संन्यासी मोक्षपरायण एवं देहसंस्थानो मोक्षपरायणो मोक्ष एव परमयनं परा गतिर्यस्य सोऽयं मोक्षपरायणो मुनिर्भवेत्। विगतेच्छाभयक्रोध इच्छा च भयं च क्रोधश्चेच्छाभयक्रोधास्ते विगता यस्मात्स विगतेच्छाभयक्रोधः। य एवं वर्तते सदा संन्यासी मुक्त एव सः। न तस्य मोक्षोऽन्यः कर्तव्योऽस्ति।।२८।।

एवं समाहितचित्तेन किं विज्ञेयमित्युच्यते-भोक्तारं यज्ञानां तपसां च कर्तृरूपेण देवतारूपेण च

सर्वलोकमहेश्वरं सर्वेषां लोकानां महान्तमाश्वरं सर्वलोकमहेश्वरं सुह्रदं सर्वभूतानां सर्वप्राणिनां प्रत्यपकारनिरपेक्षतयोपकारिणं सर्वभूतानां ह्रदयेशयं सर्वकर्मफलाध्यक्षं सर्वप्रत्ययसाक्षिणां मां नारायणं ज्ञात्वा शान्तिं सर्वसंसारोपरतिमृच्छति प्राप्नोतीति।।२९।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशंकरभगवत्पूज्यपादकृतौ श्रीमद्भगवद्गीताभाष्ये कर्मसंन्यासयोगो नाम पञ्चमोऽध्यायः।।५।।

षष्ठोऽध्यायः।

अतीतानन्तराध्यायान्ते ध्यानयोगस्य सम्यग्दर्शनं प्रत्यन्तरङ्गस्य सूत्रभूताः श्लोकाः स्पर्शान्कृत्वा बहिरित्यादय उपदिष्टास्तेषां वृत्तिस्थानीयोऽयं षष्ठोऽध्याय आरभ्यते, तत्र ध्यानयोगस्य बहिरङ्गं कर्मेति यावद्ध्यानयोगारोहणासमर्थस्तावद्गृहस्थेनाधिकृतेन कर्तव्यं कर्मेत्यतस्तत्स्तौति-अनाश्रित इति। ननु कर्म कारणमुच्यत इति विशेषणादारूढस्य च शमेनैव संबन्धकरणात्। आरुरुक्षोरारूढस्य च शमः कर्म चोभयं कर्तव्यत्वेनाभिप्रेतं

चेत्स्यात्तदारुरुक्षोरारूढस्य चेति शमकर्मविषयभेदेन विशेषणं विभागकरणं चानर्थकं स्यात्। तत्राश्रमिणां कश्चिद्योगमारुरुक्षुर्भवत्यारूढश्च कश्चिदन्ये नारुरुक्षवो न चारूढास्तानपेक्ष्यारुरुक्षोरारूढस्य चेति विशेषणं विभागकरणं चोपपद्यत एवेति चेत्। न। तस्यैवेति वचनात्। पुनर्योगग्रहणाच्च योगारूढस्येति य आसीत्पूर्वं योगमारुरुक्षुस्तस्यैवारूढस्य शम एव कर्तव्यं कारणं योगफलं प्रत्युच्यत इति। अतो न यावज्जीवं कर्तव्यत्वप्राप्तिः कस्यचिदपि कर्मणः, योगविभ्रष्टवचनाच्च। गृहस्थस्य चेत्कर्मिणो योगो विहितः षष्ठेऽध्याये स योगविभ्रष्टोऽपि कर्मगतिं कर्मफलं प्राप्नोतीति तस्य नाशाशङ्कानुपपन्ना स्यात्। अवश्यं हि कृतं कर्म काम्यं नित्यं वा मोक्षस्य नित्यत्वादनारभ्यत्वे स्वं फलमारभत एव। नित्यस्य च कर्मणो वेदप्रणाणावबुद्धत्वात्फलेन भवितव्यमित्यवोचाम, अन्यथा वेदस्यानर्थक्यप्रसङ्गादिति। नच कर्मणि सत्युभयविभ्रष्टवचनमर्थवत्, कर्मिणोविभ्रंशकारणानुपपत्तेः कर्म कृतमीश्वरे संन्यस्येत्यतः कर्तरि कर्म फलं नारभत इति चेत्। नेश्वरे संन्यासस्याधिकतरफलहेतुत्वोपपत्तेः। मोक्षायैवेति चेत्स्वकर्मणां कृतानामीश्वरे न्यासो मोक्षायैव न फलान्तराय, योगसहितो योगच्च विभ्रष्ट इत्यतस्तं प्रति नाशाशङ्का युक्तैवेति चेत्। न। 'एकाकी यतचित्तात्मा निराशीरपरिग्रहः', 'ब्रह्मचारिव्रत स्थितः', इति कर्मसंन्यासविधानात्। नचात्र ध्यानकाले स्त्रीसहायत्वाशङ्का येनैकाकित्वं विधीयते। नच गृहस्थस्य निराशीरपरिग्रह इत्यादिवचनमनुकूलम्। उभयविभ्रष्टप्रश्नानुपपत्तेश्च। अनाश्रित इत्यनेन कर्मिण एव संन्यासित्वं योगित्वं चोक्तं, प्रतिषिद्धं च निरग्नेरक्रियस्य च संन्यासित्वं योगित्वं चेति चेत्। न। ध्यानयोगं प्रति बहिरङ्गस्य सतः कर्मणः फलाकाङ्क्षा संन्यासस्तुतिपरत्वात्। न केवलं निरग्निरक्रिय एव संन्यासी योगी च किं तर्हि कर्म्यपि कर्मफलासंङ्ग संन्यस्य कर्मयोगमनुति,ष्ठन्सत्त्वशुद्धयर्थं संन्यासी योगी च भवतीति स्तूयते। नचैकेन वाक्येन कर्मफलासङ्गसंन्यासस्तुतिश्चतुर्थाश्रमप्रतिषेधश्चोपपद्यते। नच प्रसिद्धं निरग्नेरक्रियस्य परमार्थसंन्यासिनः श्रुतिस्मृतिपुराणेतिहासयोगशास्त्रविहितं संन्यासित्वं योगित्वं च प्रतिषेधति भगवान्। स्ववचनविरोधाच्च। सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नास्ते मौनीसंतुष्टो येन केनचिदनिकेतः स्थिरमतिर्विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः सर्वारम्भपरित्यागीति च तत्र तत्र भगवता स्ववचनानि दर्शितानि तैर्विरुध्येत चतुर्थाश्रमविप्रतिषेधः। तस्मान्मुनेर्योगमारुरुक्षोः प्रतिपन्नगार्हस्थ्यस्याग्निहोत्रादि कर्मफलनिरपेक्षमनुष्ठीयमानं ध्यानयोगारोहणसाधनत्वं बुद्धिशुद्धिद्वारेण प्रतिपद्यत इति स संन्यासी च योगी चेति स्तूयते-अनाश्रितः न आश्रितोऽनाश्रितः किं कर्मफलं कर्मणः फलं कर्मफलं यत्तदनाश्रितः। कर्मफलतृष्णारहित इत्यर्थः। योहि कर्मफले तृष्णावान्स कर्मफलमाश्रितो भवत्ययं तु तद्विपरीतोऽतोऽनाश्रितः कर्मफलम्। एवंभूतः सन्कार्यं कर्तव्यं नित्यं काम्यविपरीतमग्निहोत्रादिकं करोति निर्वर्तयति। यः कश्चिदीदृशः कर्मी स

कर्म्यन्तरेभ्यो विशिष्यत इत्येवमर्थमाह स संन्यासी च योगी चेति। संन्यासः परित्यागः स यस्यास्ति स संन्यासी च सोगी च। योगश्चित्तसमाधानं स यस्यास्ति स योगी चेत्येवंगुणसंपन्नोऽयं मन्तव्यो न केवलं निरग्निरक्रिय एव संन्यासी योगी चेति मन्यव्यः। निर्गता अग्नयः कर्माङ्गभूता यस्मात्स निरग्निः,

अक्रियश्चानग्निसाधना अप्यविद्यमानाः क्रयास्तपोदानादिका यस्यासावक्रियः।।१।।

ननु च निरग्नेरक्रियस्यैवश्रुतिस्मृतियोगशास्त्रेषु संन्यासित्वं योगित्वं च प्रसिद्धं कथमिह

साग्नेः सक्रियस्य संन्यासित्वं योगित्वं चाप्रसिद्धमुच्यते इति। नैष दोषः। कयाचिद्गुणवृत्त्योभयस्य संपिपादयिशितत्वात्। तत्कथं कर्मफलसंकल्पसंन्यासात्संन्यासित्वं योगाङ्गत्वेन च कर्मानुष्ठामात्कर्मफलसंकल्पस्य वा चित्तविक्षेपहेतोः परित्यागाद्योगित्वं चेति गौणमुभयं न पुनर्मुख्यं संन्यासित्वं योगित्वं चाभिप्रेतमित्येतमर्थं दर्शयितुमाह-यं संन्यासमिति। यं सर्वकर्मतत्फलपरित्यालक्षणं परमार्थसंन्यासमिति प्राहुः श्रुतिस्मृतिविदो, योगं कर्मानुष्ठानलक्षणं तं परमार्थसंन्यासं विद्धि जानीहि हे पाण्डव। कर्मयोगस्य प्रवृत्तिलक्षणस्य तद्विपरीतेन निवृत्तिलक्षणेन परमार्थसंन्यासेन कीदृशं सामान्यमङ्गीकृत्य तद्भाव उच्यत इत्यपेक्षायामिदमुच्यते। अस्ति परमार्थसंन्यासेन सादृश्यं कर्तृद्वारकं कर्मयोगस्य। यो हि परमार्थसंन्यासी स त्यक्तसर्वकर्मसाधनतया सर्वकर्मतत्फलविषयं संकल्पं प्रवृत्तिहेतुकामकारणं संन्यस्यति। अयमपि कर्मयोगी कर्म कुर्वाण एव फलविषयं संकल्पं संन्यस्यतीत्येतमर्थं दर्शयन्नाह। न हि यस्मादसंन्यस्तसंकल्पोऽसंन्यस्तोऽपरित्यक्तः फलविषयसंकल्पोऽभिसंधिर्येन सोऽसंन्यस्तसंकल्पः कश्चन कश्चिदपि कर्मी योगी समाधानवान्भवति। न संभवतीत्यर्थः। फलसंकल्पस्य चित्तविक्षेपहेतुत्वात्। तस्माद्यः कश्चन कर्मी स संन्यस्तफलसंकल्पो भवेत्स योगी समाधानवानविक्षिप्तचित्तो भवेच्चित्तविक्षेपहेतोः फलसंकल्पस्य संन्यस्तत्वादित्याभिप्रायः। एवं परमार्थसंन्यासकर्मयोगयोः कर्तृद्वारकं संन्याससामान्यमपेक्ष्य 'यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव' इति कर्मयोगस्य स्तुत्यर्थं संन्यासत्वमुक्तम्।।२।।

ध्यानयोगस्य फलनिरपेक्षः कर्मयोगो बहिरङ्गं साधनमिति तं संन्यासत्वेन स्तुत्वाधुना कर्मयोगस्य ध्यानयोगसाधनत्वं दर्शयति-आरुरुक्षोरिति। आरुरुक्षोरारोढुमिच्छतोऽनारूढस्य ध्यानयोगेऽवस्थातुमशक्तस्यैवेत्यर्थः। कस्यारुरुक्षोर्मुनेः कर्मफलसंन्यासिन इत्यर्थः। किमारुरुक्षोर्योगं कर् कारणं साधनमुच्यते, योगारूढस्य पुनस्तस्यैव शम उपशमः सर्वकर्मभ्यो निवृत्तिः कारणं योगारूढत्वस्य साधनमुच्यत इत्यर्थः। यावद्यावत्कर्मभ्य तावत्तावन्निरायासस्य जितेन्द्रियस्य चित्तं समाधीयते, तथा सति स झटिटि योगारूढो भवति। तथाचोक्तं व्यासेन 'नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च। शीलं स्थितिर्दण्डनिधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्यः'इति।।३।।

अथेदानीं कदा योगारूढो भवतीत्युच्यते-यदेति। यदा समाधीयमानचित्तो योगी हीन्द्रियार्थेष्विन्द्रियाणामर्थः शब्दादयस्तेष्विन्द्रियार्थेषु कर्मसु च नित्यनैमित्तिककाम्यप्रतिशिद्धेषु प्रयोजनाभावबुद्धया नानुषज्जतेऽनुषङ्गं कर्तव्यताबुद्धिं न करोतीत्यर्थः। सर्वसंकल्पसंन्यासी सर्वान्संकल्पानिहामुत्रार्थकामहेतून्संन्यसितु शीलमस्येति स सर्वसंकल्पसंन्यासी योगारूढः प्राप्तयोग इत्येतत्तदा तस्मिन्कालउच्यते। सर्वसंकल्पसंन्यासीति वचनात्सर्वांश्च कामान्सर्वाणि च कर्माणि

संन्यसेदित्यर्थः। संकल्पमूला हि सर्वे कामाः 'संकल्पमूला कामो वै यज्ञाः संकल्पसंभवाः'। 'काम जानामि ते मूलं संकल्पात्तवं हि जायसे। न त्वां संकल्पयिष्यामि तेन मे न भवष्यसि' इत्यादिस्मृतेः। सर्वकामपरित्यागे च सर्वकर्मसंन्यासः सिद्धो भवति, 'स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते'इत्यादिश्रुतिभ्यो 'यद्यद्धि कुरुते कर्म तत्तत्कामस्य चेष्टितम्'इत्यादिस्मृतिभ्यश्च न्यायाच्च। नहि सर्वसंकल्पसंन्यासे कश्चित्स्पन्दितुमपि शक्तः तस्मात्सर्वसंकल्पसंन्यासीति वचनात्सर्वान्कामान्सर्वाणि कर्माणि च त्याजयति भगवान्।।४।।

यदैवं योगारूढस्तदा तेनात्मात्मनोद्धृतो भवति संसारादनर्थव्रातात्, अतः उद्धरेत्संसारसागरे निमग्नमात्मानात्मानं तत उदूर्ध्वं हरेदुद्धरेत् योगारूढतामापादयेदित्यर्थः। नात्मानमवसादयेन्नाधो नयेन्नाधो गमयेत्। आत्मैव हि यस्मादात्मनो बन्धु। नह्यन्यः कश्चिद्बन्धुर्यः संसारमुक्ते भवति। बन्धुरपि तावन्मोक्षं प्रति प्रतिकूल एव स्नेहादिबन्धनायतनत्वात्। तस्माद्युक्तमवधारणमात्मैव ह्यात्मनो बन्धुरिति। आत्मैव रिपुः शत्रुर्योऽन्योऽपकारी बाह्यः शत्रुः सोऽप्यात्मप्रयुक्त एवेति युक्तमेवाबधारणमात्मैव रिपुरात्मन इति।।५।।

आत्मैव बन्धुरात्मैवं रिपुरात्मन इत्युक्तं तत्र किंलक्षण आत्मनो बन्धुः किंलक्षणो वात्मनो रिपुरुत्युच्यते-बन्धुरात्मात्मनस्तस्य तस्यात्मनः स आत्मा बन्धुर्येनात्मनात्मैव जितः आत्मा कार्यकरणसंघातो

येन जितो वशीकृतः। जितेन्द्रिय इत्यर्थः। अनात्मनस्त्वजितात्मनस्तु शत्रुत्वे शत्रुभावे वर्तेतात्मैव शत्रुवत्। यथाऽनात्मा शत्रुरात्मनोऽपकारे वर्तेतेत्यर्थः।।६।।

जितात्मन इति। जितात्मनः कार्यकरणादिसंघात आत्मा जितो येन स जितात्मा तस्य जितात्मनः प्रशान्तस्य प्रसन्नान्तःकरणस्य सतः संन्यासिनः परमात्मा समाहितः। साक्षादात्मभावेन वर्तत इत्यर्थः। किंच शीतोष्णसुखदुःखेषु तथा मानेऽपमाने च मानापमानयोः पूजापरिभवयोः।।७।।

ज्ञानेति। ज्ञानविज्ञानतृप्तात्मा ज्ञानं शास्त्रोक्तपदार्थानां परिज्ञानं, विज्ञानं तु शास्त्रतो ज्ञातानां तथैव स्वानुभवकरणं ताभ्यां ज्ञानविज्ञानाभ्यां तृप्तः संजातालंप्रत्यय आत्मान्तकरणं यस्य स ज्ञानविज्ञानतृप्तात्मा कूटस्थोऽप्रकम्प्यो भवतीत्यर्थः। विजितेन्द्रियश्च। य ईदृशो युक्तः समाहित इति स उच्यते कथ्यते। स योगी समलोष्टाश्मकाञ्चनो लोष्टाश्मकाञ्चनानि समानि यस्य स समलोष्टाश्मकाञ्चनः।।८।।

किंच-सुहृदित्यादिश्लोकार्धमेकपदम्। सुहृदिति प्रत्यपकारमनपेक्ष्योपकर्ता। मित्रं स्नेहवान्। अरिः शत्रुः। उदासीनो न कस्यचित्पक्षं भजते। मध्यस्थो यो विरुद्धयोरुभयोर्हितैषी। द्वेष्य आत्मनोऽप्रियः। बन्धुः संबन्धित्येतेषु साधुषु शास्त्रानुवर्तिष्वपि च पापेषु प्रतिषिद्धकारिषु सर्वेष्वेतेषु समबुद्धिः कः किंकर्मेत्यव्यापृतबुद्धिरित्यर्थः। विशिष्यते विमुच्यत इति वा पाठान्तरम्। योगारूढानां सर्वेषामयमुत्तम इत्यर्थः। विशिष्यते। 'विमुच्यते' इति वा पाठान्तरम्। योगारूढानां सर्वेषामयमुत्तम इत्यर्थः।।९।।

अत एवमुत्तमफलप्राप्तये योगी ध्यायी युञ्जीत समादध्यात्सततं सर्वदात्मानमन्तः करणं रहस्येकान्ते गिरिगुहादौ स्थितः सन्नेकाक्यसहायः। रहसि स्थित एकाकी चेति विशेषणात्संन्यासं कृत्वेत्यर्थः। यतचित्तात्मा चित्तमन्तःकरणमात्मा देहश्च संयतौ यस्य स यतचित्तात्मा निराशीर्वीततृष्णोऽपरिग्रहश्च। परिग्रहरहित इत्यर्थः। संन्यासित्वेऽपि त्यक्तसर्वपरिग्रहः

सन्युञ्जीतेत्यर्थः।।१०।।

अथेदानीं योगं युञ्जत आसनाहारविहारादीनां योगसाधनत्वेन नियमो वक्तव्यः। प्राप्तयोगस्य लक्षणं तत्फलादि चेत्यत आरभ्यते। तत्रासनमेव तावत्प्रथममुच्यते-शुचाविति। शुचौ शुद्धे विविक्ते स्वभावतः संस्कारतो वा देशे स्थाने प्रतिष्ठाप्य स्थिरमचलमात्मन आसनं नात्युच्छ्रितं नातीवोच्छ्रितं नाप्यतिनीचं तच्च चैलमजिनं कुशाश्चोत्तरे यस्मिन्नासने तदासनं चैलाजिनकुशोत्तरम्। पाठक्रमाद्विपरीतोऽत्र क्रमश्चैलादीनाम्।।११।।

प्रतिष्ठाप्य किम्-तत्र तस्मिन्नासन उपविश्य योगं युञ्ज्यात्। कथं, सर्वविषयेभ्य उपसंहृत्यैकाग्रं मनः कृत्वा

यतचित्तेन्द्रियक्रियः चित्तं चेन्द्रियाणि च चितेन्द्रियाणि तेषां क्रियाः संयता यस्य स यतचित्तेन्द्रियक्रियः। स किमर्थं योगं युञ्ज्यादित्याह आत्मविशुद्धयेऽन्तःकरणस्य विशुध्द्यर्थमित्येतत्।।१२।।

बाह्यसाधनमासनमुक्तमधुना शरीरधारणं कथमित्युच्यते-सममिति। समं कायशिरोग्रीवं कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवं तत्समं धारयन्नचलं च। समं धारयतश्चलनं संभवत्यतो विशिनष्टि अचलमिति। स्थिरः स्थिरो भूत्वेत्यर्थः। स्वं नासिकाग्रसंप्रेक्षणमिह विधित्सितं किं तर्हि चक्षुषोर्दृष्टिसंनिपातः। स चान्तःकरणसमाधानापेक्षो विवक्षितः। स्वनासिकाग्रसंप्रेक्षणमेव चेद्विवक्षितं मनस्तत्रैव समाधीयेत नात्मनि। आत्मनि हि मनसः समाधानां वक्ष्यत्यात्मसंस्थं मनः कृत्वेति। तस्मादिवशब्दलोपेनाक्ष्णोर्दृष्टिसंनिपात एव संप्रेक्ष्येत्युच्यते। द्शश्चानवलोकयन्दिशां चावलोकनमन्तराऽकुर्वन्नित्येतत्।।१३।।

किंच-प्रशान्तात्मा प्रकर्षेण शान्त आत्मान्तःकरणं यस्य सोऽयं प्रशान्तात्मा विगतभीर्विगतभ्यो ब्रह्मचारिव्रते स्थितो ब्रह्मचारिणो व्रतं ब्रह्मचर्यं गुरुशुश्रूषाभिक्षाभुक्तयादि तस्मिन्स्थितस्तदनुष्ठाता भवेदित्यर्थः। किंच मनः संयम्य मनसो वृत्तीरुपसंहृत्येत्येतन्मच्चित्तो मयि परमेश्वरे चित्तं यस्य योऽयं मच्चित्तो युक्तः समाहितः सन्नासीतोपविशेत्, मत्परोऽहं परो यस्य सोऽयं मत्परः। भवति कश्चिद्रागी स्त्रीचित्तो नतु स्त्रीयमेव परत्वेन गृह्णाति, किं तर्हि राजानं महादेवं वा। अयं तु मच्चित्तो मत्परश्च।।१४।।

अथेदानीं योगफलमुच्यते-युञ्जन्निति। युञ्जन्समाधानं कुर्वन्नेवं यथोक्तेन विधानेन सदात्मानं योगी न्यतमानसो न्यतं संयतं मानसं मनो यस्य सोऽयं नियतमानसः स शान्तिमुपरतिं निर्वाणपरमां निर्वाणं मोक्षस्तत्परमा निष्ठा यस्याः शान्तेः सा निर्वाणपरमा तां निर्वाणपरमां मत्संस्थां मदधीनामधिगच्छति

प्राप्नोति।।१५।।

इदानीं योगिन आहारादिनियम उच्यते-नात्यश्नत इति। नात्यश्नत आत्मसंमितमन्नपरिमाणमतीत्याश्नतोऽत्यश्नतो न योगोऽस्ति, न चैकान्तमनश्नतो योगोऽस्ति 'यदुह वा आत्मसंमितमन्नं तदवति तन्न हिनस्ति, यद्भूयो हिनस्ति तद्यत्कनीयो न तदवति' इति श्रुतेः। तस्माद्योगी नात्मसंमितादन्नादधिकं न्यूनं वाश्नीयात्। आथवा योगिनो योगशास्त्रे परिपाठितादन्नपरिमाणादतिमात्रमश्नतो योगो नास्ति। उक्तं हि 'अर्थमशनस्य सव्यञ्जनस्य तृतीमुदकस्य तु। वायोः संचरणार्थं तु चतुर्थमवशेषयेत्' इत्यादि परिमाणम्। तथा नचातिस्वप्नशीलस्य योगो भवति नैव चातिमात्रं जाग्रतो योगो भवति चार्जुन।।१६।।

कथं पुनर्योगो भवतीत्युच्यते-युक्तेति। युक्ताहारविहारस्य आहियत इत्याहारोऽन्नं विहरणं विहारः पादक्रमस्तौ युक्तौ नियतपरिमाणौ यस्य, तथा युक्तचेष्टस्य युक्ता नियता चेष्टा यस्य कर्मसु, तथा युक्तस्वप्नावबोधस्य युक्तौ स्वप्नश्चावबोधश्च तौ नियतकालौ यस्य तस्य युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगिनो योगो भवति दुःखहा दुःखानि सर्वाणि हन्तीति दुःखहा। सर्वसंसारदुःखक्षयकृद्योगो भवतीत्यर्थः।।१७।।

अथाधुना कदा युक्तो भवतीत्युच्यते-यदेति। यदा विनियतं चित्तं विशेषेण नियतं

संयतमेकाग्रतामापन्नं चित्तं हित्वा वाह्यचिन्तामात्मन्येव केवलेऽवतिष्ठते। स्वात्मनि स्थितिं लभत इत्यर्थः। निःस्पृह सर्वकामेभ्यो निर्गता दृष्टादृष्टविषयेभ्यः स्पृहा तृष्णा यस्य योगिनः स युक्तः समाहित इत्यिच्यते तदा तस्मिन्काले।।१८।।

तस्य योगिनः समाहितं यच्चित्तं तस्योपमोच्यते-यथेति। यथा दीपः प्रदीपो निवातस्थो निवाते वातवर्जिते देशे स्थितो नेङ्गते न चलति सोपमोपमीयतेऽनयेत्युपमा योगज्ञैश्चित्तप्रचारदर्शिभिः स्मृता चिन्तिता। योगिनो यतचित्तस्य संयतान्तःकरणस्य युञ्जतो योगमनुतिष्ठत आत्मनः समाधिमनुतिष्ठत इत्यर्थः।।१९।।

एवं योगाभ्यासबलादेकाग्रीभूतं निवातप्रदीपकल्पं सत्-यत्र यस्मिन्काल उपरमते चित्तमुपरतिं गच्छति निरुद्धं सर्वतोनिवारितप्रचारं योगसेवया योगानुष्ठानेन यत्र चैव यस्मिंश्च काल आत्मना समाधिपरिशुद्धेनान्तःकरणेनात्मानं परं चैतन्यज्योतिःस्वरूपं पश्यन्नुपलभमानः स्व एवात्मनि स्व एवात्मनि तुष्यति तुष्टिं भजते ।।२०।।

किंच-सुखमिति। सुखमात्यन्तिकमत्यन्तमेव भवतीत्यात्यन्तिकम्। अनन्तमित्यर्थः। यत्तद्बुद्धिग्राह्यं बुध्द्यैवेन्द्रियनिरपेक्षया गृह्यत इति बुद्धिग्राह्यमतीन्द्रियमिन्द्रियगोचरातीतमविषयजनितमित्यर्थः। वेत्ति तदीदृशं सुखमनुभवति यत्र यस्मिन्काले न चैवायं विद्वानात्मस्वरूपे स्थितस्तस्मान्नैव चलति तत्त्वतः तत्त्वस्वरूपान्न प्रच्यत इत्यर्थः।।२१।।

किंच यं सब्ध्वा यमात्मलाभं सब्ध्वा प्राप्य चापरमन्यल्लाभान्तरं ततोऽधिकमस्तीति न मन्यते न चिन्तयति। किंच यस्मिन्नात्मतत्त्वे स्थितो दुःखेन शस्त्रनिपातादिलक्षणेन गुरुणा महतापि न विचाल्यते।।२२।।

यत्रोपरमत इत्याद्यरभ्य यावद्भिप्विशेषणैर्विशिष्ट आत्मावस्थाविशेषो योग उक्तः-तं विद्याद्विजानीयाद्दुःखसंयोगवियोगं दुःखैः संयोगो दुःखसंयोगस्तेन वियोगो दुःखसंयोगवियोगस्तं दिःखसंयोगवियोगं योग इत्येवसंज्ञितं विपरीतलक्षणेन विद्यात्। विजानीयादित्यर्थः। योगफलमुपसंहृत्य पुनरन्वारम्भेण योगस्य कर्तव्यतोच्यते निश्चयानिर्वेदयोर्योगसाधनत्वविधानार्थम्। स यथोक्तफलो योगो निश्चयोनाध्यवसायेन योक्तव्योऽनिर्विण्णचेतसा न निर्विण्णमनिर्विण्णं किं तच्चेतस्तेन निर्वेदरङ्तेन चेतसा चित्तेनेत्यर्थः।।२३।।

किंच संकल्पप्रभवान्संकल्पः प्रभवो येषां कामानां ते संकल्पप्रभवाः कामास्तांस्त्यक्त्वा परित्यज्य सर्वानशेषतो निर्लेपेन। किंच मनसैव विवेकयुक्तेनेन्द्रियग्राममिन्द्रयसमुदायं विनियम्य नियमनं कृत्वा समन्ततः समन्तात्।।२४।।

शनैः शनैर्न सहसोपरमेदुपरतिं कुर्यात्। कया बुद्धया। किंविशिष्टया धृतिगृहीतया धृत्या

धैर्येण गृहीतया धैर्येण युक्तयेत्यर्थः। आत्मसंस्थमात्मनि संस्थितमात्मैव सर्वं न ततोऽन्यत्किंचिदस्तीत्येवमात्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत्। एष योगस्य परमो विधिः।।२५।।

तत्रैवमात्मसंस्थं मनः कर्तुं प्रव-त्तो योगी-यतो यतो यस्माद्यस्मान्निमित्ताच्छब्दादेर्निश्चरति निर्गच्छति स्वभावदोषान्मनश्चञ्चलमत्यर्थं चलमत एवास्थिरं ततस्ततस्तस्मात्तस्माच्छब्दादेर्निमित्तान्नियम्य तत्तन्निमित्तं याथात्म्यनिरूपणेनाभासाकृत्य

वैराग्यभावनया चैतन्मन आत्मन्येव वशं नयेदात्मवश्यता मापादयेत्। एवं योगाभ्यासबलाद्योगिन आत्मन्येव प्रशाम्यति मनः।।२६।।

प्रशान्तमनसं प्रशान्तमनसं प्रशान्तं मनो यस्य स प्रशान्तमनास्तं प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमं सुखमुत्तमं निरतिशयमुपैत्युपगच्छति। शान्तरजसं प्रक्षीणमोहादिक्लेशरजसमित्यर्थः। ब्रह्मभूतं जीवन्मुक्तं

ब्रह्मैव सर्वमित्येवं निश्चयवन्तं ब्रह्मभूतमकल्मषं धर्माधर्मादिवर्जितम्।।२७।।

युञ्जन्निति। युञ्जन्नेवं यथोक्तेन क्रमेण योगी योगान्तरायवर्जितः सदात्मानं युञ्जन् विगतकल्मषो विगतपापः सुखेनानायासेन ब्रह्मसंस्पर्शं ब्रह्मणा परेण संस्पर्शो यस्य तद्ब्रह्मसंस्पर्शं सुखमत्यन्तमन्तमतीत्य वर्तत इत्यत्यन्तमुत्कृष्टं निरतिशयमश्नुते व्याप्नोति।।२८।।

इदानीं योगस्य यत्फलं ब्रह्मैकत्वदर्शनं सर्वसंसारविच्छेदकारणं तत्प्रदर्श्यते-सर्वेति। सर्वभूतस्थं सर्वेषु भूतेषु स्थितं स्वमात्मानं सर्वभूतानि चात्मनि ब्रह्मादीनि स्तम्बपर्यन्तानि च सर्वभूतान्यात्मन्येकतां गतानीक्षते पश्यति योगयुक्तात्मा समाहितान्तःकरणः सर्वत्र समदर्शनः सर्वेषु ब्रह्मादिस्थावरान्तेषु विषमेषु सर्वभूतेशु समं निर्विशेषं विक्रियारहितं ब्रह्मात्मैकत्वविषयं दर्शनं ज्ञानं यस्य स सर्वत्र समदर्शनः।।२९।।

एतस्यात्मैकत्वदर्शनस्य फलमुच्यते-यो मामिति। यो मां पश्यति वासुदेवं सर्वस्यात्मानं सर्वत्र सर्वेषु भुतेषु सर्वं च ब्रह्मादिभूतजातं मयि सर्वात्मनि पश्यति तस्यैवमात्मैकत्वदर्शिनोऽहमीश्वरो न प्रणश्यामि न परोक्षतां गमिष्यामि। स च मे न प्रणश्यति स च विद्वान्मम वासुदेवस्य न प्रणश्यति न परोक्षीभवति। तस्य च मम चैकात्मकत्वात्। स्वात्मा हि नामात्मनः प्रिय एव भवति। यस्माच्चाहमेव सर्वात्मैकत्वदर्शी।।३०।।

इत्येत्पूर्वश्लोकार्थं सम्यग्दर्शनमनूद्य तत्फलं मोक्षोऽभिधीयते-सर्वेति। सर्वथा सर्वप्रकारैर्वर्तमानोऽपि सम्यग्दर्शी योगी वैष्णवे परमे पदे वर्तते नित्यमुक्त एव स न मोक्षं प्रति केनचित्प्रतिबध्यत इत्यर्थः।।३१।।

किंचान्यत्-आत्मौपम्येनात्मा स्वयमेवोपमीयत [अनया] इत्युपमा तस्या उपमाया भाव औपम्यं तेनात्मौपम्येन सर्वत्र सर्वभूतेषु समं तुल्यं पश्यति योऽर्जुन स च किं समं पश्यतीत्युच्यते यथा मम सुखमिष्टं तथा सर्वप्राणिनां सुखमनुकूलम्। वाशब्दश्चार्थे । यदि वा यच्च दुःखं मम प्रतिकूलमनिष्टं यथा तथा सर्वप्राणिनां दुःखमनिष्टं प्रतिकूलमित्येवमात्मौपम्येन सुखदुःखे अनुकूलप्रतिकूले तुल्यतया सर्वभूतेषु समं पश्यति न कस्यचित्प्रतिकूलमाचरत्यहिंसक इत्यर्थः। य एवमहिंसकः सम्यग्दर्शननिष्ठः स योगी परम उत्कृष्टो मतोऽभिप्रेतःसर्वयोगिनां मध्ये।।३२।।

एतस्य यथोक्तस्य सम्यग्दर्शनलक्षणस्य योगस्य दुःसंपाद्यतामालक्ष्य शुश्रूषुर्ध्रुवं तत्प्राप्त्युपायमर्जुन उवाच-योऽयमिति। योऽयं योगस्त्वया प्रोक्तः साम्येन समत्वेन हे मधुसूदन,

एतस्य योगस्याहं न पश्यामि नोपलभे चञ्चलत्वान्मनसः किं स्थिरामतलां स्थितिं प्रसिद्धमेतत्।।३३।।

चञ्चलमिति। चञ्चलं हि मनः कृष्णेति कृषतेर्विलेखनार्थस्य रूपं भक्तजनपापादिदोषाकर्षणात् कृष्णः। न केवलमत्यर्थं चञ्चलं प्रमाथि च प्रमथनशीलं प्रमन्थाति शरीरमिन्द्रियाणि च विक्षिपति परवशीकरोति। किंच बलवन्न केनचिन्नियन्तुं शक्यम्। किंच दृढं तन्तुनागवदच्छेद्यं तस्यैवंभूतस्य मनसोऽहं निग्रहं निरोधं मन्ये वायोरिव। यथा वायोर्दुष्करो

निग्रहस्ततोऽपि मनसो दुष्करं मन्य इत्यभिप्रायः।।३४।।

एवमेतद्यथा ब्रवीषि-असंशयं नास्ति संशयो मनो दुर्निग्रहं चलमित्यत्रहे महाबाहो। किं त्वभ्यासो नाम चित्तभूमौ कस्यांचित्समानप्रत्ययावृत्तिश्चित्तस्य। वैराग्यं नाम दृष्टादृष्टेष्टभोगेषु दोषदर्शनाभ्यासाद्वैतृष्णयं तेन च वैराग्येण गृह्यते। विक्षेपरूपः प्रचारश्चित्तस्यैवं तन्मनो गृह्यते निगृह्यते निरुध्यत इत्यर्थः।।३५।।

यः पुनरसंयतात्मा तेन-असंयतात्मनाभ्यासवैराग्यामसंयत आत्मान्तःकरणं यस्य सोऽयमसंयतात्मा तेनासंयतात्मना योगो दुष्प्रापो दुःखेन प्राप्य इति मे मतिः। यस्तु पुनर्वश्यात्माभ्यासवैराग्याभ्यां वश्यत्वमापादित आत्मा मनो यस्य सोऽयं वश्यात्मा तेन वश्यात्मना तु यतता भूयोऽपि प्रयत्नं कुर्वता शक्योऽवाप्तुं योग उपायतो यथोक्तादुपायात्।।३६।।

तत्र योगाभ्यासाङ्गीकरणेन परलोकेहलोकप्राप्तिनिमित्तानि कर्माणि संन्यस्तानि योगसिद्धिफलं च मोक्षसाधनं सम्यगदर्शनं न प्राप्तमिति योगी योगमार्गान्मरणकाले चलितचित्त इति तस्य नाशमाशङ्क्यार्जुन उवाच-अयतिरिति। अयतिरप्रयत्नवान्योगमार्गे श्रद्धयास्तिक्यबुद्धया चोपेतो योगादन्तकालेऽपि चलितं मानसं मनो यस्य स चलितमानसो भ्रष्टस्मृतिः सोऽप्राप्य योगसंसिद्धिं योगफलं सम्यगदर्शनं कां गतिं हे कृष्ण, गच्छति।।३७।।

कच्चिदिति। कच्चिंत्किं नोभयविभ्रष्टः कर्ममार्गाद्योगमार्गाच्च विभ्रष्टः संश्छिन्नाभ्रमिव नश्यति किंवा न नश्यत्यप्रतिष्ठो निराश्रयो हे महाबाहो, विमूढः सन्ब्रह्मणः पथि ब्रह्मप्राप्तिमार्गे।।३८।।

एतदिति। एतन्मे मम संशयं कृष्ण, छेत्तुमपनेतुमर्हस्यशेषतः। त्वदन्यस्त्वत्तोऽन्य ऋषिर्देवो वा छेत्ता नाशयिता संशयस्यास्य न हि यस्मादुपपद्यते न संभवत्यतस्त्वमेव छेत्तुमर्हसात्यर्थः।।३९।।

पार्थेति। हे पार्थ, नैवेह लोके नामुत्र परस्मिन्वा लोके विनाशस्तस्य विद्यते नास्ति नाशो नाम पूर्वस्माद्धीनजन्मप्राप्तिः स योगभ्रष्टस्य नास्ति, न हि यस्मात्कल्याणकृच्छुभकृत्कश्चिद्दुर्गतिं कुत्सितां गतिं हे तात, तनोत्यात्मानं पुत्ररूपेणेति पिता तात उच्यते पितैव पुत्र इति पुत्रोऽपि तातं उच्यते शिष्योऽपि पुत्र तुल्य उच्यते, [येतो न]गच्छति।।४०।।

किंत्वस्य भवति-प्राप्येति। योगमार्गे प्रवृत्तः संन्यासी सामर्थ्यात्प्राप्त गत्वा पुण्यकृतामश्वमेधादियाजिनां लोकांस्तत्र चोषित्वा वासमनुभूय शाश्वतीर्निंत्याः समाः संवत्सरांस्तद्भोगक्षये शुचीनां यथोक्तकारीणां श्रीमतां विभूतिमतां गेहे गृहे योगभ्रष्टोऽभिजायते।।४१।।

अथेति। अथवा श्रीमतां कुलादन्यस्मिन्योगिनामेव गरिद्राणां कुले भवति जायते धीमतां बुद्धिमताम्। एतद्धि जन्म यद्दरिद्राणां योगिनां कुले दुर्लभतरं दुःखेन लभ्यतरं पूर्वमपेक्ष्य लोके जन्म यदीदृशं यथोक्तविशेषणे कुले।।४२।।

यस्मात्-तत्रेति। तत्र योगिनां कुले तं बुद्धिसंयोगं बुद्धया संयोग बुद्धिसंयोगं लभते पौर्वदेहिकं पर्वस्मिन्देहे भवं पौर्वदेहिकम। यतते च प्रयत्नं करोति ततस्तस्मात्पूर्वकृतात्संस्काराग्भूयो बहुतरं संसिद्धौ संसिद्धिनिमित्तं हे कुरु नन्दन।।४३।।

कथं पूर्वदेहबुद्धिसंयोग इति तदुच्यते-पूर्वेति। यः पूर्वजन्मनि कृतोऽभ्यासः स पूर्वाभ्यासस्तेनैव बलवता हियते हि यस्मादवशोऽपि स योगभ्रष्टो न कृतं चेद्योगाभ्याससंस्काराद्बलवत्तरमधर्मादिलक्षणं कर्म तदा योगाभ्यासजनितेन संस्कारेण ह्रियते।

अधर्मश्चेद्बलवत्तरः कृतस्तेन योगजोऽपि संस्कारोऽभिभूयत एव। तत्क्षये तु योगजः संस्कारः स्वयमेव कार्यमारभते न दीर्घकालस्थस्यपि विनाशस्तस्यास्तीत्यर्थः। जिज्ञासुरपि योगस्य स्वरूपं ज्ञातुमिच्छन्योगमार्गे प्रव-त्तः संन्यासी योगभ्रष्टः सामर्थ्यात्सोऽपि शब्दब्रह्म वेदोक्तकर्मानुष्ठानफलमतिवर्ततेऽपाकरिष्यति किमुत

बुद्ध्वा यो योगं तन्निष्ठोऽभ्यासं कुर्यात्।।४४।।

कुतश्च योगित्वं श्रेय इति-प्रयत्नादिति। प्रयत्नाद्यतमानोऽधिकं यतमान इत्यर्थः। तत्र योगी विद्वान्संशुद्धकिल्बिषो विशुद्धकिल्बिषः संशुद्धपापोऽनेकेषु जन्मसु किंचित्किंचित्संस्कारजातमुपचित्य तेनोपचितेनानेकजन्मकृतेन संसिद्धोऽनेकजन्मसंसिद्धस्ततो सद्यसम्यग्दर्शनः सन्याति परां प्रकृष्टां गतिम्।।४५।।

यस्मादेवं तस्मात्-तपस्विभ्य इति। तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि। ज्ञानमत्र शास्त्रार्थपाण्डित्यं तद्वद्भ्योऽपि मतो ज्ञातोऽधिकः श्रोष्ठ इति, कर्मिभ्योऽग्निहोत्रादि कर्म तद्वद्भ्योऽधिको योगी विशिष्टो यस्मात्तस्माद्योगी भवार्जुन।।४६।।

योगिनामिति। योगिनामपि सर्वेषां रुद्रादित्यादिध्यानपराणां मध्ये मद्गतेन मयि वासुदेवे समाहितेनान्तरात्मनान्तःकरणेन श्रद्धावाञ्श्रद्दधानः सन्भजते सेवते योमां स मे मम युक्ततमोऽतिशयेन युक्तो मतोऽभिप्रेत इति।।४७।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यपूज्यपादश्रीमदाचार्यश्रीशंकरभगवतः कृतौ श्रीभगवद्गीताभाष्ये आत्मसंयमयोगो नाम षष्ठोऽध्यायः।।६।।

सप्तमोऽध्यायः।

'योगिनामपि सर्वेषां मद्गतेनान्तरात्मना। श्रद्धावान्भजते यो मां स मे युक्ततमो मतः' इति प्रश्नबीजमुपन्यस्य स्वमेवेदृशं मदीयं त्त्वमेवं मद्गतान्तरात्मा स्यादित्येतद्विवक्षुर्भगवानुवाच-मयीति। मयि वक्ष्यमाणविशेषणे परमेश्वर आसक्तं मनो यस्य स मय्यासक्तमना हे पार्थ, योगं युञ्जन्मनः-समाधानं कुर्वन्मदाश्रयोऽहमेव परमोश्वर आश्रयो यस्य स मदाश्रयः। यो हि कश्चित्पुरुषार्थेन केनचिदर्थी भवति स तत्साधनं कर्माग्निहोत्रादि तपो दानं वा किंचिदाश्रयं प्रतिपद्यते, अयं तु योगी मामेवाश्रयं प्रतिपद्यते हित्वान्यत्साधनान्तरं मय्येवासक्तमना भवति। यस्त्वमेवंभूतः सन्नसंशयं समग्रं समस्तं विभूतिबलशक्त्यैश्वर्यादिगुणसंपन्नं मां यथा येन प्रकारेण ज्ञास्यसि संशयमन्तरेणैवमेव भगवानिति तच्छृणूच्यमानं मया।।१।।

तच्च मद्वषयं ज्ञानं ते तुभ्यमहं सविज्ञानं विज्ञानसहितं स्वनुभवसंयुक्तमिदं वक्ष्यामि कथयिष्याम्यशेषतः कात्स्न्येन। तज्ज्ञानं विवक्षितं स्तोति श्रोतुरभिमुखीकरणाय। यज्ऱत्वा यज्ज्ञानां ज्ञात्वा नेह भूयः पुनर्ज्ञातव्यं पुरुशार्थसाधनमवशिष्यते नावशेपो भवतीति मत्तत्त्वज्ञो यः स सर्वज्ञो भवतीत्यर्थः। अतो विशिष्टफलत्वाद्दुर्लभं ज्ञानम्।।२।।

कथमित्युच्यते-मनुष्याणामिति। मनुष्याणां मध्ये सहस्रेष्वनेकेषु कश्चिद्यतति प्रयत्नं करोति सिद्धये सिद्धयथे तेषां यततामपि सिद्धानां सिद्धा एव हि ते ये मोक्षाय यतन्ते तेषां कश्चिदेव मां वेत्ति तत्त्वतो यथावत्।।३।।

श्रोतारं प्ररोचनेनाभिमुखीकृत्याह-भूमिरिति। भूमिरिति पृथिवीतन्मात्रमुच्यते न स्थूला। 'भिन्ना प्रकृतिरष्टधा' इति वचनात्। तथाबादयोऽपि तन्मात्राण्येवोच्यन्ते। आपोऽनलो वायुः खं मन इति

मनसः कारणमहंकारो गृह्यते। बुद्धिरित्यहंकारकारणं महत्तत्त्वम्। अहंकार इत्यविद्यासंयुक्तमव्यक्तम्। यथा विषसंयुक्तमन्नं विषमुच्यत एवमहंकारवासनावदव्यक्तं मूलकारणमहंकार इत्युच्यते प्रवर्तकत्वादहंकारस्य। अहंकार एव हि सर्वस्य प्रवृत्तिबीजं दृष्टं लोके।इतीयं यथोक्ता प्रक-तिर्मे ममैश्वरी मायाशक्तिरष्टधा भिन्ना भेद्मागता।।४।।

अपरेति। अपरा न परा निकृष्टाऽशुद्धानर्थकरी संसारबन्धनात्मिकेयमितोऽस्या यथोक्तायास्त्वन्यां विशुद्धां प्रकृतिं ममात्मभूतां विद्धि मे परा प्रकृष्टां जीवभूतां क्षेत्रज्ञलक्षणां प्राणधारणनिमित्तभूतां हे महाबाहो, यया प्रकृत्येदं धार्यते जगदन्तःप्रविष्टया।।५।।

एतदिति। एतद्योनीन्येते परापरे क्षेत्रक्षेत्रज्ञलक्षणे प्रकृती योनिर्येषां भूतानां तान्येतदायेनीनि भूतानि सर्वाणीत्येवमुपधारय जानीहि। यस्मान्मम प्रकृती योनिः कारणं सर्वभूतानामतोऽहं कृत्स्नस्य समस्तस्य जगतः प्रभव उत्पत्तिः प्रलयो विनाशस्तथा प्रकृतिद्वयद्वारेणाहं सर्वज्ञ ईश्वरो जगतः कारणमित्यर्थः।।६।।

यतस्तस्मात् मत्तः परमेश्वरात्परतरमन्यत्कारणान्तरं किंचिन्नास्ति न विद्यते। अहमेव जगत्कारणमित्यर्थः। हे धनंजय, यस्मादेवं तस्मान्मयि परमेश्वरे सर्वाणि भूतानि सर्वमिदं जगत्प्रोतमनिस्यीतमनुगतमनुविद्धम्। ग्रथितमित्यर्थः। दीर्घतन्तिषु पटवत्सूत्रे च मणिगणा इव।।७।।

केन केन धर्मेण विशिष्टे त्वयि सर्वमिदं प्रोतमित्युच्यते-रसोऽहमपां यः सारः स रसस्तस्मिन्रसभूते मय्यापः प्रोता इत्यर्थः। एवं सर्व्र। यथाहमप्सु रस एवं प्रभास्मि शशिसूर्ययोः। प्रणव ओंकारः सर्ववेदेषु

तस्मिन्प्रणवभूते मयि सर्वे वेदाः प्रोताः। तथा ख आकाशे शब्दः

सारभूतस्तस्मिन्मयि खं प्रोतम्। तथआ पौरुषं पुरुषस्य भावो यतः पुंबुद्धिर्नृषु तस्मिन्मयि पुरुषाः प्रोताः।।८।।

पुण्य इति। पुण्यः सुरभिर्गन्धः पृथिव्यां चाहं तस्मिन्मयि गन्धभूते पृथिवी प्रोता। पुण्यत्वं गन्धस्य स्वभावत एव पृथिव्यां दर्शितमबादिषु रतादेः पुण्यत्वोपलक्षणार्थम्। अपुण्यत्वं तु गन्धादीनामविद्याधर्माद्यपेक्षं संसारिणां भूतविशेषसंसर्गनिमित्तं भवति। तेजो दीप्तिश्चास्मि विभावसावग्नौ। विभावसावग्नौ। तथा जीवनं सर्वभूतेषु। येन जीवन्ति सर्वाणि भूतानि तज्जीवनम्। तपश्चास्मि तपस्विषु तस्मिंस्तपसि मयि तपस्विनः प्रोताः।।९।।

बीजमिति। बीजं प्ररोहकारणं मां विद्धि सर्वभूतानां हे पार्थ, सनातनं चिरतनम्। किंच

बुद्धिर्विवेकशक्तिरन्तःकरणस्य बुद्धिमतां विवेकशक्तिमतामस्मि। तेजः प्रागल्भ्यं तद्वतां तेजस्विनामहम्।।१०।।

बलमिति। बलं सामर्थ्यमोजो बलवताहम्। तच्च बलं कामरागविवर्जितं कामश्च रागश्च कामरागौ कामस्तृष्णाऽसंनिकृष्टेषु विषयेषु, रागो प्राप्तेषु विषयेषु ताभ्यां कामरागाभ्यां विवर्जितं देहादिधारणमात्रार्थं बलमहमस्मि नतु यत्संसारिणां तृष्णारागकरणम्। किंच धर्माविरुद्धो धर्मेण शास्त्रार्थेनाविरुद्धो यः प्राणिषु भूतेषु कामो यथा देहधारणमात्राद्यर्थोऽशनपानादिविषयः कामोऽस्मि हे भरतर्षभ।।११।।

किंच-ये चैवेति। ये चैव सात्त्विकाः सत्त्वनिर्वृत्ता भावाः पदार्था राजसा रजोनिर्वृत्तास्तामसास्तमोनिर्वृत्ताश्च ये केचित्प्राणिनां स्वकर्मवशाच्चायन्ते भावास्तान्मत्त एव जायमानानित्येवं विद्धि सर्वान्समस्तानेव। यद्यपि ते मत्तो जायन्ते तथापि न त्वहं तेषु

तदधीनस्तद्वशो यथा संसारिणस्ते पुनर्मयि मद्वशा मदधीनाः।।१२।।

एवंभूतमपि परमेश्वरं नित्यशुद्धबुद्धमुक्तस्वभावं सर्वभूतात्मानं निर्गुणं संसारदोषबीजप्रदाहकारणं मां नाभिजानाति जगदित्यनुक्रोशं दर्शयति भगवान्। तच्च किंनिम्त्तं जगतोऽज्ञानमित्युच्यते-ज्ञिभिरिति। त्रिभिर्गुणमयैर्गुणविकारै रागद्वेषमोहादिप्रकारैर्भावैः पदार्थैरेभिर्यथोक्तैः सर्वमिदं प्राणिजातं जगन्मोहितमविवेकतामापादितं सन्नाभिजानाति मामेभ्यो यथोक्तेभ्यो गुणेभ्यः परं व्यतिरिक्तं विलक्षणम्। चाव्ययं व्ययरहितम्। जन्मादिसर्वभावविकारवर्जितमित्यर्थः।।१३।।

कथं पुनर्दैवीमेतां त्रिगुणात्मिकां वैष्णवीं मायामतिक्रामन्तीत्युच्यते-दैवीति। दैवी देवस्य ममेश्वरस्य विष्णोः स्वभूता हि यस्मादेषा यथोक्ता घुणमयी मम माया दुरत्यया दुःखेनात्ययोःऽतिक्रमणं यस्याः सा दुरत्यया। तत्रैवं सति सर्वधर्मान्परित्यज्य मामेव मायाविनं स्वात्मभूतं सर्वात्मना ये प्रपद्यन्ते ते मायामेतां सर्वभूतमोहिनीं तरन्त्यतिक्रामन्ति। संसारबन्धनान्मुच्यन्त इत्यर्थः।।१४।।

यदि त्वां प्रपन्ना मायामेतां तरन्ति कस्मात्त्वामेव सर्वे न प्रपद्यन्त इत्युच्यते-न मामिति। न मां परमेश्वरं दुष्कृतिनः पापकारिणो मूढाः प्रपद्यन्ते नराधमा नराणां मध्येऽधमानिकृषअटास्ते च माययापहृतज्ञानाः संमुषितज्ञाना आसुरं भावं हिंसानृतादिलक्षणमाश्रिताः।।१५।।

ये पुनर्नरोत्तमाः पुण्यकर्माणः-चतुर्विधाश्चतुःप्रकारा भजन्ते सेवन्ते मां जनाः सुकृतिनः पुण्यकर्माणो हेऽर्जुन, आर्त आर्तिपरिगृहीतस्तकरव्याघ्ररोगादिनाभिभू (तोऽभिभवमा) त आपन्नो

जिज्ञासुर्भगवत्तत्त्वं ज्ञातुमिच्छति योऽर्थार्थी धनकामो ज्ञानी विष्णोस्तत्त्वविच्च हे भरतर्षभ।।१६।।

तेषामिति। तेषां चतिर्णां मध्ये ज्ञानी तत्त्ववित्तत्त्वान्नित्ययुक्तो भवत्येकभक्तिश्चान्यस्य भजनीयस्यादर्शनादतः स एकभक्तिर्विशिष्यते विशेषमाधिक्यमापद्यते। अतिरिच्यत इत्यर्थः। प्रियो हि यस्मादहमात्माज्ञानिनोऽतस्तस्याहमत्यर्थं प्रियः। प्रसिद्धं हि लोक आत्मा प्रियो भवतीति। तस्माज्ज्ञानिन आत्मत्वाद्वासुदेवः प्रियो भवतीत्यर्थः। स च ज्ञानी मम वासुदेवस्यात्मैवेति ममात्यर्थं प्रियः।।१७।।

न तर्ह्यार्तादयस्त्रयो वासुदेवस्य प्रियाः। न, किं तर्हि-उदारा इति। उदारा उत्कृष्टा सर्व एवैते त्रयोऽपि मम प्रिया एवेत्यर्थः। नहि कश्चिन्मद्भक्तो मम वासुदेवस्याप्रियो भवति, ज्ञानी त्वत्यर्थं प्रियो भवतीति विशेषः। तत्कस्मादित्याह। ज्ञानी त्वात्मैव नान्यो मत्त इति मे मम मतं निश्चयः। आस्थित आरोढुं प्रवृत्तः स ज्ञानी हि यस्मादहमेव भगवान्वासुदेवो नान्योऽस्मीत्येवं युक्तात्मा समाहित चित्तः सन्मामेव परं ब्रह्म गन्तव्यमनुत्तमां गतिं गन्तुं प्रवृत्त इत्यर्थ।।१८।।

ज्ञानी पुनरपि स्तूयते-बहूनामिति। बहूनां जन्मनां ज्ञानार्थसंस्काराश्रयाणामन्ते समाप्तौ ज्ञानवान्प्राप्तपरिपाकज्ञानो मां वासुदेवं प्रत्यगात्मानं प्रत्यक्षतः प्रपद्यते। कथं, वासुदेवः सर्वमिति। य एवं सर्वात्मानं मां प्रतिपद्यते स महात्मा न तत्समोऽन्योऽस्त्यधिको वा, अतः सुदुर्भलभो मनुष्याणां सहस्रेष्वित्युक्तम्।।१९।।

आत्मैव सर्वं वासुदेव इत्येवमप्रतिपत्तौ कारणमुच्यते-कामैरिति। कामैस्तैस्तैः पुत्रपशुस्वर्गादिविषयैर्ह्रतज्ञाना अपह्रतविवेकविज्ञानाः प्रपद्यन्तेऽन्यदेवताः प्राप्नुवन्ति वासुदेवादात्मनोऽन्या देवतास्तं तं नियमं देवताराधने प्रसिद्धो यो यो नियमस्तं तमास्थायाश्रित्य

प्रकृत्या स्वभावेन जन्मान्तरार्जितसंस्कारविशेषेण नियता नियमिताः स्वयात्मीयया।।२०।।

तेषां च कामिनां-यो यः कामी यां यां देवतातनुं श्रद्धया संयुक्तो भक्तश्च सन्नर्चितुं पूजयितुमिच्छति तस्य तस्य कामिनोऽचलां स्थिरां श्रद्धां तामेव विदधामि स्थिरीकरोमि ययैव पूर्वं प्रवृत्तः स्वभावतो यो यां देवतातनुं श्रद्धयार्चितुमिच्छतीति।।२१।।

स तयेति। स तया मद्विहितया श्रद्धया युक्तः संस्तया देवतातन्वा राधनमाराधनमीहते चेष्टते लभते च ततस्तस्या आराधिताया देवतातन्वाः कामानीप्सितान्मयैव परमेश्वरेण सर्वज्ञेन कर्मफलविभागज्ञतया विहितान्निर्मितांस्तान्, हि यस्मात्ते भगवता विहिताः कामास्तस्मात्तानवश्यं लभत इत्यर्थः। हितानिति पदच्छेदे हितत्वं कामानामुपचरितं कल्प्यम्, नहि कामा हिताः कस्यचित्।।२२।।

यस्मादन्तवत्साधनव्यापारा अविवेकिनः कामिनश्च तेऽतः-अन्तवद्विनाशि तु फलं तेषां तदभवत्यल्पमेधसामल्पप्रज्ञानां। देवान्देवयजो यान्ति देवान्यजन्तीति देवयजस्ते देवान्यान्ति मद्भक्ता यान्ति मामपि। एवं समानेऽप्यायासे मामेव न प्रपद्यन्तेऽनन्तफलायाहो खलु कष्टं वर्तन्त इत्यनुक्रोशं दर्शयति भगवान्।।२३।।

किंनिमित्तं मामेव न प्रपद्यन्ते इत्युच्यते-अव्यक्तमिति। अव्यक्तमप्रकाशं व्यक्तिमापन्नं प्रकाशं गतमिदानीं मन्यन्ते मां नित्यप्रसिद्धमीश्वरमपि सन्तमबुद्धयोऽविवेकिनः परं भावं परमात्मस्वरूपमजानन्तोऽविवेकिनो ममाव्ययं व्ययरहितमनुत्तमं निरतिशयं मदीयं भावमजानन्तो मन्यन्त इत्यर्थः।।२४।।

तदीयमज्ञानं किंनिमित्तमित्युच्यते-नाहमिति। नाहं प्रकाशः सर्वस्य लोकस्य केषांचिदेव मद्भक्तानां प्रकाशोऽहमित्यभिप्रायः। योगमायासमावृतः योगो गुणानां युक्तिर्घटनं सैव माया योगमाया तया योगमायया समावृतः संच्छन्न इत्यर्थः। अतएव मूढो लोकोऽयं नाभिजानाति मामजमव्ययम्।।२५।।

यया योगमायया समावृतं मां लोको नाभिजानाति नासौ योगमाया मदीया सती ममेश्वरस्य मायाविनो ज्ञानं प्रतिबन्धाति यथान्यस्यापि मायाविनो मायाऽज्ञानं तद्वत्, यत एवमतः-वेदाहमिति। अहं तु वेद न कश्चन मद्भक्तं मच्छरणमेकं मुक्त्वा। मत्तत्त्ववेदनाभावादेव न मां भजते।।२६।।

केन पुनर्मत्तत्त्ववेदनप्रतिबन्धेन प्रतिबद्धानि सन्ति जायमानानि सर्वभूतानि मां न विदन्तीत्यपेक्षायामिदमाह-इच्छेति। इच्छाद्वेषसमुत्थेन इच्छा च द्वेषश्चेच्छाद्वेषौ ताभ्यां समुत्तिष्ठतीतीच्छाद्वेषसमुत्थस्तेनेच्छाद्वेषसमुत्थेन। केनेति विशेषापेक्षायामिदमाह-द्वन्द्वमोहेनेति। द्वन्द्वनिमित्तो मोहो द्वन्द्वमोहस्तावेवेच्छाद्वेषौ शीतोष्णवत्परस्परविरुद्धौ सुखदुःखतद्धेतुविषयौ यथाकालं सर्वभूतैः संबध्यमानौ द्वन्द्वशब्देनाभिधीयेते। तत्र यदेच्छाद्वेषौ सुखदुःखतद्धेतुसंप्राप्त्या लब्धात्मकौ भवतस्तदा तौ सर्वभूतानां प्रज्ञायाः स्ववशापादनद्वारेण परमार्थात्मतत्त्वविषयज्ञानोत्पत्तिप्रतिबन्धकारणं मोहं जनयतः। नहीच्छाद्वेषदोषवशीकृतचित्तस्य यथाभूतार्थविशयज्ञानमुत्पद्यते बहिरपि किमु वक्तव्यं ताभ्यामाविष्टबुद्धेः संमूढस्य प्रत्यगात्मनि बहुप्रतिबन्धे ज्ञानं नोत्पद्यत इति। अतस्तेनेच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत भरतान्वयज, सर्वभूतानि संमोहितानि सन्ति संमेहं संमूढतां सर्गे जन्मन्युत्पत्तिकाल इत्येतद्यन्ति गच्छन्ति हे परंतप, मोहवशान्येव सर्वभूतानि जायमानानि जायन्त इत्यभिप्रायः। यत एवमतस्तेन द्वन्द्वमोहेन

प्रतिबद्धप्रज्ञानानि सर्वभूतानि संमोहितानि मामात्मभूतं न जानन्त्यतएवात्मभावेन मां न भजन्ते।।२७।।

के पुनरनेन द्वन्द्वमोहेन निर्मुक्ताः सन्तस्त्वां विदित्वा यथाशास्त्रमात्मभावेन भजन्त इत्यपेक्षितमर्थं दर्शयितुमुच्यते-येषामिति। येषां तु पुनरन्तगतं समाप्तप्रायं क्षीणं पापं जनानां पुण्यकर्मणां पुण्यं कर्म येषां सत्त्वशुद्धिकारणं विद्यते ते पुण्यकर्माणस्तेषां पुण्यकर्ममां ते द्वन्द्वमोहनिर्मुक्ता यथोक्तेन द्वन्द्वमोहेन निर्मुक्ता भजन्ते मां परमात्मानं दृढव्रताः। एवमेव परमार्थतत्त्वं नान्यथेत्येवं [सर्वपरित्यागव्रतेन] निश्चितविज्ञाना दृढव्रता उच्यन्ते।।२८।।

ते किमर्थं भजन्त इत्युच्यते-जरेति। जरामरणमोक्षाय जरामरणयोर्मोक्षार्थं मां परमेश्वरमाश्रित्य मत्समाहितचित्ताः सन्तो यतन्ति प्रयतन्ते ये ते यद्ब्रह्म परं तद्विदुःकृत्स्नं समस्तमध्यात्मं प्रत्यगात्मविषयं वस्तु तद्विदुः कर्म चाखिलं समस्तं विदुः।।२९।।

साधीति। साधिभूताधिदैवमधिभूतं चाधिदैवं चाधिभूताधिदैवं सहाधिभूताधिदैवेन वर्तते साधिभूताधिदैवं च मां

ये विदुः साधियज्ञं च सहाधियज्ञेन सादियज्ञं ये विदुः प्रयाणकालेऽपि मरणकालेऽपि च ते मां विदुर्युक्तचेतसः समाहितचित्ता इति।।३०।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यपूज्यपादश्रीमदाचार्यश्रीशंकरभगवतः कृतौ श्रीभगवद्गीताभाष्ये ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः।।७।।

अष्टमोऽध्यायः।

ते ब्रह्म तद्विदुः कृत्स्नमित्यादिना भगवतार्जुनस्य प्रश्नबीजान्युपदिष्टान्यतस्तत्प्रश्नार्थमर्जुन उवाच ।।१।।२।।

एषां प्रश्नानां यथाक्रमं निर्णयाय श्रीभगवानुवाच-अक्षरमिति। अक्षरं न क्षरतीति पर आत्मा, 'एतस्य वा अक्षरस्य प्रशासने गार्गि' इति श्रुतेः। ओंकारस्य चोमित्येकाक्षरं ब्रह्मेति परेण विशेषणात्तद्ब्रह्मणम्। परमिति च निरतिशये ब्रह्मण्यक्षर उपपन्नतरं विशेषणम्। तस्यैव परस्य ब्रह्मणः प्रतिदेहं प्रत्यगात्मभावः स्वभावः। स्वभावोऽध्यात्ममुच्यते, आत्मानं देहमधिकॉत्य प्रत्यगात्मतया प्रवृत्तं परमार्थब्रह्मावसानं वस्तु स्वभावोऽध्यात्ममुच्यतेऽध्यात्मशब्देनाभिधीयते। भूतभावोद्भवकरो भूतानां भावो भूतभावस्तस्योद्भवो भूतभावोद्भवस्तं करोतीति भूतभावोद्भवकरो भूतवस्तूत्पत्तिकर इत्यर्थः। विसर्गो विसर्जनं देवतोद्देशेन चरुपुरोडाशादेर्द्रव्यस्य परित्यागः स एव विसर्गलक्षणो यज्ञः कर्मसंज्ञितः कर्मशब्दित इत्येतत्। एतस्माद्धि बीजभूताद्वृष्ट्यादिक्रमेण स्थावरजङ्गमानि भूतान्युद्भवन्ति।।३।।

अधिभूतमिति। अधिभूतं प्राणिजातमधिकृत्य भवतीति। कोऽसौ क्षरः क्षरतीति क्षरो विनाशी भावो यत्किंचिज्जनिमद्वस्त्वित्यर्थः। पुरुषः पूर्णमनेन सर्वमिति पुरि शयनाद्वा पुरुषः, आदित्यान्तर्गतो हिरण्यगर्भः सर्वप्राणिकरणानामनुग्राहकः सोऽधिदैवतम्। अधियज्ञः सर्वयज्ञाभिमानिनी देवता विष्वाख्या 'यज्ञो वै विष्णुः'इति श्रुतेः। स हि विष्णुरहमेवात्रास्मिन्देहे यो यज्ञस्तस्याबमधियज्ञो यज्ञो हि देहनिर्वर्त्यत्वेन देहसमवायीति देहाधिकरणो भवति देहभृतां वर।।४।।

अन्तकाल इति। अन्तकाले च मरणकाले मामेव परमेश्वरं विष्णुं स्मरन्मुक्त्वा परित्यज्य

कलेवरं शरीरं यः प्रयाति गच्छति स मद्भावं वैष्णवं तत्त्वं याति। नास्ति विद्यतेऽत्रास्मिन्नर्थे संशयो याति वा न वेति।।५।।

न मद्विषय एवायं नियमः किं तर्हि-यं यमिति। यं यं वापि यं यं भावं देवताविशेषं स्मरंश्चिन्तयंस्त्यजति परित्यजत्यन्ते प्राणवियोगकाले कलेवरं तं तमेव स्मृतं भावमेवैति नान्यम्। कौन्तेय, सदा सर्वदा तद्भावभावितस्तस्मिन्भावस्तद्भावः स भावितः स्मर्यमाणतयाभ्यस्तो येन स तद्भावभावितः सन्।।६।।

यस्मादेवमन्त्या भावना देहान्तरप्राप्तौ कारणं, तस्मात्सर्वेषु कालेषु मामनुस्मर यथाशास्त्रं युध्य च युद्धं च स्वधर्मं कुरु। मयि वासुदेवेऽर्पिते मनोबुद्धि यस्य तव स त्वं मय्यर्पितमनोबुद्धिः सन् मामेव यथास्मृतमेष्यस्यागमिष्यस्यसंशयो न संशयोऽत्र विद्यते।।७।।

किंच-अभ्यासेति। अभ्यासयोगयुक्तेनमयि चित्तसमर्पणविषयभूत एकस्मिंस्तुल्यप्रत्ययावृत्तिलक्षणो विलक्षणप्रत्ययान्तरितोऽभ्यासः स चाभ्यासो योगस्तेन युक्तं तत्रैव व्यापृतं योगिनश्चेतस्तेन चेतसा नान्यगामिना नान्यत्र विषयान्तरे गन्तुं शीलमस्येति नान्यगामि तेन नान्यगामिना परमं निरतिशयं पुरुषं दिव्यं दिवि सुर्यमण्डले भवं याति गच्छति, हे पार्थ, अनुचिन्तयञ्शास्त्राचार्योपदेशमनुध्यायन्नित्येतत्।।८।।

किंविशिष्टं च पुरुषं यातीत्युच्यते-कविमिति। कविं क्रान्तदर्शिनं सर्वज्ञं पुराणं चिरंतनमनुशासितारं सर्वस्य जगतः प्रशासितारमणोः सूक्ष्मादप्यणीयांसं सूक्ष्मतरमनुस्मरेदनुचिन्तयेद्यः कश्चित्सर्वस्य कर्मफलजातस्य धातारं विचित्रतया प्राणिभ्यो विभक्तारं

विभज्य दातारमचिन्त्यरुपं नास्य रुपं नियतं विद्यमानमपि केनचिच्चिन्तयितुं शक्यत इत्यचिन्त्यरुपस्तमादित्यवर्णमादित्यस्येव नित्यचैतन्यप्रकाशो वर्णो यस्य तमादित्यवर्णं तमसः परस्तादज्ञानलक्षणान्मोहान्धकारात्परं तमनुचिन्तयन्यातीति पूर्वेणैव संबन्धः।।९।।

किंच प्रयाणकाले मरणकाले मनसाऽचलेन प्रचलनवर्जितेन भक्तया युक्तो भजनं भक्तिस्तया युक्तो योगबलेन चैव योगस्य बलं योगबलं तेन समाधिजसंस्कारप्रचयजनितचित्तस्थैर्यलक्षणं योगबलं तेन च युक्त

इत्यर्थः। पूर्वं हृदयपुण्डरीके वशीकृत्य चित्तं तत ऊर्ध्वगामिन्या नाड्या भूमिजयक्रमेण भ्रुवोर्मध्ये प्राणमावेश्य स्थापयित्वा सम्यगप्रमत्तः सन्स एवं बुद्धिमान्योगी कविं पुराणमित्यादिलक्षणं तं परं पुरुषमुपैति प्रतिपद्यते। दिव्यं द्योतनात्मकम्।।१०।।

योगमार्गानुगमनेनैव ब्रह्मविद्यामन्तरेणापि ब्रह्म प्राप्यत इत्येवं प्राप्त इदमुच्यते। पुनरपि वक्ष्यमाणेनोपायेन प्रतिपित्सितस्य ब्रह्मणो वेदविद्वदनादिविशेषणिशेष्यस्याभिधानं करोति भगवान्-यदक्षरमिति। यदक्षरं न क्षरतीत्याक्षरमविनाशि वेदविदो वेदार्थज्ञा वदन्ति 'तद्वा एतदक्षरं गार्गि ब्राह्मणा अभिवदन्ति'इति श्रुतेः। सर्वविशेषनिवर्तकत्वेनाभिवदन्त्यस्थूलमनण्वित्यादि। किंच विशन्ति प्रविशन्ति सम्यग्दर्शनप्राप्तौ सत्यां यद्यतयो यतनशीलाः संन्यासिनो वीतरागा विगतो रागो येभ्यस्ते वीतरागाः। यच्चाक्षरमिच्छन्तो ज्ञातुमिति वाक्यशेषः। ब्रह्मचर्यं गुरौ चरन्ति तत्ते पदं तदक्षराख्यं पदं पदनीयं ते तुभ्यं संग्रहेण संग्रहः संक्षेपस्तेन संक्षेपेण प्रवक्ष्ये कथयिष्यामि।।११।।

'स यो ह वै तद्भगवन्मनुष्येषु प्रायणान्तमोंकारमभिध्यायीत कतमं वाव स त्न लोकं जयतीति तस्मै सहोवाच एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः' इत्युपक्रम्य 'यः पुनरेतं

त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत' इत्यादिना वचनेन 'अन्यत्र धर्मादन्यत्राधप्मात्' इति चोपक्रम्य 'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति। यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्' इत्यादिभिश्च वचनैः परस्य ब्रह्मणो वाचनकरूपेण प्रतिमावत्प्रतीकरूपेण च परब्रह्मप्रतिपत्तिसाधनत्वेन मन्दमध्यमबुद्धीनां विवक्षितस्योंकारस्योपासनं कालान्तरे मुक्तिफलमित्तं यत्तदेवेहापि 'कविं पुराणमनुशासितारं','यदक्षरं वेदविदो वदन्ति' इति चोपन्यस्तस्य च परस्य ब्रह्मणः पूर्वोक्तरूपेण प्रतिपत्त्युपायभूतस्योंकारस्य कालान्तरमुक्तिफलमुपासनं योगधारणासहितं वक्तव्यं प्रसक्तानुप्रसक्तं च यत्किंचिदित्येवमर्थ उत्तरो ग्रन्थ आरभ्यते-सर्वेति। सर्वद्वाराणि सर्वाणि च तानि द्वाराणि च सर्वद्वाराण्युपलब्धौ तानि सर्वाणि संयम्य संयमनं कृत्वा मनो हृदि हृदयपुण्डरीके निरुध्य निरोधं कृत्वा निष्प्रचारमापाद्य तत्र वशीकृतेन मनसा हृदयादूर्ध्वगामिन्या नाड्योर्ध्वमारुह्य मूर्धन्याधायात्मनः प्राणमास्थितः प्रवृत्तो योगधारणां धारयितुमं।।१२।।

तत्रैव च धारयन्-ओमित्येकाक्षरं ब्रह्म ब्रह्मणोऽभिधानभूतमोंकारं व्याहरन्नुच्चारयंस्तदर्थभूतं मामीश्वरमनुस्मरन्ननुचिन्तयन्यः प्रयाति म्रियते स त्यजन्परित्यजन्देहं शरीरम्। त्यजन्देहमिति प्रयाणविशेषणार्थं देहत्यागेन प्रयाणमात्मनो न स्वरूपनाशेनेत्यर्थः। स एवं त्यजन्याति गच्छति परमां प्रकृष्टां गतिम्।।१३।।

किंच-अनन्येति। अनन्यचेता नान्यविषये चेतो यस्य सोऽयमनन्यचेता योगी सततं सर्वदा यो मां परमेश्वरं स्मरति नित्यशः। सततमिति नैरन्तर्यमुच्यते। नित्यश इति दीर्घकालत्वमुच्यते। न

षण्मासं संवत्सरं वा किं तर्हि यावज्जीवं नैरन्तर्येण यो मां स्मरतीत्यर्थः। तस्य योगिनोऽहं सुलभः सुखेन लभ्यः। पार्थ, नित्ययुक्तस्य सदा समाहितस्य योगिनः। यत एवमतोऽनन्यचेताः सन्मयि सदा समाहितो भवेत्।।१४।।

तव सौलभ्येन किं स्यादित्युच्यते शृणु तन्मम सौलभ्येन यद्भवति-मामुपेत्य मामीश्वरमुपेत्य मद्भावमापद्य पुनर्जन्म पुनरुत्पत्तिं न प्राप्नुवन्ति। किंविशिष्टं पुनर्जन्म न प्राप्नुवन्ति तद्विशेषणमाह-दुःखालयं दुःखानामाध्यात्मिकादीनामालयमाश्रयमालीयन्ते यस्मिन्दुःखानीति दुःखालयं जन्म। न केवलं दुःखालयमशाश्वतमनवस्थितस्वरूपं च नाप्नुवनितीदृशं पुनर्जन्म महात्मानो यतयः संसिद्धिं मोक्षाख्यां परमां प्रकृष्टां गताः प्राप्ताः। ये पुनर्मां न प्राप्नुवन्ति ते पुनरावर्तन्ते।।१५।।

के किं पुनस्त्वत्तोऽन्यत्प्राप्ताःपुनरावर्तन्त इत्युच्यते-आब्रह्मेति। आब्रह्मभुवनाद्भवन्ति यस्मिन्भूतानीति भुवनं ब्रह्मभुवनं ब्रह्मलोक इत्यर्थः। आब्रह्मभुवनात्सह ब्रह्मभुवनेन लोकाः सर्वे पुनरावर्तिनः पुनरावर्तनस्वभावाः हे अर्जुन, मामेकमुपेत्य तु कौन्तेय पुनर्जन्म पुनरुत्पत्तिर्न विद्यते।।१६।।

ब्रह्मलोकसहिता लोकाः कस्मात्पुरावर्तिनः कालपरिच्छिन्नत्वात्कथम्-सहस्रेति। सहस्रयुगपर्यन्तं सहस्रं युगानि पर्यन्तं पर्यवसानं यस्याह्नस्तदहः सहस्रयुगपर्यन्तं ब्रह्मणः प्रजापतेर्विराजो विदुः, रात्रिमपि युगसहस्रान्तामहःपरिमाणामेव। के विदुरित्याह तेऽहोरात्रविदः। कालसंख्याविदो जना इत्यर्थः। यत एवं कालपरिच्छिन्नास्तेऽतः पुनरावर्तिनो लोकाः।।१७।।

प्रजापतेरहनि यद्भवति रात्रौ च तदुच्यते-अव्यक्तेति। अव्यक्तादव्यक्तं प्रजापतेः स्वापावस्था

तस्मादव्यक्ताद् व्यक्तयो व्यज्यन्त इति व्यक्तयः स्थावरजङ्गमलक्षणाः सर्वाः प्रजाः प्रभवन्त्यभिव्यज्यन्ते अह्न आगमोऽहरागमस्तस्मिन्नहरागमे काले ब्रह्मणः प्रबोधकाले, तथा रात्र्यागमे ब्रह्मणः स्वापकाले प्रलीयन्ते सर्वा व्यक्तयस्तत्रैव पूर्वोक्तेऽव्यक्तसंज्ञके।।१८।।

अकृताभ्यागमकृतविप्रणाशदोषपरिहारार्थं
बन्धमोक्षशास्त्रप्रवृत्तिसाफल्यप्रदर्शनार्थमविद्यादिक्लेशमूलकर्माशयवशाच्चावशो भूतग्रामो भूत्वा भूत्वा प्रलीयत इत्यतः संसारे वैराग्यप्रदर्शनार्थं चेदमाह-भूतग्राम इति। भूतग्रामो भूतसमुदायः स्थावरजङ्गमलक्षणो यः पूर्वस्मिन्कल्प आसीत्स एवायं नान्यो भूत्वा भूत्वा पुनरहरागमे प्रलीयते पुनः पुना
रात्र्यागमेऽह्नःक्षयेऽवशोऽस्वतन्त्र एव पार्थ, प्रभवति अवश एवाहरागमे।।१९।।

यदुपन्यस्तमक्षरं तस्य प्राप्त्युपायो निर्दिष्ट ओमित्येकाक्षरं ब्रह्मेत्यादिना। अथेदानीमक्षरस्यैव स्वरूपनिर्दिदिक्षयेदमुच्यतेऽनेन योगमार्गेणेदं गन्तव्यमिति-परस्तस्मादिति। परो व्यतिरिक्तो भिन्नः। कुतः। तस्मात्पूर्वोक्तात्। तुशब्दोऽक्षरस्य विवक्षितस्याव्यक्ताद्वैलक्षण्यविशेषणार्थः। भावोऽक्षराख्यं परं ब्रह्म। व्यतिरिक्तत्वे सत्यपि सालक्षण्यप्रसङ्गोऽस्तीति तद्विनिवृत्त्यर्थमाह-आन्य इति। अन्यो विलक्षणः स चाव्यक्तोऽनिन्द्रियगोचरः। परस्तस्मादित्युक्तं, कस्मात्पुनः परः
पूर्वोक्ताद्भूतग्रामबीजभूतादविद्यलक्षणादव्यक्तात्। सनातनश्चिरंतनः यः स भावः सर्वेषु भूतेषु ब्रह्मादिषु नश्यत्सु न विनश्यति।।२०।।

अव्यक्त इति। योऽसावव्यक्तोऽक्षर इत्युक्तस्तमेवाक्षरसंज्ञकमव्यक्तं भावमाहुःपरमां प्रकृष्टं मम विष्णोपरमं पदमित्यर्थः।।२१।।

तल्लब्धेरुपाय उच्यते-पुरुष इति। पुरुषः पुरि शयनात्पूर्णत्वाद्वा स परः पार्थ, परो निरतिशयो यस्मात्पुरुषान्न परं किंचित्सभक्तया लभ्यस्तु ज्ञानलक्षणयानन्ययात्मविषयया। यस्य पुरुषस्यान्तःस्थानि मध्यस्थानि कार्यभूतानि भूतानि। कार्यं हि कारणस्यान्तर्वर्ति भवति। येन पुरुषेण सर्वमिदं जगत्ततं व्याप्तमाकाशेनेव घटादि।।२२।।

प्रकृतानां योगिनां प्रणवावेशितब्रह्मबुद्धीनां कालान्तरमुक्तिभाजां ब्रह्मप्रतिपत्तय उत्तरो मार्गो वक्तव्य इति यत्र काल इत्यादि विवक्षितार्थसमर्पणार्थमुच्यते। आवृत्तिमार्गोपन्यास इतरमार्गस्तुत्यर्थः-यत्रेति। यत्र काले प्रयाता इति व्यवहितेन संबन्धः। यत्र यस्मिन्काले त्वनावृत्तिमपुनर्जन्मावृत्तिं तद्विपरीतां चैव। योगिन इति योगिनः कर्मिणश्चोच्यन्ते। कर्मिणस्तु गुणतः 'कर्मयोगेन(ण)योगिनाम्'इति विशेषणाद्योगिनः यत्र काले प्रयाता मृता योगिनोऽनावृत्तिं यान्ति यत्र काले च प्रयाता आवृत्तिं यान्ति तं कालं वक्ष्यामि भरतर्षभ।।२३।।

तं कालमाह-अग्निर्ज्योतिरिति। अग्निः कालाभिमानिनी देवता तथा ज्योतिर्देवतैव कालाभिमानिनी। अथवाऽग्निज्योतिषी यथाश्रुते एव देवते। भूयसां तु निर्देशो यत्र काले तं कालमित्याम्रवणवत्। यथाहर्देवताऽहः शुक्लः शुक्लपक्षदेवता षण्मासा इत्तरायणं तत्रापि देवतैव मार्गभूतेति स्थिसोऽन्यत्र न्यायः। तत्र तस्मिन्मार्गे प्रयाता मृता गच्छन्ति ब्रह्म ब्रह्मविदो ब्रह्मोपासनपरा जनाः। क्रमेणेति वाक्यशेषः। नहि सद्योमुक्तिभाजां सम्यग्दर्शननिष्ठानां गतिरागतिर्वा कचिदस्ति 'न तस्य प्राणा उत्क्रामन्ति' इति श्रुतेः। ब्रह्मसंलीनप्राणा एव ते ब्रह्ममया ब्रह्मभूता एव ते। क्रमेण तु गच्छन्ति ब्रह्म ब्रह्मविदो जनाः।।२४।।

धूम इति। धूमो रात्रिर्धूमाभिमानिनी रात्र्यभिमानिनी च देवता। तथा कृष्णः कृष्णपक्षदेवता।

षणमासा दक्षिणायनमिति च पूर्ववद्दैवतैव। तत्र चन्द्रमसि भवं चान्द्रमसं ज्योतिः फलमिष्टादिकारी योगी कर्मी प्राप्य भुक्त्वा तत्क्षयान्निवर्तते।।२५।।

शुक्लेति। शुक्लेकृष्णे शुक्ला च कृष्णा शुक्लकृष्णे। ज्ञानप्रकाशकृत्वाच्छुक्ला तदभावात्कृष्णा। एते शुक्लकृष्णे हि गती जगत इत्यधिकृतानां ज्ञानकर्मणोर्न जगतः सर्वस्यैवैते गती संभवतः। शाश्वते नित्ये संसारस्य नित्यत्वान्मतेऽभिप्रेते। तत्रैकया शुक्लया यात्यनावृत्तिमन्ययेतरयावर्तते पुनर्भूयः।।२६।।

नैते इति। नैते यथोक्ते सृती मार्गौ पार्थ, जानन्संसारायैकान्या मोक्षाय चेति योगी न मुह्यति न कश्चन कश्चिदपि। तस्मात्सर्वेषु कालेषु योगयुक्तः समाहितो भवार्जुन।।२७।।

शृणु योगस्य माहात्म्यम्-वेदेष्विति। वेदेषु सम्यगधीतेषु यज्ञेषु च साद्गुण्येनानुष्ठितेषु तपःसु च सुतप्तेषु दानेषु च सम्यग्दत्तेषु यदेतेषु पुण्यस्य फलं पुण्यफलं प्रदिष्टं शास्त्रेणात्येत्यतीत्य गच्छति तत्सर्वं फलजातमिदं विदित्वा सप्तप्रश्ननिर्णयग्वारेणोक्तं सम्यगवधार्यानुष्ठाय योगी परं प्रकृष्टमैश्वरं स्थानमुपैति प्रतिपद्यते, आद्यमादौ भवं कारणं ब्रह्मेत्यर्थः।।२८।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशंकरभगवत्पूज्यपादकृतौ श्रीमद्भगवद्गीताभाष्ये ब्रह्माक्षरनिर्देशो नामाष्टमोऽध्यायः।।८।।

नवमोऽध्यायः।

अष्टमे नाडीद्वारेण धारणायोगः सगुण उक्तः। तस्य च फलमग्यर्चिरादिक्रमेण कालान्तरे ब्रह्मप्राप्ति लक्षणमेवानावृत्तिरूपं निर्दिष्टम्। तत्रानेनैव प्रकारेण मोक्षप्राप्तिफलमधिगम्यते नान्यथेति तदाशङ्काव्याविवृत्सया भगवानुवाच-इदमिति। इदं ब्रह्मज्ञानं वक्ष्यमाणमुक्तं च पूर्वेष्वध्यायेषु तद्बुद्धौ संनिधीकृत्येदमित्याह। तुशब्दो विशेषनिर्धारणार्थः। इदमेव सम्यग्ज्ञानं साक्षान्मोक्षप्राप्तिसाधनं 'वासुदेवः सर्वमिति', 'आत्मैवेदं सर्वम्' 'एकमेवाद्वितीयम्'इत्यादिश्रुतिस्मृतिभ्यः। नान्यत्। 'अथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति' इत्यादिश्रुतिभ्यश्च। ते तुभ्यं गुह्यतमं गोप्यतमं प्रवक्ष्यामि कथयिष्याम्यनसूयवेऽसूयारहिताय। किं तत्। ज्ञानम्। किंविशिष्टम्। विज्ञानसहितमनुभवयुक्तम्। यज्ज्ञानं ज्ञात्वा प्राप्य मोक्ष्यसेऽशुभात्संसारबन्धनात्।।१।।

तच्च स्तौति-राजविद्येति। राजविद्या विद्यानां राजा दीप्त्यतिशयत्वात्। दीप्यते हीयमतिशयेन ब्रह्मविद्या सर्वविद्यानाम्। तथा राजगुह्यं गुह्यानां राजा। पवित्रं पावनमिदमुत्तमं सर्वेषां पावनानां शुद्धिकारणमिदं ब्रह्मज्ञानमुत्कृष्टतमम्। अनेकजन्मसहस्रसंचितमपि धर्माधर्मादि समूलं कर्म क्षणमात्राद्भस्मीकरोति यतोऽतः किं तस्य पावनत्वं वक्तव्यम्। किंच प्रत्यक्षावगमं प्रत्यक्षेण सुखादेरिवावगमो यस्य तत्प्रत्यक्षावगमम्। अनेकगुणवतोऽपि धर्मविरुद्धत्वं दृष्टं (श्येनयाग इव) न तथात्मज्ञानं धर्मविरोधि किंतु धर्म्यं धर्मादनपेतम्। एवमपि स्याद् दुःसमपाद्यमित्यत आह। सुसुखं कर्तुं यथा रत्नविवेकविज्ञानम्। तत्राल्पायासानां कर्मणां सुखसंपाद्यानामल्पफलत्वं दुष्कराणां च महाफलत्वं दृष्टमितीदं तु सुखसंपाद्यत्वात्फलक्षयाह्येतीति प्राप्तमत आह। अव्ययं नास्य फलतः कर्मवह्ययोऽस्तीत्यव्ययमतः श्रद्धेयमात्मज्ञानम्।।२।।

अश्रद्दधाना इति। ये पुनरश्रद्दधानाः श्रद्धाविरहिता आत्मज्ञानस्य धर्मस्यास्य स्वरूपे तत्फले

च नास्तिकाः पापकारिणोऽसुराणामुपनिषदं देहमात्रात्मदर्शनमेव प्रतिपन्ना असुतृपः पुरुषाः परंतप, अप्राप्य मां परमेश्वरं मत्प्राप्तौ नैवाशङ्केति मत्प्राप्तिमार्गसाधनभेदभक्तिमात्रमप्यप्राप्येत्यर्थः। निवर्तन्ते निश्चयेनावर्तन्ते। क्क। मृत्युसंसारस्तस्य वर्त्म नरकतिर्यगादिप्राप्तिमार्गस्तस्मिन्नेव वर्तन्त इत्यर्थः।।३।।

ज्ञानस्तुत्यार्जुनमभिमुखीकृत्याह-मयेति। मया मम यः परो भावस्तेन ततं भावस्तेन ततं व्याप्तं सर्वमिदं जगदव्यक्तमूर्तिना न व्यक्ता मूर्तिः स्वरूपं यस्य मम सोऽहमव्यक्तमूर्तिस्तेन मयाऽव्यक्तमूर्तिना। कारणागोचरस्वरूपेणेत्यर्थः। तस्मिन्मय्यव्यक्तमूर्तौ स्थितानि मत्स्थानि सर्वभूतानि ब्रह्मादीनि स्तम्बपर्यन्तानि। नहि निरात्मकं किंचिद्भूतं व्यवहारायावकल्पतेऽतो मत्स्थानि मयात्मनात्मवत्त्वेन स्थितान्यतो मयि स्थितानीत्युच्यन्ते तेषां भूतानामहमेवात्मेत्यतस्तेषु स्थित इति मूढबुद्धीनामवभासतेऽतो ब्रवीमि न चाहं तेषु भुतेष्ववस्थितो मूर्तवत्संश्लेषाभावेनाकाशस्याप्यन्तरतमो ह्यहम्। नह्यसंसर्गि वस्तु क्कचिदाधेयभावेनावस्थितं भवति।।४।।

अतएवासंसर्गित्वान्मम-नच मत्स्थानि भूतानि ब्रह्मादीनि, पश्य मे योगं युक्तिं घटनं मे ममैश्वमीश्वरस्येदमैश्वरं योगमात्मनो याथात्म्यमित्यर्थः। तथाच श्रुतिरसंसर्गित्वादसङ्गतां दर्शयति "असङ्गो नहि सज्जते" इति। इदं चाश्चर्यमन्यत्पश्य। भूतभृदसङ्गोऽपि सन्भूतानि बिभर्ति नच

भूतस्थो यथोक्तेन न्यायेन दर्शितत्वाद् भूतस्थत्वानुपपत्तेः। कथं पुनरुच्यते असौ ममात्मेति, विभज्य देहादिसंघातं तस्मिन्नहंकारमध्यारोप्य लोकबुद्धिमनुसरन्व्यपदिशति ममात्मेति, न पुनरात्मन आत्मान्य इति

लेकवदजानन्।

तथा भूतानि भावयत्युत्पादयति वर्धयति वा भूतभावनः।।५।।

यथोक्तेन श्लेकद्वयेनोक्तमर्थं दृष्टान्तेनोपपादयन्नाह-यथेति। यथा लोके आकाशस्थित आकाशो स्थितो नित्यं सदा वायुः सर्वत्र गच्छतीति सर्वत्रगो महान्परिमाणतस्तथाकाशवत्सर्वगते मय्यसंश्लेषेणैव स्थितानीत्येवमुपधारय जानीहि।।६।।

एवं वायुराकाश इव मयि स्थितानि सर्वभूतानि स्थितिकाले तानि-सर्वभूतानि कौन्तेय, प्रकृतिं त्रिगुणात्मिकामपरां निकृष्टां यान्ति मामिक मदीयां कल्पक्षये प्रलयकाले। पुनर्भूयस्तानि भूतान्युत्पत्तिकाले कल्पादौ विसृजाम्युत्पादयाम्यहं पूर्ववत्।।७।।

एवमविद्यालक्षणां प्रकृतिं स्वां स्वीयामवष्टभ्य वशीकृत्य विसृजामि पुनः पुनः प्रकृतितो जातं भूतग्रामं भूतसमुदायमिमं वर्तमानं समग्रमवशमस्वतन्त्रमविद्यादिदोषैः परवशीकृतं प्रकृतेर्वशात्स्वभाववशात्।।८।।

तर्हि तस्य ते परमेश्वरस्य भूतग्रामं विषमं विदधतस्तन्निमित्ताभ्यां धर्माधर्माभ्यां संबन्धः स्यादितीदमाह भगवान्-नच मामिति। नच मामीशं तानि भूतग्रामस्य विशमविसर्गनिमित्तानि कर्माणि निबन्धन्ति धनंजय। तत्र कर्मणामसंबद्धत्वे कारणमाह-उदासीनवदासीनं यथोदासीन उपेक्षकः कश्चित्तद्वदासीनमात्मनोऽक्रियत्वादसक्तं फलसङ्गरहितमभिमानवर्जितमहं करोमिति तेषु कर्मसु। अतोऽन्यस्यापि कर्तृत्वाभिमानाभावः फलसङ्गाभावश्चाबन्धकारणमन्यथा कर्मभिर्बध्यते मूढः कोशकारवदित्यभिप्रायः।।९।।

तत्र भूतग्राममिमं विसृजाम्युदासीनवदासीनमिति च विरुद्धमुच्यत इति

तत्परिहारार्थमाह-मयेति। मया सर्वतो दृशिमात्रस्वरूपेणाविक्रियात्मनाध्यक्षेण मम माया त्रिगुणात्मिकाऽविद्यालक्षणा प्रकृतिः सूयत उत्पादयति सचराचरं जगत्। तथाच मन्त्रवर्णः 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च' इति। हेतुना निमित्तेनानेनाध्यक्षत्वेन कौन्तेय, जगत्सचराचरं व्यक्ताव्यक्तात्मकं विपरिवर्तते सर्वावस्थासु। दृशिकर्मत्वापत्तिनिमित्ता हि जगतः सर्वा प्रवृत्तिरहंमिदं भोक्ष्ये पश्यामिदं शृणोमीदं सुखमनुभवामि दुःखमनुभवामि तदर्थमिदं करिष्याम्येतदर्थमिदं करिष्य इदं ज्ञास्यामीत्याद्यावगतिनिष्ठाऽवगत्यवसानैव। 'यो अस्याध्यक्षः परमेव्योमन्' इत्यादयश्च मन्त्रा एतमर्थं दर्शयन्ति। ततश्चैकस्य देवस्य सर्वाध्यक्षभूतचैतन्यमात्रस्य परमार्थतः सर्वभोगामभिसंबन्धिनोऽन्यस्य चेतानान्तरस्याभावे भोक्तुरन्यस्याभावात्किनिमित्तेयं सृष्टिरित्यत्र प्रश्नप्रतिवचनेअनुपपन्ने। 'को अद्धा वेद क इह प्रवोचत्कुत आ जाता कुत इयं विसृष्टिः' इत्यादिमन्त्रवर्णेभ्यः। दर्शितं च भगवता 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः' इति।।१०।।

एवं मां नित्यशुद्धबुद्धमुक्तस्वभावं सर्वजन्तूनामात्मानमपि सन्तं-अवजानन्त्यवज्ञां परिभवं कुर्वन्ति मां मूढा अविवेकिनो मानुषीं मनुष्यसंबन्धिनीं तनुं देहमाश्रितं मनुष्यदेहेन व्यवहरन्तमित्येतत्। परं प्रकृष्टं भावं परमात्मतत्त्वमाकाशकल्पमाकाशादप्यन्तरतममजानन्तो मम भूतमहेश्वरं सर्वभूतानां महान्तमीश्वरं स्वमात्मानम्। ततशच तस्य ममावज्ञानभावनेनाहता

वराकास्ते।।११।।

कथं-मोघाशा इति। मोघाशा वृथाशा आशिषो येषां ते मोघाशाः। तथा मोघकर्माणो यानि चाग्निहोत्रादीनि तैरनुष्ठीयमानानि कर्माणि तानि च तेषां भगवत्परिभवात् स्वात्मभूतस्यावज्ञानान्मोघान्येव निष्फलानि कर्माणि भवन्तीति मोघकर्माणः। तथा मोघज्ञाना मोघं निष्फलं ज्ञानं येषां ते मोघज्ञानाः ज्ञानमपि तेषां निष्फलमेव स्यात्। विचेतसो विगतविवेकाश्च ते भवन्तीत्यभिप्रायः। किंच ते भवन्ति राक्षसीं रक्षसां प्रकृतिं स्वभावम् आसुरीमसुराणां च प्रकृतिं मोहिनीं मोहकारीं देहात्मवादिनीं श्रिता आश्रिताश्छिन्धि भिन्धि पिब खाद परस्वमपहरेत्येवंवदनशीलाः क्रूरकर्मणो भवन्तीत्यर्थः। 'असुर्या नाम ते लोकाः' इति श्रुतेः।।१२।।

महेति ये पुनः श्रद्दधाना भगवद्भक्तिलक्षणे मोक्षमार्गे प्रवृत्ताः-महात्मानस्त्वक्षुद्रचित्ता मामीस्वरं पार्थ, दैवीं देवानां प्रकृतिं शमदमदयाश्रद्धादिलक्षणामाश्रितः सन्तो भजन्ति सेवन्तेऽनन्यमनसोऽनन्यचित्ता ज्ञात्वा मां भूतादिं भूतानां वियदादीनां प्राणिनां चादिकारणमव्ययम्।।१३।।

कथं-सततमिति। सततं सर्वदा भगवन्तं ब्रह्मस्वरूपं मां कीर्तयन्तो
यजन्तश्चेन्द्रियोपसंहारशमदमदयाऽहिंसादिलक्षणैर्धर्मैः प्रयतन्तश्च दृढव्रता दृढं स्थिरमचाञ्चल्यं व्रतं येषां ते

दृढव्रता मनस्यन्तश्च मां हृदयेशयमात्मानं भक्तया नित्ययुक्ताः सन्त उपासते सेवन्ते।।१४।।

ते केन केन प्रकारणोपासत इत्युच्यते-ज्ञानेति। ज्ञानयज्ञेन ज्ञानमेव भगवद्विषयं यज्ञस्तेन ज्ञानयज्ञेन यजन्तः पूजयन्तो मामीश्वरं चाप्यन्येऽन्यामुपासनां परित्यज्योपासते तच्च ज्ञानमेकत्वेनैकमेव परं ब्रह्मेति परमार्थदर्शनेन यजन्त उपासते। केचिच्च पृथक्त्वेनादित्यचन्द्रादिमेदेन स एव भगवान् विष्णुरादित्यादिरूपेणावस्थित इत्युपासते। केचिद्

बहुधावस्थितः स एव भगवान् सर्वतोमुखो विश्वरूप इति तं विश्वरूपं सर्वतोमुखं बहुधा बहुप्रकारेणोपासते।।१५।।

यदि बहुभिः प्रकारैरुपासते कथं त्वामेवोपासत इत्यत आह-अहमिति। अहं क्रतुः श्रौतकर्मभेदोऽहमेवाहं यज्ञः स्मार्तः। किं च स्वधान्नमहं पितृभ्यो यद्दीयते अहमौषधं सर्वप्राणिभिर्यदद्यते तदौषधशब्दवाच्यम्। अथवा स्वधेति सर्वप्राणिसाधारणमन्नमौषधमिति व्याध्युपशमार्थं भेषजं। मन्त्रोऽहं येन पितृभ्यो देवताभ्यश्च हविर्दीयते। अहमेवाज्यं हविश्चाहमग्निर्यस्मिन् हूयते सोऽग्निरहमेवाहं हुतं हवनकर्म च।।१६।।

किंच पितेति। पिता जनयिताहमस्य जगतो माता जनयित्री धाता कर्मफलस्य प्राणिभ्यो विधाता पितामहः पितुः पिता वेद्यं वेदितव्यं पवित्रं पावनमोङ्कारश्च ऋक्सास यजुरेव च।।१७।।

किंच गतिरिति। गतिः कर्मफलं, भर्ता पोष्टा, प्रभुः स्वामी साक्षी प्राणिनां कृताकृतस्य, निवासो यस्मिन् प्राणिनो निवसन्ति, शरणमार्तानांमत्प्रपन्नानामार्तिहरः, सुहृत् प्रत्युपकारानपेक्षः सन् उपकारी, प्रभव उत्पत्तिर्जगतः, प्रलयः प्रलीयते यस्मिन्निति। तथा स्थानं सिष्ठत्यस्मिन्निति। निधानं निक्षेपः कालान्तरोपभोग्यं प्राणीनां, बीजं प्ररोहकारणं प्ररोहधर्मिणाम्। अव्ययं यावत्संसारभावित्वादव्ययम्। नह्यबीजं किंचित्प्ररोहति। नित्यं च प्ररोहदर्शनाद्बीजसंततिर्न व्येतीति गम्यते।।१८।।

किंच-तपामीति। तपाम्यहमादित्यो भूत्वा कैश्चिद्रश्मिभिरुल्बणैपहं वर्षं कैश्चिद्रश्मिभिरुत्सृजाम्युत्सृज्य पुनर्निगृह्णामि कैश्चिद्रश्मिभिरष्टभिर्मासैः पुनरुत्सृजामि प्रावृषि। अमृतं चैव देवानां मृत्युश्च मर्त्यानां। सद्

यस्य संबन्धितया विद्यमानं तद्विपरीतमसच्चैवाहमर्जुन। न पुनरत्यन्तमेवासद्भगवान् स्वयं कार्यकारणे वा सदसती। ये पूर्वोक्तैरनुवृत्तिप्रकारैकत्वपृथक्त्वादिविज्ञानैर्यज्ञैर्मां पूजयन्त उपासते ज्ञानविदस्ते यथाविज्ञानं मामेव प्राप्नुवन्ति।।१९।।

ये पुनरज्ञाः कामकामास्त्रैविद्या ऋग्यजुःसामबिदो मां वस्वादिदेवरूपिणं सोमपाः सोमं पिबन्तीति सोमपास्तेनैव सोमपानेन पूतपापाः शुद्धकिल्बिषा यज्ञैरग्निष्टोमादिभिरिष्ट्वा पूजयित्वा स्वर्गतिं स्वर्गतिस्तां प्रार्थयन्ते। ते च पुण्यं पुण्यफलमासाद्य संप्राप्य सुरेन्द्रलोकं शतक्रतोः स्थानमश्नन्ति भुञ्जते दिव्यान्दिवि भवानप्राकृतान्देवभोगान्देवानां भोगस्तान्।।२०।।

ते तमिति। ते तं भुक्त्वा स्वर्गलोकं विशालं विस्तीर्णं क्षीणे पुण्ये मर्त्यलोकमिमं विशन्त्याविशन्ति। एवं हि यथेक्तेन प्रकारेण त्रैधर्म्यं केवलं वैदिकं कर्मानुप्रपन्ना गतागतं गतं चागतं च गतागतं गमनागमनं कामकामाः कामान्कामयन्त इति कामकामा लभन्ते गतागतमेव नतु स्वातन्त्र्यं क्कचिल्लभन्ते इत्यर्थः।।२१।।

ये पुनर्निष्कामाः सम्यग्दर्शिनः अनन्या अपृथग्भूताः परं देवं नारायणमात्मत्वेन गताः सन्तश्चिन्तयन्तो मां ये जनाः संन्यासिनः पर्युपासते तेषां परमार्थदर्शिनां नित्याभियुक्तानां सततामियोगिनां योगक्षेमं योगोप्राप्तस्य प्रापणं क्षेमस्तद्रक्षणं तदुभयं वहामि प्रापयाम्यहम्। ज्ञानी त्वामैव मे मतं स च मम प्रियो यस्मात्तस्मात्ते ममात्मभूताः प्रायाश्चेति। नन्वन्येषामपि भक्तानां योगक्षेमं वहत्येव भगवान्। सत्यमेवं वहत्येव। किं त्वयं विश्षोऽन्ये ये भक्तस्ते स्वात्मार्थं स्वयमपि योगक्षेममीहन्ते। अनन्यदर्शिनस्तु नात्मार्थं योगक्षेममाहन्ते। नहि ते जीविते मरणे वात्मनो गृद्धिं

कुर्वन्ति केवलमेव भगवच्छरणास्ते। अतो भगवानेव तेषां योगक्षेमं वहतीति।।२२।।

नन्वन्या अपि देवतास्त्वमेव चेत्तद्भक्ताश्च त्वामेव यजन्ते। सत्यमेवम्-येऽप्यन्यदेवताभक्ता अन्यासु देवतासु भक्ता अन्यदेनताभक्ताः सन्तो यजन्ते पूजयन्ति श्रद्धयास्तिक्यबुद्धयान्विता अनुगतास्तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकमविधिरज्ञानं तत्पूर्वकमज्ञानपूर्वकं यजन्त इत्यर्थः।।२३।।

कस्मात्तेऽविधिपूर्वकं यजन्त इत्युच्यते यस्माद्-अहमिति। अहं हि सर्वयज्ञानां श्रौतानां स्मार्तानां च सर्वेषां यज्ञानां देवतात्मत्वेन भोक्ता च प्रभुरेव च। मत्स्वामिको हि यज्ञोऽधियज्ञोऽहमेवात्रेति ह्युक्तम्। तथा नतु

मामभिजानन्ति तत्त्वेन यथावत्। अतश्चविधिपूर्वकमिष्ट्वा यागफलाच्चयवन्ति प्रच्यवन्ते ते।।२४।।

यतन्तीति। येऽप्यन्यदेवताभक्तिमत्त्वेनाविधिपूर्वकं यजन्ते तेषामपि यागफलमवश्यंभावि, कथम्-यान्ति गच्छन्ति देवव्रता देवेषु व्रतं नियमो भक्तिश्च येषां ते देवव्रता देवान्यान्ति। पितृनग्निष्वात्तादीन्यान्ति पितृव्रताः श्राद्धादिक्रियापराः पितृभक्ताः। भूतानि विनायकमातृगणचतुर्भगिन्यादीनि यान्ति भूतेज्या भूतानां पूजकाः। यान्ति मद्यजिनो मद्यजनशीला वैष्णवा मामेव। समानेऽप्यायासे मामेव न भजन्तेऽज्ञानात्तेन तेऽल्पफलभाजो भवन्तीत्यर्थः।।२५।।

न केवलं मद्भक्तानामनावृत्तिलक्षणमनन्तफलं सुखाराधनश्चाहं, कथम्-पत्रं पुष्पं फलं

तोयमुदकं यो मे मह्यं भक्तया प्रयच्छति तदहं पत्रादि भक्तयोपहृतं भक्तिपूर्वकं प्रापितं भक्तयुपहृतमश्नामि गृह्णामि प्रयतात्मनः शुद्धबुद्धेः।।२६।।

यत एवमतः-यत्करोषि स्वतः प्राप्तं यदश्नासि यच्च जुहोषि हवनं निर्वर्तयसि श्रौतं नैतावता तेषु द्वेषो मम।।२९।।

शृणु मद्भक्तेर्माहात्म्यम्-अपिचेदिति। अपि चेद्यद्यपि सुष्ठुदुराचारः सुदुराचारोऽतीव कुत्सिताचारोऽपि भजते मामनन्यभागनन्यभक्तिः सन्साधुरेव सम्यग्वृत्त एव स मन्तव्यो ज्ञातव्यः। सम्यग्यथावद् व्यवसितो हि यस्मात्साधुनिश्चयः सः।।३०।।

क्षिप्रमिति। उत्सृज्य च बाह्यां दुराचारतामन्तःसम्यग्व्यवसायसामर्थ्यात्-क्षिप्रं शीघ्रं भवति धर्मात्मा धर्मचित्त एव शश्वन्नित्यं शान्तिं चोपशमं निगच्छति प्राप्नोति। शृणु परमार्थं कौन्तेय, प्रतिजानीहि निश्चितां प्रतिज्ञां कुरु न मे मम भक्तो मयि समर्पितान्तरात्मा मद्भक्तो न प्रणश्यतीति।।३१।।

किंच-मां होति। मां हि यस्मात्पार्थ, व्यपाश्रित्य मामाश्रयत्वेन गृहीत्वा येऽपि स्युर्भवेयुः पापयोनयः पापा योनिर्येषां ते पापयोनयः पापजन्मानः। के त इत्याह-स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति गच्छन्ति परां गतिं प्रकृष्टां गतिम्।।३२।।

किं पुनरिति। किं पुनर्ब्रह्मणाः पुण्याः पुण्ययोनयो भक्ता राजर्षयस्तथा राजानश्च त ऋषयश्चेति राजर्षयः। यत एवमेतोऽनित्यं क्षणभङ्गुरमसुखं च सुखवर्जितमिमं लोकं मनुष्यलोकं प्राप्य पुरुषार्थसाधनं दुर्लभं मनुष्यत्वं लब्ध्वा भजस्व सेवस्व माम्।।३३।।

कथम्-मन्मना इति। मयि मनो यस्य तव स त्वं मन्मना भव। तथा मद्भक्तो भव। मद्याजी मद्यजनशीलो भव। मामेव च मनस्कुरु मामेवेश्वरमेष्यस्यागमिष्यसि। युक्त्वा समाधाय चित्तम्। एवमात्मानमहं हि सर्वेषां भूतानामात्मा परा च गतिः परमयनं तं मामेवंभूतमेष्यसीत्यतीतेन

पदेन संबन्धः। मत्परायणः सन्नित्यर्थः।।३४।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशंकरभगवत्पूज्यपादकृतौ श्रीमद्भगवद्गीतीभीष्ये राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः।।९।।

दशमोऽध्यायः।

सप्तमोऽध्याये भगवतस्तत्त्वं विभूतयश्च प्रकाशिता नवमे च, अथेदानीं येषु भावेषु चिन्त्यो भगवांस्ते ते भावा

वक्तव्याः। तत्त्वंच भगवतो वक्तव्यमुक्तमपि दुर्विज्ञेयत्वादित्यतो (भगवानुवाच)-भूय इति। भूय एव भूयः पुनर्हे महावाहो, शृणु मे मदीयं परमं प्रकृष्टं निरतिशयवस्तुनः प्रकाशकं वचोवाक्यम्। यत्परमं ते तुभ्यं प्रीयमाणाय मद्वचनात्प्रीयसे त्वमतीवामृतमिव पिबंस्ततो वक्ष्यामि हितकाम्यया हितेच्छया।।१।।

किमर्थमहं वक्ष्यामीत्यत आह-न म इति। मे विदुर्न जानन्ति सुरगणाः ब्रह्मादयः। किं ते न विदुः, मम प्रभवं प्रभावं प्रभुशक्तयतिशयम्, अथवा प्रभवं प्रभवनमुत्पत्तिम्। नापि महर्षयो भृग्वादयो विदुः।कस्माते न विदुरित्युच्यते। अहमादिः कारणं हि यस्माद्देवानां महर्षीणां च सर्वशः सर्वप्रकारैः।।२।।

किंच-यो मामिति। यो मामजमनादिं च यस्मादहमादिर्देवानां महर्षीणां च न ममान्य आदिर्विद्यतेऽतोऽहमजोऽनादिश्चानादित्वमजत्वे हेतुस्तं मामजमनादिं च यो वेत्ति विजानाति लोकमहेश्वरं

लोकानां महान्तमीश्वरं तुरीयमज्ञानतत्कार्यवर्जितमसंमूढः संमोहवर्जितः स मर्त्येषु मनुष्येषु सर्वपापैः सर्वैः पापैर्मतिपूर्वामतिपूर्वकृतैः प्रमुच्यते प्रमोक्ष्यते।।३।।

अतश्चाहं महेश्वरो लोकानां-बुद्धिरिति। बुद्धिरन्तःकरणस्य सूक्ष्माद्यर्थावबोधनसामर्थ्यम्। तद्वन्तंबुद्धिमानिति हि वदन्ति। ज्ञानमात्मादिपदार्थानामवबोधः। असंमोहः प्रत्युत्पन्ने बोद्धव्येषु विवेकपूर्विका प्रवृत्तिः क्षमा आकृष्टस्य ताडितस्य वाऽविकृतचित्तता। सत्यं यथादृष्टस्य यथाश्रुतस्य चात्मानुभवस्य परबुद्धिसंक्रान्तये तथैवोच्चार्यमाणा वाक्सत्यमुच्यते। दमो बाह्येन्द्रियोपशमः। शमोऽन्तः-करणस्य। सुखमाह्लादः। दुःखं संतापः। भव उद्भवोऽभावस्तद्विपर्ययः। भयं च त्रासोऽभयमेव च तद्विपरीतम्।।४।।

अहिंसेति। अहिसाऽपीडा प्राणिनाम्। समता समचित्तता। तुष्टिः संतोषः पर्याप्तबुद्धिर्लभेषु। तप इन्द्रियसंयमपूर्वकं शरीरपीडनम्। दानं यथाशक्ति संविभागः। यशो धर्मनिमित्ता कीर्तिः। अयशस्त्वधर्मनिमित्ता कीर्तिः। भवन्ति भावा यथोक्ता बुद्ध्यादयो भूतानां प्राणिनां मत्त एवेश्वरात्पृथग्विधा नानाविधाः स्वकर्मानुरूपेण।।५।।

किंच-महर्षय इति। महर्षयः सप्त भृग्वादय पूर्वेऽतीतकालसंबन्धिनश्चत्वारो मनवस्तथा सावर्णा इति प्रसिद्धाः। ते च मद्भावा मद्गतभावना वैष्णवेन सामर्थ्येनोपेता मानसामनसैवोत्पादिता मया जाता उत्पन्नाः येषां मनूनां महर्षीणां च सृष्टिर्लोक इमाः स्थावरजङ्गमाः प्रजाः।।६।।

एतामिति। एतां यथोक्तां विभूतिं विस्तारं योगं च युक्तिं चात्मनो घटनमथवा योगैश्वर्यसामर्थ्यं सर्वज्ञत्वं योगजं योग उच्यते। मम मदीयं यो वेत्ति तत्त्वतस्तत्त्वेन यथावदित्येतत्। सोऽविकम्पेनाप्रचलितेन योगेन सम्यग्यदर्शनस्थैर्यलक्षणेन युज्यते संबध्यते। नात्र संशयो नास्मिन्नार्थे

संशयोऽस्ति।।७।।

कीदृशेनाविकम्पेन योगेन युज्यत इत्युच्यते-अहमिति। अहं परं ब्रह्म वासुदेवाख्यं सर्वस्य जगतः प्रभव उत्पत्तिर्मत्त एव स्थितिनाशक्रियाफलोपभोगलक्षणं सर्वं जगत्प्रवर्तत इत्येवं मत्वा

भजन्ते सेवन्ते मां बुधा अवगततत्त्वार्थाः भावसमन्विता भावो भावना परमार्थतत्त्वाभिनिवेशस्तेन समन्विताः संयुक्ता इत्यर्थः।।८।।

किंच-मच्चित्ता इति। मच्चित्ताः मयि चित्तं येषां ते मच्चित्ताः। मद्गतप्राणा मां गताः प्राप्ताश्चक्षुरादयः प्राणा येषां ते मद्गतप्राणाः। मय्युपसंहृतकरणा इत्यर्थः। अथवा मद्गतप्राणा मद्गतजीवना इत्येतत्। बोधयन्तोऽवगमयन्तः परस्परमन्योन्यं कथयन्तो ज्ञानबलवीर्यादिधर्मैर्विशिष्टं मां तुष्यन्ति च परितोषमुपयान्ति रमन्ति च रतिं च प्राप्नुवन्ति प्रियसङ्गत्येव।।९।।

ये यथोक्तप्रकारैर्भजन्ते मां भक्ताः सन्तः-तेषां सततयुक्तानां नित्याभुयुक्तानां निवृत्तसर्वबाह्यैषणानां भजतां सेवमानानां, किमर्थित्वादिना कारणेन नेत्याह-प्रीतिपूर्वकं प्रीतिः स्नेहस्तत्पूर्वकं मां भजतामित्यर्थः। ददामि प्रयच्छामि बुद्धियोगं बुद्धिः सम्यग्दर्शनं मत्तत्त्वविषयं तेन योगो बुद्धियोगम्। येन बुद्धियोगेन सम्यग्दर्शनलक्षणेन मां परमेश्वरमात्मभूतमात्मत्वेनोपयन्ति प्रतिपद्यन्ते। के ते। ये मच्चित्तादिप्रकारैर्मां भजन्ते।।१०।।

किमर्थं कस्य वा त्वत्प्राप्तिप्रतिबन्धहेतोर्नाशकं बुद्धियोगं तेषां त्वद्भक्तानां ददासीत्याकाङ्क्षायामाह-तेषामिति। तेषामेव कथं नाम श्रेयः स्यादित्यनुकम्पार्थं दयाहेतोरहमज्ञानजमविवेकतो जातं मिथ्याप्रत्ययलक्षणं मोहान्धकारं तमो नाशयाम्यात्मभावस्थ आत्मनो भावोऽन्तः- करणाशयस्तस्मिन्नेव स्थितः सन्। ज्ञानदीपेन विवेकप्रत्ययरूपेण भक्तिप्रसादस्नेहाभिषिक्तेन मद्भावनाभिनिवेशवातेरितेन ब्रह्मचर्यादिसाधनसंस्कारवत्प्रज्ञावर्तिना विरक्तान्तःकरणाधारेण विषयव्यावृत्तचित्तरागद्वेषाकलुषितनिवातापवरकस्थेन नित्यप्रवृत्तैकाग्र्यध्यानजनितसम्यग्दर्शनभास्वता ज्ञानदीपेनेत्यर्थः।।११।।

यथोक्तां भगवतो विभूतिं योगं च श्रुत्वार्जुन उवाच-परमिति। परं ब्रह्म परमात्मा परं तेजः पवित्रं पावनं परमं प्रकृष्टं भवान्पुरुष शाश्वतं नित्यं दिव्यं दिवि भवमादिदेवं सर्वदेवानामादौ भवं देवमजं विभुं विभवनशीलम्।।१२।।

ईदृशं-आहुः कथयन्ति त्वामृषयो वसिष्ठादयः सर्वे, देवर्षिर्नारदस्तथासितो देवलोऽप्येवमेवाह व्यासश्च, स्वयं चैव त्वं चैव ब्रवीषि मे।।१३।।

सर्वमिति। सर्वमेतद्यथोक्तमृषिभिस्त्वया च तदृतं सत्यमेव मन्ये यन्मां प्रति वदसि भाषसे हे केशव, नहि ते तव भगवन्व्यक्तिं प्रभवं विदुर्न देवा न दानवाः।।१४।।

यतस्त्वं देवादीनामादिरतः-स्वयमिति। स्वयमेवात्मनात्मानं वेत्थ त्वं निरतिशयज्ञानैश्वर्यबलादिशक्तिमन्तमीश्वरम्। पुरुषोत्तम, भूतानि भावयतीति भूतभावन, भूतेश भूतानामीशितः, हे देवदेव जगत्पते।।१५।।

वक्तुमिति। वक्तुं कथयितुमर्हस्यशेषेण दिव्या ह्यात्मविभूतय आत्मनो विभूतयो यास्ता वक्तुमर्हसि। याभिर्विभूतिभिरात्मनो माहात्म्यविस्तरैरिमाँल्लोकांस्त्वं व्याप्य तिष्ठसि।।१६।।

कथमिति। कथं विद्यां विजानीयामहं हे योगिंस्त्वां सदा परिचिन्तयन्। केषु केषु च भावेषु वस्तुषु चिन्त्योऽसि ध्येयोऽसि भगवन्मया।।१७।

विस्तरेणेति। विस्तरेणात्मनो योगं योगैश्वर्यशक्तिविशेषं विभूतिं च विस्तरं ध्येयपदार्थानां हे जनार्दन, अर्दतेर्गतिकर्मणो रूपम्। असुराणां देवप्रतिपक्षभूतानां जनानां नरकादिगमयितृत्वाज्जनार्दनः। अभ्युदयनिःश्रेयसपुरुषार्थप्रयोजनं सर्वैर्जनैर्याच्यत इति वा। भूयः

पूर्वमुक्तमपि कथय तृप्तिर्हि परितोषो यस्मान्नास्ति मे मम शृण्वतस्त्वन्मुखनिःसृतवाक्तामृतम्।।१८।।

हन्त त इति। हन्तेदानीं ते तव दिव्या दिवि भवा आत्मविभूतय आत्मनो मम विभूतयो यास्ताः कथयिष्यामीत्येतत्प्रधान्यतो यत्र यत्र प्रधाना या या विभूतिस्तां तां प्रधानां प्राधान्यतः कथयिष्याम्यहं कुरुश्रेष्ठ, अशेषतस्तु वर्षशतेनापि न शक्या वक्तुम्। यतो नास्त्यन्तो विस्तरस्य मे मम विभूतीनामित्यर्थः।।१९।।

तत्र प्रथममेव तावच्छृणु-अहमिति। अहमात्मा प्रत्यगात्मा गुडाकेश गुडाका निद्रा तस्या ईशो गुडाकेशो जितनिद्र इत्यर्थः। घनकेश इति वा। सर्वेषां भूतानामाशयेऽन्तर्हृदि स्थितोऽहमात्मा प्रत्यगात्मा नित्यं ध्येयस्तदशक्तेन चोत्तरेषु भावेषु चिन्त्योऽहं चिन्तयितुं शक्यो यस्मादहमेवादिर्भूतानां कारणं तथा मध्यं च स्थितिरन्तः प्रलयश्च।।२०।।

एवंच ध्येयोऽहम्-आदित्यानामिति। आदित्यानां द्वादशानां विष्णुर्नामादित्योऽहम्। ज्योतिषां रविः प्रकाशयितृणामंशुमान्रश्मिमान्। मरीचिर्नाम मरुतां मरुद्देवताभेदानामस्मि। नक्षत्राणामहं शशी चन्द्रमाः।।२१।।

वेदानामिति। वेदानां मध्ये सामवेदोऽस्मि। देवानां रुद्रादित्यादीनां वासव इन्द्रोऽस्मि। इन्द्रियाणामेकादशानां चक्षुरादीनां मनश्चास्मि संकल्पविकल्पात्मकं मनश्चास्मि। भूतानामस्मि चेतना कार्यकरणसंघातेऽनित्याभिव्यक्ता बुद्धिवृत्तिश्चेतना।।२२।।

रुद्राणामिति। रुद्राणामेकादशानां शंकरश्चास्मि। वित्तेशः कुबेरो यक्षरक्षसां यक्षाणां रक्षसां च। वसूनामष्टानां पावकश्चास्म्यग्निः। मेरुः शिखरिणां शिखरवतामहम्।।२३।।

पुरोधसामिति। पुरोधसां राजपुरोहितानां मुख्यं प्रधानं मां विद्धि जानीहि हे पार्थ बृहस्पतिम्। स हीन्द्रस्येति मुख्यः स्यात्पुरोधाः। सेनानीनां सेनापतीनामहं स्कन्दो देवसेनापतिः। सरसां यानि देवखातानि सरांसि सागरोऽस्मि भवामि।।२४।।

महर्षीणामिति। महर्षीणां भृगुरहं गिरां वाचां पदलक्षणानामेकमक्षरमोंकारोऽस्मि। यज्ञानां जपयज्ञोऽस्मि स्थावराणां स्थितिमतां हिमालयः।।२५।।

अश्वत्थ इति। अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदो देवा एव सन्त ऋषित्वं प्राप्ता मन्त्रदर्शित्वात्ते देवर्षयस्तेषां नारदोऽस्मि। गन्धर्वाणां चित्ररथो नाम गन्धर्वोऽस्मि। सिद्धानां जन्मनैव धर्मज्ञानवैराग्यैश्वर्यातिशयं प्राप्तानां कपिलो मुनिः।।२६।।

उच्चैरिति। उच्चैःश्रवसमश्वानां मां विद्धि जानीह्यमृतोद्भवममृतनिमित्तमथनोद्भवम्। ऐरावतमिरावत्या अपत्यं गजेन्द्राणां हस्तीश्वराणां तं मां विद्धीत्यनुवर्तते। नराणां मनुष्याणां व नराधिपं राजानं मां विद्धि जानीहि।।२७।।

आयुधानामिति। आयुधानामहं वज्रं दधीच्यस्थिसंभवम्। धेनूनां दोग्ध्रीणामस्मि कामधुक्। वसिष्ठस्य सर्वकामानां दोग्ध्री सामान्या वा कामधुक्। प्रजनः प्रजनयितास्मि कन्दर्पः कामः। सर्पाणां सर्पभेदानामस्मि

वासुकिः सर्पराजः।।२८।।

अनन्त इति। अनन्तश्चास्मि नागानां नागविशेषाणां नागराजश्चास्मि। वरुणो यादसामहमब्देवतानां राजाहम्। पितृणामर्यमा नाम पितृराजश्चास्मि। यमः संयमतां संयमनं कुर्वतामहम्।।२९।।

प्रह्लाद इति। प्रह्लादो नाम चास्मि दैत्यानां दितिवंश्यानाम्। कालः कलयतां कलनं गणनं कुर्वतामहम्। मृगाणां च मृगेन्द्रः सिंहो व्याघ्रो वाहम्। वैनतेयश्च गरुत्मान्विनतासुतः पक्षिणां पतत्रिणाम्।।३०।।

पवन इति। पवनो वायुः पवतां पावयितृणामस्मि। रामः शस्त्रभृतामहं शस्त्राणां धारयितृणां दाशरथी रामोऽहम्। झषाणां मत्स्यादीनां मकरो नाम जातिविशेषोऽहम्, स्त्रोतसां स्रवन्तीनामस्मि जाह्नवी गङ्गा।।३१।।

सर्गाणामिति। सर्गाणां सृष्टीनामादिरन्तश्च मध्यं चैवाहमुत्पत्तिस्थितिलया आहमर्जुन। भूतानां जीवाधिष्ठितानामेवादिरन्तश्चेत्याद्युक्तमुपक्रमे, इह तु सर्वस्यैव सर्गमात्रस्येति विशेषः। अध्यात्मविद्या विद्यानां मोक्षार्थत्वात्प्रधानमस्मि। वादोऽर्थनिर्णयहेतुत्वात्प्रवदतां प्रधान मतः सोऽहमस्मि। प्रवक्तृद्वारेण वदनभेदानामेव वादजल्पवितण्डानामिह ग्रबणं प्रवदतामिति।।३२।।

अक्षराणामिति। अक्षराणां वर्णानामकारो वर्णोऽस्मि। द्वन्द्वः समासोऽस्मि सामासिकस्य समाससमूहस्य। किंचाहमेवाक्षयोऽक्षीणः कालः प्रसिद्धः क्षणलवाख्यः। अथवा परमेश्वरः कालस्यापि कालोऽस्मि। धाताहं कर्मफलस्य विधाता सर्वजगतो विश्वतोमुखः सर्वतोमुखः।।३३।।

मृत्युरिति। मृत्युर्द्विविधो धनादिहरः प्राणहरश्च सर्वहर उच्यते सोऽहमित्यर्थः। अथवा पर ईश्वरः प्रलये सर्वहरणात्सर्वहरः सोऽहम्। उद्भव उत्कर्षोऽभ्युदयस्तत्प्राप्तिहेतुश्चाहं, केषां, भविष्यतां भाविकल्याणानामुत्कर्षप्राप्तियोग्यानामित्यर्थः। कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमेत्येता उत्तमाः स्त्रीणामहमस्मि यासामाभासमात्रसंबन्धेनापि लोकः कृतार्थमात्मानां मन्यते।।३४।।

बृहत्सामेति। बृहत्साम तथा साम्नां प्रधानमस्मि। गायत्री छन्दसामहं गायत्र्यादिच्छन्दोविशिष्टानामृचां गायत्र्यृगहमित्यर्थः। मासानां मार्गशीर्षोऽहम्। ऋतूनां कुसुमाकरो वसन्तः।।३५।।

द्यूतमिति। द्यूतमक्षदेवनादिलक्षणं छलयतां छलस्य कर्तृणामस्मि। तेजस्विनां तेजोऽहं। जयोऽस्मि जेतृणां। व्यवसायोऽस्मि व्यवसायिनां। सत्वं सत्त्ववतां सात्विकानामहम्।।३६।।

वृष्णीनामिति। वृष्णीनां वासुदेवोऽस्म्यमेवाहं त्वत्सखा। पाण्डवानां धनंजयस्त्वमेव। मुनीनां मननशीलानां सर्वपदार्थज्ञानिनामप्यहं व्यासः। कवीनां क्रान्तदर्शिनामुशना कविरस्मि।।३७।।

दण्ड इति। दण्डो दमयतां दमयितृणामस्म्यदान्तानां दमकारणम्। नीतिरस्मि जिगीषतां जेतुमिच्छताम्। मौनं चैवास्मि गुह्यानां गोप्यानां। ज्ञानं ज्ञानवतामहम्।।३८।।

यच्चापीति। यच्चापि सर्वभूतानां बीजं प्ररोहकारणं तदहमर्जुन,प्रकरणोपसंहारार्थ विभूतिसंक्षेपमाह। न

तदस्ति भूतं चराचरं चरमचरं वा मया विना यत्स्याद्भवेन्मयापकृष्टं परित्यक्तं निरात्मकं शून्यं हि तत्स्यादतो मदात्मकं सर्वमित्यर्थः।।३९।।

नान्तोऽस्तीति। नान्तोऽस्ति मम दिव्यानां विभूतीनां विस्तराणां परंतप। नहीश्वरस्य सर्वात्मनो विभूतीनामियत्ता शक्या वक्तुं ज्ञातुं वा केनचित्। एष तूद्देशत एकदेशेन प्रोक्तो

विभूतेर्विस्तरो मया।।४०।।

यद्यदिति। यद्यल्लोके विभूतिमाद्विभूतियुक्तं सत्त्वं वस्तु श्रीमदूर्जितमेव वा श्रीर्लक्ष्मीस्तया सहितमुत्साहोपेतं वा तत्तदेवावगच्छ त्वं जानीहि ममेश्वरस्य तेजोंशसंभवं तेजसोंऽश एकदेशः

संभवो यस्य तत्तेजोंशसंभवमित्यवगच्छ त्वम्।।४१।।

अथवेति। अथवा बहुनैतेनैवमादिना किं ज्ञातेन तवार्जुन स्यात्सावशेषेण। अशेषतस्त्वमिममुच्यमानमर्थं शृणु। विष्टभ्य विशेषतः स्तम्भनं दृढं कृत्वेदं कृत्स्नं जगदेकांशेनैकावयवेनैकपादेन सर्वभूतस्वरूपेणेत्येतत्। तथाच मन्त्रवर्णः 'पादोऽस्य सर्वा भूतानि' इति स्थितोऽहमिति।।४२।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यपूज्यपाजश्रीमदाचार्यश्रीशंकरभगवतः कृतौ श्रीभगवद्गीताभाष्ये विभूतियोगो नाम दशमोऽध्यायः।।१०।।

एकादशोऽध्यायः

भगवतो विभूतय उक्तास्तत्र च 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्'इति भगवताभिहितं श्रुत्वा यज्जगदात्मरूपमाधमैश्वरं तत्साक्षात्कर्तुमिच्छन्नर्जुन उवाच-मदनुग्रहाय मदनुग्रहाय ममानुग्रहार्थं परमं निरतिशयं गह्यं गोप्यमध्यात्मसंज्ञितमात्मानात्मविवेकविषयं यत्वयोत्कं वचो वाक्यं तेन ते वचसा मोहोऽयं विगतो ममाविवेकबुध्दिरपगतेत्सर्थः ।। १ ।।

किंच-भवेति। भव उत्पत्तिरण्ययःप्रलयो भूतानां तौ भवाण्ययौ श्रुतौ विस्तरशो मया न संक्षेपतस्त्वात्तस्त्वत्सकाशात्कमलपत्राक्ष कमलस्य पत्रं कमलपत्रं तद्वदक्षिणी यस्य तव स त्वं कमलपत्राक्षः हे कमलपत्रक्ष, माहात्म्यमपि चाध्ययमक्षयं श्रुतमित्यनुवर्तते ।। २ ।।

एवमिति। एवमेतन्नान्यथा सथा येन प्रकारेणात्थ कथयसि स्वमात्मानं परमेश्वर तथापि द्रष्टुमिच्छामि ते तव ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः संपन्नमैश्वरं वैष्णवं रूपं पुरुषोत्तम ।। ३ ।।

मन्यस इति। मन्यसे चिन्तयसि यदि मयार्जुनेन तच्छक्यं द्रष्टुमिति प्रभो स्वामिन्योगेश्वर योगिनो योगास्तेषामीश्वरो योगेश्वरः हे योगेश्वर, यस्मादहमतीवार्थी द्रष्टुं ततस्तस्मान्मे मदर्थं दर्शय त्वमात्मानमव्ययम् ।। ४ ।।

एवं चोदिनोऽर्जुनेन भगवानुवाच-पश्य म इति। पश्य मे मम पार्थ, रूपाणि शतशोऽथ सैहस्त्रशोऽनेकश इत्यर्थः। तानि च नानाविधान्यनेकप्रकाराणि दिवि भवानि दिव्यान्यप्राकृतानि नानावर्णाकृतीनि च नाना विलक्षणा नीलपीतादिप्रकारा वर्णास्त. थाकृतयोऽवयवसंस्थानविशेषा येषां रूपाणां तानि नानावर्णाकृतीनि च ।। ५ ।।

पश्यादित्यानिति। पश्यादित्यान्द्वादश वसूनष्टौ रुद्रानेकादशाश्विनौ द्वौ मरुतः सप्तसप्तगणा ये तांस्तथा च बहून्यन्यान्यप्यधष्टपूर्वाणि मनुष्यलोके त्वया त्वत्तोऽन्येन वा केनचित्पश्याश्चर्याण्यद्भुतानि भारत ।। ६ ।।

न केवलमेतावदेव-इहैकस्थमिति। इहैकस्थमेकस्मिन्स्थितं जगत्कृत्स्नं समस्तं पश्याधेदानीं सचराचरं सह चरेणाचरेण च वर्तते मम देहे गुडाकेश, यच्चान्यज्जयपराजयादि यच्छङ्कसे 'यद्वा जयेम यदि वा नो जयेयुः' इति यदवोचस्तदपि द्रष्टुं यदीच्छसि ।। ७ ।।

किंतु-नतु मामिति। नतु मां विश्वरूपधरं शक्यसे द्रष्टुमनेन प्राकृतेन स्वचक्षुषा स्वकीयेन

चक्षुषा। येन तु शक्यसे द्रष्टं दिव्येन तहिव्यं ददामि ते तुभ्यं चक्षुस्तेन पश्य मे योगमैश्वरमीश्वरस्य ममैश्वरं योगम्। योगशत्क्यतिशयमित्यर्थः ।। ८ ।।

एवं यथोक्तप्रकारेणोक्त्वा ततोऽनन्तरं राजन्धृतराष्ट्र, महायोगेश्वरो महांश्वासौ योगेश्वरश्व हरिर्नारायणो दर्शयामास दर्शितवान्पार्थाय पृथासुताय परमं रूपं विश्वरूपमैश्वरम् ।। ९ ।।

अनेकेति। अनेकवक्रनयनमनेकानि वक्राणि नयनानि च यस्मिन रूपे तदनेकवक्रनयनम्। अनेकाद्भुतदर्शनमनेकान्यद्भुतानि विस्मापकानि दर्शनानि यस्मिन् रूपे तदनेकाद्भुतदर्शनं। तथानेकदिव्याभर्णमनेकानि दिव्यान्याभरणानि यस्मिंस्तदनेकदिव्याभरणं। तथा दिव्यानेकोधतायुधं दिव्यान्यनेकान्युधतान्यायुधानि यस्मिंस्तहिव्यानेकोधतायुधं दर्शयामासेति पूर्वेण संबन्धः ।। १० ।।

किंचदिव्येति। दिव्यमाल्याम्बरधरं दिव्यानि माल्यानि पुष्पाण्यम्बराणि वस्त्राणि च ध्रियन्ते येनेश्वरेण तं दिव्यमाल्याम्बरधरं। दिव्यगन्धानुलेपनं दिव्यं गन्धानुलेपनं यस्य तं। सर्वाश्चर्यमयं सर्वाश्चर्यप्रायं देवमनन्तं नास्यान्तोऽस्तीत्यनन्तस्तं विश्वतोमुखं सर्वतोमुखं सर्वभूतात्मत्वात्तं

दर्शयामासार्जुनो ददर्शेति वाध्याह्रियते।। ११ ।।

या पुनर्भगवतो विश्वरूपस्य भास्तस्या उपमोच्यते -- दिवीति। दिव्यन्तरिक्षे तृतीयस्यां वा दिवि सूर्याणां

सहस्त्रं सूर्यसहस्त्रं तस्य युगपदुत्थितस्य या युगपदुत्थिता भाः सा यदि सहशी स्यात्तस्य महात्मनो विश्वरूपस्यैव भासो यदि वा न स्यात्ततोऽपि विश्वरूपस्यैव भा अतिरिच्यत इत्यभिप्रायः ।। १२।।

किंच -- तत्रैकस्थमिति। तत्र तस्मिन्विश्वरूप एकस्मिन्स्थितमेकस्थं जगत्कृस्त्रं प्रविभक्तमनेकधा देवपितृमनुष्यादिभेदैरपश्यद्हृष्टवांन्देवदेवस्य हरेः शरीरे पण्डवोऽर्जुनस्तदा ।। १३ ।।

तत इति। ततस्तं हष्ट्वा स विस्मयेनाविष्टो विस्मयाविष्टो हृष्टानि रोमाणि यस्य सोऽयं हृष्टरोमा चाभवद्दनंजयः प्रणम्य प्रकर्षेण नमनं कृत्वा प्रह्वीभूतः सन् शिरसा देवं विश्वरूपधरं कृताञ्जलिर्नमस्कारार्थे संपुटीकृतहस्तः सन्नभाषतोक्तवान् ।। १४ ।।

कथं यत्त्वया दर्शितं विश्वरूपं तदहं पश्यामीति स्वानुभवमाविष्कुर्वन् अर्जुन उवाच--पश्यामीति। पश्याम्युपलभे हे देव, तव देहे देवान्सर्वोस्तथा भूतविशेषसङ्घन् भूतविशेषाणां श्थावरजङ्गमानां नानासंस्थानविशेषाणां सङ्घा भूतविशेषसङ्घास्तान्। किंच ब्रह्मणं चतुर्मुखमीशमीशितारं प्रजानां कमलासनस्थं पृथिवीपद्ममध्ये मेरुकर्णिकासमस्थमित्यर्थः ऋषींश्व वसिष्ठादीन्, सर्वानुरगांश्व वासुकिप्रभृतीन्दिव्यान्दिवि भवान् ।। १५ ।।

किंच--अनेकेति। अनेकबाहूदरवक्त्रनेत्रमनेके बाहव उदराणि वक्त्राणि नेत्राणि च यस्य तव स त्वमनेकबाहूदरवक्त्रनेत्रस्तमनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वा त्वां सर्वतः सर्वत्रानन्तरूपमनन्तानि

रूपाण्यस्येत्यनन्तरूपस्तमनन्तरूपं नान्तमन्तोऽवसानं न मध्यं सध्यं नाम द्वयोः कोश्योरन्तरं न पुनस्तवादिं तव देवस्य नान्तं पश्यामि न मध्यं पश्यामि न पुनरादिं पश्यामि हे विश्वेश्वर हे विश्वरूप ।। १६ ।।

किरीटिनं इति।। किरीटिनं किरीटं नाम शिरोभूषणविशेषः तत् यस्य अस्ति सः किरीटि तं किरीटिनम्, तथा गदिनं गदा अस्य अस्तीति चक्री तं चक्रिणं च, तेजोराशिं तेजः - पुञ्जं,

सर्वतोदीप्तिमन्तं सर्वतो दीप्तिः अस्य अस्तीति सर्वतोदीप्तिमान्, तं सर्वतोदीप्तिमन्तं पश्यामि त्वां दुर्निरीक्ष्यं दुःखेन निरीक्ष्यः दुर्निरीक्ष्यं समन्तात् समन्ततः, दीप्तानलार्कद्युतिं अनलश्च अर्कश्च अनलार्कौ दीप्तौ अनलार्कौ दीप्तानलार्कौ तयोः दीप्तानलार्कयोः द्युतिरिव द्युतिः तेजः यस्य तव स त्वं दीप्तानलार्कद्युतिं, अप्रमेयं अशक्यपरिच्छेदं इत्येतत् ।। १७ ।।

इत एव ते योगशक्तिदर्शनात् अनुमिनोमि -

त्वं इति ।। त्वं अक्षरं न क्षरतीति अक्षरं परमं ब्रह्म वेदितव्यं ज्ञातव्यं मुमुक्षुभिः। त्वं अस्य विश्वस्य समस्तस्य जगतः परं प्रकृष्टं निघानं निधीयते अस्मिन्निति निधानं, परः आश्रयः इत्यर्थः। किञ्च - त्वं

अव्ययः न तव व्ययोः विद्यते इति अव्ययः, शाश्वतधर्मगोप्ता शश्वद्भवः शाश्वतः नित्यः घर्मः तस्य गोप्ता शाश्वतधर्मगोप्ता। सनातनः चिरन्तनः त्वं पुरुषः परमः मतः अभिप्रेतः मे मम ।। १८ ।।

किञ्च -

अनादि इति।। अनादिमध्यान्तं आदिश्च मध्यं च अन्तश्च न विद्यते यस्य सः अयं अनादिमध्यान्तः तं त्वां अनादिमध्यान्तं, अनन्तवीर्यं न तव वीर्यस्य अन्तः अस्ति इति अनन्तवीर्यः तं अनन्तवीर्यं, तथा अनन्तबाहुं अनन्ताः बहवः यस्य तव सः त्वं अनन्तबाहुः तं त्वां अनन्तबाहुं शशिसूर्यनेत्रं शशिसूर्यौ नेत्रे यस्य तव सः त्वं शशिसूर्यनेत्रः तं त्वां शशिसूर्यनेत्रं तं चन्द्रादित्यनयनं पश्यामि त्वां दीप्तहुताशवक्त्र दीप्तश्च असौ हुताशश्च सः वक्त्रं यस्य तव सः त्वं दीप्तहुताशवक्त्रः तं त्वां दीप्तहुताशवक्त्रं, स्वतेजसा विश्वं इदं समस्तं तपन्तं सन्तापयन्तम् ।। १९ ।।

द्यावा इति ।। द्यावापृथिव्योः इदं अनन्तरं हि अन्तरिक्षं व्याप्तं त्वया विश्वरूपधरेण, एकेन, दिशश्च सर्वाः व्याप्ता। दृष्ट्वा उपलभ्य अद्भुतं विस्मापकं रूपं इदं तव उग्रं क्रूरं लोकत्रयं लोकानां त्रयं प्रव्यथितं

भीतं प्रचलितं वा हे महात्मन अक्षुद्रस्वभाव ।। २० ।।

अथ अधुना पुरा 'यद्वा जयेम यदि वा नो जयेयुः' (२.६) इति अर्जुनस्य यः संशयः आसीत्, तन्निर्णयाय पाण्डवविजयं ऐकान्तिकं दर्शयामि इति प्रवृत्तः भगवान्, तं पश्यन् आह -

किञ्च -

अमी हि त्वां सुरसंघा विशन्ति केचिद्भीता प्राञ्जलयो गृणन्ति।

स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः वीक्षन्ते त्वां स्तुतिभिः पुषकलाभिः।। २१ ।।

अमी इति।। अमी हि युद्ध्यमानाः ये योद्धारः त्वा त्वां सुरसंघाः ये अत्र भूभरावताराय अवतीर्णाः वस्त्वादिदेवसङ्घाः मनुष्यसंस्थानाः ते त्वां विशन्ति प्रविशन्तः दक्ऋश्यन्ते। तत्र केचित् भीताः प्राञ्जलयः सन्तो गृणन्ति स्तुवन्ति त्वाम् अन्ये पलायनेऽपि अशक्ताः सन्तः। युद्धे प्रत्युपस्थिते उत्पातादिनिमित्तानि उपलक्ष्य स्वस्ति अस्तु जगतः इति उक्त्वा महर्षिसिद्धसङ्घाः महर्षीणां सिद्धानां च सङ्घाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः संपुर्णाभिः।। २१ ।।

किञ्चान्यत्-

रुद्रादित्या वसवो ये च साद्ध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च।

गन्धर्वयक्षासुरसिद्धसंघाः वीक्षन्ते त्वां निस्मिताश्चैव सर्वे।। २२ ।।

रुद्रादित्या इति ।। रुद्रादित्या वसवो ये च साद्ध्याः रुद्रादयः गणाः विश्वे देवाः, अश्विनौ च देवौ, मरुतश्च, ऊष्मपाश्च पितरः, गन्धर्वयक्षासुरसिद्धसङ्घाः - गन्धर्वाः हाहाहूहूप्रभृतयः, यक्षाः कुबेरप्रभृतयः, असुराः विरोचनप्रभृतयः,

सिद्धाः कपिलादयः - तेषां सभ्घाः गन्धर्वयक्षासुरसिद्धसभ्घाः - ते वीक्षन्ते पश्यन्ति त्वां विस्मिताः विस्मयम्

आपन्नाः सन्तः ते एव सर्वे।। २२ ।।

यस्मात् -

रूपं महत् ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम्।

बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहम्।। २३ ।।

रूपम् इति ।। रूपं महत् अतिप्रमाणं ते तव बहुवक्त्रनेत्रं बहूनि वक्त्राणि मुखालि लेत्राणि चक्षूंषि च यस्मिन् रूपे तत् रूपं बहुवक्त्रनेत्रं, हे महाबाहो!बहुबाहूरुपादं बहवो बाहवः ऊरवः

पादाश्च यस्मिन् रूपे तत् बहुबाहूरुपादं, किञ्च- बहूदरं बहूनि उदराणि यस्मिन्निति तत् बहूदरं, बहुदंष्ट्राकरालं बह्वीभिः दंष्ट्राभिः करालं विकृतं तत् बहुदंष्ट्राकरालं - दृष्ट्वा रूपं ईदृशं लोकाः लौकिकाः प्राणिनः प्रव्यथिताः प्रचलिताः भयेन;तथा अहम् अपि।। २३ ।।

तत्रेदं कारणम्-

नभःसपृशं दीप्तमनेकवर्णं व्याप्ताननं दीप्तविशालनेत्रम्।

दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो।। २४ ।।

नभःसपृशम् इति ।। नभ-स्पृशं द्युस्पृशं इत्यर्थः, दीप्तं प्रज्वलितं, अनेकवर्णं अनेके वर्णाः भयङ्कराः नानासंस्थानाः यस्मिन् त्वयि तं त्वाम् अनेकवर्णं, व्यात्ताननं व्यात्तानि विवृतानि आननानि मुखानि यस्मिन् त्वयि तं त्वा व्यात्ताननं, दीप्तविशालनेत्रं दीप्तानि प्रज्वलितानि विशालानि विस्तीर्णानि नेत्राणि यस्मिन् त्वयि तं त्वां दीप्तविशालनेत्रं दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा प्रव्यथितः अन्तरान्मा मनः यस्य मम सः अहं प्रव्यथितान्तरात्मा सन् धृतिं धैर्यं न लभे शमं च उपशमं मनःस्तुष्टिं, हे विष्णो! ।। २४ ।।

कस्मात्?-

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि।

दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास।। २५ ।।

दष्ट्राकरालानि इति ।। दंष्ट्राकरालानि दंष्ट्राभिः करालानि विकृतानि ते तव मुखानि दृष्ट्वैव उपलभ्य कालानलसन्निभानि प्रलयकाले लोकानां दाहकः अग्निः कालानलः तत्सदृशानि कालानलसन्निभानि मुखानि दृष्ट्वा इति एतत्, दिशः पूर्वापरविवेकेन न जाने दिङ्मूढो जातः अस्मि। अतः न लेभे न उपलभे च शर्म सुखम्। अतः प्रसीद प्रसन्नो भव हे देवेश!जगन्निवास।। २५ ।।

अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहेवावनिपालसंघैः ।

भीष्मो द्रोणः सूतपुत्रस्तथाऽसौ सहास्मदीयैरपि योधमुख्यैः ।। २६ ।।

अमी इति ।। अमी च त्वां धृतराष्ट्रस्य पुत्राः दुर्योधनप्रभृतयः - 'त्वरमाणाः त्वां विशन्ति' (२७) इति व्यवहितेन सम्बन्धः - सर्वे सहैव सहिताः अवनिपालसङ्घैः अवनिं पृथ्वीं पालयन्तीति

अवनिपालाः तेषां सङ्घैः, किञ्च - भीष्मः, द्रोणः, सूतपुत्रः कर्णः तथा असौ, सह अस्मदीयरैपि धृष्टद्युम्नप्रभृतिभिः योधमुख्यैः योधानां प्रधानैः सह ।। २६ ।।

वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि।

केचिद्विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ।। २७ ।।

वक्त्राणि इति।। वक्त्राणि मुखानि ते एव त्वरमाणाः त्वरायुक्ताः सन्तः विशन्ति - किंविशिष्टानि मुखानि?- दंष्ट्राकरालानि भयानकानि भयङ्कराणि। किंञ्च - केचित् मुखानि प्रविष्टानां मध्ये विलग्नाः दशनान्तरेषु मांसम् इव भक्षितं संदृश्यन्ते उपलभ्यन्ते चूर्णितैः चूर्णीकृतैः उत्तमाङ्गैः शिरोभिः ।। २७ ।।

यथा इति।। यथा नदीनां स्रवन्तीनां बहवः अनेके अम्बूनां वेगाः अम्बूवेगाः त्वराविशेषाः समुद्रमेव अभिमुखाः प्रतिमुखाः द्रवन्ति प्रविशन्ति, तथा तद्वत् तव अमी भीष्मादयः नरलोकवीराः मनुष्यलोके शूराः विशन्ति वक्त्राणि अभिविज्वलन्ति प्रकाशमानानि।।२८।।

तं किमर्थं प्रविशन्ति कथं च इति? आह -

यथा इति।। यथा प्रदीप्तं ज्वलनं अग्निं पतङ्गाः पक्षिणः विशन्ति नाशाय विनाशाय, समृद्धवेगाः समृद्धः उद्भूतः वेगः गतिः येषां ते समृद्धवेगाः।।२९।।

लेलिह्यसे इति।। लेलिह्यसे आस्वादयसि ग्रसमानः अन्तः प्रवेशयन् समन्तात् समन्ततः लोकान् समग्रान् समस्तान् वदनैः वक्त्रैः ज्वलद्भिः दीप्यमानैः तेजोभिः आपूर्य संव्याप्य जगत् समग्रं सह अग्रेण समस्तं इत्येतत्। किञ्च - भासः दीप्यतः तव उग्राः क्रूराः प्रतपन्ति संतापं कुर्वन्ति, हे विष्णो व्यापनशीलः।।३०।।

यत एवं उग्रस्वभावः, अतः -

आख्याहि इति। आख्याहि कथय - मे मह्यं कः भवान् एवं उग्ररूपः क्रूराकारः। नमः अस्तु ते तुभ्यं, हे देववर देवानां प्रधान, प्रसीद प्रसादं कुरु। विज्ञातुं विशेषेण ज्ञातुं इच्छामि भवन्तं आद्यं आदौ भवं आद्यं; न हि यस्मात् प्रजानामि तव त्वदीयां प्रवृत्तिं चेष्टाम्।। ३१।।

कालः इति।। कालः अस्मि लोकक्षयकृत् लोकानां क्षयं करोतीति लोकक्षयकृत् प्रवृद्धः (प्र)वृद्धिः गतः। यदर्थं प्रवृद्धः तत् शृणु - लोकान् समाहर्तुं संहर्तुं इह अस्मिन् काले प्रवृत्तः। ऋतेऽपि विनापि त्वा त्वां न भविष्यन्ति भीष्मद्रोणप्रभृतयः सर्वे, येभ्यः तव आशङ्का, ये अवस्थिता प्रत्यनीकेषु अनीकमनीकं प्रति प्रत्यनीकेषु प्रतिपक्षभूतेषु अनीकेषु योधाः योद्धारः।। ३२ ।।

यस्मात् एवम् -

तस्मात् इति। तस्मात् त्वं उत्तिष्ठ "भीष्मद्रोणप्रभृतयः अतिरथाः (अवस्थिताः), अजेयाः देवैरपि, अर्जुनेन

जिताः"इति यशः लभस्व; केवलं पुण्यैः हि तत् प्राप्यते। जित्वा शत्रून् दुर्योधनप्रभृतीन् भुङ्क्ष्व राज्यं समृद्धं असपत्नं अकण्टकम्। मया एव एते निहताः निश्चयेन हताः प्राणैः वियोजिताः पूर्वमेव। निमित्तमात्रं भव त्वं हे सव्यसाची इति उच्यते अर्जुनः।।३३।।

द्रोंणं इति। द्रोणं च - येषु येषु योधेषु अर्जुनस्य आशङ्का तांस्तान् व्यपदिशति भगवान्, मया हतानिति। तत्र भीष्मद्रोणयोः तावत् प्रसिद्धं आशङ्काकारणम्। द्रोणः धनुर्वेदाचार्यः दिव्यास्त्रसंपन्नः, आत्मनश्च विशेषतः गुरुः गरिष्टः। भीष्मश्च स्वच्छन्दमृत्युः दिव्यास्त्रसम्पन्नश्च

परशुरामेण द्वन्दयुद्धं अगमत्, न च पराजितः। तथा जयद्रथः, यस्य पिता तपः चरति "मम पुत्रस्य शिरः भूमौ निपातयिष्यति यः, तस्यापि शिरः पतिष्यति"इति। कर्णोऽपि वासवदत्तया शक्त्या त्वमोघया

सम्पन्नः सूर्यपुत्रः कानीनः यतः, अतः तं नाम्नैव निर्दिशति। मया हतान् त्वं जहि निमित्तमात्रेण। मा व्यथिष्ठाः, तेभ्यः भयं मा कार्षीः। युध्यस्व जेतासि दुर्योधनप्रभृतीन् रणे युद्धे सपत्नान् शत्रून्।।३४।।

एतच्छ्रुत्वा इति।। एतत् श्रुत्वा वचनं केशवस्य पूर्वोक्तं, कृताञ्जलिः सन् वेपमानः कम्पमानः किरीटी नमस्कृत्वा, भूयः पुनः एव आह उक्तवान् कृष्णं सगद्गदं भयाविष्टस्य दुःखाभिघातात्, स्नेहाविष्टस्य च हर्षोद्भवात्, अश्रुपूर्णनेत्रत्वे सति श्लेष्मणा कण्ठावरोधः; तेन वाचः अपाटवं मन्दशब्दत्वं यत् स गद्गदः तेन सह वर्तत इति। "सगद्गदं वचनं आह"इति वचनक्रियाविशेषणं एतत्। भीतभीतः पुनः पुनः भयाविष्टचेताः सन् प्रणम्य प्रह्वः भूत्वा, 'आह'इति व्यवहितेन

सम्बन्धः।।३५।।

अत्र अवसरे सञ्जयवचनं साभिप्रायम्। कथं? द्रोणादिषु अर्जुनेन निहितेषु अजेयेषु चतुर्षु, निराश्रयः दुर्योधनः निहितः एव इति मत्वा धृतराष्ट्रः जयं प्रति निराशः सन् सन्धि करिष्यति, ततः शान्तिः उभयेषां भविष्यति इति। तदपि न अश्रौषीत् धृतराष्ट्रः, भवितव्यवशात् ।। ३६।।

स्थाने इति।। स्थाने युक्तम्। किं तत? तव प्रकीर्त्या त्वन्माहात्म्यकीर्तनेन श्रुतेन, हे हृषीकेश !यत् जगत् प्रहृष्यति प्रहर्षं उपैति, तत् स्थाने युक्तं इत्यर्थः। अथवा - विषयविशेषणं स्थाने इति। युक्तः हर्षादिविषयः भगवान्, यतः ईश्वरः सर्वात्मा सर्वभूतसुहृच्च इति। तथा अनुरज्यते अनुरागं च उपैति; तच्च विषये इति व्याख्येयम्। किञ्च - रक्षांसि भीतानि भयाविष्टानि दिशः द्रवन्ति गच्छति ; तच्च स्थाने विषये। सर्वे नमस्यन्ति नमस्कारं कुर्वन्ति च सिद्धसङ्घाः सिद्धान्तानां समुदायाः कपिलादीनां; तच्च स्थाने।।३६।।

भगवतः हर्षादिविषयत्वे हेतुं दर्शयति।

कस्मात् इति।। कस्मात् च हेतोः ते तुभ्यं न नमेरन् न नमस्कुर्युः हे महात्मन् ! गरीयसे गुरुतराय - यतः ब्रह्मणः हिरण्यगर्भस्य अपि आदिकर्ता कारणं अतः तस्मात् - आदिकर्त्रे कथं एते न नमस्कुर्युः? अतः हर्षादीनां नमस्कारस्य च स्थानं त्वं अर्हः विषयः इत्यर्थः। हे अनन्त ! देवेश ! हे जगन्निवास ! त्वं अक्षरं तत् परं, यत् वेदान्तेषु श्रूयते। किं तत् ? सदसत् इति। सत् विद्यमानं, असत् च यत्र नास्ति इति बुद्धिः। ते उपाधि - (उपधान) भूते सदसती यस्य अक्षरस्य, यद् द्वारेण सदसती इति उपचर्यते। परमार्थतस्तु सदसतोः परमम तत् अक्षरं यत् अक्षरं वेदविदः वदन्ति। तत् त्वमेव, न अन्यत् इति अभिप्रायः।।३७।।

पुनरपि स्तौति -

त्वं इति।। त्वं आदिदेवः, जगतः स्रष्टत्वात्। पुरुषः पुरि शयानात् पुराणः चिरन्तनः त्वं एव अस्य विश्वस्य परं प्रकृष्टं निधानं निधीयते अस्मिन् जगत् सर्वं महाप्रलयादौ इति। किञ्च - वेत्ता असि, वेदिता असि,

सर्वस्य एव वेद्यजातस्य। यत् च वेद्यं वेदनार्हं तच्चासि, परं च धाम परमं पदं वैष्णवम्। त्वया ततं व्याप्तं विश्वं समस्तं, हे अनन्तरूप ! अन्तः न विद्यते तव रूपाणाम्।।३७।।

किञ्च

वायुः इति।। वायुः त्वं, यमः च, अग्निः, वरुणः अपांपतिः, शशाङ्कः चन्द्रमाः प्रजापतिः त्वं कश्यपादिः, प्रपितामहश्च पितामहस्यापि पिता प्रपितामहः, ब्रह्मणोऽपि पिता इत्यर्थः। नमो नमः ते तुभ्यं अस्तु सहस्रकृत्वः। पुनश्च भूयः अपि नमो नमः ते। बहुशो नमस्कारक्रियाभ्यासावृत्तिगणनं कृत्वसुचा उच्यते। 'पुनश्च' 'भूयोऽपि' इति श्रद्धाभक्त्यतिशयात् अपरितोषं आत्मनः दर्शयति।।३९।।

तथा - नमः इति। नमः पुरस्तात् पूर्वस्यां दिशि तुभ्यं, अथ पृष्ठतः ते पृष्ठतः अपि च ते नमः अस्तु, ते सर्वतः एव सर्वासु दिक्षु सर्वत्र स्थिताय हे सर्व। अनन्तवीर्यामितविक्रमः अनन्तं वीर्यं अस्य, अमितः विक्रमः अस्य। वीर्यं सामर्थ्यं, विक्रमः पराक्रमः। वीर्यवानपि कश्चित् शत्रुवधादिविषये न पराक्रमते, मन्दपराक्रमः वा। त्वं तु अनन्तवीर्यः अमितविक्रमश्च इति अनन्तवीर्यामितविक्रमः। सर्वं समस्तं जगत् समाप्नोति सम्यक् एकेन आत्मना व्याप्नोति यतः ततः तस्मात् असि भवसि सर्वः

त्वं, त्वया विनाभूतं न किञ्चित् अस्ति इति अभिप्रायः।।४०।।

यतः अहं त्वन्माहात्म्यापरिज्ञानात् अपराद्धः, अतः -

सखा इति।। सखा समानवयाः इति मत्वा ज्ञात्वा विपरीतबुद्ध्या प्रसभं अभिभूय प्रसह्य यत् उक्तं हे कृष्ण ! हे सखेति च अजानता अज्ञानिना मूढेन - किं अजानता इति ? आह - महिमानं माहात्म्यं तव इदं ईश्वरस्य विश्वरूपम्। "तव इदं महिमानं अजानता" इति वैयधिकरण्येन सम्बन्धः। 'तवेमं'इति पाठो यदि अस्ति, तदा सामानधिकरण्यमेव। मया प्रमादात् विक्षिप्तचित्ततया, प्रणयेन वाऽपि, प्रणयो नाम स्नेहनिमित्तः विस्रम्भः, तेनापि कारणेन यत् उक्तवान् अस्मि।।४१।।

यच्च इति।। यच्च अवहासार्थं परिहासप्रयोजनाय असत्कृतः परिभूतः असि भवसि त्वं - क्वं ? - विहारशय्यासनभोजनेषु विहरणं विहारः पादव्यायामः शयनं शय्या, आसनं आस्थायिका, भोजनं अदनं, इति एतेषु विहारशय्यासनभोजनेषु एकः परेक्षः सन् असत्कृतः असि परिभूतः असि ; अथवाऽपि हे अच्युत ! तत् समक्षं - तच्छब्दः

क्रियाविशेषणार्थः - प्रत्यक्षं वा असकृतः असि तत् सर्वं अपराधजातं क्षामये क्षमां कारये त्वां अहं अप्रमेयं प्रमाणातीतम्।।४२।।

पिता इति।। पिता असि जनयिता असि लोकस्य प्राणिजातस्य चराचरस्य स्थावरजङ्गमस्य। न केवलं त्वं अस्य जगतः पिता, पूज्यश्च पूजार्हः, यतः गुरुः गरीयान् गुरुतरः। कस्मात् गुरुतरः त्वं इति? आह - न त्वत्समः त्वत्तुल्यः अन्यः अस्ति। न हि ईश्वरद्वयं संभवति अनेकेश्वरत्वे व्यवहारानुपपत्तेः। त्वत्सम एव तावत् अन्यः न संभवति; कुतः एव अन्यः अभ्यधिकः स्यात् लोकत्रयेऽपि सर्वस्मिन्? अप्रतिमप्रभाव !प्रतिमीयते यया सा प्रतिमा, न विद्यते प्रतिमा यस्य तव प्रभावस्य सः त्वं अप्रतिमप्रभावः हे अप्रतिमप्रभावः! निरतिशयप्रभाव! इत्यर्थः।।४३।।

तस्मात् इति।। तस्मात् प्रणम्य नमस्कृत्य, प्रणिधाय प्रकर्षेण नीचैः धृत्वा कायं शरीरं, प्रसादये प्रसादं कारये त्वां अहं ईशं ईशितारं ईड्यं स्तुत्यम्। त्वं पुनः पुत्रस्य अपराधं पिता यथा क्षमते सर्वं, सखा इव च सख्युः, अपराधं, यथा वा प्रियः प्रियायाः अपराधं क्षमते, एवं अर्हसि हे

देव सोढुं प्रसहितुं, क्षन्तुं इत्यर्थः।।४४।।

अदृष्टपूर्वं इति।। अदृष्टपूर्वं न कदाचिदपि दृष्टपूर्वं इदं विश्वरूपं तव मया अन्यैर्वा, तत् अहं दृष्ट्वा हृषितः अस्मि। भयेन च प्रव्यथितं मनः मे। अतः तदेव मे मम दर्शय हे देव रूपं यत् मत्सखम्। प्रसीद देवेश!जगन्निवासः, जगतो निवासो जगन्निवासः, हे जगन्निवास।।४५।।

किरीटिनं इति।। किरीटिनं किरीटवन्तं, तथा गदिनं गदावन्तं, चक्रहस्तं इच्छामि त्वां प्रार्थये त्वां द्रष्टुं

अहं तथैव, पूर्ववत् इत्यर्थः। यतः एवं, तस्मात् तेनैव रूपेण वसुदेवपुत्ररूपेण चतुर्भुजेन, सहस्रबाहो -

वार्तमानिकेन विश्वरूपेण, भव विश्वमूर्ते; उपसंहृत्य विश्वरूपं, तेनैव रूपेण भव इत्यर्थः।।४६।।

अर्जुनं भीतं उपलभ्य, उपसंहृत्य विश्वरूपं, प्रियवचनेन आश्वासयन् श्रीभगवान् उवाच -

मया इति।। मया प्रसन्नेन, प्रसादः नाम त्वयि अनुग्रहबुद्धिः, तद्वता प्रसन्नेन मया तव हे

अर्जुन ! इदं परं रूपं विश्वरूपं दर्शितं आत्मयोगात् आत्मनः ऐश्वर्यस्य सामर्थ्यात्। तेजोमयं तेजः प्रायं विश्वं समस्तं अनन्तं अन्तरहितं आदौ भवं आद्यं यत् रूपं मे मम त्वदन्येन त्वत्तः अन्येन केनचित् न दृष्टपूर्वम्।।४७।।

आत्मनः मम रूपदर्शनेन कृतार्थः एव त्वं संवृत्तः इति तत् स्तौति -

न वेद इति।। न वेदयज्ञाध्ययनैः चतुर्णामपि वेदानां अध्ययनैः यथावत् यज्ञाध्ययनैश्च - वेदाध्ययनैरेव यज्ञाध्ययनस्य सिद्धत्वात् पृथक् यज्ञाध्ययनग्रहणं यज्ञविज्ञानोपलक्षणार्थं - तथा न दानैः तुलापुरुषादिभिः, न च क्रियाभिः अग्निहोत्रादिभिः श्रौतादिभिः, न अपि तपोभिः उग्रैः चान्द्रायणादिभिः घोरैः, एवंरूपः यथादर्शितं विश्वरूपं यस्य सः अहं एवंरूपः न शक्यः अहं नृलोके द्रष्टुं त्वदन्येन त्वत्तः अन्येन कुरुप्रवीर।।४८।।

मा ते व्यथा इति।। मा ते व्यथा, मा भूत् ते भयम्, मा च विमूढभावः विमूढचित्तता, दृष्ट्वा उपलभ्य रूपं घोरं ईदृक् यथादर्शितं मम इदम्। व्यपेतभीः विगतभीः विगतभयः. प्रीतमनाः च सन् पुनः भूयः त्वं तदेव चतुर्भुजं रूपं

शङ्खचक्रगदाधरं तव इष्टं रूपं इदं प्रपश्य।।४९।।

सञ्जय उवाच -

इत्यर्जुनं इति।। इति एवं अर्जुनं वासुदेवः तथाभूतं वचनं उक्त्वा, स्वकं वसुदेवस्य गृहे जातं रूपं दर्शयामास दर्शितवान् भूयः पुनः। आश्वासयामास च आश्वासितवान् भीतं एनं, भूत्वा पुनः सौम्यवपुः प्रसन्नदेहः महात्मा।।५०।।

दृष्ट्वेदं इति।। दृष्ट्वा इदं मानुषं रूपं मत्सखं प्रसन्नं तव सौम्यं जनार्दन ! इदानीं अधुना अस्मि संवृत्तः सञ्जातः - किं? - सचेताः प्रसन्नचित्तः प्रकृतिस्वभावं गतः च अस्मि।।५१।।

सुदुर्दर्शं इति।। सुदुर्दर्शं सुष्ठु दुःखेन दर्शनं अस्य इति सुदुर्दर्शं इदं रूपं दृष्टवान् असि यत् मम, देवाः अपि अस्य मम रूपस्य नित्यं सर्वदा दर्शनकाङ्क्षिणः, दर्शनेप्सवोऽपि न त्वमिव दृष्टवन्तः, न द्रक्ष्यन्ति च इति अभिप्रायः।।५२।।

कस्मात् ? -

नाहं इति।। न अहं वेदैः ऋग्यजुःसामाथर्ववेदैः चतुर्भिः अपि न तपसा उग्रेण

चांद्रायणादिना, न दानेन गोभूहिरण्यादिना, न च इज्यया यज्ञेन पूजया वा शक्यः एवंविधः यथादर्शितप्रकारः द्रष्टुं, दृष्टवान् असि मां यथा त्वम्।।५३।।

कथं पुनः शक्यः इति ?उच्यते -

भक्त्या इति।। भक्त्या तु - किंविशिष्टया इति? आह - जनन्यया अपृथग्भूतया - भगवतः अन्यत्र पृथक् न कदाचिदपि (या) भवति (सा तु अनन्या भक्तिः)। सर्वैः अपि करणैः वासुदेवादन्यत् न उपलभ्यते यया, सा अनन्या भक्तिः, तया अनन्यया भक्त्या शक्यः अहं एवंविधः विश्वरूपप्रकारः हे अर्जुन ! ज्ञातुं शास्त्रतः - न केवलं ज्ञातुं शास्त्रतः - द्रष्टुं च साक्षात्कर्तुं तत्त्वेन तत्त्वतः, प्रवेष्टुं च मोक्षुं च गन्तुं, परन्तप।।५४।।

अधुना सर्वस्य गीताशास्त्रस्य सारभूतः अर्थः निश्रेयसार्थः अनुष्ठेयत्वेन समुच्चित्य उच्यते -

मत्कर्म इति।। मत्कर्मकृत् मदर्थं कर्म मत्कर्म, तत् करोतीति मत्कर्मकृत्। मत्परमः - करोति भृत्यः स्वामिकर्म, न तु आत्मनः परमा प्रेत्य गन्तव्या गतिरिति स्वामिनं प्रतिपद्यते; अयं तु

मत्कर्मकृत् मामेव परमां गतिं प्रतिपद्यते इति मत्परमः अहं परमः परा गतिः यस्य सः अयं मत्परमः। तथा मद्भक्तः। सङ्गवर्जितः

धनपुत्रमित्रकलत्रबन्धुवर्गेषु सङ्गवर्जितः सङ्गः प्रीतिः - स्नेहः - तद्वर्जितः। निर्वैरः निर्गतवैरः सर्वभूतेषु शत्रुभावरहितः आत्मनः अत्यन्तापकारप्रवृत्तेष्वपि। यः ईदृशः मद्भक्तः सः मां एति, अहमेव तस्य परा गतिः, न अन्या गतिः काचित् भवति। अयं तव उपदेशः इष्टः मया उपदिष्टः हे पाण्डव !इति।।५५।।

द्वादशोऽध्यायः

द्वितीयप्रभृतिष्वध्यायेषु विभूत्यन्तेषु परमात्मनो ब्रह्मणोऽक्षरस्य विध्वस्तसर्वविशेषणस्योपासनमुक्तं सर्वयोगैश्वर्यसर्वज्ञानशक्तिमत्सत्त्वोपाधेरीश्वरस्य तव चोपासनं तत्रतत्रोक्तं विश्वरूपाध्याये त्वैश्वरमाद्यं समस्तजगदात्मरूपं विश्वरूपं त्वदीयं दर्शितमुपासनार्थमेव त्वया, तच्च दर्शयित्वोक्तवानसि मत्कर्मकृदित्याद्यतोऽहमनयोरुभयोः पक्षयोर्विशिष्टतरबुभुत्सया त्वां पृच्छामीत्यर्जुन उवाच-एवमिति। एवमित्यतीतानन्तरश्लोकेनोक्तमर्थं परामृशति-मत्कर्मकृदित्यादिना। एवं सततयुक्ता नैरन्तर्येण भगवत्कर्मादौ यथोक्तेऽर्थे समाहिताः सन्तः प्रवृत्ता इत्यर्थः। येभक्ता अनन्यशरणाः सन्तस्त्वां यथादर्शितं विश्वरूपं पर्युपासते ध्यायन्ति ये चान्येऽपि त्यक्तसर्वैषणाः संन्यस्तसर्वकर्माणो यथाविशेषितं ब्रह्माक्षरं निरस्तसर्वोपाधित्वादव्यक्तमकरणगोचरं। यद्धि लोके करणगोचरं तह्यक्तमुच्यते। अञ्जेर्धातोस्तत्कर्मकत्वादिदं त्वक्षरं तद्विपरीतं शिष्टैश्चोच्यमानैर्विशेषणैर्विशिष्टं तद् ये चापि पर्युपासते तेषामुभयेषां मध्ये के योगवित्तमाः केऽतिशयेन योगविद इत्यर्थः।।१।।

श्रीभगवानुवाच। ये त्वक्षरोपासकाः सम्यग्दर्शिनो निवृत्तैषणास्ते तावत्तिष्ठन्तु तान्प्रति यद्वक्तव्यं तदुपरिष्टाद्वक्ष्यामः। ये त्वितरे-मयि विश्वरूपे परमेश्वर आवेश्य समाधाय मनो ये भक्ताः सन्तो मां सर्वयोगेश्वराणामधीश्वरं सर्वज्ञं विमुक्तरागादिक्लेशतिमिरदृष्टिं नित्ययुक्ता अतीतानन्तराध्यायान्तोक्तश्लोकार्थन्योयेन सततततयुक्ताः सन्त उपासते श्रद्धया

परया प्रकृष्टयोपेतास्ते मे मम मता अभिप्रेता युक्ततमा इति। नैरन्तर्येण हि ते मच्चित्ततयाऽहोरात्रमतिवाहयन्त्यतो युक्तं तान्प्रति युक्ततमा इति वक्तुम्।।२।।

किमितरे युक्ततमा न भवन्ति न किंतु तान्प्रति यद्वक्तव्यं तच्छृणु ये त्वक्षरमनिर्देश्यमव्यक्तमव्यक्तत्वादशब्दगोचरमिति न निर्देष्टुं शक्यतेऽतोऽनिर्देश्यमव्यक्तं न केनापि प्रमाणेन व्यज्यत इत्यव्यक्तं पर्युपासते परि समन्तादुपासते। उपासनं नाम यथाशास्त्रमुपास्यस्यार्थस्य विषयीप्यमुपगम्य तैलधारावत्समानप्रत्ययप्रवाहेण दीर्घकालं यदासनं तदुपासनमाचक्षते। अक्षरस्य विशेषणमाह सर्वत्रगं व्योमवह्याप्यचिन्त्यं चाव्यक्तत्वादचिन्त्यम्। यद्धि करणगोचरं तन्मनसापि चिन्त्यं तद्विपरीतत्वादचिन्त्यमक्षरं कूटस्थं दृश्यमानगुणमन्तर्दोषं वस्तु कूटं कूटरूपं कूटसाक्ष्यमित्यादौ कूटशब्दः प्रसिद्धो लोके। तथा चाविद्याद्यनेकसंसारबीजमन्तर्दोषवन्मायाऽव्यकृतादिशब्दवाच्यतया 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं' 'मम माया दुरत्यया' इत्यादौ प्रसिद्धं यत्तत्कूटं तस्मिन्कूटे स्थितं कूटस्थं तदध्यक्षतयाथवा राशिरिव स्थितं कूटस्थमतएवाचलं तस्माद्ध्रुवं नित्यमित्यर्थः।।३।।

संनियम्येति। संनियम्य सम्यङ् नियम्य संहृत्येन्द्रियग्राममिन्द्रियसमुदायं सर्वत्र सर्वस्मिन्काले समबुद्धयः समा तुल्या बुद्धिर्योषामिष्टानिष्टप्राप्तौ ते समबुद्धयस्ते य एवंविधास्ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः। नतु तेषां वक्तव्यं किंचिन्मां ते प्राप्नुवन्तीति। ज्ञानी त्वात्मैव मे मतमिति ह्युक्तम्। नहि भगवत्स्वरूपाणां सतां युक्ततमत्वमयुक्ततमत्वं वा वाच्यम्।।४।।

किंतु क्लेशोऽधिकतरो यद्यपि मत्कर्मादिपराणाक्लेशो अधिक एव क्लेशोऽधिकतरस्त्वक्षरात्मनां परमार्थदर्शिनां देहाभिमानपरित्यागनिमित्तोऽव्यक्तासक्तचेतसामव्यक्त आसक्तं चेतो योषां तेऽव्यक्तासक्तचेतसस्तेषांव्यक्तासक्तचेतसाम्। अव्यक्ता हि यस्माद्या गतिरक्षरात्मिका दुःखं सा

देहवद्भिर्देहाभिमानवद्भिरवाप्यतेऽतःक्लेशोऽधिकतरः। अक्षरोपासकानां यद्वर्तनं तदुपरिष्टाद्वक्ष्यामः।।५।।

ये त्विति। ये तु सर्वाणि कर्माणि मयीश्वरे संन्यस्य मत्परा अहं परो येषां ते मत्पराः

सन्तोऽनन्येनैवाविद्यमानमन्यदालम्बनं विश्वरूपं देवमात्मानं मुक्त्वा यस्य सोऽनन्यस्तेनानन्येनैव (केवलेन) केन योगेन समाधिना मां ध्यायन्तशअचिन्तयन्त उपासते।।६।।

तेषां किं-तेषां मदुपासनैकपराणामहमीश्वरः समुद्धर्ता। कुत इत्याह मृत्युसंसारसागरात् मृत्युयुक्तः संसारो मृत्युसंसारः स एव सागर इव सागरो दुरुत्तरत्वात्तस्मान्मृत्युसंसारसागरादहं तेषां समुद्धर्ता भवामि न चिरात् किं तर्हि क्षिप्रमेव हे पार्थ, मय्यावेशितचेतसां मयि विश्वरूप आवेशितं प्रवेशितं समाहितं चेतो येषां ते मय्यावेशितचेतसस्तेषाम्।।७।।

यत एवं तस्मात्-मय्येवेति। मय्येव विश्वरूप ईश्वरे मनः संकल्पविकल्पात्मकमाधत्स्व स्थापय मय्येव व्यवसायं कुर्वतीं बुद्धिमाधत्स्व निवेशय। ततस्ते किं स्यादिति शृणु निवसिष्यसि निवत्स्यसि निश्चयेन मदात्मना मयि निवासं करिष्यस्येवातः शरीरपातादूर्ध्वं न संशयः संशयोऽत्र न कर्तव्यः।।८।।

अथेति। अथैवं यथावोचाम तया मयि चित्तं समाधातुं स्थापयितुं स्थिरमचलं कर्तु न शक्नोषि चेत्ततः पश्चादभ्यासयोगेन चित्तस्यैकस्मिन्नालम्बने सर्वतः समाहृत्य पुनः पुनः स्थापनमभ्यासस्तत्पूर्वको योगः समाधानलक्षणस्तेनाभ्यासयोगेन मां विश्वरूपमिच्छ प्रर्थयस्वाप्तुं प्राप्तुं हे धनंजय।।९।।

अभ्यासेऽपीति। अभ्यासेऽप्यसमर्थोऽस्यशक्तोऽसि तर्हि मत्कर्मपरमो भव मदर्थं कर्म मत्कर्म

तत्परमो मत्कर्मप्रधान इत्यर्थः। अभ्यासेन विना मदर्थमपि कर्माणि केवलं कुर्वनिसुद्धिं सत्त्वशुद्धियोगज्ञानप्राप्तिद्वारेणावाप्स्यसि।।१०।।

अथैतदिति। अथ पुनरेतदपि यदुक्तं मत्कर्मपरमत्वं तत्कर्तुमशक्तोऽसि मद्योगमाश्रितो मयि क्रियमाणानि कर्माणि संन्यस्य यत्करणं तेषामनुष्ठानं स मद्योगस्तमाश्रितः सन्सर्वकर्मफलत्यागं सर्वेषां कर्मणां फलसंन्यासं सर्वकर्मफलत्यागं ततोऽनन्तरं कुरु यतात्मवान्संयतचित्तः सन्नित्यर्थः।।११।।

इदानीं सर्वकर्मफलत्यागं स्तौति-श्रेयो हि प्रशस्यतरं ज्ञानं कस्मादविवेकपूर्वकादभ्यासात्तस्मादपि ज्ञानाज्ज्ञानपूर्वकं ध्यानं विशिष्यते। ज्ञानवतो ध्यानादपि कर्मफलत्यागो विशिष्यत इत्यनुषज्यते। एवं कर्मफलत्यागात्पूर्वविशेषणवतः शान्तिरुपशमः सहेतुकस्य संसारस्यानन्तरमेव स्यान्नतु कालान्तरमपेक्षते। अज्ञस्य कर्मणि प्रवृत्तस्य पूर्वोपदिष्टोपायानुष्ठानाशक्तौ सर्वकर्मणां फलत्यागः श्रेयःसाधनमुपदिष्टं न प्रथममेव। अतश्च श्रेयो हि ज्ञानमभ्यासादुत्तरोत्तरोत्तरविशिष्टत्वोपदेशेन सर्वकर्मफलत्यागः स्तूयते संपन्नसाधनानुष्ठानाशक्तावनुष्ठेयत्वेन श्रुतत्वात्। केन साधर्म्येण स्तुतित्वं 'यदि सर्वे प्रमुच्यन्ते'इति सर्वकामप्रहाणादमृतत्वमुक्तं तत्प्रसिद्धम्। कामाश्च सर्वे श्रौतस्मार्तसर्वकर्मणां फलानि। तत्त्यागे च विदुषो ज्ञाननिष्ठस्यानन्तरैव शान्तिरिति सर्वकामत्यागसामान्यमन्यकर्मफलत्यागस्यास्तीति तत्सामान्यात्सर्वकर्मफलत्यागस्तुतिरियं प्ररोचनार्था। यथागस्त्येन ब्राह्मणेन समुद्रः पीत इतीदानींतना अपि ब्राह्मणत्वसामान्यात्स्तुयन्ते। एवं कर्मफलत्यागात्कर्मयोगस्य

श्रेयःसाधनत्वमभिहितम्।।१२।।

अत्र चात्मेश्वरभेदमाश्रित्य विशअवरूप ईश्वरे चेतःसमाधानलक्षणो योग उक्त ईश्वरार्थं कर्मानुष्ठानादि च। 'अथैतदप्यशक्तोऽसि'इत्यज्ञानकार्यसूचनान्नाभेददर्शिनोऽक्षरोपासकस्य कर्मयोग उपपद्यत इति दर्शयति। तथा

कर्मयोगिनोऽक्षरोपासनानुपपत्तिं दर्शयति भगवान् 'ते प्राप्नुवन्ति मामेव'इति। अक्षरोपासकानां कैवल्यप्राप्तौ स्वातन्त्र्यमुक्त्वेतरेषां पारतन्त्र्यमीश्वराधीनतां दर्शितवांस्तेषामहं समुद्धर्तेति। यदि हीश्वरस्यात्मभूतास्ते मता अभेददर्शित्वादक्षररूपा एव त इति समुद्धरणकर्मवचनं तान्प्रत्यपेशलं स्यात्। यस्माच्चार्जुनस्यात्यन्तमेव हितैषी भगवांस्तस्य सम्यग्दर्शनानन्वितं कर्मयोगं भेददृष्टिमन्तमेवोपदिशति। न चात्मानमीश्वरं प्रमाणतो बुध्वा कस्यचिद्नुणभावं जिगमिषति कश्चिद्विरोधात्। तस्मादक्षरोपासकानां सम्यग्दर्शननिष्ठानां संन्यासिनां त्यक्तसर्वैषणानाम् 'अद्वेष्टा सर्वभूतानाम्'इत्यादिधर्मपूगं साक्षादमृतत्वकारणं वक्ष्यामीति प्रवर्तते-अद्वेष्टेति। अद्वेष्टा सर्वभूतानां न द्वेष्टात्मनो दुःखहेतुमपि न किंचिद्द्वेष्टि सर्वाणि भूतान्यात्मत्वेन हि पश्यति। मैत्रो मित्रभावो मैत्री मित्रतया वा वर्तत इति मैत्रः। करुण एव च करुणा कृपा दुःखितेषु दया तद्वान्करुणः सर्वभूताभयप्रदः संन्यासीत्यर्थः। निर्ममो ममेतिप्रत्ययवर्जितो निरहंकारो निर्गताहेप्रत्ययः। समदुःखसुखः समे दुःखसुखे द्वेषरागयोरप्रवर्तके यस्य स समदुःखसुखः क्षमी क्षमावानाक्रुष्टोऽभिहतो वाविक्रिय एवास्ते।।१३।।

संतुष्ट इति। संतुष्टः सततं नित्यं देहस्थितिकारणस्य लाभेऽलाभे चोत्पन्नालंप्रत्ययस्तथा गुणवल्लाभे विपर्यये च संतुष्टः सततं योगी समाहितचित्तो यतात्मा संयतस्वभावो दृढनिश्चयो दृढः

स्थिरो निश्चयोऽध्यवसायो यस्यात्मतत्त्वविषये स दृढनिश्चयो मय्यर्पितमनोबुद्धिः संकल्पात्मकं मनोऽध्यवसायलक्षणा बुद्धिस्ते मय्येवार्पिते स्थापिते यस्य संन्यासिनः स मय्यर्पितमनोबुद्धिर्य ईदृशो मद्भक्तः स मे प्रियः। 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' इति सप्तमेऽध्याये सूचितं तदिह प्रपञ्च्यते।।१४।।

यस्मादिति। यस्मात् संन्यासिनो नोद्विजते नोद्वेगं गच्छति न संतप्यते न संक्षुभ्यते लोकेः। तथा लोकान्नोद्विजते च यः। हर्षामर्षभयोद्वेगैः हर्षश्चामर्षश्च भयं चोद्वेगश्च तैर्हर्षामर्षभयोद्वेगैर्मुक्तः। हर्षः प्रियलाभेऽन्तःकरणस्योत्कर्षो रोमाञ्चनाश्रुपातादिलिङ्गः, अमर्षोऽभिलषितप्रतिघातेऽसहिष्णुता भयं त्रास उद्वेग उद्विग्नता तैर्मुक्तो यः स च मे प्रियः।।१५।।

अनपेक्ष इति। देहेनिद्रियविषयसंबन्धादिष्वपेक्षाविषयेष्वनपेक्षो निःस्पृहः शुचिर्बाह्येनाभ्यन्तरेण च शौचेन संपन्नो दक्षः प्रत्युत्पन्नेषु कार्येषु सद्यो यथावत्प्रतिपत्तुं समर्थः। उदासीनो न कस्यचिन्मित्रादेः पक्षं भजते यः स उदासीनो यतिर्गतव्यथो गतभ्यः। सर्वारम्भपरित्यागी आरम्भन्त इत्यारम्भा इहामुत्रफलभोगार्थानि कामहेतूनि कर्माणि सर्वारम्भास्तान्परित्युक्तं शीलमस्येति सर्वारम्भपरित्यागी यो मग्भक्तः स मे प्रियः।।१६।।

किंच-यो नेति। यो न हृष्यतीष्टप्राप्तौ न द्वेष्ट्यनिष्टप्राप्तौ न शोचति प्रियवियोगे न चाप्राप्तं काङ्क्षति शुभाशुभे पुण्यपापे कर्मणी परियुक्तं शीलमस्येति शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः।।१७।।

सम इति। समः शत्रौ च मित्रे तथा मानापमानयोः पूजापरिभवयोः शीतोष्णसुखदुःखेषु समः

सर्वत्र च सङ्गवर्जितः।।१८।।

किंच-तुल्यनिन्देति। तुल्यनिन्दास्तुतिः निन्दा च स्तुतिश्च निन्दास्तुती ते तुल्ये यस्य स

तुल्यनिन्दास्तुतिर्मौनी मौनवान्संयतवाक्संतुष्टो येन केनचिच्छरीरस्थितिमात्रेण। तथाचोक्तं 'येनकेनचिदाच्छन्नो येनकेनचिदाशितः। यत्रक्कचनशायी स्यातं देवा ब्राह्मणं विदुः।।' इति। किंचानिकेतो निकेत आश्रयो निवासो नियतो न विद्युते यस्य सोऽयमनिकेतोऽनागार इत्यादि स्मृत्यन्तरात्। स्थिरमतिः स्थिरा परमार्थवस्तुविषया मतिर्यस्य स स्थिरमतिर्भक्तिमान्मे प्रियो नरः।।१९।।

अद्वेष्टा सर्वभूतानामित्यादिनाक्षरस्योपासकानां निवृत्तसर्वैषणानां संन्यासिनां परमार्थज्ञाननिष्ठानां धर्मजातं प्रक्रान्तमुपसंहियते-ये त्विति। येतु संन्यासिनो धर्म्यामृतं धर्म्यं च तदमृतं तदमृतत्वहेतुत्वादिदं यथोक्तमद्वेष्टा सर्वभूतानामित्यादिना पर्युपासतेऽनुतिष्ठन्ति श्रद्दधानाः सन्तो मत्परमा यथोक्तोऽहमक्षरात्मा परमो निरतिशया गतिर्येषां ते परमात्मा मग्भक्ताश्चोत्तमां परमार्थज्ञानलक्षणां भक्तिमाश्रितास्तेऽतीव मे प्रियाः। प्रियो हि ज्ञानिनोऽत्यर्थमिति यत्सूचितं तद्व्याख्यायेहोपसंहृतं भक्तास्तेऽतीव मे प्रिया इति। यस्माद्धर्म्यामृतमिदं यथोक्तमनुतिष्ठन्भगवतो विष्णोः परमेश्वरस्यातीव मे प्रियो भवति तस्मादिदं धर्म्यामृतं मुमुक्षुणा यत्नतोऽनुष्ठेयं विष्णोः प्रयं परं धाम जिगमिषुणेति वाक्यार्थः।।२०।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यपूज्यपादश्रीमदाचार्यश्रीशंकरभगवतः कृतौ श्रीभगवद्गीताभाष्ये भक्तियोगो नाम द्वादशोऽध्यायः।।१२।।

त्रयोदशोऽध्यायः।

सप्तमेऽध्याये सूचिते द्वे प्रकृती ईश्वरस्य। त्रिगुणात्मिकाष्टधा भिन्नाऽपरा संसारहेतुत्वात्परा चान्या जीवभूता क्षेत्रज्ञलक्षणेश्वरात्मिका। याभ्यां प्रकृतिभ्यामीश्वरो जगदुत्पत्तिस्थितिलयहेतुत्वं प्रतिपद्यते। तत्र क्षेत्रक्षेत्रज्ञलक्षणप्रकृतिद्वयनिरूपणद्वारेण तद्वत ईश्वरस्य तत्त्वनिर्धारणार्थं क्षेत्राध्याय आरभ्यते। अतीतानन्तराध्याये चाद्वेष्टा सर्वभूतानामित्यादिना यावदध्यायपरिसमाप्तिस्तावत्तत्त्वज्ञानिनां संन्या सिनां निष्ठा यथा ते वर्तन्ते इत्युतदुक्तं, केन पुनस्ते तत्त्वज्ञानेन युक्ता यथोक्तधर्माचरणाद्भगवतः प्रिया भवन्तीत्येवमर्थश्चायमध्याय आरभ्यते। प्रकृतिश्च त्रिगुणात्मिका सर्वकार्यकरणविषयाकारेण परिणता पुरुषस्य भोगोपवर्गार्थकर्तव्यतया देहेन्द्रियाद्याकारेण

संहन्यते सोऽयं संघात इदं शरीरं तदेतद् श्रीभगवानुवाच-इदमिति। इदमिति सर्वनाम्नोक्तं विशिनष्टि-शरीरमिति। हे कौन्तेय क्षतत्राणात्क्षयात्क्षरणात्क्षेत्रवद्वास्मिन्कर्मफलनिर्वृत्तेः क्षेत्रमिति। इतिशब्द एवंशब्दपदार्थकः क्षेत्रमित्येवमभिधीयते कथ्यते। एतच्छरीरं क्षेत्रं यो वेत्ति विजानात्यापादतलमस्तकं ज्ञानेन विषयीकरोति स्वाभाविकेनौपदेशिकेन वा वेदनेन विषयीकरोति विभागशस्तं वेदितारं प्राहुः कथयन्ति क्षेत्रज्ञ इति। इतिशब्द एवंशब्दपदार्थक एव पूर्ववत्क्षेत्रज्ञ इत्येवमाहुः। के तद्विदस्तौ क्षेत्रक्षेत्रज्ञौ ये वुदन्ति तद्विदः।।१।।

एवं क्षेत्रक्षेत्रज्ञावुक्तौ किमेतावन्मात्रेण ज्ञानेन ज्ञातव्याविति नेत्युच्यते-क्षेत्रज्ञमिति। क्षेत्रज्ञं यथोक्तलक्षणं चापि मां परमेश्वरमसंसारिणां विद्धि जानीहि। सर्वक्षेत्रेषु यः क्षेत्रज्ञो ब्रह्मादिस्तमबपर्यन्तानेकक्षेत्रोपाधिप्रविभक्तस्तं निरस्तसर्वोपाधिभेदं सददादिशब्दप्रत्ययागोचरं विद्धित्यभिप्रायः। हे भारत,
यस्मात्क्षेत्रक्षेत्रज्ञेश्वरयाथात्म्यव्यतिरेकेण न ज्ञानगोचरमन्यदवशिष्टमस्ति
तस्मात्क्षेत्रक्षेत्रज्ञयोर्ज्ञेयभूतयोर्यज्ज्ञानं क्षेत्रक्षेत्रज्ञौ येन ज्ञानेन विषयीक्रियेते तज्ज्ञानं

सम्यग्ज्ञानमिति मतमभिप्रायो ममेश्वरस्य विष्णोः। ननु सर्वक्षेत्रेष्वेक एवेश्वरो नान्यस्तद्व्यतिरिक्तो भोक्ता विद्यते चेत्तत ईश्वरस्य संसारित्वं प्राप्तमीश्वरव्यतिरेकेण वा
संसारिणोऽन्यस्याभावात्संसाराभावप्रसङ्गस्तच्चोभयमनिष्टं
बन्धमोक्षतद्वेतुशास्त्रानर्थक्यप्रसङ्गत्प्रत्यक्षादिप्रमाणविरोधाच्च। प्रत्यक्षेण तावत्सुखदुःखतद्धेतिलक्षणः संसार उपलभ्यते। जगद्वैचित्र्योपलब्धेश्च धर्माधर्मनिमित्तः संसारोऽनुमीयते। सर्वमेतदनुपपन्नमात्मेश्वरैकत्वे। न ज्ञानाज्ञानयोरन्यत्वेनोपपत्तेः 'दूरमेते विपरीते। विषूची अविद्या या च विद्येति ज्ञाता'। तथाच तयोर्विद्याविद्याविषययोः फलभेदोऽपि विरुद्धो निर्दिष्टः श्रेयश्च प्रेयश्चेति। विद्याविषयः श्रेयः प्रेयस्त्वविद्याकार्यमिति। तथाच व्यासः 'द्वाविमावथ पन्थानौ' इत्यादि, 'इमौ द्वावेव पन्थानौ' इत्यादि च। इह च द्वे निष्ठे उक्ते अविद्या च सह कार्येण विद्यया हातव्येति श्रुतिस्मृतिन्यायेभ्योऽवगम्यते। श्रुतयस्तावत् 'इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः, तमेवं विद्वानमृत इह भवति, नान्यः पन्था विद्यतेऽयनाय, आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन, अविदुषस्तु-अथ तस्य भयं भवति, अविद्यायामन्तरे वर्तमानाः, ब्रह्म वेद ब्रह्मैव भवति' अन्योऽसावन्योऽहमस्तीति न स वेद यथा पशुरेवं स देवानाम्, आत्मविद्याः स इदं सर्वं भवति, यदा चर्मवद्' इत्याद्याः सहस्रशः। स्मृतयश्च 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः' 'इहैव

तैर्जितः सर्गो येषां साम्ये स्थितं मनः' 'समं पश्यन्हि सर्वत्र' इत्याद्याः। न्यायतश्च 'सर्पान्कुशाग्राणि

तथोदपानं ज्ञात्वा मनुष्याः परिवर्जन्ति। अज्ञानतस्तत्र पतन्ति केचिज्ज्ञाने फलं पश्य यथा विशिष्टम्'। तथाच देहादिष्वात्मबुद्धिरविद्वान्रागद्वेषादिप्रयुक्तो धर्माधर्मानुष्ठानकृज्जायते म्रियते चेत्यवगम्यते देहादिव्यतिरिक्तात्मदर्शिनो रागद्वेषादिप्रहाणापेक्षधर्माधर्मप्रवृत्त्युपशमान्मुच्यन्त इति न केनचित्प्रत्याख्यातुं शक्यं न्यायतः। तत्रैवं सति क्षेत्रज्ञस्येश्वरस्यैव सतोऽविद्याकृतोपाधिभेदतः संसारित्वमिव भवति। यथा देहाद्यात्मत्वमात्मनः। सर्वजन्तूनां हि प्रसिद्धो देहादिष्वनात्मस्वात्मभावो निश्चितो ऽविद्याकृतः। यथा स्थाणौ पुरुषनिश्चयो न चैतावता पुरुषधर्मः स्थाणोर्भवति स्थाणुधर्मो वा पुरुषस्य तथा न चैतन्यं धर्मो देहस्य देहधर्मो वा चैतन्यस्य। सुखदुःखमोहात्मकत्वादिरात्मनो न युक्तोऽविद्याकृतत्वाविशेषाज्जरामृत्युवत्। नातुल्यत्वादिति चेत्, स्थाणुपुरुषौ ज्ञेयावेव सन्तौ ज्ञात्रान्योन्यस्मिन्नध्यस्तावविद्यया देहात्मनोस्तु ज्ञेयज्ञात्रोरेवेतरेतराध्यास इति न समो दृष्टान्तो देहधर्मो ज्ञेयोऽपिज्ञातुरात्मनो भवतीति चेत्। नाचैतन्यादिर्रसङ्गत्। यदि हि ज्ञेयस्य देहादेः क्षेत्रस्य धर्माः सुखदुःखमोहेच्छादयो ज्ञातुर्भवन्ति तर्हि ज्ञेयस्य क्षेत्रस्य धर्माः केचनात्मनो भवन्त्यविद्याध्यारोपिता जरामरणादसयस्तु न भवन्तीति विशेषहेतुर्वक्तव्यः। न भवन्तीत्यस्त्यनुमानमविद्याध्यारोपितत्वाज्जरादिवदिति हेयत्वादुपादेयत्वाच्चेत्यादि। तत्रैवंसति कर्तृत्वभोक्तृत्वलक्षणः संसारो ज्ञेयस्थो ज्ञातर्यविद्ययाध्योरोपित इति न तेन

ज्ञातुः किंचिद्दुष्यति। यथा बालैरध्यारोपितेनाकाशस्य तलमलवत्त्वादिना। एवं च सति सर्वक्षेत्रेष्वपि सतो भगवतः क्षेत्रज्ञस्येश्वरस्य संसारित्वगन्धमात्रमपि नाशङ्क्यम्। नहि क्कचिदपि लोकेऽविद्याध्यस्तेन धर्मेण कस्यचिदुपकारोऽपकारो वा दृष्टः। यत्तूक्तं न समो दृष्टान्त इति। तदसत्। कथम्। अविद्याध्यासमात्रं हि दृष्टान्तदार्ष्टान्तिकयोः साधर्म्यं विवक्षितम्। तन्न व्यभिचरति। यत्तु ज्ञातरि व्यभिचरतीति मन्यसे तस्याप्यनैकान्तिकत्वं दर्शितं जरादिभिः अविद्यावत्त्वात्क्षेत्रज्ञस्य संसारित्वमिति चेत् न, अविद्यायास्तामसत्वात्। तामसो हि प्रत्यय आवरणात्मकत्वादविद्याविपरीतग्राहकः संशयोपस्थापको वाऽग्रहणात्मको वा। विवेकप्रकाशभावे तदभावात्। तामसे चावरणात्मके तिमिरादिदोषे सत्यग्रहणादेरविद्याज्ञयस्योपलब्धेः। अत्राहैवं तर्हि ज्ञातृधर्मोऽविद्या।

न, करणे चक्षुषि तैमिरिकत्वादिदोषोपलब्धेः। यत्तु मन्यसे ज्ञातृधर्मोऽविद्या तदेव चाविद्याधर्मवत्त्वं क्षेत्रज्ञस्य संसारित्वम्। तत्र यदुक्तमीश्वर एव क्षेत्रज्ञो न संसारीत्येतदयुक्तमिति। तन्न। यथा करणे चक्षुषि विपरीतग्राहकादिदोषस्य दर्शनान्न विपरीतादिग्रहणं तन्निमित्तो वा तैमिरिकत्वादिदोषो ग्रहीतुः। चक्षुषः संस्कारेण तिमिरेऽपनीते ग्रहीतुरदर्शनान्न ग्रहीतुर्धर्मो यथा तथा सर्वत्रैवाग्रहणविपरीतसंशयप्रत्ययास्तन्निमित्ताः करणस्यैव कस्यचिद्भवितुमर्हन्ति न ज्ञातुः क्षेत्रस्य। संवेद्यत्वाच्च तेषां प्रदीपप्रकाशवन्न ज्ञातृधर्मत्वम्। संवेद्यत्वादेव स्वात्मव्यतिरिक्तसंवेद्यत्वम्। सर्वकरणवियोगे च कैवल्ये सर्ववादिभिरविद्यादिदोषवत्त्वानभ्युपगमात्। आत्मनो यदि क्षेत्रज्ञस्याग्नयुष्णवत्स्वो धर्मस्ततो न कदाचिदपि तेन वियोगः स्यात्। अविक्रियस्य च व्योमवत्सर्वगतस्यामूर्तस्यात्मनः केनचित्संयोगवियोगानुपपत्तेः। सिद्धं क्षेत्रज्ञस्य नित्यमेवेश्वरत्वम्। अनादित्वान्निर्गुणत्वादित्यादीश्वरवचनाच्च। नन्वेवं सति संसारसंसारित्वाभावे शास्त्रानर्थक्यादिदोषः स्यादिति। न सर्वैरभ्युपगतत्वात्। सर्वैर्ह्यात्मवादिभिरभ्युपगतो दोषो नैकेन परिहर्तव्यो भवति।

कथमभ्युपगत इति मुक्तात्मनां संसारसंसारित्ववहाराभावः सर्वैरेवात्मवादिभिरिष्यते। नच तेषां शास्त्रानर्थक्यादिदोषप्राप्तिरभ्युपगता। तथा नः क्षेत्रज्ञानामीश्वरैकत्वे सति शास्त्रानर्थक्यं भवतु। अविद्याविषये चार्थवत्त्वम्। यथा द्वैतिनां सर्वेषां बन्धावस्थायामेव शास्त्राद्यर्थवत्त्वं न मुक्तावस्थायामेवम्। नन्वात्मनो बन्धमुक्तावस्थे परमार्थत एव वस्तुभूते द्वैतिनां नः सर्वेषामतो हेयोपादेयतत्साधनसद्भावे शास्त्राद्यर्थवत्त्वं

स्यादद्वैतिनां पुनर्द्वैतस्यापरमार्थत्वादविद्याकृतत्वाद्बन्धावस्थायाश्चात्मनोऽपरमार्थत्वे निर्विषयत्वाच्छास्त्राद्यानर्थक्यमिति चेत्। न, आत्मनोऽवस्थाभेदानुपपत्तेः। यदि तावदात्मनो बन्धमुक्तावस्थे युगपत्स्यातांक्रमेण वा। युगपत्तावद्विरोधान्न संभवतः स्थितिगती इवैकस्मिन्। क्रमभावित्वे च निर्निमित्तत्वेऽनिर्मोक्षप्रसङ्गोऽन्यनिमित्तत्वे च स्वतोऽभावादपरमार्थत्वप्रसङ्गः। तथा च सत्यभ्युपगमहानिः। किंच बन्धमुक्तावस्थयोः पौर्वापर्यनिरूपणायां बन्धावस्था पूर्वं प्रकल्प्याऽनादिमत्यन्तवती च तच्च प्रमाणविरुद्धं तथा मोक्षावस्थादिमत्यनन्ता च प्रमाणविरुद्धैवाभ्युपगम्यते। न चावस्थावतोऽवस्थान्तरं गच्छतो नित्यत्वमुपपादयितुं शक्यम्। अथानित्यत्वदोषपरिहाराय बन्धमुक्तावस्थाभेदो न कल्प्यतेऽतो द्वैतिनामपि शास्त्रानर्थक्यादिदोषोऽपरिहार्य एवेति समानत्वान्नाद्वैतवादिना परिहर्तव्यो दोषः। नच शास्त्रानर्थक्यं यथा प्रसिद्धाविद्वत्पुरुषविषयत्वाच्छास्त्रस्य। अविदुषां हि फलहेत्वोरनात्मनोरात्मपपत्तेः। न ह्यत्यन्तमूढ उन्मत्तादिरपि जलाग्न्योश्छायाप्रकाशयोर्वैकात्म्यं पश्यति किमुत विवेकी। तस्मान्न विधिप्रतिषेधशास्त्रं तावत्फलहेतुभ्यामात्मनोऽन्यत्वदर्शिनो भवति। नहि देवदत्त, त्वमिदं कुर्विति कस्मिंश्चित्कर्मणि नियुक्ते विष्णुमित्रोहं नियुक्त इति तत्रस्थो नियोगं शृण्वन्नपि प्रतिपद्यते। नियोगविषयविवेकाग्रहणात्तूपपद्यते प्रतिपत्तिस्तथा फलहेत्वोरपि। ननु प्राकृतसंबन्धापेक्षया युक्तैव प्रतिपत्तिः शास्त्रार्थविषया। फलहेतुभ्यामन्यात्मत्वदर्शनेऽपि सतीष्टफलहेतौ प्रवर्तितोऽस्म्यनिष्टफलहेतोश्च निवर्तितोऽस्मीति। यथा पितृपुत्रादीनामितरेतरात्मान्यत्वदर्शने सत्यप्यन्योन्यनियोगप्रतिषेधार्थप्रतिपत्तिः। न व्यतिरिक्तात्मदर्शनप्रतिपत्तेः प्रागेव फलहेत्वोरात्माभ्मानस्य सिद्धत्वात्। प्रतिपन्ननियोगप्रतिषेधार्थो हि फलहेतुभ्यामात्मनोऽन्यत्वं प्रतिपद्यते न पूर्वं। तस्माद्विधिप्रतिषेधशास्त्रमविद्वद्विषयमिति सिद्धम्। ननु स्वर्गकामो यजेत कलञ्जं न भक्षयेदित्यादावात्मव्यतिरेकदर्षिनामप्रवृत्तौ केवलदेहाद्यात्मदृष्टीनां च। अतः कर्तुरभावाच्छास्त्रानर्थक्यमिति चेत्। न, यथाप्रसिद्धित एव प्रवृत्तिनिवृत्त्युपपत्तेः। ईश्वरक्षेत्रज्ञैकत्वदर्शी ब्रह्मवित्तावन्न प्रवर्तते। तथा नैरात्म्यवाद्यपि नास्ति परलोक इति न प्रवर्तते। यथाप्रसिद्धितस्तु विधिप्रतिषेधशास्त्रश्रवणान्यथानुपपत्त्यानुमितात्मास्तित्व

आत्मविशेषानभिज्ञः कर्मफलसंजाततृष्णः श्रद्दधानतया च प्रवर्तत इति सर्वेषां नः प्रत्यक्षमतो न शास्त्रानर्थक्यम्। विवेकिनामप्रवृत्तिदर्शनात्तदनुगामिनामप्रवृत्तौ शास्त्रानर्थक्यमिति चेत्। न, कस्यचिदेव विवेकोपपत्तेः। अनेकेषु हि प्राणिषु कश्चिदेव विवेकी स्याद्यथेदानीम्। नच विवेकिनमनुवर्तन्ते मूढा रागादिदोषतन्त्रत्वात्प्रवृत्तेः। अभिचरणादौ च प्रवृत्तिदर्शनात्। नच विवेकिनमनुवर्तन्ते मूढा रागादिदोषतन्त्रत्वात्प्रवृत्तेः। अभिचरणादौ च प्रवृत्तिदर्शनात्। स्वाभाव्याच्च प्रवृत्तेः। स्वभावस्तु प्रवर्तत इति ह्युक्तम्। तस्मादविद्यामात्रं संसारो यथादृष्टविषय एव। न क्षेत्रज्ञस्य केवलस्याविद्या तत्कार्यं च। नच मिथ्याज्ञानं परमार्थम्। नह्यूषरदेशं स्नेहेन पङ्कीकर्तुं शन्कोति

मरीच्युदकं तथाऽविद्या क्षेत्रज्ञस्य न किंचित्कर्तुं शन्कोति। अतश्चेदमुक्तं 'क्षेत्रज्ञं चापि मां विद्धि' 'अज्ञानेनावृतं ज्ञानम्' इति

च। अथ किमिदं संसारिणामिवाहमेवं ममैवेदमिति पण्डितानामपि। शृण्विदं तत्पाण्डित्यं यत्क्षेत्र एवात्मदर्शनम्। यदि पुनः क्षेत्रज्ञमविक्रियं पश्येयुस्ततो न भोगं कर्म वाकाङ्क्षेयुर्मम स्यादिति। विक्रियैव भोगकर्मणी। अथैवं सति फलार्थित्वादविद्वान्प्रवर्तते। विदुषः पुनरविक्रियात्मदर्शिनः फलार्थित्वाभावात्प्रवृत्त्यनुपपत्तौ कार्यकरणसंघातव्यापारोपरमे निवृत्तीरुपचर्यते। इदं चान्यत्पाण्डित्यं कस्यचिदस्तु क्षेत्रज्ञ ईश्वर एव क्षेत्रं चान्यत्क्षेत्रज्ञस्य विषयः। अहं तु संसारी सुखी दुःखी च। संसारोपरमश्च मम कर्तव्यः क्षेत्रक्षेत्रज्ञविज्ञानेन ध्यानेन चेश्वरं क्षेत्रज्ञं साक्षात्कृत्वा तत्स्वरूपावस्थानेनेति।

यश्चैवं बुध्यते यश्च बोधयति नासौ क्षेत्रज्ञ इति। एवं मन्वानो यः स पण्डितापसदः संसारमोक्षयोः शास्त्रस्य चार्थवत्त्वं करोमीति। आत्महा स्वयं मूढोऽन्यांश्च व्यामोहयति शास्त्रार्थसंप्रदायरहितत्वात् श्रुतहानिमश्रुतकल्पनां च कुर्वन्। तस्मादसंप्रदायवित्सर्वशास्त्रविदपि मूर्खवदेवोपेक्षणीयः। यत्तूक्तमीश्वरस्य क्षेत्रज्ञैकत्वे संसारित्वं प्राप्नोति क्षेत्रज्ञानां चेश्वरकत्वे संसारिणोऽभावात्संसाराभावप्रसङ्गः इति। एतौ दोषौ प्रत्युक्तौ विद्याविद्ययोर्वैलक्षण्याभ्युपगमादिति चेवमविद्यादुःखित्वाद्यैर्न ज्ञातुः क्षेत्रज्ञस्य किंचिद्दुष्यति। नन्वमेव दोषो यद्दोषवत्क्षेत्रविज्ञातृत्वम्। न विज्ञानस्वरूपस्यैवाविक्रियस्य विज्ञातृत्वोपचारात्। यथोष्णतामात्रेणाग्नेस्तप्तिक्रियोपचारस्तद्वत्। यथात्र भगवता क्रियाकारकफलात्मत्वाभाव आत्मनि स्वत एव दर्शितोऽविद्याध्यारोपितैरेव क्रियाकारकाद्यात्मन्युपचर्यते तथा तत्र तत्र 'य एनं वेत्ति हन्तारं', 'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः', 'नाजत्ते कस्यचित्पापम्' इत्यादिप्रकरणेषु दर्शितस्तथैव च व्याख्यातमस्माभिः। उत्तरेषु च प्रकरणेषु दर्शयिष्यामः। हन्त तर्ह्यात्नि क्रियाकारकफलात्मतायाः स्वतोऽभावेऽविद्यया चाध्यारोपितत्वे कर्माण्यविद्वत्कर्तव्यान्येव न विदुषामिति प्राप्तम्। सत्यमेवं प्राप्तम्। एतदेव च 'न हि देहभृता शक्यम्' इत्यत्र दर्शयिष्यामः। सर्वशास्त्रार्थोपसंहारप्रकरणे च 'समासेनैव कौन्तेय निष्ठाज्ञानस्य यापरा' इत्यत्र विशेषतो दर्शयिष्यामः। अलमिह बहुप्रपञ्चंनेत्युपसंहियते।।२।।

इदं शरीरमित्यादिश्लोकोपदिष्टस्य क्षेत्राध्यायार्थस्य संग्रहश्लोकोऽयमुपन्यस्यते-तत्क्षेत्रं यच्चेत्यादि व्याचिख्यासितस्य ह्यर्थस्य संग्रहोपन्यासो न्याय्य इति यन्निर्दिष्टमिदं शरीरमिति तत् तच्छब्देन परामृशति। यच्चेदं निर्दिष्टम क्षेत्रं तद् यादृग् यादृशं स्वकीयैर्धर्मैः। चशब्दः समुच्चयार्थः। यद्विकारि यो विकारोऽस्य तद्यद्विकारि यतो यस्माच्च यत्कार्यमुत्पद्यत इति वाक्यशेषः। स च यः क्षेत्रज्ञो निर्दिष्टः स यत्प्रभावो ये प्रभावा उपाधिकृताः शक्तयो यस्य स यत्प्रभावश्च तत् क्षेत्रक्षेत्रज्ञयोर्याथात्म्यं यथा विशेषितं समासेन संक्षेपेण मे मम वाक्यतः श्रृणु श्रुत्वावधारयेत्यर्थः।।३।।

तत्क्षेत्रक्षेत्रज्ञयोर्याथात्म्यं विविक्षितं स्तौति श्रोतृबुद्धिप्ररोचनार्थम्-ऋषिभिरिति। ऋषिभिर्वसिष्ठादिभिर्बहुधा बहुप्रकारं गूतं कथितं। छन्दोभिश्छन्दांसि ऋगादीनि तैर्मन्त्रच्छन्दोभिर्विविधैर्नानाप्रकारैः पृथग्विवेकतो गीतम्। किंच ब्रह्मसूत्रपदैश्चैव ब्रह्मणः सूचकानि वाक्यानि ब्रह्मसूत्राणि तैः पद्यते गम्यते ज्ञायते ब्रह्मेति तानि पदान्युच्यन्ते। तैरेव च क्षेत्रक्षेत्रज्ञयोर्याथात्म्यं गीतमित्यनुवर्तते। 'आत्मेत्येवोपासीत' इत्यादिभिर्हि ब्रह्मसूत्रपदैरात्मा ज्ञायते।

हेतुमद्भिर्युक्तियुक्तैर्विनिश्चितैर्न संशयरूपैर्निर्श्चितप्रत्ययोत्पादकैरित्यर्थः।।४।।

स्तुत्याभिमुखीभूतायार्जुनायाह भगवान्-महाभूतानीति। महान्ति च तानि सर्वविकारव्यापकत्वाद्भूतानि च सूक्ष्माणि। स्थूलानि त्विन्द्रयगोचरशब्देनाभिधायिष्यन्ते। अहंकारो महाभूतकारणमहंप्रत्ययलक्षणः। अहंकारकारणं बुद्धिरध्यवसायलक्षणा। तत्कारणमव्यक्तमेव च न व्यक्तमव्यक्तमव्याकृतमीश्वरशक्तिर्मम माया दुरत्ययेत्युक्तम्। एवशब्दः प्रकृत्यवधारणार्थः। एतावत्येवाष्टधा भिन्ना प्रकृतिः। चशब्दो भेदसमुच्चयार्थः। इन्द्रियाणि दश श्रोत्रादीनि

पञ्च बुद्धयुत्पादकत्वाद्बुद्धीन्द्रियाणि वाक्पाण्यादीनि पञ्च कर्मनिर्वर्तकत्वात्कर्मेन्द्रियाणि तानि दश। एकं च किं तन्मन एकादशं संकल्पाद्यात्मकम्। पञ्च चेन्द्रियगोचराः शब्दादयो विषयाः। तान्येतानि संख्यातश्चतुर्विंशतितत्त्वान्याचक्षते।।५।।

अथेदानीमात्मगुणा इति यानाचक्षते वैशेषिकास्तेऽपि क्षेत्रधर्मा एव नतु क्षेत्रज्ञस्येत्याह भगवान्-इच्छा द्वेष

इति। इच्छा यज्जातीयं सुखहेतुमर्थमुपलब्धवान्पूर्वं पुनस्तज्जातीयमुपलभमानस्तमादातुमिच्छति सुखहेतुरिति सेयमिच्छान्तःकरणधर्मो ज्ञेयत्वात्क्षेत्रम्। तथा द्वेषो यज्जातीयमर्थं दुऋखहेतुत्वेनानुभूतवान् पुनस्तज्जातीयमुपलभमानस्तं द्वेष्टि सोऽयं द्वेषो ज्ञेयत्वात्क्षेत्रमेव। तथा सुखमनुकूलं प्रसन्नं सत्त्वात्मकं

ज्ञेयत्वात्क्षेत्रमेव। दुःखं प्रतिकूलात्मकं ज्ञेयत्वात्तदपि क्षेत्रम्। संघातो देहेन्द्रियाणां संहतिः। तस्यामभिव्यक्तान्तः करणवृत्तिस्तप्त इव लोहपिण्डेऽग्निरात्मचैतन्याभासरसविद्धा चेतना सा च क्षेत्रं ज्ञेयत्वात्। धृतिर्ययावसादप्राप्तानि देहेन्द्रियाणि ध्रियन्ते सा च ज्ञेयत्वात्क्षेत्रम्। सर्वान्तःकरणधर्मोपलक्षणार्थमिच्छादिग्रहणं यत उक्तं तदुपसंहरति-एतत्क्षेत्रं समासेन सविकारं सह विकारेण महादादिनोदाहृतमुक्तम्। यस्य क्षेत्रभेजातस्य संहतिरिदं शरीरं क्षेत्रमित्युक्तं तत्क्षेत्रं व्याख्यातं महाभूतादिभेदभिन्नं धृत्यन्तम्।।६।।

क्षेत्रज्ञो वक्ष्यमाणविशेषणो यस्य सप्रभावस्य क्षेत्रज्ञस्य परिज्ञानादमृतत्वं भवति तं ज्ञेयं यत्तत्प्रवक्ष्यामीत्यादिना सविशेषणं स्वयमेव वक्ष्यति भगवान्। अधुना तु तज्ज्ञानसाधनगणममानित्वादिलक्षणं यस्मिन्सति तज्ज्ञेयविज्ञाने योग्योऽधिकृतो भवति यत्परः संन्यासी ज्ञाननिष्ठा उच्यते, तममानित्वादिगणं ज्ञानसाधनत्वाज्ज्ञानशब्दवाच्यं विदधाति भगवान्-अमानित्वमिति। अमानित्वं मानिनो भावो मानित्वमात्मनः श्लाघनं तदभावोऽमानित्वम्। अदम्भित्वं स्वधर्मप्रकटीकरणं दम्भित्वं तदभावोऽदम्भित्वम्। अहिंसाऽहिंसनं प्राणिनामपीडनम्। क्षान्तिः परापराधप्राप्तावविक्रिया। आर्जवमृजुभावोऽवक्रत्वम्। आर्जवमृजुभावोऽवक्रत्वम्। आचार्योपासनं मोक्षसाधनोपदेष्टुराचार्यस्य शुश्रूषादिप्रयोगेण सेवनम्। शौचं कायमलानां मृज्जलाभ्यां प्रक्षालनमन्तश्च मनसः प्रतिपक्षभावनया रागादिमलानामपनयनं शौचम्। स्थैर्यं स्थिरभावो मोक्षमार्ग एव कृताध्यवसायत्वम्। आत्मविनिग्रह आत्मनोऽपकारकस्यात्मशब्दवाच्यस्य कार्यकरणसंघातस्य विनिग्रहः स्वभावेन सर्वतः प्रवृत्तस्य सन्मार्ग एव निरोध आत्मविनिग्रहः।।७।।

किंच-इन्द्रियेति। इन्द्रियार्थेषु शब्दादिषु दृष्टादृष्टेषु भोगेषु विरागभावो वैराग्यम्-अनहंकारोऽहेकाराभाव एव च। जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं जन्म च मृत्युश्च जरा च व्याधयश्च दुःखानि च तेषु जन्मादिदुःखान्तेषु प्रत्येकं दोषानुदर्शनम्, जन्मनि गर्भवासयोनिद्वारा निःसरणं दोषस्तस्यानुदर्शनमालोचनम्, तथा जरायां

प्रज्ञाशक्तितेजोनिरोधदोषानुदर्शनं परिभूतता चेति। तथा व्याधिषु शिरोरोगादिषु दोषानुदर्शनं, तथा दुःखेष्वध्यात्माधिभूताधिदैवनिमित्तेषु अथवा दुःखान्येव दोषो दुःखदोषस्तस्य जन्मादिषु पूर्ववदनुदर्शनम्। दुःखं जन्म दुःखं मृत्युः दुःखं जरा दुःखं व्याधयः। दुःखनिमित्तत्वाज्जन्मादयो दुःखं न पुनः स्वरूपेणैव दुःखमिति। एवं जन्मादिषु दुःखदोषानुदर्शनाद्देहेन्द्रियविषयभोगेषु वैराग्यमुपजायते। ततः प्रत्यगात्मनि प्रवृत्तिः करणानामात्मदर्शनाय। एवं ज्ञानहेतुत्वाज्ज्ञानमुच्यते जन्मादिदुःखदोषानुदर्शनम्।।८।।

किंच-असक्तिरिति। असक्तिः सक्तिः सङ्गनिमित्तेषु विषयेषु प्रीतिमात्रं तदभावोऽसक्तिः। अनभिष्वङ्गोऽभिष्वङ्गाभावः, अभिष्वङ्गो नाम सक्तिविशेष एवानन्यात्मभावनालक्षणः। यथान्यस्मिन्सुखिनि दुऋखिनि वाहमेव सुखी दुःखी च जीवति मृते वाहमेव जीवामि मरिष्यामि चेति। क्केत्याह पुत्रदारगृहादिषु। पुत्रेषु

दारेष्वादिग्रहणादन्येष्वप्यत्यन्तेष्टेषु दासवर्गादिषु। तच्चोभयं ज्ञानार्थत्वाज्ज्ञानमुच्यते। नित्यं च समचित्तत्वं तुल्यचित्तता, क्क, इष्टानिष्टोपपत्तिषु इष्टानामनिष्टानां चोपपत्तयः संप्राप्तयस्तास्विष्टानिष्टोपपत्तिषु

नित्यमेव तुल्यचित्तता, इष्टोपपत्तिषु न हृष्यति न कुप्यति चानिष्टोपपत्तिषु। तच्चैतन्नित्यं समचित्तत्वं ज्ञानम्।।९।।

किंच-मयि चेति। मयि चेश्वरेऽनन्ययोगेनापृथक्समाधिना नान्यो भगवतो वासुदेवात्परोऽस्त्यतः स एव नो गतिरित्येवं निश्चिताऽव्यभिचारिणी बुद्धिरनन्ययोगस्तेन भजनं भक्तिर्न व्यभिचरणशीलाऽव्यभिचारिणी। सा च ज्ञानम्। विविक्तदेशसेवित्वं विविक्तः स्वभावतः संस्कारेण वाऽशुच्यादिभिः सर्पव्याघ्रादिभिश्च रहितोऽरण्यनदीपुलिनदेवगृहादिभिर्विविक्तो देशस्तं सेवितुं शीलमस्येति विविक्तदेशसेवी तद्भावो

विविक्तदेशसेवित्वम्। विविक्तेषु हि देशेषु चित्तं प्रसीदति यतस्तत आत्मादिभावना विविक्त उपजायतेऽतो विविक्तदेशसेवित्वं ज्ञानमुच्यते। अरतिररमणं क्क जनसंसदि जनानां प्राकृतानां संस्कारशून्यानामविनीतानां (कलहोन्मुखितचित्तानां) संसत्समवायो जनसंसन्न संस्कारवतां विनीतानां संसत्तस्या ज्ञानोपकारकत्वादतः प्राकृतजनसंसद्यरतिर्ज्ञानार्थत्वाज्ज्ञानम्।।१०।।

किंच-अध्यात्मेति। अधअयात्मज्ञाननित्यत्वमात्मादिविषयं ज्ञानमध्यात्मज्ञानं तस्मिन्नित्यभावो नित्यत्वममानित्वादीनां ज्ञानसाधनानां भावनापरिपाकनिमित्तं तत्त्वज्ञानं तस्यार्थो मोक्षः संसारोपरमस्तस्यालोचनं तत्त्वज्ञानार्थदर्शनम्।तत्वज्ञानफलालोचने हि तत्साधनानुष्ठाने प्रवृत्तिः स्यादिति।

एतदमानित्वादितत्त्वज्ञानार्थदर्शनान्तमुक्तं ज्ञानामिति प्रोक्तं ज्ञानार्थत्वात्। अज्ञानं यदतोऽस्माद्यथोक्तादन्यथा विपर्ययेण मानित्वं दम्भित्वं हिंसाऽक्षान्तिरनार्जवमित्याद्यज्ञानं विज्ञेयं परिहरणाय संसारप्रवृत्तिकारणत्वादिति।।११।।

ययोक्तेन ज्ञानेन ज्ञातव्यं किमित्याकाङ्क्षायामाह-ज्ञेयं यत्तदित्यादि। ननु यमा नियमाश्चामानित्वादयो न तैर्ज्ञेयं ज्ञायते। न ह्यमानित्वादि कस्यचिद्वस्तुनः परिच्छेदकं दृष्टम्। सर्वत्रैव च यद्विषयं ज्ञानं तदेव तस्य ज्ञेयस्य परिच्छेदकं दृश्यते। न ह्यन्यविषयेण ज्ञानेनान्यदुपलभ्यते। यथा घटविषयेण ज्ञानेनाग्निः। नैष दोषो ज्ञाननिमित्तत्वाज्ज्ञानमुच्यत इति ह्यवोचाम। ज्ञानसहकारिकारणत्वाच्च-ज्ञेयमिति। ज्ञेयं ज्ञातव्यं यत्तत्प्रवक्ष्यामि प्रकर्षेण

यथावद्वक्ष्यामि। किं फलं तदिति प्ररोचनेन श्रोतुरभिमुखीकरणायाह। यज्ज्ञेयं ज्ञात्वामृतममृतत्वमश्नुते न पुनर्म्रियत इत्यर्थः। अनादिमदादिरस्यादिमन्नादिमदनादिमत्। किं तत्परं निरतिशयं ब्रह्म ज्ञेयमिति प्रकृतम्। अत्र केचिदनादिमत्परमिति पदं छिन्दन्ति बहुव्रीहिणोक्तेऽर्थे मतुप आनर्थक्यमनिष्टं स्यादिति। अर्थविशेषं च दर्शयन्ति अहं वासुदेवाख्या परा शक्तिर्यस्य तन्मत्परमिति। सत्यमेवमपुनरुक्तं स्यादर्थश्चेत्संभवति, न त्वर्थः संभवति ब्रह्मणः सर्वविशेषप्रतिषेधेनैव विजिज्ञापयिषितत्वान्न सत्तन्नासदुच्यत इति। विशिष्टशक्तिमत्त्वप्रदर्शनं विशेषप्रतिषेधश्चेति विप्रतिषिद्धम्। तस्मान्मतुपो बहुव्रीहिणा समानार्थत्वेऽपि प्रयोगः श्लोकपूरणार्थः। अमृतत्वफलं ज्ञेयं मयोच्यत इति प्ररोचनेनाभिमुखीकृत्याह न सत्तज्ज्ञेयमुच्यत इति नाप्यसत्तदुच्यते। ननु महता परिकरबन्धेन कण्ठरवेणोद्घुष्य ज्ञेयं प्रवक्ष्यामीत्यननुरूपमुक्तं न सत्तान्नासदुच्यत इति। न, अनुरूपमेवोक्तम्। कथं सर्वासु ह्युपनिषत्सु ज्ञेयं ब्रह्म 'नेति नेत्यस्थूलमनणु' इत्यादिविशेषप्रतिषेधेनैव निर्दिश्यते नेदं तदिति वाचोऽगोचरत्वात्। ननु न तदस्ति यद्वस्त्वस्तिशब्देन नोच्यते। अथास्तिशब्देन नोच्यते नास्ति तज्ज्ञेयम्। विप्रतिषिद्धं च ज्ञेयं तदस्तिशब्देन नोच्यत इति च। न तावन्नास्ति नास्तिबुद्यविषयत्वात्। ननु सर्वा बुद्धयोऽस्तिनास्तिबुद्धयनुगता एव। तत्रैवं सति ज्ञेयमप्यस्तिबुद्ध्यनुगतप्रत्ययविषयं वा स्यान्नास्तिबुद्ध्यनुगतप्रत्ययविषयं वा स्यात्।

नातीन्द्रियत्वेनोभयबुद्ध्यनुगतप्रत्ययाविषयत्वात्। यद्धीन्द्रियगम्यं वस्तु घटादिकं तदस्तिबुद्ध्यनुगतप्रत्ययविशयं वा स्यान्नास्तिबुद्ध्यनुगतप्रत्ययविषयं वा स्यात्। इदं तु ज्ञेयमतीन्द्रियत्वेन शब्दैकप्रमाणगम्यत्वान्न घटादिवदिभयबुद्ध्यनुगतप्रत्ययविषयमित्यतो न सत्तन्नासदित्युच्यते। यत्तूक्तं विरुद्धमुच्यते ज्ञेयं तन्न सत्तन्नासदुच्यत इति। न विरुद्धम् 'अन्यदेव तद्विदितादथो अविदितादधि' इति श्रुतेः। श्रुतिरपि विरुद्धार्थेति चेद्यथा यज्ञाय शालामारभ्य को हि तद्वेद यद्यमुष्मिंल्लोकेऽस्ति वा न वेतीत्येवमिति चेत्। न, विदिताविदिताभ्यामन्यत्वश्रुतेरवश्यविज्ञेयार्थप्रतिपादनपरत्वात्। यद्यमुष्मिन्नित्यादि तु विधिशेषोऽर्थवादः। उपपत्तेश्च सदादिशब्दैर्ब्रह्म नोच्यत इति। सर्वो हि शब्दोऽर्थप्रकाशनाय प्रयुक्तः श्रूयमाणश्च श्रोतृभिर्जातिक्रियागुणसंबन्धद्वारेण संकेतग्रहणं सव्यपेक्षोऽर्थं प्रत्याययति। नान्यथाऽदृष्टत्वात्। तद्यथा गौरश्व इति वा जातितः, पचति पठतीति वा क्रियातः, शुक्लः कृष्ण इति वा गुणतः, धनी गोमानिति वा संबन्धतः, नतु ब्रह्म जातिमदतो न सदादिशब्दवाच्यं नापि गुणवद्येन गुणशब्देनोच्येत निर्गुणत्वान्नापि क्रियाशब्दवाच्यं निष्क्रियत्वात् 'निष्कलं निष्क्रियं शान्तम्' इति श्रुतेः। नच संबन्ध्येकत्वादद्वयत्वादविषयत्वादात्मत्वाच्च न केनचिच्छब्देनोच्यत इति युक्तं 'यतो वाचो निवर्तन्ते'इत्यादि श्रुतिभ्यश्च।।१२।।

सच्छब्द प्रत्ययाविषयत्वादसत्त्वाशङ्कायां ज्ञेयस्य सर्वप्राणिकरणोपाधिद्वारेण तदस्तित्वं प्रतिपादयंस्तदाशङ्कानिवृत्त्यर्थमाह-सर्वत इति। सर्वतः पाण्यः पादाश्चस्येति सर्वतः पाणिपादं तज्ज्ञेयम्। सर्वप्राणिकरणोपाधिभिः श्रेत्रज्ञास्तित्वं विभाव्यते। क्षेत्रज्ञश्च क्षेत्रोपाधित उच्यते क्षेत्रं च पाणिपादादिभिरनेकधा

भिन्नम्। क्षेत्रोपाधिभेदकृतं विशेषजातं मिथ्यैव क्षेत्रज्ञस्येति तदपनयनेन ज्ञेयत्वमुक्तं न सत्तन्नासदुच्यत इति। उपाधिकृतं मिथ्यारूपमप्यस्तित्वाधिगमाय ज्ञेय धर्मवत्परिकल्प्योच्यते सर्वतः-पाणिपादमित्यादि। तथाहि संप्रदायविदां वचनम् 'अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्चयते'

इति। सर्वत्र सर्वदेहावयवत्वेन गम्यमानाः पाणिपादादयो ज्ञेयशक्तिसद्भावनिनित्तस्वकार्या इति ज्ञेयसद्भावे लिङ्गानि ज्ञेयस्येत्युपचारत उच्यन्ते तथा व्याख्येयमन्यत्सर्वतःपाणिपादं तज्ज्ञेयम्। सर्वतोऽक्षिशिरोमुखं सर्वत्राक्षीणि शिरांसि मुखानि च यस्य तत्सर्वतोऽक्षिशिरोमुखम्। सर्वतःश्रुतिमच्छ्रुतिःश्रवणेन्द्रियं तद्यस्य तच्छ्रुतिमल्लोके प्राणिनिकाये सर्वमावृत्य संव्याप्य तिष्ठति स्थितिं लभते।।१३।।

उपाधिभूतपाणिपादादीन्द्रियाध्यारोपणाज्ज्ञेयस्य तद्वत्ताशङ्का माभूदित्येवमर्थः श्लोकारम्भः-सर्वेन्द्रियेति। सर्वेन्द्रियगुणाभासं सर्वाणि च तानीन्द्रियाणि श्रोत्रादीनि बुद्धिन्द्रियक्मेन्द्रियाख्यान्यन्तःकरणे च बुद्धिमनसी ज्ञेयोपाधित्वस्य तुल्यत्वात्सर्वेन्द्रियग्रहणेन गृह्यते। अपि चान्तःकरणोपाधिद्वारेणैव श्रोत्रादीनामप्युपाधित्वमित्यतोऽन्तःकरणबहिष्करणोपाधिभूतैः सर्वेन्द्रियगुणैरध्यवसायसंकल्पश्रवणवचनादिभिरवभासत इति सर्वेन्द्रियगुणाभासं सर्वेन्द्रियव्यापारैर्व्यापृतमिव तज्ज्ञेयमित्यर्थः। 'ध्यायतीव लेलायतीव' इति श्रुतेः। कस्मात्पुनः कारणान्न व्यापृतमेवेति गृह्यत इत्यत आह। सर्वेन्द्रियविवर्दितं सर्वकरणरहितमित्यर्थः। अतो न करणव्यापारैर्व्यपृतं तज्ज्ञेयम्। यस्त्वयं मन्त्रः- 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः' इत्यादिः स सर्वेन्द्रियोपाधिगुणानुगुण्यभजनशक्तिमत्तज्ज्ञेयमित्येवंप्रदर्शनार्थो नतु साक्षादेव जवनादिक्रियावत्त्वप्रदर्शनार्थः। 'अन्धो मणिमविन्दत्' इत्यादिमन्त्रार्थवत्तस्य मन्त्रस्यार्थः। यस्मात्सर्वकरणवर्जितं ज्ञयं तस्मादसक्तं सर्वसंश्लेषवर्जितम्। यद्यप्येवं तथापि सर्वभृच्चैव। सदास्पदं हि सर्वं सर्वत्र सद्बुद्ध्यनुगमात्। नहि

मृगतृष्णिकादयोऽपि निरास्पदा भवन्ति। अतः सर्वभृत्सर्वं बिभर्तीति। स्यादिदं चान्यज्ज्ञेयस्य सत्त्वाधिगमद्वारं निर्गुणं सत्त्वरजस्तमांसि गुणास्तैर्वर्जितं तज्ज्ञेयं तथापि गुणभोक्तृ च गुणानां सत्त्वरजस्तमसां शब्दादिद्वारेण सुखदुःखमोहाकारपरिणतानां भोक्तृ चोपलब्धृ तज्ज्ञेयमित्यर्थः।।१४।।

किंच-बहिरन्तरिति। बहिस्त्वक्पर्यन्तं देहमात्मत्वेनाविद्याकल्पितमपेक्ष्य तमेवावधिं कृत्वा बहिरुच्यते। तथा प्रत्यगात्मानमपेक्ष्य देहमेवावधिं कृत्वान्तरुच्यते। बहिरन्तश्चेत्युक्ते मध्येऽभावे प्राप्त इदमुच्यते अचरं चरमेव च यच्चराचरं देहाभासमपि तदेव ज्ञेयं यथा रज्जुसर्पाभासः। यद्यचरं चरमेव च व्यवहारविषयं सर्वं ज्ञेयं किमर्थमिदमिति सर्वैर्न विज्ञेयमिति। उच्यते, सत्यं सर्वाभासं तत्तथापि व्योमवत्सूक्ष्ममतः सूक्ष्मत्वात्स्वेन रूपेण तज्ज्ञेयमप्यविज्ञेयमविदुषाम्। विदुषां त्वात्मैवेदं सर्वं ब्रह्मैवेदं सर्वमित्यादिप्रमाणतो नित्यं विज्ञातमविज्ञाततया दूरस्थं वर्षसहस्रकोट्याप्यविदुषामप्राप्यत्वादन्तिके च तदात्मत्वाद्विदुषाम्।।१५।।

किंच-अविभक्तमिति। अविभक्तं च प्रतिदेहं व्योमवत्तदेकं भूतेषु सर्वप्राणिषु विभक्तमिव च स्थितं देहेष्वेव विभाव्यमानत्वाद्भूतभर्तृ च भूतानि बिभर्तीति तज्ज्ञेयं भूतभर्तृ च स्थितिकाले। प्रलयकाले ग्रसिष्णु ग्रसनशीलम्। उत्पत्तिकाले प्रभविष्णु च प्रभवनशीलं यथा रज्जवादिः सर्पादेर्मिथ्याकल्पितस्य।।१६।।

किंच सर्वत्र विद्यमानं सन्नोपलभ्यते चेज्ज्ञेयं तमस्तर्हि। न, किं तर्हि-ज्योतिषामपीति। ज्योतिषामादित्यादीनामपि तज्ज्ञेयं ज्योतिः। आत्मचैतन्यज्योतिषेद्धानि ह्यादित्यादीनि ज्योतींषि दीप्यन्ते 'येन सूर्यस्तपति तेजसेद्धः', 'तस्य भासा सर्वमिदं विभाति' इत्यादिश्रुतिभ्यः। स्मृतेश्चेहैव 'यदादित्यगतं तेजः'इत्यादेः। तमसोऽज्ञानात्परमस्पृष्टमुच्यते। ज्ञानादेर्दुःसंपादनबुध्द्या

प्राप्तावसादस्योत्तम्भनार्थमाह ज्ञानममानित्वादि। ज्ञेयं ज्ञेयं यत्तत्प्रवक्ष्यामीत्यादिनोक्तम्। ज्ञानगम्यं ज्ञेयमेव ज्ञातं सज्ज्ञानफलमिति ज्ञानगम्यमुच्यते। ज्ञानमानं तु ज्ञेयम्। तदेतत्रयमपि हृदि बुद्धौ सर्वस्य प्राणिजातस्य विष्ठितं विशेषेण स्थितम्। तत्रैव हि त्रयं विभाव्यते।।१७।।

यथोक्तार्थोपसंहारार्थोऽयं श्लोक आरभ्यते-इति क्षेत्रमिति। इत्येवं क्षेत्रं महाभूतादि धृत्यन्तं तथा ज्ञानममानित्वादि तत्त्वज्ञानार्थदर्शनपर्यन्तं ज्ञेयं च 'ज्ञेयं यत्तद्'इत्यादि 'तमसः परमुच्यते' इत्येवमन्तमुक्तं समासतः। एतावान्सर्वो हि वेदार्थो गीतार्थश्चोपसंहृत्योक्तः। अस्मिन्सम्यग्दर्शने कोऽधिक्रियत इत्युच्यते। मद्भक्तो मयीश्वरे सर्वज्ञे पमगुरौ वासुदेवे समर्पितसर्वात्मभावो यत्पश्यति श्रृणोति स्पृशति वा सर्वमेव भगवान्वासुदेव इत्येवंग्रहाविष्टबुद्धिर्मद्भक्तः स एतद्यथोक्तं सम्यग्दर्शनं विज्ञाय मद्भावाय मम भावो मद्भावः परमात्मभावस्तस्मै

मद्भावायोपपद्यते मोक्षं गच्छति।।१८।।

तत्र सप्तमे ईश्वरस्य द्वे प्रकृती उपन्यस्ते परापरे क्षेत्रक्षेत्रज्ञलक्षणे। एतद्योनीनि भूतानीति चोक्तम्। क्षेत्रक्षेत्रज्ञप्रकृतिद्वययोनित्वं कथं भूतानामित्ययमर्थोऽधुनोच्यते-प्रकृतिमिति। प्रकृतिं पुरुषं चैवेश्वरस्य प्रकृती तौ प्रकृतिपुरुषावुभावप्यनादि विद्धि। न विद्यत आदिर्ययोस्तावनादी। नित्यत्वादीश्वरस्य तत्प्रकृत्योरपि युक्तं नित्यत्वेन भवितुम्। प्रकृतिद्वयवत्त्वमेव हीश्वरस्येश्वरत्वम्। याभ्यां प्रकृतिभ्यामीश्वरो जगदुत्पत्तिस्थितिप्रलयहेतुस्ते द्वे अनादी सत्यौ संसारस्य कारणम्। न आदी अनादी इति तत्पुरुषसमासं केचिद्वर्णयन्ति। तेन हि किलेश्वरस्य कारणत्वं सिध्यति। यदि पुनः प्रकृतिपुरुषावेव नित्यौ स्यातां तत्कृतमेव जगन्नेश्वरस्य जगतः कर्तृत्वम्। तदसत्,

प्राक्प्रकृतिपुरुषयोरुत्पत्तेरीशितव्याभावादीश्वरस्यानीश्वरत्वप्रसङ्गात्। संसारस्य निर्निमित्तत्वेऽनिर्मोक्षत्वप्रसङ्गाच्छास्त्रानर्थक्यप्रसङ्गाद्बन्धमोक्षाभावप्रसङ्गच्च। नित्यत्वे पुनरीश्वरस्य प्रकृत्योः सर्वमेतदुपपन्नं भवेत्। कथं, विकारांश्च गुणांश्चैव
वक्ष्यमाणान्विकारान्बुध्यादिदेहेन्द्रियान्तान्गुणात्मिका माया सा संभवो येषां विकाराणां गुणानां च तान्विकारान्गुणांश्च विद्धि प्रकृतिसंभवान्प्रकृतिपरिणामान्।।१९।।

के पुनस्ते विकारा गुणाश्च प्रकृतिसंभवाः-कार्येति। कार्यकरणकर्तृत्वे कार्यं शरीरं करणानि तत्स्थानि त्रयोदश। देहस्यारम्भकाणि भूतानि विषयाश्च प्रकृतिसंभवा विकाराः पूर्वोक्ता इह कार्यग्रहणेन गृह्यन्ते। गुणाश्च प्रकृतिसंभवाः सुखदुःखमोहात्मकाः करणाश्रयत्वात्करणग्रहणेन गृह्यन्ते। तेषां कार्यकरणानां कर्तृत्वमुत्पादकत्वं यत्तत्कार्यकरणकर्तृत्वं तस्मिन्कार्यकरणकर्तृत्वे हेतुः कारणमारम्भकत्वेन प्रकृतिरुच्यते। एवं कार्यकरणकर्तृत्वेन संसारस्य करणं प्रकृतिः कार्यकारणकर्तृत्व इत्यस्मिन्नपि पाठे कार्यं यद्यस्य विपरिणामस्तत्तस्य कार्यं विकारो विकारि कारणं तयोर्विकारविकारिणोः कार्यकारणयोः कर्तृत्व इति। अथवा षोडश विकाराः कार्यं, सप्त प्रकृतिविकृतयः कारणं, तान्येव कार्यकारणान्युच्यन्ते। तेषां कर्तृत्वे हेतुः प्रकृतिरुच्यत आरम्भकत्वेनैव। पुरुषश्च संसारस्य कारणं, यथा स्यात्तदुच्यते। पुरुषो जीवः क्षेत्रज्ञो भोक्तेति पर्यायः सुखदुःखानां भोग्यानां भोक्तृत्व उपलब्धृत्वे हेतुरुच्यते। कथं पुनरनेन कार्यकरणकर्तृत्वेन सुखदुःखभोक्तृत्वेन च प्रकृतिपुरुषयोः संसारकारत्वमुच्यत इति। अत्रोच्यते कार्यकरणसुखदुःखरूपेण हेतुफलात्मना परिणतया प्रकृत्या भोग्यया पुरुषस्य तद्विपरीतस्य भोक्तृत्वेनाविद्यारूपः संयोगः स्यात्तदा संसारः स्यादिति। अतो यत्प्रकृतिपुरुषयोः कार्यकरणकर्तृत्वेन

सुखदुःखभोक्तृत्वेन च संसारकारणत्वमुक्तं तद्युक्तमुक्तम्। कः पुनरयं संसारो नाम, सुखदुःखसंभोगः संसारः पुरुषस्य च सुखदुःखानां संभोक्तृत्वं संसारित्वमिति।।२०।।

यत्पुरुषस्य सुखदुःखानां भोक्तृत्वं संसारित्वमित्युक्तं तस्य तत्किंनिमित्युच्यते-पुरुष इति। पुरुषो भोक्ता प्रकृतिस्थः प्रकृतावविद्यालक्षणायां कार्यकारणरूपेण परिणतायां स्तितः प्रकृतिस्थः प्रकृतिमात्मत्वेन गत इत्येतद्धि यस्मात्तस्मागद्भुङ्क्त उपलभत इत्यर्थः। प्रकृतिजान्प्रकृतितो
जानान्सुखदुःखमोहाकाराभिव्यक्तान्गुणान्सुखी दुःखी मूढः पण्डितोऽहमित्येवम्। सत्यामप्यविद्यायां सुखदुःखमोहेषु गुणेषु भुज्यमानेषु यः सङ्ग आत्मभावः संसारस्य स प्रधानं कारणं जन्मनः "स यथाकामो भवति तत्कतुर्भवति" इत्यादिश्रुतेः। तदेतदाह कारणं हेतुर्गुणसङ्गे गुणेषु सङ्गोऽस्य पुरुषस्य भोक्तुः, सदसद्योनिजन्मानि तेषु सदसद्योनिजन्मसु विषयभूतेषु कारणं गुणसङ्गः। अथवा सदसद्योनिजन्मस्वस्य संसारस्य कारणं गुणसङ्ग इति संसारपदमध्याहार्यम्। सद्योनयो देवादियोनयोऽसद्योनयः पश्वादियोनयः सामर्थ्यात्सदसद्योनयो मनुष्ययोनयोऽप्यविरुद्धा द्रष्टव्याः। एतदुक्तं भवति। प्रकृतितत्वाख्याऽविद्या गुणेषु च सङ्गः कामः संसारस्य कारणमिति। तच्च परिवर्जानायोच्यते। अस्य च निवृत्तिकारणं ज्ञानं वैराग्ये ससंन्यासं गीताशास्त्रे प्रसिद्धम्। तच्च ज्ञानं पुरस्तादुपन्यस्तं क्षेत्रक्षेत्रज्ञविषयम्। यज्ज्ञात्वामृतमश्नुत इत्युक्तं चान्यापोहेनातद्धर्माध्यारोपेण च।।२१।।

तस्यैव पुनः साक्षान्निर्देशः क्रियते-उपद्रष्टेति। उपद्रष्टा समीपस्थः सन्द्रष्टा स्वयमव्यापृतो यथार्त्विग्यजमानेषु यज्ञकर्मव्यापृतेषु तटस्थोऽन्योव्यापृतो यज्ञविद्याकुशल ऋत्विग्यजमानव्यापारगुणदोषाणामीक्षिता तद्वत्कार्यकरणव्यापारेष्वव्यापृतोऽन्यो विलक्षणस्तेषां कार्यकरणानां सव्यापाराणां सामीप्येन द्रष्टोपद्रष्टा। अथवा देहचक्षुर्मनोबुद्ध्यात्मानो द्रष्टारस्तेषां बाह्यो द्रष्टा देहस्तत

आरभ्यान्तरतमश्च प्रत्यक्समीप आत्मा द्रष्टा। यतः परोऽन्तरो नास्ति द्रष्टा सोऽतिशयसामीप्येन द्रष्टृत्वादुपद्रष्टा स्यात्। यज्ञोपद्रष्टृवद्वा सर्वविषयीकरणादुपद्रष्टा।

अनुमन्ता चानुमोदनमनुमननं कुर्वत्सु तत्क्रियासु परितोपस्तत्कर्तानुमन्ता च। अथवानुमन्ता कार्यकरणप्रवृत्तिषु स्वयमप्रवृत्तोऽपि प्रवृत्त इव तदनुकूलो विभाव्यते तेनानुमन्ता। अथवा प्रवृत्तान्स्वव्यापारेषु तत्साक्षिभूतः कदाचिदपि न निवारयतीत्यनुमन्ता। भर्ता भरणं नाम देहेन्द्रियमनोबुद्धीनां संहतानां चैतन्यात्मपारार्थ्येन निमित्तभूतेन चैतन्याभासानां यत्स्वरूपधारणं तच्चैतन्यात्मकृतमेवेति भर्तात्मेत्युच्यते। भोक्ताग्न्युष्णवन्नित्यचैतन्यस्वरूपेण बुद्धेः सुखदुःखमोहात्मकाः प्रत्ययाः सर्वविषयविषयाश्चैतन्यात्मग्रस्ता इव जायमाना विभक्ता विभाव्यन्त इति भोक्तात्मोच्यते। महेश्वरः सर्वात्मत्वात्स्वतन्त्रत्वाच्च महानीश्वरश्चेति महेश्वरः। परमात्मा देहादीनां बुद्ध्यन्तानां प्रत्यगात्मत्वेन कल्पितानामविद्यया परम उपद्रष्ट्टत्वादिलक्षण आत्मेति परमात्मा सोऽन्तः परमात्मेत्यनेन शब्देन

चाप्युक्तः कथितः श्रुतौ। क्कासावस्मिन्देहे पुरुषः परोऽव्यक्तात्। 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः' इति यो वक्ष्यमाणः 'क्षेत्रज्ञं चापि मां विद्धि' इत्युपन्यस्तो व्याख्यायोपसंहृतश्च।।२२।।

तमेवं यथोक्तलक्षणमात्मानम्-य एवं यथोक्तप्रकारेण वेत्ति पुरुषं साक्षादात्मभावेनायमहमिति प्रकृतिं च यथोक्तामविद्यालक्षणां गुणैः स्वविकारैः सह निवर्तितामभावमापादितां विद्यया सर्वथा

सर्वप्रकारेण वर्तमानोऽपि स भूयः पुनः पतितेऽस्मिन्विद्वच्छरीरे देहान्तराय नाभिजायते। नोत्पद्यते। देहान्तरं न गृह्णातीत्यर्थः। अपिशब्दात्किमु वक्तव्यं स्ववृत्तस्थो न जायत इत्यभिप्रायः। ननु यद्यपि ज्ञानोत्पत्तयनन्तरं पुनर्जन्माभाव उक्तस्तथापि प्राग्ज्ञानोत्पत्तेः कृतानां कर्मणामुत्तरकालभाविनां च यानि चातिक्रान्तान्यनेकजन्मकृतानि तेषां फलमदत्त्वा नाशो न युक्त इति स्युस्त्रीणि जन्मानि। कृतविप्रणाशो हि न युक्त इति। यथा फले प्रवृत्तानामारब्धजन्मनां कर्मणाम्। नच कर्मणां विशेषोऽवगम्यते। तस्मात्त्रिप्रकाराण्यपि कर्माणि त्रीणि जन्मान्यारभेरन्संहतानि वा सर्वाण्येकं जन्मारभेरन्। अन्यथा कृतविनाशो सति सर्वत्रानाश्वासप्रसङ्ग शास्त्रानर्थक्यं च स्यादित्यत इदमयुक्तमुक्तं न स भूयोऽभिजायत इति। न, 'क्षीयन्ते चास्य कर्माणि', 'ब्रह्म वेदब्रह्मैव भवति', 'तस्य तावदेव चिरमिषीकातूलवत्सर्वकर्माणि प्रदूयन्ते' इत्यादिश्रुतिशतेभ्य उक्तो विदुषः सर्वकर्मदाहः। इहापि चोक्तो यथैधांसीत्यादिना सर्वकर्मदाहः। वक्ष्यति चोपपत्तेश्च। अविद्याकर्मक्लेशबीजनिमित्तानि हि कर्माणि जन्मान्तराङ्कुरमारभन्ते। इहापि च साहंकाराभिसंधीनि करमाणि फलारम्भकाणि नेतराणीति तत्र तत्र भगवतोक्तं 'बीजान्यग्नयुपदग्धानि न रोहन्ति यथा पुनः। ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संपद्यते पुनः' इति च। अस्तु तावज्ज्ञानोत्पत्त्युत्तरकालकृतानां कर्मणां ज्ञानेन दाहो ज्ञानसहभावित्वात्। न त्विह जन्मनि ज्ञानोत्पत्तेः प्राक्कृतानामतीतानेकजन्मान्तरकृतानां च दाहो युक्तः। न, सर्वकर्माणीति विशेषणात्। ज्ञानोत्तरकालभाविनामेव सर्वकर्मणामिति चेत्। न, संकोचत्वे कारणानुपपत्तेः। यत्तूक्तं यथा वर्तमानजन्मारम्भकाणि कर्माणि न क्षीयन्ते फलदानाय प्रवृत्तान्येव सत्यपि ज्ञाने तथाऽनारब्धफलानामपि कर्मणां क्षयो न युक्त इति तदसत्। कथं तेषां मुक्तेषुवत्प्रवृत्तफलत्वात्। यथा पूर्वं लक्ष्यवेधाय मुक्त इषुर्धनुषो सक्ष्यवेधोत्तरकालमप्यारब्धवेगक्षयात्पतनेनैव निवर्तते एवं शरीरारम्भकं कर्म शरीरस्थितिप्रयोजने निवृत्तेऽप्यासंस्कारवेगक्षयात्पूर्ववद्वतेत एव। स एवेषुः प्रवृत्तिनिमित्तानारब्धवेगस्त्वमुक्तो धनुषि प्रयुक्तोऽप्युपसंह्रियते तथानारब्धफलानि कर्माणि स्वाश्रयस्थान्येव ज्ञानेन निर्बीजीक्रियन्त इति पतिते ऽस्मिन्विद्वच्छरीरे 'न स भूयोऽभिजायते' इति युक्तमेवोक्तमिति सिद्धम्।।२३।।

अत्रात्मदर्शन उपायविकल्पा इमे ध्यानादय उच्यन्ते-ध्यानेनेति। ध्यानेन ध्यानं नाम शब्दादिभ्यो विषयेभ्यः श्रोत्रादीनि करणानि मनस्युपसंहृत्य मनश्च प्रत्यच्केतयितर्येकाग्रतया यच्चिन्तनं तद्ध्यानम्। तथा ध्यायतीव बको ध्यायतीव पृथिवी ध्यायन्तीव पर्वता इत्युपमोपादानात्तौलधारावत्संततो।ञविच्छिन्नप्रत्ययो ध्यानं तेन ध्यानेनात्मनि बुद्धौ पश्यन्त्यात्मानं प्रत्यक्चेतनमात्मना ध्यानसंस्कृतेनान्तःकरणेन केचिद्योगिनः। अन्ये सांख्येन योगेन सांख्यं नाम-इमे सत्त्वरजस्तमांसि गुणा मया दृश्या अहं तेभ्योऽन्यस्तद्व्यापारसाक्षिभूतो नित्यो गुणविलक्षण आत्मेति चिन्तनमेष सांख्यो योगस्तेन पश्यन्त्यात्मानमात्मनेति वर्तते। कर्मयोगेन कर्मैव योग ईश्वरार्पणबुद्ध्यानुष्ठीयमानं घटनरूपं योगार्थत्वाद्योग उच्यते। गुणतस्तेन सत्वशुद्धिज्ञानोत्पत्तिद्वारेण चापरे।।२४।।

अन्ये त्विति। अन्ये त्वेषु विकल्पेष्वन्यतरेणाप्येवं यथोक्तमात्मानमजानन्तोऽन्येभ्य आचार्येभ्यः श्रुत्वेदमेव चिन्तयतेत्युक्ता उपासते श्रद्दधानाः सन्तश्चिन्तयन्ति तेऽपि चातितरन्त्येवातिक्रमन्त्येव मृत्युं मृत्युयुक्तं संसारमित्येतत्। श्रुतिपरायणाः श्रुतिः श्रवणं परमयनं गमनं मोक्षमार्गप्रवृत्तौ परं

साधनं येषां ते श्रुतिपरायणाः

केवलपरोपदेशप्रमाणाः स्वयं विवेकरहिता इत्यभिप्रायः। किमु वक्तव्यं प्रमाणं प्रति स्वतन्त्रा विवेकिनो मृत्युमतितरन्तीत्यभिप्रायः।।२५।।

क्षेत्रज्ञेश्वरैकत्वविषयं ज्ञानं मोक्षसाधनं यज्ज्ञात्वामृतमश्नुत इत्युक्तं तत्कस्माद्धेतोरिति तद्धेतुप्रदर्शनार्थं श्लोक आरभ्यते-यावदिति। यावद्यत्किंचित्संजायते समुत्पद्यते सत्वं वस्तु किमविशेषेणेत्याह स्थावरजङ्गमं स्थावरं जङ्गमं च क्षेत्रक्षेत्रज्ञसंयोगात्तज्जायत इत्येवं विद्धि जानीहि हे भरतर्षभ। कः पुनरयं क्षेत्रक्षेत्रज्ञयोः संयोगोऽभिप्रेतः। न तावद्रज्ज्वेव घटस्यावयवसंश्लेषद्वारकः संबन्धविशेषः संयोगः क्षेत्रेण क्षेत्रज्ञस्य संभवत्याकाशवन्निरवयवत्वात्। नापि समवायलक्षणस्तन्तुपटयोरिव क्षेत्रक्षेत्रज्ञयोरितरेतरकार्यकारणभावानभ्युपगमादिति। उच्यते,

क्षेत्रक्षेत्रज्ञयोर्विषयविषयिणोर्भिन्नस्वभावयोरितरेतरतद्धर्माध्यासलक्षणः संयोगः क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धनो रज्जुशुक्तिकादीनां तद्विवेकज्ञानाभावादध्यारोपितसर्परजतादिसंयोगवत्। सोऽयमध्यासस्वरूपः क्षेत्रक्षेत्रज्ञसंयोगो मिथ्याज्ञानलक्षणः। यथाशास्त्रं क्षेत्रक्षेत्रज्ञलक्षणभेदपरिज्ञानपूर्वकं प्राग्दर्शितरूपात्क्षेत्रान्मुञ्जादिवेषीकां यथोक्तलक्षणं क्षेत्रज्ञं प्रविभज्य न सत्तन्नासदुच्यत इत्यनेन निरस्तसर्वोपाधिविशेषं ज्ञेयं ब्रह्म स्वरूपेण यः पश्यति क्षेत्रं च मायानिर्मितहस्तिस्वप्नदृष्टवस्तुगन्धर्वनगरादिवदसदेव स दिवावभासत इत्येवं निश्चितविज्ञानो यस्तस्य यथोक्तसम्यग्दर्शनविरोधादपगच्छति मिथ्याज्ञानं तस्य जन्महेतोरपगमात्। 'य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह' इत्यनेन विद्वान्भूयो नाभिजायत इति यदुक्तं तदुपपन्नमुक्तम्।।२६।।

न स भूयोऽभिजायत इति सम्यग्दर्शनफलमविद्यादिसंसारबीजनिवृत्तिज्वारेण जन्माभाव उक्तः जन्मकारणं चाविद्यानिमित्तकः क्षेत्रक्षेत्रज्ञसंयोग उक्तः। अतस्तस्या अविद्याया निवर्तकं सम्यग्दर्शनमुक्तमपि पुनः शब्दान्तरेणोच्यते-समं सर्वेष्वित्यादि। समं निर्विशेषं तिष्ठन्तं स्थितिं कुर्वन्तं क्क सर्वेषु भूतेषु ब्रह्मादिस्थावरान्तेषु प्राणिषु कं परमेश्वरं देहेन्द्रियमनोबुद्धयव्यक्तात्मनोऽपेक्ष्य परमेश्वरस्तं सर्वेषु भूतेषु समं तिष्ठन्तम्। तानि विशिनष्टि-विनश्यत्स्विति। तं च परमेश्वरमविनश्यन्तमिति भूतानां परमेश्वरस्य चात्यन्तवैलक्षण्यप्रदर्शनार्थम्। कथं सर्वेषां हि भावविकाराणां जनिलक्षणो भावविकारो मूलं

जन्मोत्तरभाविनोऽन्ये सर्वे भावविकारा विनाशान्ताः। विनाशात्परो न कश्चिदस्ति भावविकारो भावाभावात्। सति हि धर्मिणि धर्मा भवन्त्यतोऽन्त्यभावविकाराभावानुवादेन पूर्वभाविनः सर्वे भावविकाराः प्रतिषिद्धा भवन्ति सह कार्यैः। तस्मात्सर्वभूतैर्वैलक्षण्यमत्यन्तमेव परमेश्वरस्य सिद्धं निर्विशेषत्वमेकत्वं च। य एवं यथोक्तं पश्यति स पश्यति। ननु सर्वोऽपि लोकः पश्यति किं विशेषणेनेति, सत्यं पश्यति किंतु विपरीतं पश्यत्यतो विशिनष्टि स एव पश्यतीति। यथा तिमिरदृष्टिरनेकं चन्द्रं पश्यति तमपेक्ष्यैकचन्द्रदर्शी विशिष्यते स एव पश्यतीति तथैवेहाप्येकमविभक्तं यथोक्तमात्मानं यः पश्यति स विभक्तानेकात्मविपरीतदर्शिभ्यो विशिष्यते स एव पश्यतीति। इतरे पश्यन्तोऽपि न पश्यन्ति विपरीतदर्शित्वादनेकचन्द्रदर्शिवदित्यर्थः।।२७।।

यथोक्तस्य सम्यगदर्शनस्य फलवचनेन स्तुतिः कर्तव्येति श्लोक आरभ्यते-समं पश्यन्निति। समं पश्यन्नुपलभमानो हि यस्मात्सर्वत्र सर्वभूतेषु समवस्थितं

तुल्यतयावस्थितमीश्वरमतीतानन्तरश्लोकोक्तलक्षणमित्यर्थः। समं पश्यन्किं न हिनस्ति हिंसां न करोत्यात्मना स्वेनैव स्वमात्मानं ततस्तदहिंसनाद्याति परां प्रकृष्टां गतिं मोक्षाख्याम्। ननु नैव कश्चित्प्राणी स्वयं स्वमात्मानं हिनस्ति कथमुच्यतेऽप्राप्तं न हिनस्तीति। यथा न पृथिव्यामग्निश्चेतव्यो नान्तरिक्ष इत्यादि। नैष दोषः, अज्ञानामात्मतिरस्करणोपपत्तेः। सर्वो ह्यज्ञोऽत्यन्तप्रसिद्धं साक्षादपरोक्षादात्मानं तिरस्कृत्यानात्मानमात्मत्वेन परिगृह्य तमपि धर्माधर्मौ कृत्वोपात्तमात्मानं हन्तीत्यात्महा सर्वोऽज्ञः। यस्तु परमार्थात्माऽसावपि सर्वदाऽविद्या हत इव विद्यमानफलाभावादिति सर्व आत्महन एवाविद्वांसः। यस्त्वितरो यथोक्तात्मदर्शी स उभयथाप्यात्मनात्मानं न हिनस्ति ततो याति परां गतिम्। यथोक्तं फलं तस्य भवतीत्यर्थः।।२८।।

सर्वभूतस्थमीशं समं पश्यन्न हिनस्त्यात्मनात्मानमित्युक्तं तदनुपपन्नं स्वगुणकर्मवैलक्षण्यभेदभिन्नेष्वात्मस्वित्येतदाषङ्क्याह-प्रकृत्यैवेति। प्रकृत्या प्रकृतिर्भगवतो माया त्रिगणात्मिका 'मायां तु प्रकृतिं विद्यात्' इति मन्त्रवर्णात्तया प्रकृत्यैव च नान्येन महदादिकार्यकारणाकारपरिणतया कर्माणि वाङ्मनःकायारभ्याणि क्रियमाणानि निर्वर्त्यमानानि सर्वशः सर्वप्रकारैर्यः पश्यत्युपलभते तथात्मानं क्षेत्रज्ञमकर्तारं

सर्वोपाधिविवर्जितं पश्यति स परमार्थदर्शीत्यभिप्रायः। निर्गुणस्याकर्तुर्निर्विशेषस्याकाशस्येव भेदे प्रमाणानुपपत्तिरित्यर्थः।।२९।।

पुनरपि तदेव सम्यग्दर्शनं शब्दान्तरेण प्रपञ्चयति-यदेति। यदा यस्मिन्काले भूतपृथग्भावं भूतानां पृथग्भावं पृथक्त्वमेकस्मिन्नात्मनि स्थितमेकस्थमनुपश्यति शास्त्राचार्योपदेशतो मत्तवात्मप्रत्यक्षत्वेन पश्यत्यात्मैवेदं सर्वमिति। तत एव च तस्मादेव च विस्तारमुत्पत्तिं विकाशात्मात्मतः प्राण आत्मत आशा आत्मतः स्मर आत्मत आकाश आत्मतस्तेज आत्मत आप आत्मत आविर्भावतिरोभावावात्मतो भूरात्मनोऽन्नमित्येवमादिप्रकारैर्विस्तारं यदा पश्यति ब्रह्म संपद्यते ब्रह्मैव भवति तदा। तस्मिन्काल इत्यर्थः।।३०।।

एकस्यात्मनः सर्वदेहात्मत्वे तद्दोषसंबन्धे प्राप्त इदमुच्यते-अनादीति। अनादित्वादनादेर्भावोऽनादित्वमादिः करणं तद्यस्य नास्ति तदनादि। यद्ध्यादिमत्तत्स्वेनात्मना व्येत्ययं त्वनादित्वान्निरवयव इति कृत्वा न व्येति। तथा निर्गुणत्वात्सगुणो हि गुणव्ययाद् व्येत्ययं तु निर्गुणत्वान्न व्येतीति परमात्मायमव्ययो नास्य व्ययो विद्यत इत्यव्ययः। यत एवमतः शरीरेष्वात्मन उपलब्धिर्भवतीति शरीरस्थ उच्यते तथापि न करोति। तदकरणादेव

तत्फलेन न लिप्यते। यो हि कर्ता स कर्मफलेन लिप्यतेऽतं त्वकर्ताऽतो न फलेन लिप्यत इत्यर्थः। कः पुनर्देहेषु करोति लिप्यते च। यदि तावदन्यः परमात्मनो देही कः करोति लिप्यते च तत इदमनुपपन्नमपक्तं क्षेत्रज्ञेश्वरैकत्वं क्षेत्रज्ञं चापि मां विद्धित्यादि। अथ नास्तीश्वरादन्यो देही कः करोति लिप्यते चेति वाच्यं परो वा नास्तीति। सर्वथा दुर्विज्ञेयं दुर्वाच्यं चेति भगवत्प्रोक्तमौपनिषदं दर्शनं परित्यक्तं वैशेषिकैः साख्यार्हतबौद्धैश्च। तत्रायं परिहारो भगवता स्वेनैवोक्तः 'स्वभावस्तु प्रवर्तते' इति। अविद्यामात्रस्वभावो हि करोति लिप्यत इति व्यवहारो भवति नतु परमार्थ नतु परमार्थत एकस्मिन्परमात्मनि तदस्ति अत एकस्मिन्परमार्थसांख्यदर्शने स्थितानां ज्ञाननिष्ठानां परमहंसपरिव्राजकानां तिरस्कृताविद्याव्यवहाराणां कर्माधिकारो नास्तीति तत्र तत्र दर्शितं भगवता।।३१।।

किमिव न करोति न लिप्यत इत्यत्र दृष्टान्तमाह-यथा सर्वगतमिति। यथा सर्वगतं व्याप्यति सत्सौक्ष्म्यात्सूक्ष्मभावादाकाशं खं नोप्यलिप्यते न संबध्यते सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते।।३२।।

किंच-यथा प्रकाशयतीति। यथा प्रकाशयत्यवभासयत्येकः कृत्स्नं लोकमिमं रविः सवितादित्यस्तथा तद्वन्महाभूतादिधृत्यन्तं क्षेत्रमेकः सन्प्रकाशयति कः क्षेत्री परमात्मेत्यर्थः। रविदृष्टान्तोऽत्रात्मन उभयार्थोऽपि भवति रविवत्सर्वक्षेत्रेष्वेक आत्माऽलेपकश्चति।।३३।।

समस्ताध्यायार्थोपसंहारार्थोऽयं श्लोकः-क्षेत्रक्षेत्रज्ञयोरिति। क्षेत्रक्षेत्रज्ञयोर्यथाव्याख्यातयोरेवं यथाप्रदर्शितप्रकारेतरवैलक्षण्यविशषं ज्ञानचक्षुषा शास्त्राचार्योपदेशजनितमात्मप्रत्ययिकं ज्ञानं चक्षुस्तेन ज्ञानचक्षुषा भूतप्रकृतिमोक्षं च भूतानां प्रकृतिरविद्यालक्षणाऽव्यक्ताख्या तस्या भूतप्रकृतेर्मोक्षणमभावगमनं च ये विदुर्विजानन्ति यान्ति गच्छन्ति ते परं परमार्थतत्वं ब्रह्म न पुनर्देहमागगत्त इत्यर्थः।।३४।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यपूज्यपादश्रीमदाचार्यश्रीशंकरभगवतः कृतौ श्रीभगवद्गीताभाष्ये प्रकृतिपुरुषविवेको नाम त्रयोदशोऽध्यायः।।१३।।

चतुर्दशोध्यायः।

सर्वमुत्पद्यमानं क्षेत्रक्षेत्रज्ञसंयोगादुत्पद्यत इत्युक्तं तत्कथमिति तत्प्रदर्शनार्थं 'परं भूयः'इत्यादिरध्याय आरभ्यते, अथवेश्वरपरतन्त्रयोः क्षेत्रक्षेत्रज्ञयोर्जगत्कारणत्वं नतु सांख्यानामिव स्वतन्त्रयोरित्येवमर्थं प्रकृतिस्थत्वं गुणेषु च सङ्गः संसारकारणमित्युक्तं कस्मिन्गुणे कथं सङ्गः के वा गुणाः कथं वा ते बन्धतीति गुणेभ्यश्च मोक्षणं कथं स्यान्मुक्तस्य च लक्षणं वक्तव्यमित्येवमार्थं च श्रीभगवानुवाच-परमिति। परं ज्ञानमिति व्यवहितेन संबन्धः। भूयः पुनः पूर्वेषु सर्वेष्वध्यायेष्वसकृदुक्तमपि प्रवक्ष्यामि। तच्च परं परवस्तुविषयत्वात्। किं तत् ज्ञानं सर्वेषां ज्ञानानामुत्तममुत्तमफलत्वात्। ज्ञानानामिति नामानात्वादीनां किं तर्हि यज्ञादिज्ञेयवस्तुविषयाणामिति। तानि न मोज्ञायेदं तु मोक्षायेति परोत्तमशब्दाभ्यां स्तौति श्रोतृबुद्धिरुच्युत्पादनार्थम्। यज्ज्ञात्वा यज्ज्ञानं ज्ञात्वा प्राप्य मनुयः संन्यासिनो मननशीलाः सर्वे परां सिद्धिं मोक्षाख्यामितोऽसमाद्देहन्धानादूर्ध्वं गताः प्राप्ताः ।।१।।

अस्याश्च सिद्धेरैकान्तिकत्वं दर्शयति-इदमिति। इदं ज्ञानं यतोक्तमुपाश्रित्य ज्ञानसाधनमनुष्ठायेत्येतत्। मम

परमेश्वरस्य साधर्म्यं मत्वस्वरूपतामागताः प्राप्ता इत्यर्थो नतु समानधर्मतां साधर्म्यं क्षेत्रज्ञेश्वरयोर्भेदानभ्युपगमाद्गीताशाश्रे। फलवादश्चायं स्तुर्थमुच्यते। सर्गेऽपि सृष्टिकालेऽपि नोपजायन्ते नोप्यद्यन्ते, प्रलये ब्रह्मणोऽपि विनाशकाले न व्यथन्ति च व्यथां नापद्यन्ते। न च्यवन्तीत्यर्थः।।२।।

क्षेत्रक्षेत्रज्ञसंयोग ईदृशो भूतकारणमित्याह-ममेति। मम स्वभूता मदीया माया त्रिगुणात्मिका प्रकृतिर्योनिः सर्वभातानां सर्वकार्येभ्यो महत्वाद्भरणाच्च स्वविकाराणां महद्ब्रह्मेति योनिरेव विशिष्यते। तस्मिन्महति ब्रह्मणि योनौ गर्भं हिरण्यगर्भस्य जन्मनो बीजं सर्वभूतजन्मकारणं बीजं दधामि निक्षिपामि। क्षेत्रक्षेत्रज्ञप्रकृतिद्वयशक्तिमानीश्वरोऽहमविद्याकामकर्मोपाधिस्वरूपानुविधायिनं

क्षेत्रेण संयोजयामीत्यर्थः। संभव

उत्पत्तिः सर्वभूतानां हिरण्यगर्भोत्पत्तिद्वारेण ततस्तस्माद्गर्भाधानाद्भवति हे भारत।।३।।

सर्वयोनिष्विति। देवपितृमनुष्यपशुमृगादिसर्वयोनिषु कौन्तेय, मूर्तयो देहसंस्थानलक्षणा मूर्च्छिताङ्गवयवा मूर्तयः संभवन्ति यास्तासां मूर्तीनां ब्रह्ममहत् सर्वावस्थं योनिः कारणमहमीशो बीजप्रदो गर्भाधानस्य कर्ता पिता।।४।।

के गिणाः कथं बन्धन्तीत्युच्यते-सत्त्वमिति। सत्तवं रजस्तम इत्येवंनामानो, गुणा इति पारिभाषिकः शब्दो न रूपादिवद्द्रव्याश्रिताः। नच गुणगुणिनोरन्यत्वमत्र विवक्षितम्। तस्माद्गुणा इव नित्यपरतन्त्राः क्षेत्रज्ञं प्रत्यविद्यात्मकत्वात्क्षेत्रज्ञं निबन्धन्तीव तमास्पदीकृत्यात्मानं प्रतिलभन्त इति निबन्धन्तीत्युच्यते। ते च प्रकृतिसंभवा निबन्धन्तीव हे महाबाहो, महान्तौ समर्थतरावाजानुप्रलम्बौ बाहू यस्य स महाबाहुः हे महाबाहो, देहे शरीरे देहिनं देहवन्तमव्ययं। अव्ययत्वं चोक्तमनाद्त्वादित्यादिश्लोके। ननु देही न लिप्यत इत्युक्तं तत्कथमिह निबन्धन्तीत्यन्यथोच्यते, परिहृतमस्माभिरिवशब्देन निबन्धन्तीवेति।।५।।

तत्र सत्त्वमिति। तत्र सत्त्वादीनां सत्त्वस्यैव तावल्लक्षणमुच्यते निर्मलत्वात्स्फटिकमणिरिव प्रकाशकमनामयं निरुपद्रवं सत्त्वं तन्निबन्धाति। कथं सुखसङ्गेन सुख्यहमिति विषयभूतस्य सुखस्य

विषयिष्यात्मनि संश्लेषापादनं मृषैव सुखे सञ्जनमिति। सैषाऽविद्या। नहि विषयधर्मो विषयिणो भवति। इच्छादि च धृत्यन्तं क्षेत्रस्यैव विषयस्य धर्म इत्युक्तं भगवता। अतोऽविद्ययैव स्वकीयधर्मभूतया विषयविषय्यविवेकलक्षणयाऽस्वात्मभूते सुखे सञ्जयतीव सक्तमिव करोत्यसुखिनं सुखिनमिव। तथा ज्ञानसङ्गेन च। ज्ञानमिति सुखसाहचर्यात्क्षेत्रस्यैवान्तःकरणस्य धर्मो नात्मनः। आत्मधर्मत्वे सङ्गानुपपत्तेर्बन्धानुपपत्तेश्च। सुख इव ज्ञानादौ सङ्गोमन्तव्यो हेऽनघाव्यसन।।६।।

रजो रागात्मकमिति। रजो रागात्मकं रञ्जनाद्रागो गैरिकादिवद्रागात्मकं विद्धि जानीहि। तृष्णासङ्गसमुद्भवं तृष्णाऽप्राप्ताभिलाष आसङ्गः प्राप्ते विषये मनसः प्रीतिलक्षणः संश्लेषः, तृष्णासङ्गयोः, समुद्भवं तृष्णासङ्गसमुद्भवं तन्निबन्धाति तद्रजः हेकौन्तेय कर्मसङ्गेन दृष्टादृष्टार्थेषु कर्मसु सञ्जनं तत्परता कर्मसङ्गस्तेन निबन्धाति रजो देहिनम्।।७।।

तमस्त्विति। तमस्तृतीयो गुणोऽज्ञानाज्जातमज्ञानजं विद्धि। मोहनं मोहकरमविवेककरं सर्वदेहिनां सर्वेषां देहवतां। प्रमादालस्यनिद्राभिः प्रमादश्चालस्यं च निद्रा च प्रमादालस्यनिद्रास्ताभिस्तत्तमो निबन्धाति भारत।।८।।

पुनर्गुणानां व्यापारः संक्षेपत उच्यते-सत्त्वमिति। सत्त्वं सुखेसंजयति संश्लेषयति। रजः कर्मणि हे भारत, संजयतीति वर्तते। ज्ञानं सत्त्वकृतं विवेकमावृत्याच्छाद्य तु तमः स्वेनावरणात्मना प्रमादे संजयत्युत। प्रमादो नाम प्राप्तकर्तव्याकरणम्।।९।।

उक्तं कार्यं कदा कुर्वन्ति गुणा इत्युच्यते-रज इति। रजस्तमश्चोभावप्यभिभूय सत्त्वं भवत्युद्भवति वर्धते यदा तदा लब्धात्मकं सत्त्वं स्वकार्यं ज्ञानसुखाद्यारभते हे भारत। तथा रजोगुणः सत्त्वंतमश्चैवोभावप्यभिभूय वर्धते यदा तदा कर्म तृष्णादि स्वकार्यमारभते। तम आख्यो गुणः सत्त्वं रजश्चोभावप्यभिभूय तथैव वर्धते यदा तदा ज्ञानावरणादि स्वकार्यमारभते।।१०।।

यदा यो गुण उद्भूतो भवति तदा तस्य किं लिङ्गमित्युच्यते-सर्वद्वारेष्विति। सर्वद्वारेष्वात्मन उपलब्धिद्वाराणि श्रोत्रादीनि सर्वाणि करणानि तेषु सर्वद्वारेष्वन्तःकरस्य बुद्धेर्वृत्तिः प्रकाशो

देहेऽस्मिन्नुपजायते तदेव ज्ञानम्। यदैवं प्रकाशो ज्ञानाख्य उपजायते तदा ज्ञानप्रकाशेन लिङ्गेन विद्याद्विवृद्धमुद्भूतं सत्त्वमित्युतापि।।११।।

रजस उद्भूतस्येदं चिह्नम्-लोभ इति। लोभः परद्रव्यादित्सा, प्रवृत्तिः प्रवर्तनं सामान्यचेष्टा, आरम्भ

उद्यमः, कस्य, कर्मणाम्। अशमोऽनुपशमः, हर्षरागादिप्रव-त्तिः, स्पृहा सर्वसामान्यवस्तुविषया तृष्णा, रजसि गुणे विवृद्ध एतानि लिङ्गानि जायन्ते हे भरतर्षभ।।१२।।

अप्रकाश इति। अप्रकाशोऽविवेकोऽत्यन्तमप्रवृत्तिश्च प्रवृत्त्यभावस्तत्कार्यं प्रमादो मोह एव चाविवेको मूढतेत्यर्थः। तमसि गुणे विवृद्ध एतानि लिङ्गानि जायन्ते हे कुरुनन्दन।।१३।।

मरणद्वारेणापि यत्फलं प्राप्यते तदपि सङ्गरागहेतुकं सर्वं गौणमेवेति दर्शयन्नाह-यदेति। यदा सत्त्वे प्रवृद्ध ऊद्भूते तु प्रलयं मरणं याति प्रतिपद्यते देहभृदात्मा तदोत्तमविदां महदादितत्त्वविदामित्येतत्। लोकानमलान्मलरहितान्प्रतिपद्यते प्रान्पोतीत्येतत्।।१४।।

रजसि गुणेविवृद्धे प्रलयं मरणं गत्वा प्राप्य कर्मसङ्गिषु कर्मासक्तियुक्तेषु मनुष्येषु जायते। तथा तद्वेदेव प्रलीनो मृतस्तमसि विवृद्धे मूढयोनिषु पश्वादियोनिषु जायते।।१५।।

अतीतश्लोकार्थस्यैव संक्षेप उच्यते-कर्मणः सुकृतस्य सात्त्विकस्येत्यर्थः। आहुः शिष्टाः

सात्त्विकमेव निर्मलं फलमिति। रजसस्तु फलं दुःखं राजसस्य कर्मण इत्यर्थः। कर्माधिकारात्फलमपि दुःखमेव कारणानुरूप्याद्राजसमेव। तथाऽज्ञानं तमसस्तामसस्य कर्मणोऽधर्मस्य पूर्ववत्।।१६।।

किंच गुणेभ्यो भवति-सत्त्वादिति। सत्त्वाल्लब्धात्मकात्संजायते समुत्पद्यते ज्ञानं। रजसो लोभ एव च। प्रमादमोहौ चोभौ तमसो भवतोऽज्ञानमेव च भवति।।१७।।

किंच-ऊर्ध्वमिति। ऊर्ध्वंगच्छन्चि देवलोकादिषूत्पद्यन्ते सत्त्वस्थाः सत्त्वगुणवृत्तस्थाः। मध्ये तिष्ठन्ति मनुष्यषूत्पद्यन्ते राजसाः। जघन्यगुणवृत्तस्था जघन्यश्चासौ गुणश्च जघन्यगुणस्तमस्तस्य वृत्तं निद्रालस्यादि तस्मिन्स्थिता जघन्यगिणवृत्तस्था मूढा अधो गच्छन्ति पश्वादिषूत्पद्यन्ते तामसाः।।१८।।

पुरुषस्य प्रकृतिस्थत्वरूपेण मुथ्याज्ञानेन युक्तस्य भोग्येषु गुणेषु सुखदुःखमोहात्मकेषु सुखी दुऋखी मूढोऽहमस्मीत्येवंरूपो यः सङ्गस्तत्कारणं पुरुषस्य सदसद्योनिजन्मप्राप्तिलक्षणस्य संसारस्येति समासेन पूर्वाध्याये यदुक्तं तदिह 'सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः'इत्यत आरभ्य गुणस्वरूपं गुणवृत्तं स्ववृत्तेन च गुणानां बन्धकत्वं गुणवृत्तनिबद्धस्य च पुरुषस्य या गतिरित्येतत्सर्वं मिथ्याज्ञानमज्ञानमूलं च बन्धकारणं विस्तरेणोकत्वाधुना सम्यग्दर्शनान्मोक्षो वक्तव्य इत्याह भगवान्-नान्यमिति। नान्यं कार्यकरणविषयाकारपरिणतेभ्यो गुणेभ्यः कर्तारमन्यं यदा द्रष्टा विद्वान्सन्नानुपश्यति। गुणा एव सर्वावस्थाः सर्वकर्मणां कर्तार इत्येवं पश्यति। गुणेभ्यश्च परं गुणव्यापारसाक्षिभूतं वेत्ति मद्भावं मम भावं द्रष्टाधिगच्छति।।१९।।

कथमधिगच्छतीत्युच्यते-गुणानीति। गुणानेतान्यथोक्तानतीत्य जीवन्नेवातिक्रम्य मायोपाधिभूतांस्त्रान्देही देहसमुद्भवान्देहोत्पत्तिबीजभूतान्, जन्ममृत्युजरादुःखैः, जन्म च मृत्युश्च जरा च दुःखानि च तैर्जीवन्नेव विनुक्तः सन्विद्वानमृतमश्नुते। एवं मद्भावमधिगच्छतीत्यर्थः।।२०।।

जीवन्नेव गुणानतीत्यामृतश्नुत इति प्रश्नबीजं प्रतिफलभ्यार्जुन उवाच-कैरिति।

कैर्लिङ्गैश्चिह्नैस्त्रीन्गुणानतिवर्तते।।२१।।

गुणातीतस्य लक्षणं गुणातीतत्वोपायं चार्जुनेन पृष्टोऽस्मिञ्श्लोके प्रश्नद्वयार्थं प्रतिवचनं भगवानुवाच। यत्तावत्कैर्लिङ्गैर्युक्तो गुणातीतो भवति तच्छृणुष्व-प्रकाशमिति। प्रकाशं च सत्त्वकार्यं प्रवृत्तिं च रजःकार्यं मोहमेव च तमःकार्यमित्येतानि न द्वेष्टि संप्रवृत्तानि सम्यग्विषयभावेनोदभूतानि। मम तामसः प्रत्ययो जातस्तेनाहं मूढस्तथा राजसी प्रवृत्तिर्ममोत्पन्ना दुःखात्मिका तेनाहं रजसा प्रवर्तितः प्रचलितः स्वरूपात्कष्टं मम वर्तते योऽयं मत्स्वरूपावस्थानाद्भ्रंशस्तथा सात्विको गुणः प्रकाशात्मा मां विवेकित्वमापादयन्सुखे च संजयन्बन्धातीति तानि द्वेष्ट्यसम्यग्दर्शित्वेन। तदेवं गुणातीतो न द्वेष्टि संप्रवृत्तानि। यथाच सात्विकादिपुरुषः सात्त्विकादिकार्याण्यात्मानं प्रति प्रकाश्य निवृत्तानि काङ्क्षति न तथा गुणातीतो निवृत्तानि काङ्क्षतात्यर्थः। एतन्न परप्रत्यक्षं लिङ्गं किं तर्हि स्वात्मप्रत्यक्षत्वादात्मविषयमेवैतल्लक्षणम्। नहि स्वात्मविषयं द्वेषमाकाङ्क्षां वा परः पश्यति।।२२।।

अथेदानीं गुणातीतः किमाचार इति प्रश्नस्य प्रतिवचनमाह-उदासीनेति। उदासीनवद्यथोदासीनो न कस्यचित्पक्षं भजते तथायं गुणातीतत्वोपायमार्गेऽवस्थित आसीन आत्मविद्गुणैर्यः संन्यासी न विचाल्यते विवेकदर्शनावस्थातः। तदेत्स्फुटीकरोति। गुणाः कार्यकारणविषयाकारपरिणता अन्योऽन्यस्मिन्वर्तन्त इति

योऽवतिष्ठति। छन्दोभङ्गभयात्परस्मैपदप्रयोगः। योऽनुतिष्ठतीति पाठान्तरम्। नेङ्गते न चलति। स्वरूपावस्थ एव भवतीत्यर्थः।।२३।।

किंच-समदुःखसुखः समे दुःखसुखे यस्य स समदुःखसुखः। स्वस्थः स्वात्मनि स्थितः प्रसन्नः। समलोष्टाश्मकाञ्चनो लोष्टं चाश्मा च काञ्चनं च समानि यस्य स समलोष्टाश्मकाञ्चनः। तुल्यप्रियाप्रियः प्रियं चाप्रियं च प्रियाप्रिये समे यस्य सोऽयं तुल्यप्रियाप्रियः। धीरो धीमान्। तुल्यनिन्दात्मसंस्तुतिः निन्दा चात्मसंस्तुतिश्च तुल्ये निन्दात्मसंस्तुती यस्य यतेः स

तुल्यनिन्दात्मसंस्तुतिः।।२४।।

किंच-मानापमानयोरिति। मानापमानयोस्तुल्यः समो निर्विकारः। तुल्यो मित्रारिपक्षयोः, यद्यप्युदासीना भवन्ति केचेत्स्वाभिप्रायेण तथापि पराभिप्रायेण मित्रारिपक्षयोरिव भवन्तीति तुल्यो मित्रारिपक्षयोरित्याह। सर्वारम्भपरित्यागी दृष्टादृष्टार्थानि कर्माण्यारभ्यन्त इत्यारम्भाः सर्वानारम्भान्परित्युक्तुं शीलमस्येति सर्वारम्भपरित्यागी देहधारणमात्रनिमित्तव्यतिरेकेण सर्वकर्मपरित्यागीत्यर्थः। गुणातीतः स उच्यते। उदासीनवदित्यादि गुणातीतः स उच्यत इत्येतदन्तमुक्तं यावद्यन्तसाध्यं तावत्संत्यासिनानुष्ठेयं गुणातीतत्वसाधनं मुमुक्षोः स्थिरीभूतं तु स्वसंवेद्यं सद्गुणातीतस्य यतेर्लक्षणं भवतीति।।२५।।

अधुना कथं च त्रीन्गुणानतिवर्तत इति प्रश्नस्य प्रतिवचनमाह-मां चेति। मां चेश्वरं नारायणं सर्वभूतहृदयाश्रितं यो यतिः कर्मी वाऽव्यभिचारेण न कदाचिद्यो व्यभिचरति भक्तियोगेन भजनं भक्तिः सैव योगस्तेन विवेकज्ञानात्मकेन भक्तियोगेन सेवते स गुणान्समतीत्यैतान्यथोक्तान्ब्रह्मभूयाय भवनं भूयो ब्रह्मभूयाय ब्रह्मभवनाय मोक्षाय कल्पते। समर्थो भवतीत्यर्थः।।२६।।

कीदृशस्य ब्रह्मणोऽमृतस्याविनाशिनोऽव्ययस्याविकारिणः शाश्वतस्य च नित्यस्य धर्मस्य ज्ञानयोगधर्मप्राप्यस्य सुखस्यानन्दरूपस्यैकान्तिकस्याव्यभिचारिणः। अमृतादिस्वभावस्य परमात्मनः प्रत्यगात्मा प्रतिष्ठा सम्यग्ज्ञानेन परमात्मतया निश्चीयते। तदेतद्ब्रह्मभूयाय कल्पत इत्युक्तम्। यया

चेश्वरशक्तया भक्तानुग्रहादिप्रयोजनाय ब्रह्म प्रतिष्ठते प्रवर्तते सा शक्तिर्ब्रह्मैवाहं शक्तिशक्तिमतोरनन्यत्वादित्यभिप्रायः। अथवा ब्रह्मशब्दवाच्यत्वात्सविकल्पकं ब्रह्म तस्य ब्रह्मणो निर्विकल्पकोऽहमेव नान्यः प३तिष्ठाश्रयः किंविशिष्टस्यामृतस्यामरणधर्मकस्याव्ययस्य व्ययरहितस्य। किंच शाश्वतस्य च नित्यस्य धर्मस्य ज्ञाननिष्ठालक्षणस्य सुखस्य तज्जनितस्यैकान्तिकनियतस्य च प्रतिष्ठाहमिति वर्तते।।२७।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यपूज्यपादश्रीमदाचार्यश्रीशंकरभगवतः कृतौ श्रीभगवद्गीताभाष्ये गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः।।१४।।

पञ्चदशोऽध्यायः

यस्मान्मदचीनं कर्मिणां कर्मफलं ज्ञानिनां च ज्ञानफलमतो भक्तियोगेन मां ये सेवन्ते ते मत्प्रसादाज्ज्ञानप्राप्तिक्रमेण गुणातीता मोक्षं गच्छन्ति किमु वक्तव्यमात्मनस्तत्त्वमेव सम्यग्विजानन्त इत्यतो भगवानर्जुनेनापृष्टमप्यात्मनस्तत्त्वं विवक्षुरुवाच-ऊर्ध्वमूलमित्यादि। तत्र तावद्वृक्षरूपक कल्पनया वैराग्यहेतोः संसारस्वरूपं वर्णयति, विरक्तस्य हि संसाराद्भगवत्तत्त्वज्ञानेऽधिकारो नान्यस्येति-ऊर्ध्वमूलमिति। ऊर्ध्वमूलं कालतः सूक्ष्मत्वात्कारणत्वान्नित्वान्महत्त्वाच्चोर्ध्वमुच्यते ब्रह्माव्यक्तमायाशक्तिमत्तन्मूलस्येति सोऽयं संसारवृक्ष ऊर्ध्वमूलं कालतः सूक्ष्मत्वात्कारणत्वान्नित्यत्वान्महत्त्वाच्चोर्ध्वमुच्यते ब्रह्माव्यक्तमायाशक्तिमत्तन्मूलस्येति सोऽयं संसारवृक्ष ऊर्ध्वमूलः। श्रुतेश्च 'ऊर्ध्वमूलोऽवाक्शाखः' इति। पुराणे च 'अव्यक्तमूलप्रभवस्तस्यैवानुग्रहोत्थितः। बुद्धिस्कन्धमयश्चैव इन्द्रियान्तरकोटरः।। महाभूतविशाखश्च विषयैः पत्रवांस्तथा। धर्माधर्मसुपुष्पश्च सुखदुःखफलोदयः।। आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः। एतद्ब्रह्मवनं चैव ब्रह्माचरति नित्यशः।। एतच्छित्त्वा च भित्त्वा च ज्ञानेन परमासिना। ततश्चात्मरतिं प्राप्य यस्मान्नावर्तते पुनः।।' इत्यादि। तमूर्ध्वमूलं संसारं मायामयं वृक्षमधःशाखं महदहंकारतन्मात्रादयः शाखा इवास्याधो भवन्तीति सोऽयमधःशाखस्तमधःशाखं न श्वोऽपि स्थातेत्यश्वत्थस्तं क्षणप्रध्वंसिनमश्वत्थं प्राहुः कथयन्ति। अव्ययं संसारमायामयमनादिकालप्रवृत्तत्वात्सोऽयं

संसारवृक्षोऽव्ययोऽनाद्यनन्तदेहादिसंतानाश्रयो हि सुप्रसिद्धस्तमव्ययम्। तस्यैव संसारवृक्षस्येदमन्यद्विशेषणं छन्दांसि छादनादृग्यजुःसामलक्षणानि यस्य संसारवृक्षस्य पर्णानीव पर्णानि। यथा वृक्षस्य परिरक्षणार्थानि पर्णानि तथा वेदाः संसारवृक्षपरिरक्षणार्थाः धर्माधर्मतद्धेतुफलप्रकाशनार्थत्वात्। यथाव्याख्यातं संसारवृक्षं समूलं यस्तं वेद स वेदविद्वेदार्थविदित्यर्थः। नहि संसारवृक्षादस्मात्समूलाज्ज्ञेयोऽन्योऽणुमात्रोऽप्यवशिष्टोऽस्ति। अतः सर्वज्ञः स यो वेदार्थविदिति समूलवृक्षज्ञानं स्तौति।।१।।

तस्यैव संसारवृक्षस्यापरावयवकल्पनोच्यते-अधो मनुष्यादिभ्यो यावत्स्थावरमूर्ध्वं च यावद्ब्रह्मा विश्वसृजो धर्म इत्येतदन्तं यथाकर्म यथाश्रुतं ज्ञानकर्मफलानि तस्य वृक्षस्य शाखा इव शाखाः प्रसृताः प्रगताः गुणप्रवृद्धा गुणैः

सत्त्वरजस्तमोभिः प्रवृद्धाः स्थूलीकृता उपादानभूतैर्विषयप्रवाला विषयाः शब्दादयः प्रवाला इव देहादिकर्मफलेभ्यः शाखाभ्योऽङ्कुरीभवन्तीव तेन विषयप्रवालाः शाखाः। संसारवृक्षस्य

परममूलमुपादानं कारणं पूर्वमुक्तमथेदानीं कर्मफलजनितरागद्वेषादिवासना मूलानीव धर्माधर्मप्रवृत्तिकारणान्यवान्तरभावीनि तान्यधश्च देहाद्यपेक्षया मूलान्यनुसंततान्यनुप्रविष्टानि कर्मानुबन्धीनि कर्म धर्माधर्मलक्षणमनुबन्धः पश्चाद्भावी येषामुद्भूतिमनुभवन्तीति तानि कर्मानुबन्धीनि मनुष्यलोके। विशेषतोऽत्र हि मनुष्याणां कर्माधिकारः प्रसिद्धः।।२।।

यस्त्वयं वर्णितः संसारवृक्षः-न रूपेति। न रूपमस्येह यथा वर्णितं तथा नैवोपलभ्यते स्वन्पमरीच्युदकमायागन्धर्वनगरसमत्वाद्दृष्टनष्टस्वरूपो हि स इत्यत एव नान्तो न पर्यन्तो निष्ठा समाप्तिर्वा विद्यते। तथा न चादिरित आरभ्यायं प्रवृत्त इति न केन चिद्गम्यते। नच संप्रतिष्ठा

स्थितिर्मध्यमस्य न केनचिदुपलभ्यते। अश्वत्थमेनं यथोक्तं सुविरूढमूलं सुष्ठु विरूढानि विरोहं गतानि

मूलानि यस्य तमेनं सुविरूढमूलमसङ्गशस्त्रेणासङ्गः पुत्रवित्तलोकैषणादिभ्यो व्युत्थानं तेनासङ्गशस्त्रेण दृढेन परमात्माभिमुखनिश्चयदृढीकृतेन पुनःपुनर्विवेकाभ्यासाश्मनिशितेन छित्त्वा संसारवृक्षं सबीजमुद्धृत्य।।३।।

तत इति। ततः पश्चात्पदं वैष्णवं तत्परिमार्गितव्यं। परिमार्गणमन्वेषणं। ज्ञातव्यमित्यर्थः। यस्मिन्पदे गताः प्रविष्टा न निवर्तन्ते भूयः पुनः संसाराय। कथं परिमार्गितव्यमित्याह। तमेव च यः पदशब्देनोक्त आद्यमादौ भवं पुरुषं प्रपद्य इत्येवं परिमार्गितव्यं तच्छरणतयेत्यर्थः। कोऽसौ पुरुष इत्युच्यते यतो यस्मात्पुरुषात्संसारमायावृक्षप्रवृत्तिः प्रसृता निःसृतैन्द्रजालिकादिव माया पुराणी चिरंतनी।।४।।

कथंभूतास्तत्पदं गच्छन्तीत्युच्यते-निर्मानेति। निर्मानमोहा मानश्च मोहश्च मानमोहौ तौ निर्गतौ येभ्यस्ते निर्मानमोहा मानमोहवर्जिताः जितसङ्गदोषाः सङ्ग एव दोषः सङ्गदोषो यैस्ते जितसङ्गदोषाः अध्यात्मनित्याः परमात्मस्वरूपालोचननित्यास्तत्पराः विनिवृत्तकामाः विशेषतो निर्लेपेन निवृत्ताः कामा येषां ते विनिवृत्तकामा यतयः संन्यासिनो द्वन्द्वैः प्रियाप्रियादिभिर्विमुक्ताः सुखदुःखसंज्ञैः परित्यक्ता गच्छन्त्यमूढा मोहवर्जिताः पदमव्ययं तद्यथोक्तम्।।५।।

तदेव पदं पुनर्विशिष्यते-नेति। तद्धामेति व्यवहितेन धास्ना संबन्धः। धाम तेजोरूपं पदं न भासयते सूर्य आदित्यः सर्वावभासनशक्तिमत्वेऽपि सति। तथा न शशाङ्कश्चन्द्रो न पावको नाग्निरपि। यद्धाम वैष्णवं पदं गत्वा प्राप्य न निवर्तन्ते यच्च सूर्यादिर्न तद्धाम पदं परमं मम विष्णोः।।६।।

यद्गत्वा न निवर्तन्त इत्युक्तम्। ननु सर्वा हि गतिरागत्यन्ता, 'संयोगा विप्रयोगान्ताः' इति हि प्रसिद्धं, कथमुच्यते तद्धामगतानां नास्ति निवृत्तिरिति, श्रृणु तत्र कारणम्-ममैवेति। ममैव परमात्मनोंऽशो भागोऽवयव एकदेश इत्यनर्थान्तरम्। जीवलोके जीवानां लोके संसारे जीवभूतो भोक्ता कर्तेति प्रसिद्धः सनातनः। यथा जलसूर्यकः। सूर्यांशो जलनिमित्तापाये सूर्यमेव गत्वा न निवर्तते तथाऽयमप्यं शस्तेनैवात्मना संगच्छत्येवमेव, यथावा घटाद्युपाधिपरिच्छिन्नो घटाद्याकाश आकाशांशः सन्घटादिनिमित्तापाये आकाशं प्राप्य न निवर्तत इत्येवमत उपपन्नमुक्तं यद्गत्वा न निवर्तन्त इति। ननु निरवयवस्य परमात्मनः कुतोऽवयव एकदेशोंऽश इव कल्पितो यतः। दर्शितश्चायमर्थः क्षेत्राध्याये विस्तरशः। स च जीवो मदंशत्वेन कल्पितः कथं संसरत्युत्क्रामतीति चेत्युच्यते, मनः षष्ठानीन्द्रियाणि श्रोत्रादीनि प्रकृतिस्थानि स्वस्थाने कर्णशष्कुल्यादौ प्रकृतौ स्थितानि कर्षत्याकर्षति।।७।।

कस्मिन्काले-शरीरमिति। यच्चापि यदा चाप्युत्क्रामतीश्वरो देहादिसंघातस्वामी जीवस्तदा कर्षतीति श्लोकस्य द्वितीयपादोऽर्थवशात्प्राथम्येन संबध्यते। यदा च पूर्वस्माच्छरीराच्छरीरान्तरमान्पोति तदा गृहीत्वैतानि

मनःषष्ठानीन्द्रियाणि संयाति सम्यग्यति गच्छति। किमिवेत्याह। वायुः पवनो गन्धानिवाशयात्पुष्पादेः।।८।।

कानि पुनस्तानीति-श्रोतमिति। श्रोत्रं चक्षुः स्पर्शनं च त्वगिन्द्रियं रसनं च घ्राणमेव च मनश्च षष्ठं प्रत्येकमिन्द्रियेण सहाधिष्ठाय देहस्थो विषयाञ्शब्दादीनुपसेवते।।९।।

एवं देहगतं देहात्-उत्क्रामन्तं परित्यजन्तं देहं पूर्वोपात्तं स्थितं वा देहे तिष्ठन्तं भुञ्जानं वा शब्दादींश्चोपलभमानं गुणान्वितं सुखदुःखमोहाख्यैर्गुणैरन्वितमनुगतं संयुक्तमित्यर्थः। एवंभूतमप्येनमत्यन्तदर्शनगोचरप्राप्तं विमूढा दृष्टादृष्टविषयभोगबलाकृष्टचेतस्तयानेकधा मूढा

नानुपश्यन्त्यहो कष्टं वर्तत इत्यनुक्रोशति च भगवान्। येतु पुनः प्रमणजनितज्ञानचक्षुषस्त एनं पश्यन्ति ज्ञानचक्षुषो विवित्तदृष्टय

इत्यर्थः।।१०।।

केचित्तु-यतन्तः प्रयन्तः प्रयन्तं कुर्वन्तो योगिनश्च समाहितचित्ता एनं प्रकृतमात्मानं पश्यन्त्ययमहमस्मीत्युपलभन्त आत्मनि स्वस्यां बुद्धाववस्थितं यतन्तोऽपि शास्त्रादिप्रमाणैरकृतात्मनोऽसंस्कृतात्मानस्तपसेन्द्रियजयेन च दिश्चरितादनुपरता अशान्तदर्पात्मानः प्रयत्नं किर्वन्तोऽपि नैनं पश्यन्त्यचेतसोऽविवेकिनः।।११।।

यत्पदं सर्वस्यावभासकमप्यग्न्यादित्यादिकं ज्योतिर्नावभासयते, यत्प्राप्ताश्च मुमुक्षवः पुनः संसाराभिमुखा न निवर्तन्ते यस्य च पदस्योपाधिभेदमनुविधीयमाना जीवा घटाकाशादय इवाकाशस्यांशास्तस्य पदस्य सर्वात्मत्वं सर्वात्मवं सर्वव्यवहारास्पदत्वं च विवक्षुश्चतुर्भिः श्लोकैर्विभूतिसंक्षेपमाह भगवान्-यदिति। यदादित्यगतमादित्याश्रयं। किं तत् तेजो दीप्तिः प्रकाशो जगद्भासयते प्रकाशयत्यखिल समस्तं यच्चन्द्रमसि शशभृति तत्तेजोऽवभासकं वर्त्तते यच्चाग्नौ हुतवहे तत्तेजो विद्धि विजानीहि मामकं मदीयं मम विष्णोस्तज्जयोतिः। अथवा यदादित्यगतं तेजश्चैतन्यात्मकं ज्योतिर्यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं मदीयं मम विष्णोस्तज्जयोतिः। ननु स्थावरेषु जङ्गमेषु च तत्समानं चैतन्यात्मकं ज्योतिस्तत्र कथमिदं विशेषणं यदादित्यगतमित्यादि। नैष दोषः सत्त्वाधिक्यादाधिक्योपपत्तेः। आदित्यादिषु हि सत्त्वमत्यन्तप्रकाशमत्यन्तभास्वरमतस्तत्रैवाविस्तरं ज्योतिरित तद्विशिष्यते, नतु तत्रैव तदधिकमिति। यथा हि लोके तिल्येऽपि मुखसंस्थाने न काष्ठकुड्यादौ तु स्वच्छे स्वच्छतरे च तारतम्येनाविर्भवति।।१२।।

किंच-गामिति। गां पृथिवीमाविश्य प्रविश्य धारयामि भूतानि जगदहमोजसा बलेन यद्बलं कामरागविवर्जितमैश्वरं जगद्विधारणाय पृथिव्यां प्रविष्टं येन गुर्वी पृथिवी नाधः पतति न विदार्यते च। तथाच मन्त्रवर्णः 'येन द्यौरुग्रा पृथिवी च दृढा' इति 'स दाधार पृथिवीम्' इत्यादिश्च। अतो गामाविश्य च भूतानि चराचराणि धारयामीति युक्तमुक्तम्। किंच पृथिव्यां जाता ओषधीः सर्वा व्रीहियवाद्याः पुष्णामि पुष्टिमती रसस्वादुमतीश्च करोमि सोमो भूत्वा रसात्मकः सोमः सर्वरसात्मको रसस्वभावः सर्वरसानामाकरः सोमः। स हि सर्वा ओषधीः स्वात्मरसानुप्रवेशेन

पुष्णाति।।१३।।

किंच-अहमिति। अहमेव वैश्वानर उदरस्थोऽग्निर्भूत्वा 'अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते' इत्यादिश्रुतेर्वैश्वानरः सन्प्राणिनां प्राणवतां देहमाश्रितः प्रविष्टः प्राणापानसमायुक्तः प्राणापानाभ्यां समायुक्तः संयुक्तः पचामि पक्तिं करोमि चतुर्विधं चतुष्प्रकारमन्नमशनं भोज्यं भक्ष्यं चोष्यं लेह्यं च भोक्ता वैश्वानरोऽग्निर्भोज्यमन्नं सोमस्तदेतदुभयमग्नीषोमौ सर्वमिति पश्यतोऽन्नदोषलेपो न भवति।।१४।।

किंच-सर्वेति। सर्वस्य प्राणिजातस्याहमात्मा सन्हृदि बुद्धौ संनिविष्टोऽतो मत्त आत्मनः

सर्वप्राणिनां स्मृतिर्ज्ञानं तदपोहनं च। येषां पुण्यकर्मानुरोधेन ज्ञानस्मृती भवतस्तथा पापकर्मिणां पापकर्मानुरूपेण स्मृतिज्ञानयोरपोहनं चापायनमपगमनं च। वेदैश्च सर्वैरहमेव परमात्मा वेद्यो वेदितव्यो वेदान्तकृद्वेदान्तार्थसंप्रदायकृदित्यर्थः। वेदविद्वेदार्थविदेव चाहम्।।१५।।

भगवत ईश्वरस्य नारायणाख्यस्य विभूतिसंक्षेप उक्तो विशिष्टोपाधिकृतो यदादित्यगतं तेज इत्यादिना, अथाधुना तस्यैव क्षराक्षरोपाधिप्रविभक्ततया निरुपाधिकस्य केवलस्य स्वरूपनिर्दिधारयिषयोत्तरश्लोका आरभ्यन्ते। तत्र सर्वमेवातीतानागतानन्तराध्यायार्थजातं त्रिधा राशीकृत्याह-द्वाविमाविति। द्वाविमौ पृथग्राशीकृतौ पुरुषावित्युच्येते लोके संसारे। क्षरश्च क्षरतीति क्षरो विनाश्येको राशिरपरः पुरुषोऽक्षरस्तद्विपरीतो ऊगवतो मायाशक्तिः क्षराख्यस्य

स्वयमेव भगवान् क्षरः सर्वाणि भूतानि समस्तं विकारजातमित्यर्थः। कूटस्थः कूटो माया वञ्चना जिह्नता कुटिलतेति पर्यायाः, अनेकमायादिप्रकारेण स्थितः कूटस्थः संसारबीजानन्त्यान्न क्षरतीत्यक्षरं उच्यते।।१६।।

आरभ्यां क्षराक्षराभ्यां विलक्षणः क्षराक्षरोपाधिद्वयदोषेणास्पृष्टो नित्यशुद्धबुद्धमुक्तस्वभावः-उत्तम उत्कृष्टतमः

पुरुषस्त्वन्योऽत्यन्तविलक्षण आभ्यां परमात्मेति परमश्चासौ देहाद्यविद्याकृतात्मभ्य आत्मा च सर्वभूतानां प्रत्यक्चेतनइत्यतः परमात्मेत्युदाहृत उक्तो वेदान्तेषु। स एव विशेष्यते यो लोकत्रयं भूर्भुवःस्वराख्यं स्वकीयया चैतन्यबलशक्तयाविश्य प्रविश्य बिभर्ति स्वरूपसद्भावमात्रेण बुभर्ति धारयत्यव्ययो नास्य व्ययो विद्यत इत्यव्यय ईश्वरः सर्वज्ञो नारायणाख्य ईशनशीलः।।१७।।

यथाव्याख्यातस्येश्वरस्य इत्यात्मानं दर्शयति भगवान्-यस्मादिति। यस्मात्क्षरमतीतोऽहं संसारमायावृक्षमश्वत्थाख्यमतिक्रान्तोऽबमक्षरादपि संसारवृक्षबीजभूतादपि चोत्तम उत्कृष्टतम ऊर्ध्वतमो वातः क्षराक्षराभ्यामुत्तमत्वादस्मि भवामि लोके वेदे च प्रथितः प्रख्यातः पुरुषोत्तम इत्येवं मां भक्तजना विदुः कवयः काव्यादिषु चेदं नाम निबन्धन्ति पुरुषोत्तम इत्यनेनाभिधानेनाभिगृणन्ति।।१८।।

अथेदानीं यथानिरुक्तमात्मानं यो वेद तस्येदं फलमुच्यते-यो मामिति। यो मामीश्वरं यथोक्तविशषणमेवं यथोक्तेन प्रकारेणासंमूढः संमोहवर्जितः सन् जानात्ययमहमस्मीति पुरुषोत्तमं स सर्ववित्सर्वात्मना सर्वं वेत्तीति सर्वज्ञः सर्वभूतस्थं भजति मां सर्वभावेन सर्वात्मचित्ततया हे भारत।।१९।।

अस्मिन्नध्याये भगवत्तत्त्वज्ञानं मोक्षफलमुक्त्वाथेदानीं तत्स्तौति-इति गुह्यतममिति। इत्येतद्गुह्यतमं गोप्यतममत्यन्तरहस्येतत्। किं तच्छास्त्रम्। यद्यपि गीताख्यं समस्तं शास्त्रमुच्यते

तथप्ययमेवाध्याय इह शास्त्रमित्युच्यते स्तुत्यर्थं प्रकरणात्। सर्वो हि गीताशास्त्रार्थोऽस्मिन्नध्याये समासेनोक्ते न केवलं, सर्वश्च वेदार्थ इह परिसमाप्तो 'यस्तं वेद स वेदवित्', 'वेदैश्च सर्वैरहमेव वेद्यः' इति चोक्तम्। इदमुक्तं कथितं मया हेऽनघापाप। एतच्छास्त्रं यथादर्शितार्थं बुद्ध्वा बुद्धिमान्स्याद्भवेन्नान्यथा। कृतकृत्यश्च भारत कृतं कृत्यं कर्तव्यं येन स कृतकृत्यो विशिष्टजन्मप्रसूतेन ब्राह्मणेन यत्कर्तव्यं तत्सर्वं भगवत्तत्त्वे विदिते कृतं भवेदित्यर्थः। न चान्यथा कर्तव्यं परिसमाप्यते कस्यचिदित्यभिप्रायः। 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते' इति चोक्तम् 'एतद्धि जन्मसामग्र्यं ब्राह्मणस्य विशेषतः। प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा' इति च

मानवं वचनम्। यत एतत्परमार्थतत्त्वं मत्तः श्रुतवानसि ततः कृतार्थस्त्वं भारतेति।।२०।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यपूज्यपादश्रीमदाचार्यश्रीशंकरभगवतःकृतौ श्रीभगवद्गीताभाष्ये पुरुषोत्तमयोगो नाम पञ्चदशोध्यायः।।१५।।

षोडशोऽध्यायः।

दैव्यासुरी राक्षसी चेति प्रणिनां प्रकृतयो नवमेऽध्याये सूचितास्तासां विस्तरेण प्रदर्शनायाभयं सत्त्वसंशुद्धिरित्यादिरध्याय आरभ्यते, तत्र संसारमोक्षाय दैवी प्रकृतिर्निबन्धनायासुरी राक्षसी चेति दैव्या आदानाय प्रदर्शनं क्रियत इतरयोः परिवर्जनाय क्षीभगवानुवाच-अभयमिति। अभयमभीरुता, सत्त्वसंशुद्धिः सत्तवस्यान्तःकरणस्य संव्यवहारेषु परवञ्चनमायानृतादिपरिवर्जनं शुद्धभावेन व्यवहार इत्यर्थः। ज्ञानयोगव्यवस्थितिः ज्ञानं शास्त्रत आचार्यतश्चात्मादिपदार्थानामवगमः, अवगतानामिन्द्रियाद्युपसंहारेणैकाग्रतया स्वात्मसंवेद्यतापादनं योगस्तयोर्ज्ञानयोगयोर्व्यवस्थितिर्व्यवस्थानं तन्निष्ठतैषा प्रधाना दैवी सात्त्विकी संपत्। यत्र च येषामधिकृतानां या प्रकृतिः संभवति सात्त्विकी सोच्यते। दानं यथाशक्ति संविभागोऽन्नादीनां, दमश्च बाह्यकरणानामुपशमोऽन्तःकरणस्योपशमं शान्तिं वक्ष्यति, यज्ञश्च श्रौतोऽग्निहोत्रादिः, स्मार्तष्च देवयज्ञादिः, स्वाध्याय ऋग्वेदाद्यध्ययनमदृष्टार्थं, तपो वक्ष्यमाणं शरीरादि, आर्जवमृजुत्वं सर्वदा।।१।।

किंच-अहिंसेति। अहिंसाऽहिंसनं प्रणिनां पीडावर्जनं, सत्यमप्रियानृतवर्जितं यथाभूतार्थवचनम्, अक्रोधः परैराक्रुष्टस्याभिहतस्य वा प्राप्तस्य क्रोधस्योपशमनं, त्यागः संन्यासः पूर्वं दानस्योक्तत्वात्, शान्तिरन्तःकरणस्योपशमः, अपैशुनमपिशुनता परस्मै पररन्ध्रप्रकटीकरणं पैशुनं तदभावोऽपैशुनं, दया कृपा भूतेषु

दुःखितेषु, अलोलुप्त्वमिन्द्रियाणां विषयसंनिधावविक्रिया, मार्दवं मृदुताऽक्रौर्यं, ह्रीर्लज्जा, अचापलमसति प्रयोजने वाक्पाणिपादादीनामव्यापारयितृत्वम्।।२।।

किंच-तेज इति। तेजः प्रागल्भ्यं न त्वग्गता दीप्तिः, क्षमाऽऽक्रुष्टस्य ताडितस्य वान्तर्विक्रियानुत्पत्तिरुत्पन्नायां विक्रियायां प्रशमनमक्रोध इत्यवोचाम, इत्थं क्षमाया अक्रोधस्य च विशेषः, धृतिर्देहेन्द्रियेष्ववसादं प्राप्तेषु तस्य प्रतिषेधकोऽन्तःकरणवृत्तिविशेषो येनोत्तम्भितानि करणानि देहश्च नावसीदन्ति, शौचं द्विविधं, मृज्जलकृतं बाह्यमाभ्यन्तरं च मनोबुध्द्योर्नैर्मल्यं मायारागादिकालुष्याभाव एवं द्विविधं शौचम्, अद्रोहः परजिघांसाभावोऽहिंसनं, नातिमानितात्यर्थं

मानोऽतिमानः स यस्य विद्यते सोऽतिमानिता तदभावो नातिमानिता,

आत्मनः पूज्यतातिशयभावनाभाव इत्यर्थः। भवन्त्यभयादीन्येतदन्तानि संपदमभिदातस्य। किंविशिष्टां संपदं, दैवीं देवानां संपदमभिलक्ष्य दातस्य दैवविभूत्यर्हस्य भाविकल्याणस्येत्यर्थः, हे भारत।।३।।

अथेदानीमासुरी संपदुच्यते-दम्भो धर्मध्वजित्वम्, दर्पो धनस्वजनादिनिमित्त उत्सेकोऽतिमानः पूर्वोक्तः क्रोधश्च, पारुष्यमेव पारुष्यमेव परुषवचनं यथा काणं चक्षुष्मान्, विरूपं रूपवान्, हीनाभिजनमुत्तमाभिजन इत्यादि। अज्ञानं चाविवेकज्ञानं मिथ्याप्रत्ययः कर्तव्याकर्तव्यादिविषयमभिजातस्य पार्थ। किमभिजातस्येत्याह-असुराणां संपदासुरी तामभिजातस्येत्यर्थः।।४।।

अनयोः संपदोः कार्यमुच्यते-दैवीति। दैवी संपद् या सा विमोक्षाय संसारबन्धनात्, निबन्धाय नियतो बन्धो निबन्धस्तदर्थमासुरी संपन्मताभिप्रेता तता राक्षसी। तत्रैवमुक्तेऽर्जुनस्यान्चतर्गतं भावं किमहमासुरसंपद्युक्तः किंवा दैवीसंपद्युक्त इत्येवमालोचनारूपमालक्ष्याह भगवान्-मा शुचः शोकं मा कार्षीः। संपदं दैवीमभिजातोऽस्यभिलक्ष्य जातोऽसि भाविकल्याणस्त्वमसीत्यर्थः। हे पाण्डव।।५।।

द्वौ भूतेति। द्वौ द्विसंख्याकौ भूतसर्गौ भूतानां मनुष्याणां सर्गौ सृष्टा भूतसर्गौ सृज्येते इति सर्गौ भूतान्येव सृज्यमानानि दैवासुरसंपद्युक्तानि द्वौ भूतसर्गावित्युच्यते, 'द्वया ह प्राजापत्या देवाश्चासुराश्च' इति श्रुतेः। लोकेऽस्मिन्संसार इत्यर्थः। सर्वेषां द्वैविध्योपपत्तेः। कौ तौ भूतसर्गावित्युच्येते प्रकृतावेव दैव आसुर एव च। उक्तयोरेव पुनरनुवादे प्रयोजनमाह-दैवो भूतसर्गोऽभयं सत्त्वसंशुद्धिरित्यादिना विस्तरशो विस्तरप्रकारैः प्रोक्तः कथितो न त्वासुरो विस्तरशोऽतस्तत्परिवर्जनार्थमासुरं पार्थ, मे मम वचनादुच्यमानं विस्तरशः श्रृण्ववधारय।।६।।

अध्यायपरिसमाप्तेरासुरी संपत्प्राणिविशेषणत्वेन प्रदर्श्यते प्रत्यक्षीकरणेन च शक्यतेऽस्याः परिवर्जनं कर्तुमिति-प्रवृत्तिमिति। प्रवृत्तिं च प्रवर्तनं यस्मिन्पुरुषार्थसाधने कर्तव्ये प्रवृत्तिस्तां, निवृत्तिं च तद्विपरीतां यस्मादनर्थहेतोर्निवर्तितव्यं सा निवृत्तिस्तां च जना आसुरा न विदुर्न जानन्ति। न केवलं प्रवृत्तिनिवृत्ती एव न विदुर्न शौचं नापि चाचारो न सत्यं तेषु विद्यते। अशौचा अनाचारा मायाविनोऽनृतवादिनो ह्यासुराः।।७।।

किंच-असत्येति। असत्यं यथा वयमनृतप्रायास्तथेदं जगत्सर्वमसत्यमप्रतिष्ठं च नास्य धर्माधर्मौ प्रतिष्ठातोऽप्रतिष्ठं चेति त आसुरा जना जगदाहुरनीश्वरं नच धर्माधर्मसव्यपेक्षकोऽस्य शासितेश्वरो विद्यत इत्यतोऽनीश्वरं जगदाहुः। किंचापरस्परसंभूतं कामप्रयुक्तयोः स्त्रीपुरुषयोरन्योन्यसंयोगाज्जगत्सर्वं संभूतम्। किमन्यत्कामहैतुकं कामहेतुकमेव कामहैतुकं किमन्यज्जगतः कारणं न किचिददृष्टं धर्माधर्मादि कारणान्तरं विद्यते जगतः काम एव प्रणिनां कारणमिति लोकयतिकदृष्टिरियम्।।८।।

एतामिति। एतां दृष्टिमवष्टभ्याश्रित्य नष्टात्मानो नष्टस्वभावा विभ्रष्टपरलोकसाधना अल्पबुद्धयोऽल्पविषयविषयाल्पैव बुद्धिर्येषां तेऽल्पबुद्धयः प्रभवन्त्युद्भवन्त्युग्रकर्माणः क्रूरकर्माणो हिंसात्मकाः क्षयाय जगतः प्रभवन्तीति संबन्धः। जगतोऽहिताः शत्रव इत्यर्थः।।९।।

ते च-काममिति। काममिच्छाविशेषमाश्रित्यावष्टभ्य दुष्पूरमशक्यपूरणं दम्भमानमदान्विता दम्भश्च मानश्च मदश्च दम्भमानमदास्तैरन्विता दम्भमानमदान्विताः मोहाद विवेकतो
गृहीत्वोपादायासद्ब्राहानशुभनिश्चयान्प्रवर्तन्ते लोकेऽशुचिव्रता अशुचीनि व्रतानि येषां

तेऽशुचिव्रताः।।१०।।

किंच-चिन्तेति। चिन्तामपरिमेयां च न परिमातुं शक्यतेऽस्याश्चिन्ताया इयत्ता साऽपरिमेया तामपरिमेयां प्रलयान्तां मरणान्तामुपाश्रिताः सदा चिन्तापरा इत्यर्थः। कामोपभोगपरमाः, काम्यन्त इथि कामाः शब्दादयस्तदुपभोगपरमाः, अयमेव परमः पुरुषार्थो यः कामोपभोग इत्येवं निश्चितात्मान एतावदिति

निश्चिताः।।११।।

आशापाशेति। आशापाशशतैराशा एव पाशास्तच्छतैराशापाशशतैर्बद्धा नियन्त्रिताः सन्तः सर्वत आकृष्यमाणाः कामक्रोधपरायणाः कामक्रोधौ परमयनं पर आश्रयो येषां ते कामक्रोधपरायणाः, ईहन्ते चेष्टन्ते कामभोगार्थं कामभोगप्रयोजनाय न तु धर्मार्थमन्यायेनार्थसंचयानर्थप्रचयानन्यायेन परस्वापहरणादिनेत्यर्थः।।१२।।

ईदृशश्च तेषामभिप्रयः इदमिति। इदं द्रव्यमद्येदानीं मया लब्धमिदमन्यत्प्रप्स्ये मनोरथं मनस्तुष्टिकरमिदं चास्तीदमपि मे भविष्यत्यागामिनि संवत्सरे पुनर्धनं तेनाहं धनी विख्यातो

भविष्यामि।।१३।।

असौ मयेति। असौ देवदत्तनामा मया हतो दुर्जयः शत्रुः, हनिष्ये चान्यान्वराकानपरानपि, किमेते करिष्यन्ति

तपस्विनः सर्वथापि नास्ति मत्तुल्य ईश्वरोऽहमहं भोगी सर्वप्रकारेण च सिद्धोऽहं संपन्नः पुत्रैः पौत्रैर्नप्तृभुर्न केवलं मानुषोऽहं बलवान्सुखी चाहमेवान्ये तु भूमिभारायावतीर्णाः।।१४।।

आढ्य इति। आढ्यो धनेनाभिजनेनाभिजनवान्सप्तपुरुषं श्रोत्रियत्वादिसंपन्नस्तेनापि न मम तुल्योऽस्ति कश्चित्कोऽन्योऽस्ति सदृशस्तुल्यो मया, किंच यक्ष्ये यागेनाप्यन्यानभिभविष्यामि दास्यामि नटादिभ्यो मोदिष्ये हर्षं चातिशयं प्राप्स्यामीत्येवमज्ञानेन विमोहिता अज्ञानविमोहिता विविधमविवेकभावमापन्नाः।।१५।।

अनेकेति। अनेकचित्तविभ्रान्ता उक्तप्रकारैरनेकैश्चित्तैर्विविधं भ्रान्ता अनेकचित्तविभ्रान्ता मोहजालसमावृता मोहोऽविवेकोऽज्ञानं तदेव जालमिवावरणात्मकत्वात्तेन समावृताः प्रसक्ताः कामभोगेषु तत्रैव निषण्णाःसन्तस्तेनोपचितकल्मषाः पतन्ति नरकेऽशुचौ वैतरण्यादौ।।१६।।

आत्मेति। आत्मसंभाविताः सर्वगुणविशिष्टतयात्मनैव संभाविता आत्मसंभाविता न साधुभिः, स्तब्धा अप्रणतात्मानो धनमानमदान्विता धननिमित्तो मानो मदश्च ताभ्यां धनमानमदाभ्यामन्विता यजन्ते नामयज्ञैर्नाममात्रैर्यज्ञैस्ते दम्भेन धर्मध्वजितयाऽविधिपूर्वकं विहिताङ्गेतिकरातव्यतारहितैः।।१७।।

अहमिति। अहंकारमहंकरणमहंकारो विद्यमानैरविद्यमानैश्च गुणैरात्मन्यध्यारोपितैर्विशिष्टमात्मानमहमिति मन्यते सोऽहंकारोऽविद्याख्यः कष्टतमः सर्वदोषाणां मूलं सर्वानर्थप्रवृत्तीनां च तथा बलं पराभिभवनिमित्तं कामरागान्वितं दर्पं दर्पो नाम यस्योद्भवे धर्ममतिक्रामतिसोऽयमन्तःकरणाश्रयो दोषविशेषः, कामं स्त्र्यादिविषयं क्रोधमनिष्टविषयमेतानन्यांश्च महतो दोषान्संश्रिताः। किंच ते मामीश्वरमात्मपरदेहेषु स्वदेहे परदेहेषु च तद्बुद्धिकर्मसाक्षिभूतं मां प्रद्विषन्तो मच्छासनातिवर्तित्वं प्रद्वेषस्तं कुर्वन्तोऽभ्यसूयकाः सन्मार्गस्थानां गुणेष्वसहमानाः।।१८।।

तानहमिति। तानहं सर्वान्सन्मार्गप्रतिपक्षभूतान्साधुद्वेषिणो द्विषतश्च मां क्रूरान्संसारेष्वेव

नरकसंसारणमार्गेषु नराधमानधर्मदोषवत्त्वात्क्षिपामि प्रक्षिपाम्यजस्रं संततमशुभानशुभकर्मकारिण आसुरीष्वेव क्रूरकर्मप्रायासु व्याघ्रसिंहादियोनिषु क्षिपामीत्यनेन संबन्धः।।१९।।

असुरीमिति। आसुरी योनिमापन्नाः प्रतिपन्ना मूढा जन्मनि जन्मन्यविवेकिनः प्रतिजन्म तमोबहुलास्वेव योनिषु जायमाना अधो गच्छन्तो मूढा मामीश्वरमप्राप्यानासाद्यैव हे कौन्तेय ततस्तस्मादपि यान्त्यधर्मा निकृष्टतमां गतिम्। मामप्राप्यैवेति न मत्प्राप्तौ काचिदप्याशङ्कास्त्यतो मच्छिष्टसाधुमार्गमप्राप्येत्यर्थः।।२०।।

सर्वस्या आसुर्याः संपदः संक्षेपोऽयमुच्यते, यस्मिंस्त्रिविधे सर्व आसुरीसंपद्भेदोऽनन्तोऽप्यन्तर्भवति यत्परिहारेण परिहृतश्च भवति, यन्मूलं सर्वस्यानर्थस्य तदेतदुच्यते-त्रिविधमिति। त्रिविधं त्रिप्रकारं नरकद्वारं नरकस्य प्राप्ताविदं द्वारं नाशनमात्मनो यद्द्वारं प्रविशन्नेव नश्यत्यात्मा कस्मैचित्पुरुषार्थाय योग्यो न भवतीत्येतदुच्यते द्वारं नाशनमात्मन इति किं तत्, कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्। यत एतद्द्वारं नाशनमात्मनस्तस्मात्कामादित्रयमेतत्त्यजेत्। त्यागस्तुतिरियम्।।२१।।

एतैरिति। एतैर्विमुक्तः कैन्तेय तमोद्वारैस्तमसो नरकस्य दिःखमोहात्मकस्य द्वाराणि

कामादयस्तैरेतैस्त्रिभिर्विमुक्तो नर आचरत्यनुतिष्ठति। किमात्मनः श्रेयो यत्प्रतिबद्धः पूर्वं नाचरति तदपगमादाचरति ततस्तदाचरणाद्यति परां गतिं मोक्षमपीति।।२२।।

सर्वस्यैतस्यासुरीपत्परिवर्जनस्य श्रेयआचरणस्य शास्त्रं कारणं शास्त्रप्रमाणादुभयं शक्यं कर्तुं नान्यथातो-यःशास्त्रेति। यः शास्त्रविधिं शास्त्रं वेदस्तस्य विधिं कर्तव्याज्ञानकारणं विधिप्रतिषेधाख्यमुत्सृज्य त्यक्त्वा

वर्तते कामकारतः कामप्रयुक्तः सन्न स सिद्धिं पुरुष्थयोग्यतामाप्नोति। नाप्यस्मिंल्लोके सुखं नापि परां प्रकृष्टां गतिं स्वर्गं मोक्षं वा।।२३।।

तस्मादिति। तस्माच्छास्त्रं प्रमाणं ज्ञानसाधनं ते तव कार्याकार्यव्यवस्थितौ कर्तव्याकर्तव्यव्यवस्थायामतो ज्ञात्वा बुद्ध्वा शास्त्रविधानोक्तं विधिर्विधानं शास्त्रेण विधानं शास्त्रविधानं कुर्यान्न कुर्यदित्येवलक्षणं तेनोक्तं स्वकर्म यत्तत्कर्तुमिहार्हसि। इहेति कर्माधिकारभूमिप्रदर्शनार्थमिति।।२४।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यपूज्यपादश्रीमदाचार्यश्रीशंकरभगवतः कृतौ श्रीभगवद्गीताभाष्ये दैवासुरसंपद्विभागयोगो नाम षोडशोऽध्यायः।।१६।।

सप्तदशोध्यायः।

स्माच्छास्त्रं प्रमाणं त इति भगवद्वाक्याल्लब्धप्रश्नबीजोऽर्जुन उवाच-ये शास्त्रेति। ये केचिदविशेषिताः शास्त्रविधिं शास्त्रविधानं श्रुतिस्मृतिशास्त्रचोदनामुत्सृज्य परित्यज्य यजन्ते देवादीन्पूजयन्ति श्रद्धयान्विताः श्रद्धयास्तिक्यबुद्ध्यान्विताः संयुक्ताः सन्तः श्रुतिलक्षणं स्मृतिलक्षणं वा कंचिच्छास्त्रविधिमपश्यन्तो वृद्धव्यवहारदर्शनादेव ये श्रद्दधानतया देवादीन्पूजयन्ति त इह ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विता इत्येवं गृह्यन्ते। ये पुनः कंचिच्छास्त्रविधिमुपलभमाना एव तमुत्सृज्य यथाविधि देवादीन्पूजयन्ति त इह ये शास्त्रविधिमुत्सृज्य यजन्ते इति न परिगृह्यन्ते।

कस्माच्छ्रद्धयान्वितत्वविशेषणात् देवादिपूजाविधिपरं किंचिच्छास्त्रं पश्यन्त एव तदुत्सृज्याश्रद्दधानतया तद्विहितायां देवादिपूजायां श्रद्धयान्विताः प्रवर्तन्त इति न शक्यं कल्पयितुं यस्मात्तस्मात्पूर्वोक्ता एव 'ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः' इत्यत्र गृह्यन्ते। तेषामेवंभूतानां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः किं सत्त्वनिष्ठावस्थानमाहोस्विद्रजोऽथ वा तमः। एतदुक्तं भवति-या तेषां देवादिविषया पूजा सा किं सात्त्विक्याहोस्विद्राजस्युत तामसीति।।१।।

सामान्यविषयोऽयं प्रश्नो नाप्रविभज्य प्रतिवचनमर्हतीति श्रीभगवानुवाच-त्रिविधेति। त्रिविधा त्रिप्रकारा भवति श्रद्धा। यस्यां निष्ठायां त्वं पृच्छसि देहिनां सा स्वभावजा। जन्मान्तरकृतो धर्मादिसंस्कारो मरणकालेऽभिव्यक्तः स्वभाव उच्यते ततो जाता स्वभावजा। सात्त्विकी सत्त्वनिर्वृत्ता देवपूजाविषया, राजसी रजोनिर्वृत्ता यक्षरक्षःपूजादिविषया, तामसी तमोनिर्वृत्ता प्रेतपिशाचादिपूजाविषयैवं त्रिविधा तामुच्यमानां श्रद्धां शृणु।।२।।

सैवं त्रिविधा भवति-सत्त्वेति। सत्त्वानुरूपा विशिष्टसंस्कारोपेतान्तःकरणानुरूपा सर्वस्य प्राणिजातस्य श्रद्धा भवति भारत। यद्येवं ततः किं स्यदित्युच्यते। श्रद्धामयः श्रद्धाप्रायोऽयं पुरुषः संसारी जीवः। कथं यो यच्छ्रद्धो या श्रद्धा यस्य जीवस्य स यच्छ्रद्धः स एव तच्छ्रद्धानुरूप एव स जीवः।।३।।

ततश्च कार्येण लिङ्गेन देवादिपूजया सत्त्वादिनिष्ठानुमेयेत्याह-यजन्त इति। यजन्ते पूजयन्ति सात्त्विकाः सत्त्वनिष्ठा देवान्, यक्षरक्षांसि राजसाः, प्रेतान् भूतगणांश्च सप्तमातृकादींश्चान्ये यजन्ते तामसा जनाः।।४।।

एवं कार्यतो निर्णीताः सत्त्वादिनिष्ठाः शास्त्रविध्युत्सर्गे तत्र कश्चिदेव सहस्रेषु देवपूजादितत्परः

सत्त्वनिष्ठो भवति, बाहुल्येन तु रजोनिष्ठाश्चैव प्राणिनो भवन्ति, कथम्-अशास्त्रेति। अशास्त्रविहितं न शास्त्रविहितमशास्त्रविहितं धोरं पीडाकरं प्राणिनामात्मनश्च तपस्तप्यन्ते निर्वर्तयन्ति ये तपो जनास्ते च दम्भाहंकारश्च दम्भाहंकारसंयुक्ताः कामरागबलान्विताः कामश्च रागश्च कामरागौ तत्कृतं बलं कामरागबलं तेनान्विताः कामरागबलैर्वान्विताः।।५।।

कर्शयन्त इति। कर्शयन्तः कृशीकुर्वन्तः शरीरस्थं भूतग्रामं करणसमुदायमचेतसोऽविवेकिनो मां चैव तत्कर्मबुद्धिसाक्षिभूतमन्तःशरीस्थं कर्शयन्तो मदनुशासनाकरणमेव मत्कर्शनं तान्विद्ध्यासुरनिश्चयान् आसुरो निश्चयो येषां त आसुरनिश्चयास्तान्परिहरणार्थं विद्धीत्युपदेशः।।६।।

आहाराणां च रस्यस्निग्धादिवर्गत्रयरूपेण भिन्नानां यथाक्रमं सात्त्विकराजसतामसपुरुषप्रियत्वदर्शनमिह

क्रियते रस्यस्निग्धादिष्वाहारविशेषेष्वात्मनः प्रीत्यतिरेकेण लिङ्गेन सात्विकत्वं राजसत्वं तामसत्वं च बुद्ध्वा रजस्तमोलिङ्गानामाहाराणां परिवर्जनार्थं सत्त्वलिङ्गानां चोपादानार्थं तथा यज्ञादीनामपि सत्त्वादिगुणभेदेन

त्रिविधत्वप्रतिपादनमिह राजसतामसान्बुद्ध्वा कथं नु नाम
परित्यजेत्सात्त्विकानेवानुतिष्ठेदित्येवमर्थमाह-आहारस्त्विति। आहारस्त्वपि सर्वस्य भोक्तुस्त्रिविधो भवति प्रिय इष्टः। तथा यज्ञस्तपस्तथा दानं तेषामाहारादीनां भेदमिमं वक्ष्यमाणं शृणु।।७।।

आयुरिति। आयुश्चसत्त्वं च बलं चारोग्यं च सुखं च प्रीतिश्च तासां विवर्धना

आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनास्ते च रस्या रसोपेताः स्निग्धाः स्नेहवन्तः स्थिराश्चिरकालस्थायिनो देहे, हृद्या हृदयप्रिया आहाराः सात्त्विकप्रियाः सात्त्विकस्येष्टाः।।८।।

कट्विति। कटुरम्लो लवणोऽत्युष्णः। अतिशब्दः कट्वादिषु सर्वत्र योज्योऽतिकटुरतितीक्ष्ण इत्येवं

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिन एवंविधा आहारा राजसस्येष्टा दुःखशोकामयप्रदा दुःखं च शोकं चामयं च प्रयच्छन्तीति दुःखशोकामयप्रदाः।।९।।

यातयाममिति। यातयामं मन्दपक्कं निर्वीर्यस्य गतरसेनोक्तत्वाद्गतरसं रसवियुक्तं पूति दुर्गन्धि पर्युषितं च पक्कं सद् रात्र्यन्तरितं च यद् उच्छिष्टमपि च भुक्तशिष्टमप्यमेध्यमयज्ञार्हं भोजनमीद्ृशं तामसप्रियम्।।१०।।

अथेदानीं यज्ञस्त्रिविध उच्यते-अफलेति। अफलाकाङ्क्षिभिरफलार्धिर्यज्ञो विधिदृष्टः शास्त्रचोदनदृष्टो यो यज्ञ इज्यते निर्वर्त्यते यष्टव्यमेवेति यज्ञस्वरूपनिर्वर्तनमेव कार्यमिति मनःसमाधाय नानेन पुरुषार्थो मम कर्तव्य इत्येवं निश्चित्य स सात्त्विको यज्ञ उच्यते।।११।।

अभिसंधायेति। अभिसंधायोद्दिश्य फलं दम्भार्थमपि चैव यजिज्यते भरतश्रेष्ठ, तं यज्ञं विद्धि राजसं रजोगुणनिर्वर्त्यं राजसं जानीहि।।१२।।

विधिहीनमिति। विधिहीनं यथाचोदितविधिपरीतम्, असृष्टान्नं ब्राह्मणेभ्यो न सृष्टं न दत्तमन्नं यस्मिन्नस्तमसृष्टान्नम्, मन्त्रहीनं मन्त्रतः स्वरतो वर्णतश्च वियुक्तं मन्त्रहीनम्, अदक्षिणमुक्तदक्षिणारहितं, श्रद्धाविरहितं यज्ञं तामसं परिचक्षते तमोनिर्वृत्तं कथयन्ति।।१३।।

अथेदानीं तपस्त्रिविधमुच्यते-देवेति। देवाश्च द्विजाश्च गुरुवश्च प्राज्ञाश्च देवद्विजगुरुप्राज्ञास्तेषां पूजनं देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवमृजुत्वं ब्रह्मचर्यमहिंसा च शरीरनिर्वर्त्यं शारीरं शरीरप्रधानैः सर्वैरेव कार्यकारणैः कर्त्रादिभिः साध्यं शारीरं तप उच्यते। पञ्चैते तस्य हेतव इति हि वक्ष्यति।।१४।।

अनुद्वेगेति। अनुद्वेगकरं प्राणिनामदुःखकरं वाक्यं सत्यं प्रियहितं च यत्। प्रियहिते दृष्टादृष्टार्थे। अनुद्वेगकरत्वादिभिर्धर्मैक्यं विशेष्यते। विशेषणधर्मसमुच्चयार्थश्चशब्दः। परप्रत्ययार्थं प्रयुक्तत्य वाक्यस्य सत्यप्रियहितानुद्वेगकरत्वानामन्यतमेन द्वाभ्यां त्रिभिर्वा हीनता स्याद्यदि न तद्वाङ्भयं तपः। तथा सत्यवाक्यस्येतरेषामन्यतमेन द्वाभ्यां त्रिभिर्वा विहीनतायां न वाङ्भयतपस्त्वम्। तथा प्रियवाक्यस्यापीतरेषामन्यतमेन द्वाभ्यां त्रिभिर्वा वियुक्तस्य न वाङ्भयतपस्त्वम्। किं पुनस्तत्तपो यत् सत्यं

वाक्यमनुद्वेगकरं प्रियहितं च तत् परमं तपो

वाङ्भयम्। यथा शान्तो भव वत्स स्वाध्यायं योगं चानुतिष्ठ, तथा श्रेयो भविष्यति। सावाध्यायाभ्यसनं चैव यथाविधि वाङ्भयं तप उच्यते।।१५।।

मन इति। मनःप्रसादो मनसः प्रशान्तिः स्वच्छतापादनं मनसः प्रसादः। सौम्यत्वं यत् सौमनस्याहुर्मुखादिप्रसादकार्यान्तःकरणस्य वृत्तिः, मौनं वाक्संयमोऽपि मनःसंयमपूर्वको भवतीति कार्येण कारणमुच्यते मनःसंयमो मौनमिति। आत्मविनिग्रहो मनोनिरोधः सर्वतः सामान्यरूप आत्मविनिग्रहो वाग्विषयस्यैव मनसः संयमो मौनमिति विशेषः। भावसंशुद्धिः परैर्व्यवहारकालेऽमायावित्वं भावसंशुद्धिरित्येतत्तपो मानसमुच्यते।।१६।।

यथोक्तं कायिकं वाचिकं मानसं च तपस्तप्तं नरैसत्त्वादिभेदेन कथं त्रिविधं

भवतीत्युच्यते-श्रद्धयास्तिक्यबुद्ध्या परया प्रकृष्टया तप्तमनुष्ठितं तपः स्तत् प्रकृतं त्रिविधं त्रिप्रकारम्। अधिष्ठानं मरैरनुष्ठातृभिरफलाकाङ्क्षिभिः फलाकाङ्क्षारहितैर्युक्तैः समाहितैर्यदीदृशं तपस्तत्सात्त्विकं सत्त्वनिर्वृत्तं परिचक्षते कथयन्ति शिष्टाः।।१७।।

सत्कारेति। सत्कारमानपूजार्थं सत्कारः साधुकारः साधुरयं तपस्वी ब्राह्मण इत्येवमर्थं मानो मानंन प्रत्युत्थानाभिवादनादिस्तदर्थं पूजा पादप्रक्षालनार्चनाशयितृत्वादिस्तदर्थं च तपः सत्कारमानपूजार्थं दम्भेनैव व

क्रियते तपस्तदिह प्रोक्तं कथितं राजसं चलं कादाचित्कफलत्वेनाध्रुवम्।।१८।।

मूढेति। मूढग्राहेणाविवेकनिश्चयेनात्मनः पीडया क्रियते यत्तपः परस्योत्सादनार्थं विनाशार्थं वा तत्तामसं तप उदाहृतम्।।१९।।

इदानीं दानभेद उच्यते-दातव्यमिति। दातव्यमिति। दातव्यमित्येवं मनःकृत्वा यद्दानं दीयतेऽनुपकारिणे प्रत्युपकारासमर्थाय समर्थयापि निरपेक्षं दीयते देशे पुण्ये कुरुक्षेत्रादौ काले संक्रान्त्यादौ पात्रे च षडङ्गविद्वेदपारग इत्यादौ तद्दानं सात्त्विकं स्मृतम्।।२०।।

यत्त्विति। यत्तु दानं प्रत्युपकारार्थं काले त्वयं मां प्रत्युपकरिष्यतीत्येवमर्थं फलं वास्य दानस्य मे

भविष्यत्यदृष्टमिति तदुद्दिश्य पुनर्दीयते च परिक्लिष्टं खेदसंयुक्तं तद्राजसं स्मृतम्।।२१।।

अदेशेति। अदेशकालेऽपुण्ये देशे म्लेच्छाशुच्यादिसंकीर्णेऽकाले पुण्यहेतुत्वेनाप्रख्याते संक्रान्त्यादिविशेषरहितेऽपात्रेभ्यश्च मूर्खतस्करादिभ्यो देशादिसंपत्तौ वाऽसत्कृतं प्रियवचनपादप्रक्षालनपूजादिरहितमवज्ञातं पात्रपरिभवयुक्तं च यद्दानं तत्तामसमुदाहृतम्।।२२।।

यज्ञदानतपःप्रभृतीनां साद्गुण्यकरणायायमुपदेश उच्यते-ॐ तदिति। ॐतत्सदित्येष निर्देशो निर्दिश्यतेऽनेनेति निर्देशस्त्रिविधो नामनिर्देशो ब्रह्मणः स्मृतश्चिन्तितो वोदान्तेषु ब्रह्मविद्भिः। ब्राह्मणास्तेन निर्देश त्रिविधेन वेदाश्च यज्ञाश्च विहिता निर्मिताः पुरा पूर्वमिति निर्देशस्तुत्यर्थमुच्यते।।२३।।

तस्मादोमित्युदाहृत्योच्चार्य यज्ञदानतपःक्रियाः यज्ञादिस्वरूपाः क्रियाः प्रवर्तन्ते विधानोक्ताः शास्त्रचोदिताः

सततं सर्वदा ब्रह्मवादिनां ब्रह्मवदनशीलानाम्।।२४।।

तदिति। तदित्यनभिसंधाय तदिति ब्रह्माभिधानमुच्चार्यानभिसंधाय च कर्मणः फलं यज्ञतपःक्रियाः यज्ञक्रियास्तपः क्रियाश्च यज्ञतपःक्रिया दानक्रियाश्च विविधाः क्षेत्रहिरण्यप्रदानादिलक्षणाः क्रयन्ते निर्वर्त्यन्ते मोक्षकाङ्क्षिभिः मोक्षार्थिभिर्मुमुक्षुभिः।।२५।।

ॐतच्छष्दयोर्विनियोग उक्तोऽथेदानीं सच्छब्दस्य विनियोगः कथ्यते सद्भाव इति। असतः सद्भावे तथा विद्यमानस्य पुत्रस्य जन्मति, तथा साधुभावोऽसद्वृत्तस्यासाधोः सद्वृत्तता साधुभावस्तस्मिन् साधुभावे च सदित्येतदभिधानं ब्रह्मणः प्रयुज्यते

तत्रोच्यतेऽभिधीयते प्रशस्ते कर्णि विवादौ च तथा सच्छब्दः पार्थ युज्यते प्रयुज्यत इत्येतत्।।२६।।

यज्ञे यज्ञकर्मणि या स्थितिस्तपसि च या स्थितिर्दाने च या स्थितिः सा च सदित्युच्यते विद्वद्भिः, कर्म चैव तदर्थीयमथवा यस्याभिधानत्रयं प्रकृतं तदर्थीयं यज्ञदानतपोर्थीयमीश्वरार्थीयमित्येतत्सदित्येवाभिधीयते। तदेतद्यज्ञदानतपआदिकर्मासात्त्विकं विगुणमपि श्रद्धापूर्वकं ब्रह्मणोभिधानत्रयप्रयोगेण सगिणं सात्त्विकं संपादितं भवति।।२७।।

अश्रद्धयेति। तत्र च सर्वत्र श्रद्धाप्रधानतया सर्वं संपाद्यते यस्मात्तस्माद्-अश्रद्धया हुतं हवनं कृतं दत्तं च ब्रह्मणेभ्योऽश्रद्धया, तपस्तप्तमनुष्ठितमश्रद्धया, तथाऽश्रद्धयैव कृतं यत्स्तुतिनमस्कारादि तत्सर्वमसदित्युच्यते

मत्प्राप्तिसाधनमार्गबाह्यत्वात् पार्थ। नच तद्ब्रह्वायासमपि प्रेत्य फलाय नोऽपीहार्थं साधुभिर्निन्दितत्वादिति।।२८।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यपूज्यपादश्रीमदाचार्यश्रीशंकरभगवतः कृतौ श्रीभगवद्गीताभाष्ये श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः।।१७।।

अष्टादशोऽध्यायः।

सर्वस्यैव गीताशास्त्रस्यार्थोऽस्मिन्नध्याय उपसंहृत्य सर्वश्च वेदार्थो वक्तव्य इत्येवमर्थोऽयमध्याय आरभ्यते सर्वेषु ह्यतीतेष्वध्यायेषु पूर्वेक्तोऽर्थोऽस्मिन्नध्यायेऽवगम्यतेऽर्जुनस्तु संन्यासत्यागशब्दार्थयोरेव विशेषं बुभुत्सुरुवाच-संन्यासस्येति। संन्यासस्य संन्यासशब्दार्थस्येत्येतद्धे महाबाहो, तस्य भावस्तत्वं याथात्म्यमित्येतद् इच्छामि वेदितुं ज्ञातुं त्यागस्य च त्यागशब्दार्थस्येत्येतद् हृषीकेश पृथगितरेतरविभागतः। केशिनिषूदन केषिनामा हयच्छद्भा कश्चिदसुरस्तं निषूदितवान्भगवान्वासुदेवस्तेन तन्नाम्ना संबोध्यतेऽर्जुनेन।।१।।

तत्र तत्र निर्दिष्टौ संन्यासत्यागशब्दौ न निर्लुण्ठितार्थौ पूर्वेष्वध्यायेष्वतोऽर्जुनाय पृष्टवते तन्निर्णयाय भगवानुवाच-काम्येति। काम्यानामश्वमेधादीनां कर्मणां न्यासं परित्यागं संन्यासं संन्यासशब्दार्थमनुष्ठेयत्वेन प्राप्तस्याननुष्ठानं कवयः पण्डिताः केचिद्विदुर्विजानन्ति नित्यनैमित्तिकानामनुष्ठीयमानानां सर्वकर्मणामात्मसंबन्धितया प्राप्तस्य फलस्य परित्यागः सर्वकर्मफलत्यागस्तं प्राहुः कथयन्ति त्यागं त्यागशब्दार्थं विचक्षणाः पण्डिताः। यदि काम्यकर्मपरित्यागः फलपरित्यागो वार्थो वक्तव्यः सर्वथा परित्यागमात्रं संन्यासत्यागशब्दयोरेकोऽर्थः स्यत्, न घटपटशब्दाविव जात्यान्तरभूतार्थौ। ननु नित्यनैमित्तिकानां कर्मणां फलमेव नास्तीत्याहुः कथमुच्यते तेषां फलत्याग इति। यथा वन्ध्यायाः पुत्रत्यागः। नैष दोषः, नित्यानामपि कर्मणां भगवता

फलवत्त्वस्येष्टत्वात्। वक्ष्यति हि भगवाननिष्टमिति नतु संन्यासिनामिति च। संन्यासिनामेव हि केवलं कर्मफलासंबन्धं दर्शयन्नसंन्यासिनां नित्यकर्मफलप्राप्तिं 'भवत्यत्यागिनां प्रेत्य' इति दर्शयति।।२।।

त्याज्यं दोषेति। त्याज्यं त्यक्तव्यं दोषवद्दोषोऽस्यास्तीति दोषवत्। किं तत् कर्म बन्धदेतुत्वात्सर्वमेव। अथवा दोषो यथा रागदिस्त्यज्यते तथा त्याज्यमित्येके कर्म प्राहुर्मनीषिणः पण्डिताः सांख्यादिदृष्टिमाश्रिता अधिकृतानां कर्मिणामपीति। तत्रैव यज्ञदानतपःकर्म न त्याज्यमिति चापरे। कर्मिण एवाधिकृतानपेक्ष्यैते विकल्पा नतु ज्ञाननिष्ठान्व्युत्थायिनः संन्यासिनोऽपेक्ष्य। ज्ञानयोगेन योगिनामित्यधिकताः पूर्वं विभक्तनिष्ठा अपीह सर्वशास्त्रोपसंहारप्रकरणे यथा विचार्यन्ते तथा साख्या अपि ज्ञाननिष्ठा विचार्यन्तमिति। न, तेषां मोहदुःखनिमित्तत्यागानुपपत्तेः। न कायक्लेशनिमित्तानि दुःखानि सांख्या आत्मनि पश्यन्ति, इच्छादीनां क्षेत्रधर्मत्वेनैव दर्शितत्वात्।

अतस्ते न कायक्लेशदुःखभयात्कर्म परित्यजन्ति। नापि ते कर्माण्यात्मनि पश्यन्ति। येन नियतं कर्म मोहात्परित्यजेयुः। गुणानां कर्म नैव किंचित्करोमिति हि ते संन्यस्यन्ति। सर्वकर्माणि मनसा संन्यस्येत्यादिभिर्हि तत्त्वविदः संन्यासप्रकार उक्तः। तस्माद्येऽन्येऽधिकृताः कर्मण्यनात्मविदो येषां च मोहात्त्यागः संभवति कायक्लेशभयाच्च त एव तामसास्त्यागिनो राजसाश्चेति निन्द्यन्ते कर्मिणामनात्मज्ञानां कर्मफलत्यागस्तुत्यर्थम्। सर्वारम्भपरित्यागी मौनी संतुष्टो येन केनचिदनिकेतः स्थिरमतिरिति गुणातीतलक्षणे च परमार्थसंन्यासिनो विशेषितत्वात्। वक्ष्यति च ज्ञानस्य या परा, निष्ठेति। तस्माज्ज्ञाननिष्ठाः संन्यासिनो नेह विवक्षिताः। कर्मफलत्याग एव सात्त्विकत्वेन गुणेन

तामसत्वाद्यपेक्षया संन्यास उच्यते न मुख्यः सर्वकर्मसंन्यासासंभवे च नहि देहभृतेति हेतुवचनान्मुख्य एवेति चेत्। न, हेतुत्यर्थत्वात्। यथा त्यागाच्छान्तिरनन्तरमिति कर्मफलत्यागस्तुतिरेव यथोक्तानेकपक्षानुष्ठानाशक्तिमन्तमर्जुनमज्ञं प्रति विधानात्तथेदमपि नहि देहभृता शक्यमिति

कर्मफलत्यागस्तुत्यर्थं वचनम्। न सर्वकर्माणि मनसा संन्यास्य नैव कुर्वन्न कारयन्नास्त इत्यस्य पक्षस्यापवादः केनचिद्दर्शयितुं शक्यः। तस्मात्कर्मण्यधिकृतान्प्रत्येवैष संन्यासत्यागविकल्पः। ये तु परमार्थदर्शिनः सांख्यास्तेषां ज्ञाननिष्ठायामेव सर्वकर्मसंन्यासलक्षणायामधिकारो नान्यत्रेति न ते विकल्पार्हाः। तथोपपादितमस्माभिर्वेदाविनाशिनमित्यस्मिन्प्रदेशे तृतीयादौ च।।३।।

तत्रैतेषु विकल्पभेदेषु-निश्चयं श्रृण्ववधारय मे मम वचनात्त्र त्यागे त्यागसंन्यासविकल्पे यथादर्शिते भरतसत्तम भरतानां साधुतम। त्यागो हि त्यागसंन्यासशब्दवाच्यो हि योऽर्थः स एक एवेत्यभिप्रेत्याह-त्यागो हीति। पुरुषव्याघ्र, त्रिविधास्त्रिप्रकारस्तामसादिप्रकारैः संप्रकीर्तितः शास्त्रेषु सम्यक्कथितः। यस्मात्तामसादिभेदेन त्यागसंन्यासशब्दवाच्योऽर्थोऽधिकृतस्य कर्मिणोऽनात्मज्ञस्य त्रिविधः संभवति न परमार्थदर्शिन इत्ययमर्थो दुर्ज्ञानस्तस्मादत्र तत्त्वं नान्यो वक्तुं समर्थः। तस्मान्निश्चयं परमार्थशास्त्रार्थविषयमध्यवसायमैश्वरं श्रृणु।।४।।

कः पुनरसौ निश्चय इत्याह-यज्ञ इति। यज्ञो दानं तप इत्येतत्त्रिविधं कर्म न त्याज्यं न त्यक्तव्यं कार्यं करणीयमेव तत्। कस्माद् यज्ञो दानं तपश्चैव पावनानि विशुद्धिकारणानि मनीषिणां फलानभिसंधीनामित्येवय्।।५।।

एतान्यपीति। एतान्यपि तु कर्माणि यज्ञदानतपांसि पावनान्युक्तानि सङ्गमासक्तिं तेषु त्यक्त्वा, फलानि च तेषां त्यक्त्वा परित्यज्य कर्तव्यान्यनुष्ठेयानीति मे मम निश्चितं मतमुत्तमम्। निश्चयं श्रृणु मे तत्रेति प्रतिज्ञाय पावनत्वं च सहेतुकमपक्त्वैतान्यपि कर्माणि कर्तव्यानीत्येतन्निश्चितं मतमुत्तममिति प्रतिज्ञातार्थोपसंहार एव नापूर्वार्थं वचनम्, एतान्यपीति प्रकृतसंनिकृष्टार्थतोपपत्तेः। सासङ्गस्य फलार्थिनो बन्धहेतव एतान्यपि कर्माणि मुमुक्षोः

कर्तव्यानीत्यपिशब्दस्यार्थो न त्वन्यानि कर्माण्यपेक्ष्यैतान्यपीत्युच्यते। अन्ये वर्णयन्ति नित्यानां कर्मणां फलाभावात्सङ्गं त्यक्त्वा फलानि चेति नोपपद्यते। एतान्यपीति यानि काम्यानि नित्येभ्योऽन्यान्येतान्यपि कर्तव्यानि किमुत यज्ञदानतपांसि नित्यानीति। तदसत्, नित्यानामपि कर्मणां फलवत्त्वस्योपपादितत्वात्। यज्ञो दानं तपश्चैव पावनानीत्यादिवचनेन नित्यान्यपि कर्माणि बन्धङेतुत्वाशङ्कया जिहासोर्मुमुक्षोः कुतः काम्येषु प्रसङ्गः 'दूरेण ह्यवरं कर्म' इति च निन्दितत्वात्, 'यज्ञार्थात्कर्मणोऽन्यत्र'इति च काम्यकर्मणां बन्धहेतुत्वस्य निश्चितत्वात्।

'त्रैगुण्यविषया वेदाः', 'त्रैविद्या मां सोमपाः', 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति', इति च दूरव्यवहितत्वाच्च न काम्येष्वेतान्यपीति व्यपदेशः।।६।।

तस्मादज्ञस्याधिकृतस्य मुमुक्षोः-नियतस्य तु नित्यस्य संन्यासः परित्यागः कर्मणो नोपपद्यतेऽज्ञस्य पावनत्वस्येष्टत्वात्। मोहादज्ञानात्तस्य नियतस्य परित्यागः। नियतं चावश्यं कर्तव्यं त्यज्यते चेति विप्रतिषिद्धमतो मोहनिमित्तः परित्यागस्तामसः परिकीर्तितो मोहश्च तम इति।।७।।

किंच-दुःखमिति। दुःखमित्येव यत्कर्म कायक्लेशभयाच्छरीरदुःखभयात्त्यजेत्परित्यजेत्स कृत्वा राजसं रजोनिर्वृत्तं त्यागं नैव तत्त्यागफलं ज्ञानपूर्वकस्य सर्वकर्मत्यागस्य फलं मोक्षाख्यं न

लभेन्नैव लभते।।८।।

कः पुनः सात्त्विकस्त्यागः-कार्यमिति। कार्यं कर्तव्यमित्येव यत्कर्म नियतं नित्यं क्रियते निर्वर्त्यते हेऽर्जुन, संङ्ग त्यक्त्वा फलं चैव। नित्यानां कर्मणां फलवत्त्वे भगवद्वचनं प्रमाणमवोचाम। अथवा यद्यपि फलं न श्रूयते नित्यस्य कर्मणस्तथापि नित्यं कर्म कृतमात्मसंस्कारं प्रत्यवायपरिहारं वा फलं करोत्यात्मन इति कल्पयत्येवाज्ञस्तत्र तामपि कल्पनां निवारयति फलं त्यक्त्वेत्यनेनातः साधूक्तं सङ्गं त्यक्त्वा फलं चेति। स त्यागो नित्यकर्मसु सङ्गफलपरित्यागः सात्त्विकः सत्त्वनिर्वृत्तो मतोऽभिमतः। ननु कर्मपरित्यागस्त्रिविधः संन्यास इति च प्रकृतस्तत्र तामसो राजसश्चोक्तस्त्यागः कथमिह सङ्गफलत्यागस्तृतीयत्वेनोच्यते यथा त्रयो ब्राह्मणा आगतास्तत्र षडङ्गविदौ द्वौ क्षत्रियस्तृतीय इति तद्वंत् नैष दोषस्त्यागसामान्येन स्तुत्यर्थत्वात्। अस्ति हि कर्मसंन्यासस्य फलाभिसंधित्यागस्य च त्यागत्वसामान्यं तत्र राजसतामसत्वेन कर्मत्यागनिन्दया कर्मफलाभिसंधित्यागः सात्त्विकत्वेन स्तूयते 'स त्यागः सात्त्विको मतः' इति।।९।।

यस्त्वधिकृतः सङ्गं त्यक्त्वा फलाभिसन्धिं च नित्यं कर्म करोति तस्य फलरागादिनाऽकलुषी क्रियमाणमन्तःकरणं नित्यैश्च कर्मभिः संस्क्रियमाणं विशुध्यति। विशुद्धं प्रसन्नमात्मालोचनक्षमं भवति। तस्यैव नित्यकर्मानुष्ठानेन विशुद्धान्तः-करणस्यात्मज्ञानाभिमुखस्य क्रमेण यथा यन्निष्ठा स्यात्तद्वक्तव्यमित्याह-न द्वेष्ट्यकुशलमशोभनं काम्यं कर्म शरीरम्भद्वारेण संसारकारणं किमनेनेत्येवं कुशले शोभने नित्ये कर्मणि सत्त्वशुद्धिज्ञानोत्पत्तितन्निष्ठाहेतुत्वेन मोक्षकारणमिदमित्येवं नानुषज्जते तत्रापि प्रयोजनमपश्यन्ननुषङ्गं प्रीति न करोतीत्येतत् कः पुनरसौ त्यागी पूर्वोक्तेन सङ्गफलपरित्यागेन तद्वंस्त्यागी यः कर्मणि सङ्गं त्यक्त्वा तत्फलं च नित्यकर्मानुष्ठायी स त्यागी। कदा पुनरसावकुशलं कर्म न द्वेष्टि कुशले च नानुषज्जत इत्युच्यते सत्त्वसमाविष्टो यदा सत्त्वेनात्मानात्मविवेकविज्ञानहेतुना समाविष्टः संव्याप्तः संयुक्त इत्येतत्। अतएव च मेधावी मेधयात्मज्ञानलक्षणया प्रज्ञया संयुक्तस्तद्वान्मेधावी मेधावित्वादेव छिन्नसंशयश्छिन्नोऽविद्याकृतः संशयो यत्यात्मस्वरूपावस्थानमेव परं निःश्रेयस्साधनं नान्यत्किंचिदित्येवं निश्चयेन छिन्नसंशयो योऽधिक-तः पुरुषः पूर्वोक्तेन प्रकारेण कर्मयोगानुष्ठानेन क्रमेण संस्क-तात्मा सन् जन्मादिविक्रियारहितत्वेन निष्क्रयमात्मानमात्मत्वेन संबुद्धः स सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नासीनो नैष्कर्म्यलक्षणां ज्ञाननिष्ठामश्नुत इत्येतत्पूर्वोक्तस्य कर्मयोगस्य प्रयोजनमनेन श्लोके नोक्तम्।।१०।।

यः पुनरधिकृतः सन्देहात्माभिमानित्वेन देहभृदज्ञोऽबाधितात्मकर्तृत्वविज्ञानतयाहंकर्तेति निश्चितबुद्धिस्तस्याशेषकर्मपरित्यागस्याशक्यत्वात्कर्मफलत्यागेन चोदितकर्मानुष्ठान एवाधिकारो न

तत्त्याग इत्येतमर्थं दर्शयितुमाह-नहीति। यस्माद्देहभृता देहं बिभर्तीति देहभृद्देहात्माभिमानवान्देहभृदुच्यते नहि विवेकी स हि वेदाविनाशिनमित्यादिना कर्तृत्वाधिकारान्निवर्तितोऽतस्तेन देहभृताऽज्ञेन न शक्यं त्युक्तं संन्यसितु कर्माण्यशेषतो निःशेषेण। तस्माद्यस्त्वज्ञोऽधिकृतो नित्यानि कर्माणि कुर्वन्कर्मफलत्यागी कर्मफलाभिसन्धिमात्रसंन्यासी स त्यागीत्यभिधीयते कर्म्यपि सन्निति स्तुत्यभिप्रायेण। तस्मात्परमार्थदर्शिनैवादेहभृता

देहात्मभावरहितेनाशेषकर्मसंन्यासः शक्यते कर्तुम्।।११।।

किं पुनस्तत्प्रयोजनं यत्सर्वकर्मपरित्यागात्स्यादित्युच्यते-अनिष्टं नरकतिर्यगादिलक्षणमिष्टं

देवादिलक्षणं, मिश्रमिष्टसंयुक्तं मनुष्यलक्षणं चैवं त्रिविधं त्रिप्रकारं कर्मणो धर्माधर्मलक्षणस्य फलं बाह्यानेकारकव्यापारनिष्पन्नं सदविद्याकृतमिन्द्रजालमायोपमं महामोहकरं प्रत्यगात्मोपसर्पीव फल्गुतया

लयमदर्शनं गच्छतीति फलमिति फलनिर्वचनं तदेतदेवंलक्षणं फलं भवत्यत्यागिनामज्ञानां कर्मिणामपरमार्थसंन्यासिनां प्रेत्य शरीरपातादूर्ध्वमि। नतु परमार्थसंन्यासिनां परमहंसपरिव्राजकानां केवलज्ञाननिष्ठानां क्कचित्। नहि केवलसम्यग्दर्शननिष्ठा अविद्यादिसंसारबीजं नोन्मूलयति कदाचिदित्यर्थः।।१२।।

अतः परमार्थदर्शिन एवाशेषकर्मसंन्यासित्वं संभवत्यविद्याध्यारोपितत्वादात्मनि क्रियाकारकफलानां न त्वज्ञस्याधिष्ठानादीनि क्रियाकर्तृणि कारकाण्यात्मत्वेन पश्यतोऽशेषकर्मसंन्यासः संभवति। तदेतदुत्तरै श्लोकैदर्शयति-पञ्चेति। पञ्चैतानि वक्ष्यमाणानि हे महाबाहो, कारणानि निर्वर्तकानि। निबोध मे ममेति, उत्तरत्र चेतःसमाधानार्थं वस्तुवैषम्यप्रदर्शनार्थं च। तानि च कारणानि ज्ञातव्यतया स्तौति-सांख्ये ज्ञातव्याः पदार्थः संख्यायन्ते यस्मिञ्शास्त्रे तत्सांख्यं वेदान्तः। कृतान्त इति तस्यैव विशेषणं। कृतमिति कर्मोच्यते तस्यान्तः कृतस्यपरिसमाप्तिर्यत्र स कृतान्तः कर्मान्त इत्येतत् 'यावानर्थ उदपाने' 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते' इत्यात्मज्ञाने संजाते सर्वकर्मणां निवृत्तिं दर्शयति। अतस्तस्मिन्नात्मज्ञानार्थे सांख्ये कृतान्ते वेदान्ते प्रोक्तानि कथितानि सिद्धये निष्पत्त्यर्थं सर्वकर्मणाम्।।१३।।

कानि तानीत्युच्यते-अधिष्ठानमिति। अधिष्ठानमिच्छाद्वेषसुखदुःखज्ञानादीनामभिव्यक्तेराश्रयोऽधिष्ठानं शरीरं तथा कर्तोपाधिलक्षणो भोक्ता करणं च श्रोत्रादिकं शब्दाद्युपलब्धये पृथग्विधं नानाप्रकारं द्वादशसंख्यं विविधाश्च पृथक्चेष्टा वायवीयाः प्राणापानाद्या दैवं चैव दैवमेव चात्रैतेषु चतुर्षु पञ्चमं पञ्चानां पूरणमादित्यादि चक्षुराद्यनुग्राहकम्।।१४।।

शरीरेति। शरीरवाङ्मनोभिर्यत्कर्म त्रिभिरेतैः प्रारभते निर्वर्तयति नरो न्याय्यं वा धर्म्यं शास्त्रीयं, विपरीतं वाऽशास्त्रीयमधर्म्यम् यच्चापि निमिषितचेष्टादि जीवनहेतुस्तदपि पूर्वकृतधर्माधर्मयोरेव कार्यमिति न्याय्यविपरीतयोरेव ग्रहणेन गृहीतम्। पञ्चैते यथोक्तास्तस्य सर्वस्यैव कर्मणो हेतवः कारणानि। नन्वधिष्ठानादीनि सर्वकर्मणां कारणानि, कथमुच्यते शरीरवाङ्मनोभिः कर्म प्रारभत इति। नैष दोषः, विधिप्रतिषेधलक्षणं सर्वं कर्म शरीरादित्रयप्रधानं तदङ्गतया दर्शनश्रवणादि च जीवनलक्षणं त्रिधैव राशीकृतमुच्यते शरीरादिभिरधिष्ठानादिभिरारभत इति फलकालेऽपि तत्प्रधानैर्भुज्यत इति पञ्चनामेव हेतुत्वं न विरुध्यते।।१५।।

तत्रेति। तत्रेति प्रकृतेन संबध्यते, एवं सति, एवं यथोक्तैः पञ्चभिर्हेतुभिर्निर्वर्त्ये सति कर्मणि।

तत्रैवं सतीति दुर्मतित्वस्य हेतुत्वेन संबध्यते। तत्र तेष्वात्मानमन्यत्वेनाविद्यया परिकल्प्य तैः क्रियमाणस्य कर्मणोऽहमेव कर्तेति कर्तारमात्मानं केवलं शुद्धं तु यः
पश्यत्यविद्वान्कस्माद्वेदान्ताचार्योपदेशन्यायैरकृतबुद्धित्वादसंस्कृतबुद्धित्वाद्योऽपि
देहादिव्यतिरिक्तात्मवाद्यन्यमात्मानमेव केवलं कर्तारं पश्यत्यसावप्यकृतबुद्धिरेवातोऽकृतबुद्धित्वान्न स पश्यत्यात्मनस्तत्त्वं कर्मणो वेत्यर्थोऽतो दुर्मतिः कुत्सिता विपरीता दुष्टाऽजस्रं जननमरणप्रतिपत्तिहेतुभूता मतिरस्येति दुर्मतिः स पश्यन्नपि न पश्यति, यथा तैमिरिकोऽनेकं चन्द्रं, यथा वाभ्रेषु धावत्सु चन्द्रं धावन्तं, यथा वा वाहन उपविष्टोऽन्येषु धावत्स्वात्मानं धावन्तम्।।१६।।

कः पुनः सुमतिर्यः सम्यक्पश्यतीत्युच्यते-यस्येति यस्य शास्त्राचार्योपदेशन्यायसंस्कृतात्मनो न भवत्यहंकृतोऽहं कर्तेत्येवंलक्षणो भावो भावनाप्रत्यय एत एव पञ्चाधिष्ठानादयोऽविद्ययात्मनि कल्पिताः सर्वकर्मणां कर्तारो नाहमहं तु तद्व्यापाराणां साक्षिभूतो 'अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः'

'केवलोऽविक्रिय' इत्येवं पश्यतीत्येतत्। बुद्धिरन्तःकरणं यस्यात्मन उपाधिभूता न लिप्यते नानुशायिनी भवतीदमहमकार्षं तेनाहं नरकं गमिष्यामीत्येवं यस्य बुद्धिर्न लिप्यते स सुमतिः स पश्यति। ङत्वापि स इमाँल्लोकान्सर्वान्प्राणिन इत्यर्थः। न हन्ति हननक्रियां न करोति। न निबध्यते नापि तत्कार्येणाधर्मफलेन संबध्यते। ननु हत्वापि न हन्तीति विप्रतिषिद्धमुच्यते यद्यपि स्तुतिः। नैष दोषः, लौकिकपारमार्थिकदृष्ट्यपेक्षया तदुपपत्तेः। देहाद्यात्मबुद्धया हन्ताहमिति लौकिकीं दृष्टिमाश्रित्य हत्वापीत्याह यथादर्शितां पारमार्थिकीं दृष्टिमाश्रित्य न हन्ति न निबध्यत इति तदुभयमुपपद्यत एव।

नन्वधिष्ठानादिभिः संभूय करोत्येवात्मा कर्तारमात्मानं केवलं त्विति केवलशब्दप्रयोगात्। नैष दोषः, आत्मनोऽविक्रयस्वभावत्वेऽधिष्ठानादिभिः संहतत्वानुपपत्तेः। विक्रियावतो ह्यन्यैः संहननं संभवति संहत्य वा कर्तृत्वं स्यान्न त्वविक्रियस्यात्मनः केनचित्संहननमस्तीति न संभूय कर्तृत्वमुपपद्यते। अतः केवलत्वमात्मनः स्वाभाविकमिति केवलशब्दोऽनुवादमात्रम्। अविक्रियत्वं चात्मनः श्रुतिस्मृतिन्यायप्रसिद्धम्। 'अविकार्योऽयमुच्यते' 'गुणैरेव कर्माणि क्रियन्ते' शरीरस्थोऽपि न करोतात्याद्यसकृदुपादितं गीतास्वेव तावत्। श्रुतिषु च 'ध्यायतीव लेलायतीव' इत्येवमाद्यासु। न्यायतश्च निरवयवमपरतन्त्रमविक्रियमात्मतत्त्वमिति राजमार्गः विक्रियावत्त्वाभ्युपगमेऽप्यात्मनः स्वकीयैव विक्रिया स्वस्य भवितुमर्हति। नाधिष्ठानादीनां कर्मण्यात्मकर्तृकाणि स्युः। नहि परस्य कर्म

परेणाकृतमागन्तुमर्हति। यत्त्वविद्यया गमितं न तत्तस्य। यथा रजतत्वं न शुक्तिकाया यथावा तलमलवत्त्वं बालैर्गमितमविद्याया नाकाशस्य तथाधिष्ठानादिविक्रियापि तेषामेवेति नात्मनः। तस्माद्युक्तमहंकृतत्वबुद्धिलेपाभावाद्विद्वान्न हन्ति न निबध्यत इति। नायं हन्ति न हन्यत इति प्रतिज्ञाय न जायत इत्यादिहेतिवचनेनाविक्रियत्वमात्मन उक्त्वा वेदाविनाशिनमिति विदुषः कर्माधिकारनिवृत्तिं शास्त्रादौ संक्षेपत उक्त्वा मध्ये प्रसारितां च तत्र तत्र प्रसङ्गं कृत्वेहोपसंहरति शास्त्रार्थपिंण्डीकरणाय विद्वान्न हरन्ति न निबध्यत इति। एवं च सति देहभृत्त्वाभिमानानुपपत्तावविद्याकृताशेषकर्मसंन्यासोपपत्तेः संन्यासिनामनिष्टादि त्रिविधं कर्मणः फलं न भवतीत्युपपन्नं तद्विपर्यायाच्चेतरेषां भवतीत्येतच्चापरिहार्यमित्येष गीताशास्त्रस्यार्थ उपसंहृतः। स एष सर्ववेदार्थसारो निपुणमतिभिः पण्डितैर्विचार्य प्रतिपत्तव्य इति तत्र तत्र प्रकरणविभागेन

दर्शितोस्मभिः शास्त्रन्यायानुसारेण।।१७।।

अथेदानीं तेषां कर्मणां प्रवर्तकमुच्यते-ज्ञानमिति। ज्ञानं ज्ञायतेऽनेनेति सर्वविषयमविशेषेणोच्यते। तथा ज्ञेयं ज्ञातव्यं तदापि सामान्येनैव सर्वमुच्यते। तथा परिज्ञातोपाधिलक्षणोऽविद्याकल्पितो भोक्ता, इत्येतत्रयमेषामविशेषेण सर्वकर्मणां प्रवर्तिका त्रिविधा त्रिप्रकारा कर्मचोदना। ज्ञानदीनां हि त्रयाणां संनिपाते हानोपादानादिप्रयोजनः सर्वकर्मारम्भः स्यात्ततः पञ्चभिरधिष्ठानादिभिरारब्धं वाङ्मनःकायाश्रयभेदेन त्रिधा राशीभूतं त्रिषु करणादिषुं संगृह्यत इत्येतदुच्यते-करणं क्रियतेऽनेनेति बाह्यं श्रेत्रादि, अन्तःस्थं बिद्ध्यादि, कर्मेप्सिततमं कर्तुः

क्रियया व्याप्यमानं, कर्ता करणानां व्यापारयितोपाधिलक्षण इति त्रिविधस्त्रिप्रकारः कर्मसंग्रहः संगृह्यतेऽस्मिन्निति संग्रहः कर्मणः संग्रहः कर्मस्ग्रहः। कर्मैषु हि त्रिषु समवैति तेनायं त्रिविधः कर्मसंग्रहः।।१८।।

अथेदानीं क्रियाकारकफलानां सर्वेषां गुणात्मकत्वात्सत्त्वरजस्तमोगुणभेदतस्त्रिविधो भेदो वक्तव्य

इत्यारभ्यतेज्ञानं कर्म चेति। ज्ञानं कर्म च, कर्म क्रिया, न कारकं पारिभाषिकमीप्सिततमं कर्म, कर्ता च निर्वर्तकः क्रियाणां त्रिधैवावधारणं गुणव्यतिरिक्तजात्यन्तराभावप्रदर्शनार्थं गुणभेदतः सत्त्वादिभेदेनेत्यर्थः। प्रोच्यते कथ्यते। गुणसंख्याने कापिले शास्त्रे तदपि गुणसंख्यानशास्त्रं गुणभोक्तृविषये प्रमाणमेव परमार्थब्रह्मैकत्वविषये यद्यपि विरुध्यते, तथापि ते हि कापिला गुणगौणव्यापारनिरूपणेऽभियुक्ता इति तच्छास्त्रमपि वक्ष्यमाणार्थस्तुत्यर्थत्वेनोपादीयत इति न विरोधः। यथावद्यथान्यायं यथाशास्त्रं श्रृणु तान्यपि ज्ञानादीनि तद्भेदजातानि गुणभेदकृतानि श्रृणु। वक्ष्यमाणेऽर्थे मनःसमाधिं कुर्वित्यर्थः।।१९।।

ज्ञानस्य तु तावत्त्रिविधत्वमुच्यते-सर्वेति। सर्वभूतेष्वव्यक्तादिस्थावरन्तेषु भूतेषु येन ज्ञानेनैकं भावं वस्तु, भावशब्दो वस्तुवाच्येकमात्मवस्त्वित्यर्थः। अव्ययं न व्येति स्वात्मना धर्मैर्वा कूटस्थनित्यमित्यर्थः। ईक्षते येन ज्ञानेन पश्यति तं च भावमविभक्तं प्रतिदेहं विभक्तेषु देहभेदेषु न विभक्तं तदात्मवस्तु व्योमवन्निरन्तरमित्यर्थः। तज्ज्ञानमद्वैतात्मदर्शनं सात्त्विक सम्यग्दर्शनं विद्वीति।।२०।।

यानि द्वेतदर्शनानि तान्यसम्यग्भूतानि राजसानि तामसानि चेति न साक्षात्संसारोच्छित्तये भवन्ति। पृथक्त्वेनेति। पृथक्त्वेन तु भेदेन प्रतिशरीरमन्यत्वेन यज्ज्ञानं नानाभावान्भिन्नानात्मनः पृथग्विधान्पृथक्प्रकारान् भिन्नलक्षणानित्यर्थः। वेत्ति विजानाति यज्ज्ञानं सर्वेषु भूतेषु ज्ञानस्य कर्तृत्वासंभवाद्येन ज्ञानेन वेत्तीत्यर्थः। तज्ज्ञानं विद्धि राजसं रजोनिर्वृत्तम्।।२१।।

यत्त्विति। यत्तु ज्ञानं कृत्स्नवत्समस्तवत्सर्वविषय मिवैकस्मिन्कार्ये देहे बहिर्वा प्रतिमादौ सक्तमेतावानेवात्मेश्वरो वा नातः परमस्तीति यथा नग्नक्षपणकादीनां शरीरानुवर्ती देहपरिमाणो जीव ईश्वरो वा पाषाणदार्वादिमात्रमित्येवमेकस्मिन्कार्ये सक्तमहैतुकं हेतुवर्जितं विर्युक्तिकमतत्त्वार्थवद्यथाभूतोऽर्थस्तत्त्वार्थः सोऽस्य

ज्ञेयभूतोऽस्तीति तत्त्वार्थवन्न तत्त्वार्थवन्न तत्त्वार्थवदतत्त्वार्थवदहैतुकत्वादेवाल्पं चाल्पविषयत्वादल्पफलत्वाद्वा तत्तामसमुदाहृतम्। तामसानां हि प्राणिनामविवेकिनाममीदृशं ज्ञानं दृश्यते।।२२।।

अथ कर्मणस्त्रैविध्यमुच्यते-नियमिति। नियतं नित्यं सङ्गरहितमासक्तिवर्जितमरागद्वेषतः कृतं

रागप्रयुक्तेन द्वेषप्रयुक्तेन च कृतं रागद्वेषतः कृतं तद्विपरीतं कृतमरागद्वेषतः कृतमफलप्रेप्सुना फलं प्रेप्सतीति फलप्रेप्सुः फलतृष्णस्तद्विपरीतेनाफलप्रेप्सुना कर्त्रा कृतं कर्म यत्तत्सात्त्विकमुच्यते।।२३।।

यत्त्विति। यत्तु कामेप्सुना फलप्रेप्सुनेत्यर्थः। कर्म साहंकारेण वा साहंकारेणेति न तत्त्वज्ञानापेक्षया किं तर्हि लौकिकश्रोत्रियनिरहंकारापेक्षया। यो हि परमार्थनिरहंकार आत्मविन्न तस्य कामेप्सुत्वबहुलायासकर्तृत्वप्राप्तिरस्ति।

सात्त्विकस्यापि कर्मणोऽनात्मवित्साहेकारः कर्ता किमुत राजसतामसयोः। लोकेऽनात्मविदपि श्रोत्रियो निरहंकार उच्यते निरहंकारोऽयं ब्राह्मण इति तस्मात्तदपेक्षयैव साहंकारेण वेत्युक्तम्।

पुनःशब्दः पादपूरणार्थः। क्रियते बहुलायासं कर्त्रा महतायासेन निर्वर्त्यते तत्कर्म राजसमुदाहृतम्।।२४।।

अनुबन्धमिति। अनुबन्धं पश्चाद्भावि यद्वस्तु सोऽनुबन्ध उच्यते तं चानुबन्धं, क्षयं यस्मिन्कर्मणि क्रियमाणे शक्तिक्षयोऽर्थक्षयो वा स्यात्तं क्षयं, हिंसां प्रणिपीडामनपेक्ष्य च पौरुषं पुरुषकारं शन्कोमीदं कर्म समापयितुमित्येवमात्मसामर्थ्यम्, इत्येतान्यनुबन्धादीन्यनपेक्ष्य पौरुषान्तानि मोहादविवेकत आरभ्यते कर्म

यत्त्त् तामसं तमोनिर्वृत्तमुच्यते।।२५।।

मुक्तेति। मुक्तसङ्गो मुक्तः परित्यक्तः सङ्गो येन स मुक्तसङ्गोऽनहंवादी नाहंवदनशीलो धृत्युत्साहसमन्वितो धृतिर्धारणमुत्साह उद्यमस्ताभ्यां समन्वितः संयुक्तो धृत्युत्साहसमन्वितः सिद्ध्यसिद्ध्योः क्रियमाणस्य कर्मणः फलसिद्धावसिद्धौ च सिद्ध्यसिध्द्योर्निर्विकारः केवलं शास्त्रप्रमाणप्रयुक्तो न फलरागादिनाऽयुक्तो यः स निर्विकार उच्यते। एवभूतः कर्ता यः स सात्त्विक उच्यते।।२६।।

रागीति। रागी रागोऽस्यास्तीति रागी, कर्मफलप्रेप्सुः कर्मफलार्थी, लुब्धः परद्रव्येषु संजाततृष्णस्तीर्थादौ च स्वद्रव्यापरित्यागी, हिंसात्मकः परपीडाकरस्वभावोऽशुचिर्बाह्यान्तःशौचवर्जितः, हर्षशोकान्वित इष्टप्राप्तौ हर्षोऽनिष्टप्राप्ताविष्टवियोगे च शोकस्ताभ्यां हर्षशोकाभ्यामन्वितः संयुक्तस्तस्यैव च कर्मणः संपत्तिविपत्तिभ्यां हर्षशोकौ स्यातां ताभ्यां संयुक्तो यः कर्ता स राजसः परिकीर्तितः।।२७।।

अयुक्त इति। अयुक्तोऽसमाहितः। प्राकृतोऽत्यन्तासंस्कृतबुद्धिर्बालसमः, स्तब्धो दण्डवन्न नमति कस्मैचित्, शठो मायावी शक्तिगूहनकारी, नैष्कृतिकः परवृत्तिच्छेदनपरः अलसोऽप्रवृत्तिशीलः कर्तव्येष्वपि, विषादी सर्वदावसन्नस्वभावः, दीर्घसूत्री च कर्तव्यानां दीर्घप्रसारणो यदद्य श्वो वा कर्तव्यं तन्मासेनापि न करोति, यश्चैवंभूतः स कर्ता तामस उच्यते।।२८।।

बुद्धेर्भेदमिति। बुद्धेर्भेदं धृतेश्चैव भेदं गुणतः सत्त्वादिगुणतस्रिविधं श्रृण्विति सूत्रोपन्यासः। प्रोच्यमानं कथ्यमानमशेषेण निरवशेषतो यथावत् पृथक्त्वेन विवेकतो धनंजय। दिग्विजये मानुषं दैवं च प्रभूतं धनमजयत्तेनासौ धनंजयोऽर्जुनः।।२९।।

प्रवृत्तिं च प्रवृत्तिः प्रवर्तनं बन्धहेतुः कर्ममार्गः। निवृत्तिं च निवृत्तिर्मोक्षहेतुः संन्यासमार्गः। बन्धमोक्षसमानवाक्यत्वात्प्रवृत्तिनिवृत्ती कर्मसंन्यासमार्गावित्यवगम्यते। कार्योकार्ये विहितप्रतिषिद्धे कर्तव्याकर्तव्ये करणाकरणे इत्येतत्, कस्य, देशकालाद्यपेक्षया दृष्टादृष्टार्थानां कर्मणाम्, भयाभये बिभेत्यस्मादिति भयं तद्विपरीतमभयं भयं चाभयं च भयाभये दृष्टादृष्टविषययोर्भयाभययोः कारणे इत्यर्थः। बन्धं सहेतुकं मोक्षं च सहेतुकं या वेत्ति विजानाति बुद्धिः सा पार्थ सात्त्विकी। तत्र ज्ञानं

बुद्धेर्वृत्तिर्बुद्धिस्तु वृत्तिमती। धृत्तिरपि वृत्तिविशेष एव बुद्धेः।।३०।।

ययेति। यया धर्मं शास्त्रचोदितमधर्मं च तत्प्रतिषिद्धं कार्यं चाकार्यमेव च पूर्वोक्ते अव कार्योकार्ये अयथावन्न यथावत्सर्वतो निर्णयेन न प्रजानाति या बुद्धिः सा पार्थराजसी।।३१।।

अधर्ममिति। अधर्मं प्रतिषिद्धं धर्मं विहितमिति या मन्यते जानाति तमसावृता सती सर्वार्थान्सर्वानेव ज्ञेयपदार्थान्विपरीतांश्च विपरीतानेव विजानाति बुद्धिः सा पार्थ तामसी।।३२।।

धृत्येति। धृत्या ययाऽव्यभिचारिण्येति व्यवहितेन संबन्धः। धारयते किं, मनःप्राणेन्द्रियक्रियाः मनश्च

प्राणाश्चेन्द्रियाणि तेषां क्रयाश्चेष्टास्ता उच्छास्त्रमार्गप्रवृत्तेर्धारयते धारयति। धृत्या हि धार्यमाणा उच्छास्त्रमार्गविषया न भवन्ति। योगेन समाधिनाऽव्याभिचारिण्या नित्यसमाध्यनुगतयेत्यर्थः। एतदुक्तं भवति। अव्यभिचारिण्या धृत्या मनःप्राणेन्द्रियक्रिया धारयमाणा योगेन धारयतीति। यैवंलक्षणा धृतिः सा पार्थ, सात्त्विकी।।३३।।

ययेति। यया तु धर्मकामार्थान्धर्मश्च कामश्चार्थश्च धर्मकामार्थास्तान्धर्मकामार्थान् धृत्या यया धारयते मनसि नित्यकर्तव्यरूपानवधारयते हे अर्जुन, प्रसङ्गेन यस्य यस्य धर्मादेर्धारणप्रसङ्गस्तेन तेन प्रसङ्गेन फलाकाङ्क्षी च भवति यः पुरुषस्तस्य धृतिर्या सा पार्थ, राजसी।।३४।।

ययेति। यया स्वप्नं निद्रां भयं त्रासं शोकं विषादमवसादं, विषण्णतां मदं विषयसेवामात्मनो बहु मन्यमानो

मत्त इव मदमेव च यस्तस्य धृतिर्या सा तामसी मता।।३५।।

गुणभेदेन क्रियाणां कारकाणां च त्रिधा भेद उक्तोऽथेदानीं फलस्य च सुखस्य त्रिधा भेद उच्यते-सुखमिति। सुखं त्विदानीं त्रिविधं शृणु समाधानं कुर्वित्येतन्मे मम भरतर्षभ। अभ्यासात्परिजयादावृत्ते रमते रतिं प्रतिपद्यते यत्र यस्मिन्सुखानुभवे, दुःखान्तं च दुःखावसानं दुःखोपशमं च निगच्छति निश्चयेन प्राप्नोति।।३६।।

यदिति। यत्तत् सुखमग्रे पूर्वं प्रथमसंनिपाते ज्ञानवैराग्यध्यानसमाध्यारम्भेऽत्यन्तायासपूर्वकत्वाद्विषमिव दुःखात्मकं भवति, परिणामे ज्ञानवैराग्यादिपरिपाकजं सुखममृतोपमं तत्सुखं सात्त्विकं प्रोक्तं विद्वद्भिरात्मनो बुद्धिरात्मबुद्धिरात्मबुद्धेः प्रसादो नैर्मल्यं सलिलवत्स्वच्छता ततो जातमात्मबुद्धिप्रसादजमात्मविषया वात्मालम्बना वा बुद्धिरात्मबुद्धिस्तत्प्रसादप्रकर्षाद्वा जातमित्येतत्तस्मात्सात्त्विकं तत्।।३७।।

विषयेति। विषयेन्द्रियसंयोगद्यत्तत्सुखं जायतेऽग्रे प्रथमक्षणेऽमृतोपममृतसमं परिणामे विषमिव बलवीर्यरूपप्रज्ञामेधाधनोत्साहहानिहेतुत्वादधर्मतज्जनितनरकादिहेतुत्वाच्च परिणामे तदुपभोगविपरिणामान्ते विषमिव तत्सुखं राजसं स्मृतम्।।३८।।

यदग्रे चति। यदग्रे चानुबन्धे चावसानोत्तरकाले सुखं मोहनं मोहकरमात्मनो निद्रालस्यप्रमादोत्थं निद्रा चालस्यं च प्रमादश्चेत्येतेभ्यः समुत्तिष्ठतीति निद्रालस्यप्रमादेत्थं तत्तामसमुदाहृतम्।।३९।।

अथेदानीं प्रकरणोपसंहारार्थः श्लोक आरभ्यते-नेति। न तदस्ति तन्नास्ति पृथिव्यां वा मनुश्यादि सत्त्वं

प्राणिजातमन्यद्वाऽप्राणिजातं दिवि देवेषु वा पुनः सत्त्वं प्रकृतिजैः प्रकृतितो जातैरेभिस्त्रिभिर्गुणैः

सत्त्वादिभिर्मुक्तं परित्यक्तं यत्स्याद्भवेन्न तदस्तीति पूर्वेण संबन्धः।।४०।।

सर्वः संसारः क्रियाकारकफललक्षणः सत्त्वरजस्तमोगुणात्मकोऽविद्यापरिकल्पितः समूलोऽनर्थ उक्तो वृक्षरूपकल्पनया चोर्ध्वमूलमित्यादिना, तं चासङ्गशस्त्रेण दृढेन छित्त्वा, ततः पदं तत्परिमार्गितव्यमिति चोक्तं, तत्र च सर्वस्य त्रिगुणात्मकत्वात्संसारकारणनिवृत्त्यनुपपत्तौ प्राप्तायां यथा तन्निवृत्तिः स्यात्तथा वक्तव्यं, सर्वश्च गीताशास्त्रार्थ उपसंहर्तव्य एतावानेव च सर्वो वेदः स्मृत्यर्थश्च पुरुषार्थमिच्छद्भिरनुष्ठेय इत्येवमर्थं च ब्राह्मणक्षत्रियविशामित्यादिरारभ्यते-ब्रह्मणेति। ब्राह्मणाश्च विशश्च ब्राह्मणक्षत्रियविशस्तेषां

ब्राह्मणक्षत्रियविशां शूद्राणां च। शूद्राणामसमासकरणमेकजातित्वे सति वेदेऽनधिकारात्, हे परंतप, कर्माणि प्रविभक्तानीतरेतरविभागेन व्यवस्थापितानि। केन, स्वभावप्रभवैर्गुणैः स्वभाव ईश्वरस्य प्रकृतिस्त्रिगुणात्मिका माया सा प्रभवो येषां गुणानां ते स्वभावप्रभवास्तैः। शमादीनि कर्माणि प्रविभक्तानि ब्राह्मणादीनाम्। अथवा ब्राह्मणस्वभावस्य सत्त्वगुणः प्रभवः कारणं, तथा क्षत्रियस्वभावस्य सत्त्वोपसर्जनं रजः प्रभवः, वैश्यस्वभावस्य तमउपसर्जनं रजः प्रभवः, शूद्रास्वभावस्य रजउफसर्जनं तमः प्रभवः,

प्रशान्त्यैश्वर्येहामूढतास्वभावदर्शनाच्चतुर्णाम्। अथवा जन्मान्तरकृतसंस्कारः प्राणिनां वर्तमानजन्मनि स्वकार्याभिमुखत्वेनाभिव्यक्तः स्वभावः स प्रभवो येषां गुणानां ते स्वभावप्रभवा गुणाः। गुणप्रादुर्भावस्य निष्कारणत्वानुपपत्तेः। स्वभावः कारणमिति कारणविशेषोपादानम्। एवं स्वभावप्रभवैः प्रकृतिप्रभवैः सत्त्वरजस्तमोभिर्गुणैः स्वकार्यानुरूपेण शमादीनि कर्माणि प्रविभक्तानि। ननु शास्त्रप्रविभक्तानि शास्त्रेण विहितानि ब्राह्मणादीनां शमादीनि कर्माणि कथमुच्यते सत्त्वादिगुणप्रविभक्तानीति। नैष दोषः, शास्त्रेणापि ब्रह्मणादीनां सत्त्वादिगुणविशेषापेक्षयैव शमादीनि कर्माणि प्रविभक्तानि न गुणानपेक्षयेति शास्त्रप्रविभक्तान्यपि कर्माणि गुणप्रविभक्तानीत्युच्यन्ते।।४१।।

कानि पुनस्तानि कर्माणीत्युच्यन्ते-शम इति। शमो दमश्च यथाव्याख्यातार्थौ, तपो यथोक्तं शारीरादि, शौचं व्याख्यातं, क्षान्तिः क्षमा, आर्जवमृजुतैव च, ज्ञानं विज्ञानम्, आस्तिक्यमास्तिकभावः, श्रद्दधानता आगमार्थेषु, ब्रह्मकर्म ब्राह्मणजोतेः कर्म मास्तिकस्वभावजम्। यदुक्तं स्वभावप्रभवैर्गुणैः प्रविभक्तानीति तदेवोक्तं स्वभावजमिति।।४२।।

शौर्यमिति। शौर्यं शूरस्य भावः, तेजः प्रागल्भ्यम्। धृतिर्धारणम्। सर्वावस्थास्वनवसादो भवति यथा धृत्योत्तम्भितस्य। दाक्ष्यं दक्षस्य भावः, सहसा प्रत्युत्पन्नेषु कार्येष्वव्यामोहेन प्रवृत्तिः। युद्धे चाप्यपलायनमपराङ्मुखीभावः शत्रुभ्यः। दानं देयद्रव्येषु मुक्तहस्तता। ईश्वरभावश्चेश्वरस्य भावः,

प्रभुशक्तिप्रकटीकरणमीशितव्यान्प्रति, क्षात्रं कर्म क्षत्रियजातेर्विहितं कर्म क्षात्रकर्म स्वभावजम्।।४३।।

कृषीति। कृषिघौरक्ष्यवाणिज्यं कृषिश्च गौरक्ष्यं च वाणिज्यं च कृषीगौरक्ष्यवाणिज्यं कृषिर्भूमेर्विलेखनं, गाः रक्षतीति गोरक्षस्तद्भावो गौरक्ष्यं पाशुपाल्यं वाणिज्यं वाणिक्कर्म क्रयविक्रयादिलक्षणं वैश्यकर्म वैश्यजातेः कर्म वैश्यकर्म स्वभावजम्। परिचर्यात्मकं शुश्रूषास्वभावं कर्म शूद्रस्यापि स्वभावजम्।।४४।।

एतेषां जातिविहितानां कर्मणां सम्यगनुष्ठितानां स्वर्गप्राप्तिः फलं स्वभावतो 'वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलधर्मायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्त'इत्यादिस्मृतिभ्यः, पुराणे च वर्णिनामाश्रमिणां च लोकफलभेदविशेषस्मरणात्।

कारणान्तरात्त्विदं वक्ष्यमाणं फलं-स्वे स्वे यथोक्तलक्षणभेदे कर्मण्यभिरतस्तत्परः संसिद्धिं स्वकर्मानुष्ठानादशुद्धिक्षये सति कायेन्द्रियाणां ज्ञाननिष्ठायोग्यतालक्षणां संसिद्धिं लभते प्राप्नोति नरोऽधिकृतः पुरुषः किं स्वकर्मानुष्ठानत एव साक्षात्संसिद्धिः। न, कथं तर्हि स्वकर्मनिरतः सिद्धिं यथा येन प्रकारेण विन्दति तच्छृणु।।४५।।

यत इति। यतो यस्मात्प्रवृत्तिरुत्पत्तिश्चेष्टा वा यस्मादन्तर्यामिण ईश्वराद्भूतानां प्रणिनां स्याद्येनेश्वरेण सर्वमिदं जगत्ततं व्याप्तं स्वकर्मणा पूर्वोक्तेन प्रतिवर्णं तमीश्वरमभ्यर्च्य पूजयित्वाराध्य केवलं ज्ञाननिष्ठायोग्यतालक्षणां सिद्धिं विन्दति मानवो मनुष्यः।।४६।।

यत एवमतः-श्रेयानिति। श्रेयान्प्रशस्यतरः स्वो धर्मः स्वधर्मो विगुणोऽपीत्यपिशब्दो द्रष्टव्यः, परधर्मात्स्वनुष्ठितात्स्वभावनियतं स्वभावेन नियतम्, यदुक्तं स्वभावजमिति तदेवोक्तं स्वभावनियतमिति, यथा विषजातस्येव कृमेर्विषं न दोषकरं तथा स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषं पापम्।।४७।।

स्वभावनियतं कर्म कुर्वाणो विषज इव कृमिः किल्बिषं नाप्नोतीत्युक्तम्। परधर्मश्च भयावह इति।

अनात्मज्ञश्च नहि कश्चित्क्षणमप्यकर्मकृत्तिष्ठतीति अतः-सहजमिति। सहजं सह जन्मनैवोत्पन्नं सहजं सह जन्मनैवोत्पन्नं सहजं किं तत्कर्म कौन्तेय, सदोषमपि त्रिगुणत्वान्न त्यजेत् सर्वारम्भा आरभ्यन्त इत्यारम्भाः सर्वकर्माणीत्येतत्प्रकरणात्। ये केचिदारम्भाः स्वधर्माः परधर्माश्च ते सर्वे हि यस्मात्त्रिगुणात्मकत्वमत्र हेतुस्त्रिगुणात्मकत्वाद्दोषेण धूमेन सहजेनाग्निरिवावृताः, सहजस्य कर्मणः स्वधर्माख्यस्य परित्यागेन परधर्मानुष्ठानेऽपि दोषोन्नैवमुच्यते, भयावहश्च परधर्मः। नच शक्यतेऽशेषतस्त्यक्तुमज्ञेन कर्म यतस्तस्मान्न त्यजेदित्यर्थः। किमशेषतस्त्यक्तुमशक्यं कर्मेति न त्यजेत्किं वा सहजस्य कर्मणस्त्यागे दोषो भवतीति। किंचातो यदि तावदशेषतस्त्यक्तुमशक्यमिति न त्याज्यं सहजं कर्मैवं तर्ह्यशेषतस्त्यागे गुण एव स्यादिति सिद्धिं भवति। सत्यमेवमशेषतस्त्याग एव नोपपद्यत इति चेत्, किं नित्यप्रचलितात्मकः पुरुषो यथा साख्यानां गुणाः किंवा क्रियैव कारकं, यथा बौद्धानां पञ्चस्कन्धाः क्षणप्रध्वंसिनः, उभयथापि कर्मणोऽशेषतस्त्यागो न संभवति। अथ तृतीयोऽपि पक्षो यदा करोति तदा सक्रियं वस्तु, यदा न करोति तदा निष्क्रियं वस्तु तदेव। तत्रैवं सति शक्यं कर्माशेषतस्त्यक्तुम्। अयं त्वस्मिंस्तृतीये पक्षे विशेषो न नित्यप्रचलितं वस्तु नापि क्रियैव कारकं किं तर्हि व्यवस्थिते द्रव्येऽविद्यमाना क्रियोत्पद्यते विद्यमाना च विनश्यति। शुद्धं द्रव्यं शक्तिमदवतिष्ठत इत्येवमाहुः काणादास्तदेव च कारकमित्यस्मिन्पक्षे को दोष इति, अयमेव तु दोषो यतस्त्वभागवतं मतमिदं कथं ज्ञायते, यत आह भगवान्नासतो विद्यते भाव इत्यादि। काणादानां ह्यसतो भावः सतश्चाभाव इतीदं मतम्। अभागवतत्वेऽपि न्यायवच्चेत्को दोष इति चेत्। उच्यते, दोषवत्त्विदं सर्वप्रमाणविरोधात्। कथम्, .दि तावद्द्व्यणुकादि द्रव्यं प्रागत्पत्तेरत्यन्तमेवासदुत्पन्नं च स्थितं कंचित्कालं पुनरत्यन्तमेवासत्त्वमापद्यते। तथाच सत्यसदेव सज्जायते

सदेवासत्त्वमापद्यतेऽभावो भावो भवति भावश्चाभाव इति। तत्राभावो जायमानः प्रागुत्पत्तेः शशविषाणकल्पः समवाय्यसमवायिनिमित्ताख्यं कारणमपेक्ष्य जायत इति। न चैवमभाव उत्पद्यते कारणं वापेक्षत इति शक्यं वक्तुं, असतां शशविषाणादीनामदर्शनात्। भावात्मकाश्चेद्घटादय उत्पद्यमानाः किंचिदभिव्यक्तिमात्रकारणमपेक्ष्योत्पद्यन्त इति शक्यं प्रतिपत्तुम्। किंचासतश्च सद्भावे

सतश्चासद्भावे न क्कचित्प्रमाणप्रमेयव्यवहारे विश्वासः कस्यचित्स्यात्। सत्सदेवासदसदेवेति निश्चयानुपपत्तेः किंचोत्पद्यत इति ह्यणुकादेर्द्रव्यस्य स्वकारणसत्तासंबन्धमाहुः। प्रागत्पत्तेश्चासत्पश्चात्स्वकारणव्यापारमपेक्ष्य स्वकारणैः परमाणुभिः सत्तया च समवायलक्षणेन संबन्धेन संबध्यते संबद्धं सत्कारणसमवेतं सद्भवति। तत्र वक्तव्यं कथमसतः सत्कारणं

भवेत्संबन्धो वा केनचित् स्यात्। नहि वन्ध्यापुत्रस्य सता संबन्धो वा कारणं वा केनचित्प्रमाणतः कल्पयितुं शक्यम्। ननु नैवं वैशेषिकैरभावस्य संबन्धः कल्प्यते ह्यणुकादीनां हि द्रव्याणां स्वकारणेन समवायलक्षणः संबन्धः सतामेवोच्यत इति। न संबन्धात्प्राक्सत्त्वानभ्युपगमात्। नहि वैशेषिकैः

कुलालदण्डचक्रदिव्यापारात्प्राग्घटादीनामस्तित्वमिष्यते। नच मृद एव घटाद्याकारप्राप्तिमिच्छन्ति। ततश्चासत एव संबन्धः पारिशेष्यादिष्टो भवति। नन्वसतोऽपि समवायलक्षणः संबन्धो न विरुद्धः। नः, वन्ध्यापुत्रादीनामदर्शनात्। घटादेरेव प्रागभावस्य स्वकारणसंबन्धो भवति न वन्ध्यापुत्रादेः, अभावस्य तुल्यत्वेऽपीति विशेषोऽभावस्य वक्तव्यः। एकस्याभावो द्वयोरभावः सर्वस्याभावः प्रागभावः प्रध्वंसाभाव इतरेतराभावोऽत्यन्ताभाव इति लक्षणतो न केनचिद्विशेषो दर्शयितुं शक्यः। असति च विशेषे घटस्य प्रागभाव एव कुलालादिभिर्घटभावमापद्यते संबध्यते च भावेन कपालाख्येन, स्वकारणेन सर्वव्यवहारयोग्यश्च भवति नतु घटस्यैव प्रध्वंसाभावोऽभावत्वे सत्यपीति प्रध्वंसाद्यभावानां न क्कचिह्यवहारयोग्यत्वं प्रागभावस्यैव

ह्यणुकादिद्रव्याख्यस्योत्पत्त्यादिव्यवहारार्हत्वमित्येतदसमञ्जसमभावत्वाविशेषादत्यन्तप्रध्वंसाभावयोरिव। ननु नैवास्माभिः प्रागभावस्य भावापत्तिरुच्यते। भावस्यैव हि तर्हि भावापत्तिर्यथा घटस्य घटापत्तिः पटस्य वा पटापत्तिः। एतदप्यभावस्य भावापत्तिवदेव प्रमाणविरुद्धम्। सांख्यस्यापि यः परिणामपक्षः सोऽप्यपूर्वधर्मोत्पत्ति विनाशाङ्गीकरणाद्वैशेषिकपक्षान्न विशिष्यते।
अभिव्यक्तितिरोभावाङ्गीकरणेऽप्यभिव्यक्तितिरोभावयोर्विद्यमानत्वनिरूपणे पूर्ववदेव प्रमाणविरोधः। एतेन कारणस्यैव संस्थानमुत्पत्त्यादीत्येतदपि प्रत्युक्तम्। परिशेष्यात्सदेकमेव
वस्त्वविद्ययोत्पत्तिविनाशादिधर्मैर्नटवदनेकधा विकल्प्यत इतीदं भागवतं मतमुक्तं नासतो विद्यते भाव इत्यस्मिञ्श्लोके। सत्प्रत्ययस्याव्यभिचाराह्यभिचाराच्चेतरेषामिति। कथं तर्हि आत्मनोऽविक्रियत्वेऽशेषतः कर्मणस्त्यागो नोपपद्यत इति। यदि वस्तुभूता गुणाः यदि वाविद्याकल्पितास्तद्धर्मः कर्म तदात्मन्यविद्याध्यारोपितमेवेत्यविद्वान्नहि कश्चित्क्षणमप्यशेषतस्त्यक्तम्। विद्वांस्तु पुनर्विद्ययाऽविद्यायां निवृत्तायां शन्कोत्येवाशेषतः कर्म परित्युक्तुमविद्याध्यारोपितस्य शेषानुपपत्तेः। नहि
तैमिरिकदृष्ट्याध्यारोपितस्य द्विचन्द्रादेस्तिमिरापगमे शेषोऽवतिष्ठते। एवंच सतीदं वचनमुपपन्नं सर्वकर्माणि मनसेत्यादि। 'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः', 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मावनः'इति च।।४८।।

या च कर्मजा सिद्धिरुक्ता ज्ञाननिष्ठायोग्यतालक्षणा तस्याः फलभूता नैष्कर्म्यसिद्धिर्ज्ञाननिष्ठालक्षणा वक्तव्येति श्लोक आरभ्यते-असक्तबुद्धिरिति। असक्ता सङ्गरहिता बुद्धिरन्तःकरणं यस्य स जितात्मा विगतस्पृहो विगता स्पृहा तृष्णा देहजीवितभोगेषु यस्मात्स विगतस्पृहः। य एवंभूत आत्मज्ञः स नैष्कर्म्यसिद्धिं निर्गतानि कर्माणि यस्मान्निष्क्रियब्रह्मात्मसंबोधात्स निष्कर्मा तस्य भावो नैष्कर्म्यं नैष्कर्म्यंच तत्सिद्धिश्च सा नैष्कर्म्यसिद्धिः नैष्कर्म्यस्य वा सिद्धिर्निष्क्रियात्मस्वरूपावस्थानलक्षणस्य सिद्धिर्निष्पत्तिस्तां

नैष्कर्म्यसिद्धिं परमां प्रकृष्टां कर्मजसिद्धिविलक्षणां सद्योमुक्त्यवस्थानरूपां संन्यासेन सम्यग्दर्शनेन तत्पूर्वकेण वा सर्वकर्मसंन्यासेनाधिगच्छति प्राप्नोति। तथाचोक्तं 'सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नास्ते'इति।।४९।।

पूर्वोक्तेन स्वकर्मानुष्ठाननेनेश्वराभ्यर्चनरूपेण जनितां प्रागुक्तलक्षणां सिद्धिं प्राप्तस्योत्पन्नात्मविवेकज्ञानस्य केवलात्मज्ञाननिष्ठारूपा नैष्कर्म्यलक्षणा सिद्धिर्येन क्रमेण भवति तद्वक्तव्यमित्याह-सिद्धिमिति। सिद्धिं प्राप्तः स्वकर्मणेश्वरं समभ्यर्च्य तत्प्रसादजां कायेन्द्रियाणां ज्ञाननिष्ठायोग्यतालक्षणां सिद्धिं प्राप्तः, सिद्धिं प्राप्त इति तदनुवाद उत्तरार्थः। किं तदुत्तरं

यदर्थोऽनुवाद इत्युच्यते। यथा येन प्रकारेण ज्ञाननिष्ठारूपेण ब्रह्म

परमात्मानमाप्नोति तथा तं प्रकारं ज्ञाननिष्ठाप्राप्तिक्रमं मे मम वचनान्निबोध त्वं निश्चयेनावधारयेत्येतत्। किं विस्तरेण नेत्याह समासेनैव संक्षेपेणैव हे कौन्तेय।

यथा ब्रह्म प्राप्नेति तथा निबोधेति अनेन या प्रतिज्ञाता ब्रह्मप्राप्तिस्तामिदंतया दर्शयितुमाह-निष्ठा ज्ञानस्य या परेति। निष्ठा पर्यवसानं परिसमाप्तिरित्येतत्। कस्य ब्रह्मज्ञानस्य या परा परिसमाप्तिः। कीदृशी सा, यादृशमात्मज्ञानम्। कीदृक् तत्, यादृश आत्मा। कीदृशोऽसौ, यादृशो भगवतोक्त उपनिषद्वाक्यैश्च न्यायतश्च। ननु विषयाकारं ज्ञानं न विषयो नाप्याकारवानात्मेष्यते क्कचित्, ननु 'आदित्यवर्णो भारूपः स्वयंज्योतिः' इत्याकारवत्त्वमात्मनः श्रूयते, न तमोरूपत्वप्रतिषेधार्थत्वात्तेषां वाक्यानाम्।

आत्मनस्तमोरूपत्वे प्राप्ते तत्प्रतिषेधार्थान्यादित्यवर्णमित्यादिवाक्यानि, अरूपमिति च विशेषतो रूपप्रतिषेधात्। अविषयत्वाच्च 'न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्। अशब्दमस्पर्शम्'इत्याद्यैः। तस्मादात्माकारं ज्ञानमित्यनुपपन्नम्। कथं तर्ह्यात्मनो ज्ञानम्। सर्वं हि यद्विषयं ज्ञानं तत्तदाकारं भवति निराकारश्चात्मेत्युक्तम्। ज्ञानात्मनोश्चोभयोर्निराकारत्वे कथं तद्भावनानिष्ठेति। न, अत्यन्तनिर्मलत्वस्वच्छत्वसूक्ष्मत्वोपपत्तेरात्मनो बुद्धेश्चात्मसमनैर्मल्याद्युपपत्तेरात्मचैतन्याकाराभासत्वोपपत्तिः। बुद्ध्याभासं मनस्तदाभासानीन्द्रियाणीन्द्रियाभासश्च देहोऽतो लौकिकैर्देहमात्र एवात्मदृष्टिः क्रियते। देहचैतन्यवादिनश्च लोकायतिकाश्चैतन्यविशिष्टः कायः पुरुष इत्याहुः, तथान्य इन्द्रियचैतन्यवादिनः। अन्ये बुद्धिचैतन्यवादिनः। ततोऽप्यन्तरव्यक्तमव्याकृताख्यमविद्यावस्थमात्मत्वेन प्रतिपन्नाः केचित्। सर्वत्र हि बुद्ध्यादिदेहान्ते आत्मचैतन्याभासतात्मभ्रान्तिकारणमित्यतश्च आत्मविषयं ज्ञानं न विधातव्यं। किं तर्हि नामरूपाद्यनात्माध्यारोपणनिवृत्तिरेव कार्या नात्मचैतन्यविज्ञानम्, अविद्याध्यारोपितसर्वपदार्था कारैरेव विशिष्टतया गृह्यमाणत्वात्। अतएव हि विज्ञानवादिनो बौद्धा विज्ञानव्यतिरेकेण वस्त्वेव नास्तीति प्रतिपन्नाः प्रमाणान्तरनिरपेक्षतां च स्वसंविदितत्वाभ्युपगमेन। तस्मादविद्याध्यारोपणनिराकरणमात्रं ब्रह्मणि कर्तव्यं नतु ब्रह्मज्ञाने यत्नोऽत्यन्तप्रसिद्धत्वात्। अविद्याकल्पितनामरूपविशेषाकारापह्नतबुद्धित्वादत्यन्तप्रसिद्धं सुविज्ञेयमासन्नतरमात्मभूतमप्यप्रसिद्धं दुर्विज्ञेयमतिदूरमन्यदिव च प्रतिभात्यविवेकिनाम्। बाह्याकारनिवृत्तबुद्धीनां तु लब्धगुर्वात्मप्रसादानां नातःपरं सुखं सुप्रसिद्धं सुविज्ञेयं स्वासन्नमस्ति। तथाचोक्तं 'प्रत्यक्षावगमं धर्म्यम्' इत्यादि। केचित्तु पण्डितंमन्या निराकारत्वादात्मवस्तु नोपैति बुद्धिरतो दुःसाध्या सम्यग्ज्ञाननिष्ठेत्याहुः। सत्यं, एवं

गुरुसंप्रदायरहितानामश्रुतवेदान्तानामत्यन्तबहिर्विषयासक्तबुद्धीनां सम्यक्प्रमाणेष्वकृतश्रमाणाम्, तद्विपरीतानां तु लौकिकग्राह्यकद्वैतवस्तुनि सद्बुद्धिर्नितरां दुःसंपाद्यात्मचैतन्यव्यतिरेकेण वस्त्वन्तरस्यानुपलब्धेः। यथा चैतदेवमेव नान्यथेत्यवोचाम। उक्तं च भगवता 'यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः' इति। तस्माद् बाह्याकारभेदबुद्धिमिवृत्तिरेवात्मस्वरूपालम्बने कारणम्। नह्यात्मा नाम कस्यचित्कदाचिदप्रसिद्धः प्राप्यो हेय उपादेयो वा। अप्रसिद्धे हि तस्मिन्नात्मनि अस्वार्थाः सर्वाः प्रवृत्तयः व्यर्थाः प्रसज्येरन्। नच देहाद्यचेतनार्थत्वं शक्यं कल्पयितुम्। नच सुखार्थं सुखं दुःखार्थं वा दुःखमात्मावगत्यवसानार्थत्वाच्च सर्वव्यवहारस्य। तस्माद्यथा स्वदेहस्य परिच्छेदाय

न प्रमाणान्तरापेक्षा ततोऽप्यात्मनोऽन्तरतमत्वात्तदवगतिंप्रति न प्रमाणान्तरापेक्षेत्यात्मज्ञाननिष्ठा विवेकिनां सुप्रसिद्धेति सिद्धम्। येषामपि निराकारं ज्ञानमप्रत्यक्षं तेषामपि ज्ञानवशेनैव ज्ञेयावगतिरिति ज्ञानमत्यन्तं प्रसिद्धं सुखादिवदेवेत्यभ्युपगन्तव्यम्। जिज्ञासानुपपत्तेश्च। अप्रसिद्धं चेज्ज्ञानं ज्ञेयवज्जिज्ञास्येत। यथा ज्ञेयं घटादिलक्षणं ज्ञानेन ज्ञाता व्याप्तुमिच्छति तथा ज्ञानमपि ज्ञानान्तरेण ज्ञाव्यमाप्तुमिच्छेत्। न चैतदस्ति। अतोऽत्यन्तप्रसिद्धं ज्ञानं ज्ञाताप्यतएव प्रसिद्ध इति। तस्माज्ज्ञाने यत्नो न कर्तव्यः किं त्वनानात्मन्यात्मबुद्धिनिवृत्तावेव। तस्माज्ज्ञाननिष्ठा सुसंपाद्या।।५०।।

सेयं ज्ञानस्य परा निष्ठोच्यते कथं कार्येतिबुद्ध्याध्यवसायात्मिकया विशुद्धया मायारहितया युक्तः संपन्नो धृत्या धैर्येणात्मानं कार्यकरण संघातं नियम्य च नियमनं कृत्वा वशीकृत्य शब्दादीञ्शब्द आदिर्येषां ते शब्दादयस्तान्विषयांस्त्यक्त्वा सामर्थ्याच्छरीरस्थितिमात्रहेतुन्केवलान्मुक्त्वा ततोऽधिकान्सुखार्थांस्त्यक्त्वेत्यर्थः। शरीरस्थित्यर्थत्वेन प्राप्तेषु च रागद्वेषौ व्युदस्य च परित्यज्य।।५१।।

ततः-विविक्तसेव्यरण्यनदीपुलिनगिरिगुहादीन्विविक्तान्देशान्सेवितुं शीलमस्येति विविक्तसेवी। लघ्वशनशीलः।

विविक्तसेवालघ्वशनयोर्निद्रादिदोषनिवर्तकत्वेन चित्तप्रसादहेतुत्वाद्ग्रहणम्। यतवाक्कायमानसो वाक् च कायश्च मानसं च यतानि संयतानि यस्य ज्ञाननिष्ठस्य स ज्ञाननिष्ठो यतिर्यतवाक्कायमानसः स्यात्। एवमुपरतसर्वकरणः सन्, ध्यानयोगपरो ध्यानमात्मस्वरूपचिन्तनं योग आत्मविषय एवैकाग्रीकरणं तौ ध्यानयोगौ परत्वेन कर्तव्यौ यसय स ध्यानयोगपरः। नित्यं नित्यग्रहणं मन्त्रजपाद्यन्यकर्तव्याभावप्रदर्शनार्थम्। वैराग्यं विरागभावो दृष्टादृष्टेषु विषयेषु वैतृष्णयं समुपाश्रितः सम्यगुपाश्रितो नित्यमेवेत्यर्थः।।५२।।

किंच-अहंकारमहंकरणमहंकारो देहेन्द्रियादिषु तं, बलं सामर्थ्यं कामरागादियुक्तं नेतरच्छरीरादिसामर्थं स्वाभाविकत्वेन तत्त्यागस्याशक्यत्वात्। दर्पो नाम हर्षानन्तरभावी धर्मातिक्रमहेतुः 'हृष्टो दृप्यति दृप्तो

धर्ममतिक्रामति'इति स्मरणात्, तं च, काममिच्छां क्रोधं द्वेषं परिग्रहमिन्द्रियमनोगतदोषपरित्यागेऽपि शरीरधारणप्रसङ्गेन धर्मानुष्ठाननिमित्तेन वा बाह्यः परिग्रहः प्राप्तस्तं च विमुच्य परित्यज्य परमहंसपरिव्राजको भूत्वा देहजीवनमात्रेऽपि निर्गतममभावो निर्ममोऽत एव शान्त उपरतः। यः संहृतहर्षायासो यतिर्ज्ञाननिष्ठो ब्रह्मभूयाय ब्रह्मभवनाय कल्पते समर्थो भवति।।५३।।

अनेन क्रमेण ब्रह्मभूतो ब्रह्मप्राप्तः प्रसन्नात्मा लब्धाध्यात्मप्रसादो न शोचति किंचिदर्थवैकल्यमात्मनो वैगुण्यं चोद्दिश्य न शोचति न संतप्यते न काङ्क्षति। ब्रह्मभूतस्यायं स्वभावोऽनूद्यते न शोचति न काङ्क्षतीति। नह्यप्राप्तविषयाकाङ्क्षा ब्रह्मविद उपपद्यते। 'न हृष्यतीति'वा पाठः। समः सर्वेषु भूतेष्वात्मौपम्येन सर्वेषु भूतेषु सुखं दुःखं वा सममेव पश्यतीत्यर्थो नात्मसमदर्शनमिह तस्य वक्ष्यमाणत्वाद्भक्त्या मामभिजानातीति। एवंभूतो ज्ञाननिष्ठो मद्भक्तिं मयि परमेश्वरे भक्तिं भजनं परामुत्तमां ज्ञानलक्षणां चतुर्थी लभते चतुर्विधा भजन्ते मामित्युक्तम्।।५४।।

ततो ज्ञानलक्षणया-भक्तया मामभिजानाति यावानहमुपाधिकृतविस्तरभेदो यश्चाहं

विध्वस्तसर्वोपाधिभेद उत्तमपुरुश आकाशकल्पस्तं मामद्वैतं चैतन्यमात्रैकरसमजरममरमभयमनिधनं तत्त्वतोऽभिजानाति। ततो मामेवं तत्त्वतो ज्ञात्वा विशते तदनन्तरं मामेव ज्ञानानन्तरम्। नात्र ज्ञानप्रवेशक्रिये भिन्ने विवक्षिते ज्ञात्वा विशते तदनन्तरमिति,। किं तर्हि फलान्तराभावज्ञानमात्रमेव, क्षेत्रज्ञं चापि मा विद्धीत्युक्तत्वात्। ननु विरुद्धमिदमुक्तं ज्ञानस्य या परा निष्ठा तया मामभिजानातीति, कथं विरुद्धमिति चेदुच्यते, यदैव यस्मिन्विषये ज्ञानमुत्पद्यते ज्ञातुस्तदैव तं विषयमभिजानाति ज्ञातेति न ज्ञाननिष्ठां ज्ञानावृत्तिलक्षणामपेक्षत इति। अतश्च ज्ञानेन नाभिजानाति ज्ञानावृत्त्या तु ज्ञाननिष्ठयाभिजानातीति। नैष दोषो ज्ञानस्य स्वात्मोत्पत्तिपरिपाकहेतुयुक्तस्य प्रतिपक्षविहीनस्य यदात्मानुभवनिश्चयावसानत्वं तस्य निश्ठाशब्दाभिलापाच्छास्त्राचार्योपदेशेन ज्ञानोत्पत्तिपरिपाकहेतुं सहकारीकारणं बुद्धिविशुद्ध्याद्यमानित्वादि चापेक्ष्य जनितस्य क्षेत्रज्ञपरमात्मैकत्वज्ञानस्य कर्त्रादिकारकभेदबुद्धिनिबन्धनसर्वकर्मसंन्यासससहितस्य स्वात्मानुभवनिश्चयरूपेण यदवस्थानं सा परा ज्ञाननिष्ठेत्युच्यते। सेयं ज्ञाननिष्ठार्तादिभिक्तित्रयापेक्षया परा चतुर्थी भक्तिरित्युक्ता। तया परया भक्तया भगवन्तं तत्त्वतोऽभिजानाति। यदनन्तरमेवेश्वरक्षेत्रज्ञभेदबुद्धिरशेषतो निवर्तते अतो ज्ञाननिष्ठालक्षणया भक्तया मामभिजानातीति वचनं न विरुध्यते। अत्र च सर्वं निवृत्तिविधायि शास्त्रं वेदान्तेतिहासपुराणस्मृतिलज्ञणं न्यायप्रसिद्धमर्थवद्भवति, 'विदित्वा व्युत्थायाथ भिक्षाचर्यं चरन्ति तस्मान्न्यासमेषां तपसामतिरिक्तमाहुर्न्यास एवात्यरेचयत्' इति

संन्यासः कर्मणां न्यासः, 'वेदानिमं च लोकममुं च परित्यज्य, त्यज धर्ममधर्मं चे' त्यादि। इह च दर्शितानि वाक्यानि, नच तेषां वाक्यानामानर्थक्यं युक्तम्। नचार्थवादत्वं स्वप्रकरणस्थत्वात् प्रत्यगात्माविक्रियस्वरूपनिष्ठत्वाच्च मोक्षस्य। नहि पूर्वसमुद्रं जिगमिषोः प्रातिलोम्येन प्रत्यक्समुद्रं जिगमिषुणा समानमार्गत्वं संभवति। प्रत्यगात्मविषयप्रत्ययसंतानकरणाभिनिवेशश्च ज्ञाननिष्ठा। सा च प्रत्यक्समुद्रगमनवत्कर्मणा सहभावित्वेन विरुध्यते। पर्वतसर्षपयोरिवान्तरवान्विरोधः प्रमाणविदां निश्चितः। तस्मात्सर्वकर्मसन्यासेनैव ज्ञाननिष्ठा कार्येति सिद्धम्।।५५।।

स्वकर्मणा भगवतोऽभ्यर्चनभक्तियोगस्य सिद्धिप्राप्तिः फलं ज्ञाननिष्ठायोग्यता। यन्निमित्ता ज्ञाननिष्ठा मोक्षफलावसाना। स भगवद्भक्तियोगोऽधुना स्तूयतेशास्त्रार्थोपसंहारप्रकरणे शास्त्रार्थनिश्चयदाढ्यार्य-सर्वेति। सर्वकर्माणि प्रतिषिद्धान्यपि सदाकुर्वाणोऽनुतिष्ठन्मह्यपाश्रयोऽहं वासुदेव ईश्वरो व्यपाश्रयो यस्य स मह्यपाश्रयो

मय्यर्पितस्त्रवात्मभाव इत्यर्थः। सोऽपि मत्प्रसादान्ममेश्वरस्य प्रसादादवाप्नोति शाश्वतं नित्यं वैष्णवं पदमव्ययम्।।५६।।

यस्मादेवं तस्मात्-चेतसा विवेकबुद्ध्या सर्वकर्माणि दृष्टादृष्टार्थानि मयीश्वरे संन्यस्य यत्करोषि यदश्नासीत्युक्तन्यायेन मत्परोऽहं वासुदेवः परो यस्य तव स त्वं मत्परः सन् मय्यर्पितसर्वात्मभावः बुद्धियोगं मयि समाहितबुद्धित्वं बुद्धियोगस्तं बुद्धियोगमुपाश्रित्याश्रयोऽनन्यशरणत्वं मच्चित्तो मय्येव चित्तं यस्य तव स त्वं मच्चित्तः सततं सर्वदा भव।।५७।।

मच्चित्तः सर्वदुर्गाणि सर्वाणि दुस्तराणि संसारहेतुजातानि मत्प्रसादात्तरिष्यस्यतिक्रमिष्यसि। अथ चेद् यदि

त्वं मदुक्तमहंकारात्पण्डितोऽहमिति न श्रोष्यसि न ग्रहीष्यसि ततस्त्वं विनङ्क्ष्यसि विनाशं गमिष्यसि।।५८।।

इदं च त्वया न मन्तव्यं स्वतन्त्रोऽहं किमर्थं परोक्तं करिष्यामीति। यदिचेत्त्वमहंकारमाश्रित्य न योत्स्य इति न युद्धं करिष्यामीति मन्यसे चिन्तयसि निश्चयं करोषि मिथ्यैव प्यवसायो निश्चयस्ते तव, यस्मात् प्रकृतिः क्षत्रस्वभावस्त्वां नियोक्ष्यति।।५९।।

यस्माच्च स्वभावजेन शौर्यादिना यथोक्तेन कौन्तेय, निबद्धो निश्चयेन बद्धः स्वेनात्मीयेन कर्मणा कर्तुं नेच्छसि यत्कर्म मोहादविवेकतः करिष्यस्यवशोऽपि परवश एव तत्कर्म।।६०।।

यस्मात्-ईश्वर ईशनशीलो नारायणः सर्वभूतानां सर्वप्राणिनां हृद्देशे हृदयदेशेऽर्जुन, शुक्लान्तरात्मस्वभावो विशुद्धान्तःकरण इति, 'अहश्च कृष्णमहरर्जुनं च' इति दर्शनात्, तिष्ठति स्थितिं लभते। तेषु स कथं तिष्ठतीत्याह-भ्रामयन्भ्रमणं कारयन्सर्वंभूतानि यन्त्रारूढान्यधिष्ठितानीवेतीवशब्दोऽत्र द्रष्टव्यः। यथा दारुकृतपुरुषादीनि यन्त्रारूढानि। मायया छद्मना भ्रामयंस्तिष्ठतीति संबन्धः।।६१।।

तमेवेश्वरं शरणामाश्रयं संसारार्तिहरणार्थं गच्छाश्रय सर्वभावेन सर्वात्माना हे भारत, ततस्तत्प्रसादादीश्वरानुग्रहात्परां प्रकृष्टां शान्तिं परामुपरतिं स्थानं च मम विष्णोः परमं पदमवाप्स्यसि शाश्वतं नित्यम्।।६२।।

इत्येतत्ते तुभ्यं ज्ञानमाख्यातं कथितं गुह्याद्गोप्याद्गुह्यतरमतिशयेन गुह्यं रहस्यमित्यर्थः। मया सर्वज्ञेनेश्वरेण। विमृश्य विमर्शनमालोचनं कृत्वैतद्यथोक्तं शास्त्रमशेषेण समस्तं यथोक्तं चार्थजातं यथेच्छसि

तथा कुरु।।६३।।

भूयोऽपि मयोच्यमानं श्रृणु-सर्वगुह्येभ्योऽत्यन्तगुह्यतममत्यन्तरहस्यमुक्तमप्यसकृद्भूयः पुनः शृणु मे मम दृढमव्यभिचारेणेति कृत्वा ततस्तेन कारणेन यक्ष्यामि कथयिष्यामि ते तव हितं परमं ज्ञानप्राप्तिसाधनम्। तद्धि सर्वहितानां हिततमम्।।६४।।

किं तदित्याह-मदिति। मन्मना भव मच्चित्तो भव मद्भक्तो भव मद्भजनो भव मद्याजी मद्यजनशीलो भव मां नमस्कुरु नमस्कारमपि ममैव कुरु। तत्रैवं वर्तमानो वासुदेवएव समर्पितसाध्यसाधनप्रयोजनो मामेवैष्यस्यागमिष्यसि। सत्यं ते तव प्रतिजाने सत्यां प्रतिज्ञां करोम्येतस्मिन्वस्तुनीत्यर्थः। यतः प्रियोऽसि मे। एवं भगवतः सत्यप्रतिज्ञत्वं बुद्ध्वा भगवद्भक्तेरवश्यंभाविमोक्षफलमवधार्य भगवच्छरणैकपरायणो भवेदिति वाक्यार्थः।।६५।।

कर्मयोगनिष्ठायाः परमरहस्यमीश्वरशरणतामुपसंहृत्याथेदानीं कर्मयोगनिष्ठाफलं सम्यग्दर्शनं सर्ववेदान्तसारविहितं वक्तव्यमित्याह-सर्वधर्मान्सर्वे च ते धर्माश्च सर्वधर्मास्तान्।

धर्मशब्देनात्राधर्मोऽपि गृह्यते नैष्कर्म्यस्य विवक्षितत्वात्। 'नाविरतो दुश्चरितात्' इति 'त्यज धर्ममधर्मं च' इत्यादिश्रुतिस्मृतिभ्यः। सर्वधर्मान्परित्यज्य संन्यस्य सर्वकर्माणीत्येतत्। मामेकं सर्वात्मानं समं सर्वभूतस्थमीश्वरमच्युतं गर्भजन्मजरामरणविवर्जितमहमेवेत्येवमेकं शरणं व्रज न मत्तोऽन्यदस्तीत्यवधारयेत्यर्थः। अहं त्वा त्वामेवं निश्चितबुद्धिं सर्वपापेभ्यः सर्वधर्माधर्मबन्धनरूपेभ्यो मोक्षयिष्यामि स्वात्मभावप्रकाशीकरणेन। उक्तंच 'नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता' इति। अतो मा शुचः शोकं मा कार्षीरित्यर्थः।।६६।।

अस्मिन्हि गीताशास्त्रे परं निःश्रेयससाधनं निश्चितं किं ज्ञानं किं कर्म वाहोस्विदुभयमिति।

कुतः संदेहः 'यज्ज्ञात्वामृतमश्नुते', 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्'इत्यादीनि वाक्यानि

केवलाज्ज्ञानान्निःश्रेयसप्राप्तिं दर्शयन्ति। 'कर्मण्येवाधिकारस्ते' 'कुरु कर्मैवे'त्येवमादीनि कर्मणामवश्यकर्तव्यतां दर्शयन्ति। एवं ज्ञानकर्मणोः कर्तव्यतोपदेशात्समुच्चितयोरपि निःश्रेयसहेतुत्वं स्यादिति भवेत्संशयः। किं पुनरत्र मीमांसाफलम्। नन्वेतदेवैषामन्यतमस्य परमनिःश्रेयससाधनत्वावधारणम्। अतो विस्तीर्णतरं मीमास्यमेतत्। आत्मज्ञानस्य तु केवलस्य निःश्रेयसहेतुत्वं भेदप्रत्ययनिवर्तकत्वेन कैवल्यफलावसानत्वात्। क्रियाकारकफलभेदबुद्धिरविद्ययात्मनि नित्यप्रवृत्ता मम कर्माहं कर्तामुष्मै फलायेदं कर्म करिष्यामीतीयमविद्यानादिकालप्रवृत्ता। अस्या अविद्याया निवर्तकमयमहमस्मि केवलोऽकर्ताक्रियोऽफलो न मत्तोऽन्योऽस्ति कश्चिदित्येवंरूपमात्मविषयं ज्ञानमुत्पद्यमानं कर्मप्रवृत्तिहेतुभूताया भेदबुद्धेर्निवर्तकत्वात्। तुशब्दः

पक्षद्वयं निवर्तयति। अकार्यत्वाच्च निःश्रेयसस्य कर्मसाधनत्वानुपपत्तिः। नहि नित्यं वस्तु कर्मणा ज्ञानेन वा क्रियते। केवलज्ञानमप्यनर्थकं हिं। नाविद्यानिवर्तकत्वे सति दृष्टकैवल्यफलावसानत्वात्। अविद्यातमोनिवर्तकस्य ज्ञानस्य दृष्टं कैवल्यफलावसानत्वम्। रज्ज्वादिविषये सर्पाद्यज्ञानतमोनिवर्तकप्रदीपप्रकाशफलवत्। विनिवृत्तसर्पादिविकल्परज्जुकैवल्यावसानं हि प्रकाशफलं तथा ज्ञानम्। दृष्टार्थानां च छिदिक्रियाग्निमन्थनादीनां व्यापृतकर्त्रादिकारकाणां द्वैधीभावाग्निदर्शनादिफलादन्यफले कर्मान्तरे वा व्यापारानुपपत्तिर्यथा तथा ज्ञाननिष्ठा क्रियायां दृष्टार्थायां

व्यापृतस्य ज्ञात्रादिकारकस्यात्मकैवल्यफलादन्यफले कर्मान्तरे प्रवृत्तिरनुपपन्नेति न ज्ञाननिष्ठा कर्मसहितोपपद्यते। भुज्यग्निहोत्रादिक्रियावस्त्यादुतु चेत्। न, कैवल्यफले ज्ञाने क्रियाफलार्थित्वानुपपत्तेः। कैवल्यफले हि ज्ञाने प्राप्ते सर्वतः संप्लुतोदके फले कूपतडागादिक्रियाफलार्थित्वाभाववत्फलान्तरे तत्साधनभूतायां वा क्रियायामर्थित्वानुपपत्तिः। नहि राजप्राप्तिफले कर्मणि व्यापृतस्य क्षेत्रप्राप्तिफले व्यापारेपपत्तिस्तद्विषयं चार्थित्वम्। तस्मान्न कर्मणोऽस्ति निःश्रेयससाधनत्वम्। नच ज्ञानकर्मणोः समुच्चितयोः। नापि ज्ञानस्य कैवल्यफलस्य कर्मसाहाय्यापेक्षाविद्यानिवर्तकत्वेन विरोधात्। नहि तमस्तमसो निवर्तकमतः केवलमेव ज्ञानं निःश्रेयससाधनमिति। न नित्याकरणेप्रत्यवायप्राप्तेः कैवल्यस्य च नित्यत्वात्। यत्तावत्केवलज्ञानात्कैवल्यप्राप्तिरित्येतत्तदसत्। यतो नित्यानां कर्मणां श्रुत्युक्तानामकरणे प्रत्यवायो नरकादिप्राप्तिलक्षणः स्यात्। नन्चेवं तर्हि कर्मभ्यो मोक्षो नास्तीत्यनिर्मोक्ष एव नैष दोषो नित्यत्वान्मोक्षस्य। नित्यानां कर्मणामनुष्ठानात्प्रत्यवायस्याप्राप्तिः। प्रतिषिद्धस्य

चाकरणादनिष्टशरीरानुपपत्तिः। काम्यानां च वर्जनादिष्टशरीरानिपपत्तिः। वर्तमानशरीरारम्भकस्य च कर्मणः फलोपभोगक्षये पतितेऽस्मिञ्शरीरे देहान्तरोत्पत्तौ च कारणाभावादात्मनो रागादीनां चाकरणात्स्वरूपावस्थानमेव कैवल्यमित्ययत्नसिद्धं कैवल्यमिति। अतिक्रान्तानेकजन्मान्तरकृतस्य स्वर्गनरकादिप्राप्तिफलस्यानारब्धकार्यस्योपभोगानुपपत्तेः क्षयाभाव इति चेत्। न, नित्यकर्मानुष्ठानायासदुःखोपभोगस्य तत्फलोपभोगत्वोपपत्तेः। प्रायश्चित्तवद्वा पूर्वोपात्तदुरितक्षयार्थत्वान्नित्यकर्मणाम्। आरब्धानां चोपभोगेनैव कर्मणां क्षीणत्वादपूर्वाणां च कर्मणामनारम्भेऽयत्नसिद्धं कैवल्यमिति। न, 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय'

इति विद्याया अन्यः पन्था मोक्षाय न विद्यत इति श्रुतेश्चर्मवदाकाशवेष्टनासंभववदविदुषो मोक्षासंभवश्रुतेर्ज्ञानात्कैवल्यमाप्नोतीति च पुराणस्मृतेरनारब्धफलानां पुण्यानां कर्मणां क्षयानुपपत्तेश्च। यथा पूर्वोपात्तानां दुरितानामनारब्धफलानां संभवस्तथा पुण्यानामप्यनारब्धफलानां स्यात्संभवः। तेषां च देहान्तरमकृत्वा क्षयानुपपत्तौ मोक्षानुपपत्तिः। धर्माधर्महेतूनां च रागद्वेषमोहानामन्यत्रात्मज्ञानादुच्छेदानुपपत्तेर्धर्माधर्मोच्छेदानुपपत्तिः। नित्यानां च कर्मणां पुण्यलोकफलश्रुतेर्वर्णा आश्रमाश्च स्वकर्मनिष्ठा इत्यादिस्मृतेश्च कर्मक्षयानुपपत्तिः। ये त्वाहुर्नित्यानि कर्माणि दुःखरूपत्वात्पूर्वकृतदुरितकर्मणां फलमेव नतु तेषां स्वरूपव्यतिरेकेणान्यत्फलमस्त्यश्रुतत्वाज्जीवनादिनिमित्ते च विधानादिति। न, अप्रवृत्तानां फलदानासंभवाद्दुःखफलविशेषानुपपत्तिश्च स्यात्। यदुक्त पूर्वजन्मकृतदुरितानां कर्मणां फलमन्यकर्मारब्धे जन्मन्युपभुज्यत इत्युपपत्तिः। अन्यथा स्वर्गफलोपभोगायाग्निहोत्रादिकर्मारब्धे जन्मनि नरककर्मफलोपभोगानुपपत्तिर्न स्यात्। तस्य दुरितदुःखविशेषफलत्वानुपपत्तेश्च, अनेकेषु हि दुरितेषु संभवत्सु भिन्नदुःखसाधनफलेषु नित्यकर्मानुष्ठानायासदुःखमेव पूर्वकृतदुरितकर्मफलमिति। कथम्, अप्रसूतफलस्य पूर्वकृतदुरितस्य क्षयो नोपपद्यत इति प्रकृतं तत्र प्रसूतफलस्य कर्मणः फलं नित्यकर्मानुष्ठानायासदुःखमाह भवान्नाप्रसूतफलस्येति। अथ सर्वमेव पूर्वकृतं दुरितं तत्प्रसूतफलमेवेति मन्यते भवांस्ततो

नित्यकर्मानुष्ठानायासदुःखमेव फलमिति विशेषणमयुक्तं नित्यकर्मविध्यानर्थक्यप्रसङ्गश्चोपभोगेनैव प्रसूतफलस्य दुरितकर्मणः क्षयोपपत्तेः। किंच श्रुतस्य नित्यस्य दुःखं कर्मणश्चेत्फलं नित्यकर्मानुष्ठानायासादेव तद्दृश्यते व्यायामादिवत्तदन्यस्येति कल्पनानुपपत्तिः। जीवनादिनिमित्ते यद्विहितं प्रायश्चित्तं नतु तस्य पापस्य तत्फलम्। अथ तस्यैव पापस्य निमित्तस्य प्रायश्चित्तदुःखं फलं जीवनादिनिमित्त मपि नित्यकर्मानुष्ठानायासदुःखं जीवनादिनिमित्तस्यैव तत्फलं प्रसज्यते

नित्यप्रायश्चित्तयोर्नैमित्तिकत्वाविशेषात्। किंचान्यन्नित्यस्य काम्यस्य चाग्निहोत्रादेरनुष्ठानायासदुःखस्य तुल्यत्वान्नित्यानुष्ठानायासदुःखमेव पूर्वकृतदुरितस्य फलं नतु काम्यानुष्ठानायासदुःखमिति विशेषो नास्तीति तदपि पूर्वकृतदुरितफलं प्रसज्येत। तथाच सति नित्यानां

फलाश्रवणात्तद्विधानान्यथानुपपत्तेश्च नित्यानुष्ठानायासदुःखं पूर्वकृतदुरितफलमित्यर्थापत्तिकल्पनाऽनुपपन्ना। एवंविधानान्यथानुपपत्तेरनुष्ठानायासदुःखव्यतिरिक्तफलत्वानुमानाच्च नित्यानाम्। विरोधाच्च। विरुद्धं चेदमुच्यते नित्यकर्मण्यनुष्ठीयमानेऽन्यस्य कर्मणः फलं भुज्यत इत्यभ्युपगम्यमाने स एवोपभोगो

नित्यस्य कर्मणः फलमिति नित्यस्य कर्मणः फलाभाव इति च विरुद्धमुच्यते। किंच काम्याग्निहोत्रादावनुष्ठीयमाने नित्यमप्यग्निहोत्रादि तन्त्रेणैवानुष्ठितं भवतीति तदायासदुःखेनैव काम्याग्निहोत्रादिफलमुपक्षीणं स्यात्तत्तन्त्रत्वात्। अथ काम्याग्निहोत्रादिफलमन्यदेव स्वर्गादि तदनुष्ठानायासदुःखमपि भिन्नं प्रसज्येत। नच तदस्ति दृष्टविरोधात्। नहि काम्यानुष्ठानायासदुःखात्केवलनित्यानुष्ठानायासदुःखं भिद्यते। किंचान्यदविहितमप्रतिषिद्धं च कर्म तत्कालफलं नतु शास्त्रचोदितं प्रतिषिद्धं वा तत्कालफलम्। भवेद्यदि तदा स्वर्गादिष्वप्यदृष्टफलशासने चोद्यमो न स्यात्। अग्निहोत्रादीनामेव

कर्मस्वरूपाविशेषेऽनुष्ठानायासदुःखमात्रेणोपक्षयः काम्यानां च स्वर्गादिमहाफलत्वमङ्गेतिकर्तव्यताद्याधिक्ये त्वसति फलकामित्वमात्रेणेति न शक्यं कल्पयितुम्। तस्मान्न नित्यानां कर्मणामदृष्टफलाभावः कदाचिदप्युपद्यते। अतश्चाविद्यापूर्वकस्य कर्मणो विद्यैव शुभस्याशुभस्य वा क्षयकारणमशेषतो न नित्यकर्मानुष्ठानम्। अविद्याकामबीजं हि सर्वमेव कर्म। तथाचोपपादितम्। अविद्वद्विषयं कर्म विद्वद्विषया च सर्वकर्मसंन्यासपूर्विका ज्ञाननिष्ठा। उभौ तौ न विजानीतिः, वेदाविनाशिनं नित्यं, ज्ञानयोगेन साख्यानां कर्मयोगेन योगिनां, अज्ञानां कर्मसङ्गिनां, तत्त्ववित्तु, गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते, सर्वकर्माणि मनसा संन्यास्यास्ते, नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित्, अर्थादज्ञः करोमीति।आरुरुक्षोः कर्मकारणमारूढस्य योगस्थस्य शम एव कारणम्। उदारास्त्रयोऽप्यज्ञा ज्ञानी त्वात्मैव मे मतम्, अज्ञाः कर्मिणो गतागतं कामकामा लभन्ते, अनन्याश्चिन्तयन्तो मां नित्ययुक्ता, यथोक्तमात्मानमाकाशकल्पमकल्मषमुपासते। ददामि बुद्धियोगं तं येन मामुपयान्ति ते अर्थान्न कर्मिणोऽज्ञा उपयान्ति। भगवत्कर्मकारिणो ये युक्ततमा अपि कर्मिणोऽज्ञास्त उत्तरेत्तरहीनफलत्यागावसानसाधनाः। अनिर्देश्याक्षरोपासकास्त्वद्वेष्टा सर्वभूतानामित्यध्यायपरिसमाप्त्युक्तसाधनाः, क्षेत्राध्यायाद्यध्यायत्रयोक्तज्ञानसाधनाश्च। अधिष्ठानादिपञ्चहेतुकसर्वकर्मसंन्यासिनामात्मैकत्वाकर्तृत्वज्ञानवतां परस्यां ज्ञाननिष्ठायां वर्तमानानां भगवत्तत्त्वविदामनिष्टादिकर्मफलत्रयं परमहंसपरिव्राजकानामेव लब्धभगवत्स्वरीपात्मैकत्वशरणानां न भवति भवत्येवान्येषामज्ञानां कर्मिणामसंन्यासिनामित्येष गीताशास्त्रोक्तस्य कर्तव्यार्थस्य विभागः। अविद्यापूर्वरत्वं सर्वस्य कर्मणो.सिद्धमिति चेन्न ब्रह्महत्यादिवत्। यद्यपि शास्त्रावगतं नित्यं कर्म तथाप्यविद्यावत एव भवति। यथाप्रतिषेधशास्त्रावगतमपि ब्रह्महत्यादिलक्षणं कर्मानर्थकारणमविद्याकामादिदोषवतो भवत्यन्यथा प्रवृत्त्यनुपपत्तेस्तथा नित्यनैमित्तिककाम्यान्यपीति। देहव्यतिरिक्तात्मन्यज्ञाते प्रवृत्तिर्नित्यादिकर्मस्वनुपपन्नेति चेन्न, चलनात्मकस्य कर्मणो.नात्मकर्तृकस्याहंकरोमीति प्रवृत्तिदर्शनात्। देहादिसंघातेऽहंप्रत्ययो गौणो न मिथ्येति चेन्न, तत्कार्येष्वपि गौणत्वोपपत्तेः। आत्मीय देहादिसंघातेऽहंप्रत्ययो गौणो यथात्मीये पुत्रे आत्मा वै पुत्रनामासीति, लोके चापि मम प्राण एवायं गौरिति तद्वत्, नैवायं मिथ्याप्रत्ययः। मिथ्याप्रत्ययस्तु स्थाणुपुरुषयोरगृह्यमाणविशेषयोः। न गौणप्रत्ययस्य मुख्यकार्यार्थता, अधिकरणस्तुत्यर्थत्वाल्लुप्तोपमाशब्देन।

यथा सिंहो देवदत्तोऽग्निर्माणवक इति सिंह इवाग्निरिव
क्रौर्यपैङ्गल्यादिसामान्यवत्त्वाद्देवदत्तमाणवकाधिकरणस्तुत्यर्थमेव नतु सिंहकार्यमग्निकार्यं वा
गौणशब्दप्रत्ययनिमित्तं किंचित्साध्यते, मिथ्याप्रत्ययकार्यं त्वनर्थमनुभवतीति गौणप्रत्ययविषयं च जानाति नैष
सिंहो देवदत्तस्तथायमग्निर्माणवक इति। तथा गौणेन देहादिसंघातेनात्मना कृतं कर्म

न मुख्येनाहंप्रत्ययविषयेणात्मना

कृतं स्यात्। नहि गौणसिंहाग्निभ्यां कृतं कर्म मुख्यसिंहाग्निभ्यां कृतं स्यात्। नच क्रौर्येण पैङ्गल्येन वा
मुख्यासिंहाग्न्योः कार्यं किंचित्क्रियते स्तुत्यर्तेनोपक्षीणत्वात्। स्तूयमानौ च जानीतो नाहं सिंहो
नाहमग्निरिति न

सिंहस्य कर्म ममाग्नेश्चेति तथा न संघातस्य कर्म मम मुख्यस्यात्मन इति प्रत्ययो युक्तरः स्यान्न पुनरहं
कर्ता मम कर्मेति। यच्चाहुरात्मीयैः स्मृतीच्छाप्रयत्नैः कर्महेतुभिरात्मा कर्म करोतीति न, तेषां
मिथ्याप्रत्ययपूर्वकत्वात्। मिथ्याप्रत्ययनिमित्तेष्टानिष्टानुभूतक्रियाफलजनितसंस्कारपूर्वका हि

स्मृतीच्छाप्रयत्नादयः। यथास्मिञ्चन्मनि देहादिसंघाताभिमानरागद्वेषादिकृतौ धर्माधर्मौ तत्फलानुभवश्च
तथाऽतीतेऽतीततरेऽपि जन्मनीत्यनादिरविद्याकृतः संसारोऽतीतोनागतश्चानुमेयः। ततश्च
सर्वकर्मसंन्याससहितज्ञाननिष्ठया आत्यन्तिकः। संसारोपरम इति सिद्धम्।

अविद्यात्मकत्वाच्च देहाभिमानस्य तन्निवृत्तौ देहानुपपत्तेः संसारानुपपत्तिः। देहादिसंघात
आत्माभिमानोऽविद्यात्मकः। नहि लोके गवादिभ्योऽन्योऽहं मत्तश्चान्ये गवादय इति जानंस्तानहमिति प्रत्ययं
मन्यते कश्चित्। अजानंस्तु स्थाणौ पुरुषविज्ञानवदविवेकतो देहादिसंघाते कुर्यादहमिति प्रत्ययं न विवेकतो
जानन्। यस्त्वात्मा वै पुत्रनामासीति पुत्रेऽहंप्रत्ययः स तु जन्यजनकसंबन्धनिमित्तो गौणः। गौणेन चात्मना
भोजनादिवत्परमार्थकार्यं न शक्यते कर्तुं गौणसिंहाग्निभ्यां मुख्यसिंहाग्निकार्यवत्।
अदृष्टविषयचोदनाप्रामाण्यादात्मकर्तव्यं गौणैर्देहेन्द्रियात्मभिः क्रियत एव इति चेन्न, अविद्याकृतात्मत्वात्तेषां।
नच गौणा आत्मनो देहेन्द्रियादयः। किं तर्हि मिथ्याप्रत्ययेनैवासङ्गस्यात्मनः सङ्गत्यात्मत्वमापाद्यते
तद्भावे भावात्तदभावे चाभावात्। अविवेकिनां ह्यज्ञानकाले बालनां दृश्यते दीर्घोऽहं गौरोऽहमिति
देहादिसंघाते अहंप्रत्ययः। नतु विवेकिनामन्योऽहं देहादिसंघातादिति जानतां तत्काले
देहादिसंघातेऽहंप्रत्ययो भवति। तस्मान्मिथ्याप्रत्ययाभावेऽभावात्तत्कृत एव न गौणः।
पृथग्गृह्यमाणविशेषसामान्ययोर्हि सिंहदेवत्तयोरग्निमाणवकयोर्वा गौणः प्रत्ययः शब्दप्रयोगौ वा
स्यान्नगृह्यमाणसामान्यविशेषयोः। यत्तूक्तं श्रुतिप्रामाण्यादिति। तन्न, तत्प्रामाण्यस्यादृष्टविषयत्वात्।
प्रत्यक्षादिप्रमाणानुपलब्धे हि विषयेऽग्निहोत्रादिसाध्यसाधनसंबन्धे श्रुतेः प्रामाण्यं न
प्रत्यक्षादिविषयेऽदृष्टर्शनार्थविषयत्वात्प्रामाण्यस्य। तस्मान्न दृष्टमिथ्याज्ञाननिमित्तस्याहंप्रत्ययस्य देहादिसंघाते
गोणत्वं कल्पयितुं शक्यम्। नहि श्रुतिशतमपि शीतोऽग्निरप्रकाशो वेति ब्रुवत्प्रामाण्यमुपैति। यदि
ब्रूयाच्छीतोऽग्निरप्रकाशो वेति तथाप्यर्थान्तरं श्रुतेर्विवक्षितं कल्प्यं प्रामाणयान्यथानुपपत्तेर्नतु प्रमाणान्तरविरुद्धं
स्ववचनवुरुद्धं वा। कर्मणो मिथ्याप्रत्ययवत्कर्तृकंत्वात्कर्तुरभावे श्रुतेरप्रामाण्यमिति चेत्। न,
ब्रह्मविद्यायामर्थवत्त्वोपप्तेः। कर्मविधिश्रुतिवद्ब्रह्मविद्याविधिश्रुतेरप्रामाण्यप्रसङ्ग इति चेत्। न,
बाधकप्रत्ययानुपपत्तेः। यथा ब्रह्मविद्याविधिश्रुत्यात्मन्यवगतेदेहादिसंघातेऽहंप्रत्ययो बाध्यते
तथात्मन्येवात्मावगतिर्न कदाचित्केनचित्कथंचिदपि बाधितुं शक्या, फलाव्यतिरेकादवगतेर्यथाग्निरुष्णः
प्रकाशश्चेति। नचैवं कर्मविधिश्रुतेरप्रामाण्यं, पूर्वपूर्वप्रवृत्तिनिरोधेनोत्तरोत्तरापूर्वप्रवृत्तिजननस्य

प्रत्यगात्माभिमुख्येनप्रवृत्त्युत्पादनार्थत्वात्। मिथ्यात्वेऽप्युपायस्योपेयसत्यतया सत्यत्वमेव स्याद्यथार्थवादानां विधिशेषाणाम्। लोकेऽपि बालोन्मत्तादीनां पयआदौ पाययितव्ये

चूडावर्धनादिवचनम्। प्रकारान्तरस्थानां च साक्षादेव वा प्रामाण्यसिद्धिः
प्रगात्मज्ञानाद्देहाभिमाननिमित्तप्रत्यक्षादिप्रामाण्यवत्। यत्तु मन्यसे स्वयमव्याप्रियमामोऽप्यात्मा संनिधिमात्रेण करोति तदेव च मुख्यं कर्तृत्वमात्मनः। यथा राजा युद्ध्यमानेषु योधेषु युध्यत इति प्रसिद्धं स्वयमयुध्यमानोऽपि संनिधानादेव जितः पराजितश्चेति च तथा सेनापतिवाचैव करोति क्रियाफलसंबन्धश्च राज्ञः सेनापतेश्च दृष्टः, यथाच ऋत्विक्कर्म यजमानस्य, तथा देहादीनां कर्मात्मकृतं स्यात्तत्फलस्यात्मगामित्वात्। यथा वा भ्रामकस्य लोहभ्रामयितृत्वादव्यापृतस्यैव मुख्यमेव कर्तृत्वं तथा चात्मन इति। तदसत्, अकुर्वतः कारकत्वप्रसङ्गात्।

कारकमनेकप्रकारमिति चेन्न। राजप्रभृतीनां मुख्यस्यापि कर्तृत्वस्य दर्शनात्। राजा तावत्स्वव्यापारेणापि युध्यते योधानां च योधयितृत्वे धनदाने च मुख्यमेव कर्तृत्वं तथा जयपराजयफलोभोगे। तथा यजमानस्यापि प्रधानत्यागे दक्षिणादाने च मुख्यमेव कर्तृत्वम्। तस्मादव्यापृतस्य कर्तृत्वोपचारो यः स गौण इत्यवगम्यते। यदि मुख्यं कर्तृत्वं स्वव्यापारलक्षणं नोपलभ्यते राजयजमानप्रभृतीनां तदा संनिधिमात्रेणापि कर्तृत्वं मुख्यं परिकल्प्येत तथा भ्रामकस्य लोहभ्रमणेन न तथा राजयजमानप्रभृतीनां तदा संनिधिमात्रेणापि कर्तृत्वं मुख्यं परिकल्प्येत यथा भ्रामकस्य लोहभ्रमणेन न तथा राजयजमानादीनां स्वव्यापारो नोपलभ्यते। तस्मात्संनिधिमात्रेणापि कर्तृत्वं गौणमेव। तथाच सति तत्फलसंबन्धोऽपि गौण एव स्यात्। न, गौणेन

मुख्यं कार्यं निर्वर्त्यते। तस्मादसदैवैतद्गीयते देहादीनां व्यापरेणाव्यामृत आत्मा कर्ता भोक्ता च स्यादिति। भ्रान्तिनिमित्तं तु सर्वमुपपद्यते। यथा स्वप्ने मायायां चैवम्। नच देहाद्यात्मप्रत्ययभ्रान्तिसन्तानविच्छेदेषु सुषुप्तिसमाध्यादिषु कर्तृत्वभोक्तृत्वाद्यनर्थ उपलभ्यते। तस्माद्भ्रन्तिप्रत्ययनिमित्त एवायं संसारभ्रमो नतु परमार्थ इति सम्यग्दर्शनादत्यन्तमेवोपरम इति सिद्धम्। सर्वं गीताशास्त्रार्थमुपसंहृत्यास्मिन्नध्याये विशेषतश्चान्ते इह शास्त्रार्थदाढर्याय संक्षेपत उपसंहारं कृत्वाथेदानीं शास्त्रसंप्रदायविधिमाह-इदमिति। इदं शास्त्रं ते तव हिताय मयोक्तं संसारविच्छित्तयेऽतपस्काय तपोरहिताय न वाच्यमिति व्यवहितेन संबध्यते। तपस्विनेऽप्यभक्ताय गुरौ देवेच भक्तिरहिताय कदाचन कस्यांचिदप्यवस्थायां न वाच्यम्। भक्तस्तपस्व्यपि सन्नशुश्रूषुर्यो भवति तस्मा अपि न

वाच्यम्। नच यो मां वासुदेवं प्राकृतं मनुष्यं मत्वाभ्यसूयत्यात्मप्रशंसादिदोषाध्यारोपणेन ममेश्वरत्वमजानन्न सहतेऽसावप्ययोग्यस्तस्मा अपि न वाच्यम्। भगवति अनसूयायुक्ताय भक्ताय तपस्विने शुश्रूषवेऽनसूयवे च वाच्यं शास्त्रमिति सामर्थ्याद्गम्यते। तत्र मेधाविने तपस्विने वेत्यनयोर्विकल्पदर्शनात्। शुश्रूषाभक्तियुक्ताय तपस्विने तद्युक्ताय मेधाविने वा वाच्यम्। शुश्रूषाभक्तिवियुक्ताय व तपस्विने नापि मेधाविने वाच्यम्। भगवत्यसूयायुक्ताय समस्तगुणवतेऽपि न वाच्यम्। गुरुशुश्रूषाभक्तिमते च वाच्यमित्येष शास्त्रसंप्रदायविधिः।।६७।।

संप्रदायस्य कर्तुः फलमिदानीमाह-य इति। य इमं यथोक्तं परमं निःश्रेयसार्थं केषवार्जुनयोः संवादरूपं ग्रन्थं गुह्यं गोप्यं मद्भक्तेषु मयि भक्तिमत्स्वभिधास्यति वक्ष्यति। ग्रन्थतोऽर्थतश्च स्थापयिष्यतीत्यर्थः। यथा त्वयि मया। भक्तेः पुनर्ग्रहणाद्भक्तिमात्रेण केवलेन शास्त्रसंप्रदाने प्रत्रं भवतीति गम्यते। कथमभिधास्यतीत्युच्यते भक्तिं मयि परां कृत्वा भगवतः परमगुरोः अच्युतस्य शुश्रूषा मया क्रियत इत्येवं कृत्वेत्यर्थः। तस्येदं फलं मामेवैष्यति मुच्यत एव। असंशयोऽत्र संशयो

न कर्तव्यः।।६८।।

किंच-नच तस्माच्छास्त्रसंप्रदायकृतो मनुष्येषु मनुष्याणां मध्ये कश्चिन्मे मम प्रियकृत्तमोऽतिशयेन प्रियकरोऽन्यःप्रयकृत्तमो नास्त्येवेत्यर्थो वर्तमानेषु नच भविता भविष्यत्यपि काले तस्माद्द्वितीयोऽन्यः प्रियतरः प्रियकृत्तरः भुवि लोकेऽस्मिन् न भविता।।६९।।

योऽपि-अध्येष्यते च पठिष्यति य इमं धर्म्यं धर्मादनपेतं ग्रन्थमावयोस्तेनेदं कृतं स्यात्। ज्ञानयज्ञेन विधिजपोपांशुमानसानां यज्ञानां ज्ञानयज्ञो मानसत्वाद्विशिष्टतम इत्यतस्तेन ज्ञानयज्ञेन गीताशास्त्रस्याध्ययनं स्तूयते। फलविधिरेव वा देवतादिविष्यज्ञानयज्ञानयज्ञफलतुल्यमस्य फलं

भवतीति। तेनाध्ययनेनाहमिष्टः पूजितः स्यां भवेयमिति मे मम मतिर्निश्चयः।।७०।।

अथ श्रोतुरिदं फलम्-श्रद्वावाञ्श्रद्दधानोऽनसूयश्चासूयावर्जितः सन्निमं ग्रन्थं शृणुयादपि यो नरोऽपिशब्दात्किमुताऽर्थज्ञानवान् सोऽपि पापान्मुक्तः
शुभान्प्रशस्ताँल्लोकान्प्राप्नुयात्पुण्यकर्मणामग्निहोत्रादिकर्मवताम्।।७१।।

शिष्यस्य शास्त्रार्थग्रहणाग्रहणविवेकबुभुत्सया पृच्छति-तदग्रहणे ज्ञाते पुनर्ग्राहयिष्याम्युपायान्तरेणापीति प्रष्टुरभिप्रायः। यत्नान्तरं चास्थाय शिष्यः कृतार्थः कर्तव्य इत्याचार्यधर्मः प्रदर्शितो भवति।
कच्चित्किमेतन्मयोक्तं श्रुतं श्रवणेनावधारितां पार्थ किं त्वयैकाग्रेण चेतसा चित्तेन किं वाऽप्रमादतः। कच्चिदज्ञानसंमोहोऽज्ञाननिमित्तः संमोहोऽविवित्तभावोऽविवेकः सावाभाविकः किं प्रनष्टः। यदर्थोऽयं शास्त्रश्रवणायासस्तव मम चोपदेष्ट्टत्वायासः प्रवृत्तस्ते तुभ्यं धनंजय।।७२।।

नष्टो मोहोऽज्ञानजः समस्तसंसारानर्थहेतुः सागर इव दुस्तरः। स्मृतिश्चात्मतत्त्वविषयी लब्धा। यस्या लाभात्सर्वह्रदयग्रन्थीनां विप्रमोक्षः। त्वत्प्रसादात्तवप्रसादान्मया त्वत्प्रसादमाश्रितेनाच्युत। अनेन मोहनाशप्रश्नप्रतिवचनेन सर्वशास्त्रार्थज्ञानफलमेतावदेवेति निश्चितं दर्शितं भवति। यतो ज्ञानान्मोहनाश आत्मस्मृतिलाभश्चेति। तथाच श्रुतावनात्मविच्छोचामीत्युपन्यस्यात्मज्ञानेन सर्वग्रन्थिविप्रमोक्ष उक्तः। भिद्यते ह्रदयग्रन्थिस्तत्र को मोहः कः शोक एकत्वमनुपश्यत इति च मन्त्रवर्णः। अथेदानीं त्वच्छासने स्थितोऽस्मि गतसंदेहो मुक्तसंशयः। करिष्ये वचनं तव। अहं त्वत्प्रसादात्कृतार्थो न मे कर्तव्यमस्तीत्यभिप्रायः।।७३।।

परिसमाप्तः शास्त्रार्थः। अथेदानीं कथासंबन्धप्रदर्शनार्थं संजय उवाच-इत्येवमहं वासुदेवस्य पार्थस्य च महात्मनः संवादमिमं यथोक्तमश्रौषं श्रुतवानास्मि अद्भुतमत्यन्तविस्मयकरं रोमहर्षणं रोमाञ्चकरम्।।७४।।

तं चेमं व्यासप्रसादात् ततो दिव्यचक्षुर्लाभाच्छ्रुतवानेतं संवादं गुह्यतमं परं योगं योगार्थत्वाद्ग्रन्थोऽपि योगः, संवादमिमं योगमेव वा योगेश्वरत्कृष्णात्साक्षात्कथयतः स्वयं न परंपराया।।७५।।

हे राजन्धृतराष्ट्र संस्मृत्य संस्मृत्य प्रतिक्षणं संवादमिममद्भुतं केशवार्जुनयोः पुण्यं श्रवणादपि पापहरं श्रुत्वा ह्रष्यामि च मुहुर्मुहुः प्रतिक्षणम्।।७६।।

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेर्विश्वरूपं विस्मयो मे महान् राजन्, ह्रष्यामि च पुनः पुनः।।७७।।

किंबहुना यत्र यस्मिन्पक्षे योगेश्वरः सर्वयोगानामीश्वरस्तत्प्रभावत्वात्सर्वयोगबीजश्च कृष्णो

यत्र पार्थो यस्मिन्पक्षे धनुर्धरो गाण्डीवधन्वा तत्र श्रीस्तस्मिन्पाण्डवानां पक्षे श्रीः विजयस्तत्रैव भूतिः श्रियो विशेषो विस्तारो

भूतिर्ध्रुवाव्यभिचारिणी नीतिर्नय इत्येवं मतिर्ममेति।।७८।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यपूज्यपादश्रीमदाचार्यश्रीशंकरभगवतः कृतौ श्रीभगवद्गीताभाष्ये मोक्षसन्यासयोगो नामाष्टादशोऽध्यायः।।१८।।

BHAGAVADGITA

Sanskrit Commentary - Sri Sankaracharya

Chapter 2

DV

२.१ च्द्धत च्छदत्तुद्धठुड़ण्ठुद्धन्छ ङुत्ङु ददृद्य ड़दृश्श्ङ्कदद्य दृद द्यण्त्म त्मथ्दृत्तु. च्ण्ङ्क ड़दृश्श्ङ्कदद्यठुद्धन्र त्मद्यठुद्धद्यत्म ढद्धदृश्र २.१०.

२.२ च्द्धत च्छदत्तुद्धठुड़ण्ठुद्धन्छ ङुत्ङु ददृद्य ड़दृश्श्ङ्कदद्य दृद द्यण्त्म त्मथ्दृत्तु. च्ण्ङ्क ड़दृश्श्ङ्कदद्यठुद्धन्र त्मद्यठुद्धद्यत्म ढद्धदृश्र २.१०.

२.३ च्द्धत च्छदत्तुद्धठुड़ण्ठुद्धन्छ ङुत्ङु ददृद्य ड़दृश्श्ङ्कदद्य दृद द्यण्त्म त्मथ्दृत्तु. च्ण्ङ्क ड़दृश्श्ङ्कदद्यठुद्धन्र त्मद्यठुद्धद्यत्म ढद्धदृश्र २.१०.

२.४ च्द्धत च्छदत्तुद्धठुड़ण्ठुद्धन्छ ङुत्ङु ददृद्य ड़दृश्श्ङ्कदद्य दृद द्यण्त्म त्मथ्दृत्तु. च्ण्ङ्क ड़दृश्श्ङ्कदद्यठुद्धन्र त्मद्यठुद्धद्यत्म ढद्धदृश्र २.१०.

२.५ च्द्धत च्छदत्तुद्धठुड़ण्ठुद्धन्छ ङुत्ङु ददृद्य ड़दृश्श्ङ्कदद्य दृद द्यण्त्म त्मथ्दृत्तु. च्ण्ङ्क ड़दृश्श्ङ्कदद्यठुद्धन्र त्मद्यठुद्धद्यत्म ढद्धदृश्र २.१०.

२.६ च्द्धत च्छदत्तुद्धठुड़ण्ठुद्धन्छ ङुत्ङु ददृद्य ड़दृश्श्ङ्कदद्य दृद द्यण्त्म त्मथ्दृत्तु. च्ण्ङ्क ड़दृश्श्ङ्कदद्यठुद्धन्र त्मद्यठुद्धद्यत्म ढद्धदृश्र २.१०.

२.७ च्द्वत् च्छदत्त्वद्धत्वड़ण्त्वद्धन्त्व ङुत्ङु ददृद्य ड़दृश्श्ङदद्य दृद द्यण्त्म त्मथ्दृत्त्व. च्ण्ङ्ख ड़दृश्श्ङदद्यत्वद्धन्र त्मद्यत्वद्धद्यत्म ढद्धदृश्र २.१०.

२.८ च्द्वत् च्छदत्त्वद्धत्वड़ण्त्वद्धन्त्व ङुत्ङु ददृद्य ड़दृश्श्ङदद्य दृद द्यण्त्म त्मथ्दृत्त्व. च्ण्ङ्ख ड़दृश्श्ङदद्यत्वद्धन्र त्मद्यत्वद्धद्यत्म ढद्धदृश्र २.१०.

२.९ च्द्वत् च्छदत्त्वद्धत्वड़ण्त्वद्धन्त्व ङुत्ङु ददृद्य ड़दृश्श्ङदद्य दृद द्यण्त्म त्मथ्दृत्त्व. च्ण्ङ्ख ड़दृश्श्ङदद्यत्वद्धन्र त्मद्यत्वद्धद्यत्म ढद्धदृश्र २.१०.

।।२.१०।। --

अत्र 'दृष्ट्वा तु पाण्डवानीकम् ' (गीता १.२) इत्यारभ्य यावत् 'न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ' (गीता २.९) इत्येतदन्तः प्राणिनां
शोकमोहादिसंसारबीजभूतदोषोद्भवकारणप्रदर्शनार्थत्वेन व्याख्येयो ग्रन्थः। तथाहि -- अर्जुनेन राज्यगुरुपुत्रमित्रसुहृत्स्वजनसंबन्धिबान्धवेषु 'अहमेतेषाम्' 'ममैते '
इत्येवंप्रत्ययनिमित्तस्नेहविच्छेदादिनिमित्तौ आत्मनः शोकमोहौ प्रदर्शितौ 'कथं भीष्ममहं संख्ये' (गीता २.४) इत्यादिना। शोकमोहाभ्यां ह्यभिभूतविवेकविज्ञानः स्वत व क्षत्रधर्मे युद्धे प्रवृत्तोऽपि तस्माद्युद्धादुपरराम; परधर्मं च भिक्षाजीवनादिकं कर्तुं प्रववृते। तथा च सर्वप्राणिनां शोकमोहादिदोषाविष्टचेतसां स्वभावत व स्वधर्मपरित्यागः प्रतिषिद्धसेवा च स्यात्। स्वधर्मे प्रवृत्तानामपि तेषां वाङ्मनःकायादीनां प्रवृत्तिः फलाभिसंधिपूर्विकैव साहंकारा च भवति। तत्रैवं सति धर्माधर्मोपचयात् इष्टानिष्टजन्मसुखदुःखादिप्राप्तिलक्षणः संसारः अनुपरतो भवति। इत्यतः

संसारबीजभूतौ शोकमोहौ। तयोश्च सर्वकर्मसंन्यासपूर्वकादात्मज्ञानात् नान्यतो निवृत्तिरिति तदुपदिदिक्षुः सर्वलोकानुग्रहार्थम् अर्जुनं निमित्तीकृत्य आह भगवान्वासुदेवः -- 'अशोच्यान्' (गीता २.११) इत्यादि।।

अत्र केचिदाहुः -- सर्वकर्मसंन्यासपूर्वकादात्मज्ञाननिष्ठामात्रादेव केवलात् कैवल्यं न प्राप्यत व। किं तर्हि? अग्निहोत्रादिश्रौतस्मार्तकर्मसहितात् ज्ञानात् कैवल्यप्राप्तिरिति सर्वासु गीतासु निश्चितोऽर्थ इति। ज्ञापकं च आहुरस्यार्थस्य -- 'अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ' (गीता २.३३) 'कर्मण्येवाधिकारस्ते ' (गीता २.४७) 'कुरु कर्मैव तस्मात्त्वम्' (गीता ४.१५) इत्यादि। हिंसादियुक्तत्वात् वैदिकं कर्म अधर्माय इतीयमप्याशङ्का न कार्या। कथम्? क्षात्रं कर्म युद्धलक्षणं गुरुभ्रातृपुत्रादिहिंसालक्षणमत्यन्तं क्रूरमपि स्वधर्म इति कृत्वा न अधर्माय; तदकरणे च 'ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि' (गीता २.३३) इति ब्रुवता यावज्जीवादिश्रुतिचोदितानां पश्वादिहिंसालक्षणानां च कर्मणां प्रागेव नाधर्मत्वमिति सुनिश्चितमुक्तं भवति -- इति।।

तदसत्; ज्ञानकर्मनिष्ठयोर्विभागवचनाद्बुद्धिद्वयाश्रययोः। 'अशोच्यान्' (गीता २.११) इत्यादिना भगवता यावत् 'स्वधर्ममपि चावेक्ष्य' (गीता २.३१) इत्येतदन्तेन ग्रन्थेन यत्परमार्थात्मतत्त्वनिरूपणं कृतम्, तत्सांख्यम्। तद्विषया बुद्धिः आत्मनो जन्मादिषड्विक्रियाभावादकर्ता आत्मेति प्रकरणार्थनिरूपणात् या जायते, सा सांख्यबुद्धिः। सा येषां ज्ञानिनामुचिता भवति, ते सांख्याः। तस्या बुद्धेः जन्मनः प्राक् आत्मनो देहादिव्यतिरिक्तत्वकर्तृत्वभोक्तृत्वाद्यपेक्षो धर्माधर्मविवेकपूर्वको मोक्षसाधनानुष्ठानलक्षणो योगः। तद्विषया बुद्धिः योगबुद्धिः। सा येषां कर्मिणामुचिता भवति ते योगिनः। तथा च भगवता विभक्ते द्वे बुद्धी निर्दिष्टे 'एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां श्रृणु' (गीता २.३९) इति। तयोश्च सांख्यबुद्ध्याश्रयां ज्ञानयोगेन निष्ठां सांख्यानां विभक्तां वक्ष्यति 'पुरा वेदात्मना मया प्रोक्ता' (गीता ३.३) इति। तथा च योगबुद्ध्याश्रयां कर्मयोगेन निष्ठां विभक्तां वक्ष्यति -- 'कर्मयोगेन योगिनाम् ' (गीता ३.३) इति। वं सांख्यबुद्धिं योगबुद्धिं च आश्रित्य द्वे निष्ठे विभक्ते भगवतैव

उक्ते ज्ञानकर्मणोः कर्तृत्वाकर्तृत्वैकत्वानेकत्वबुद्ध्याश्रययोः युगपदेकपुरुषाश्रयत्वासंभवं पश्यता। यथा तद्विभागवचनम्, तथैव दर्शितं शातपथीये ब्राह्मणे -- 'एतमेव प्रव्राजिनो लोकमिच्छन्तो ब्राह्मणाः प्रव्रजन्ति' (बृ० ४.४.२२) इति सर्वकर्मसंन्यासं विधाय तच्छेषेण 'किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोकः' (बृ० ४.४.२२) इति। तत्र व च प्राक् दारपरिग्रहात् पुरुषः आत्मा प्राकृतो धर्मजिज्ञासोत्तरकालं लोकत्रयसाधनम् -- पुत्रम्, द्विप्रकारं च वित्तं मानुषं दैवं च; तत्र मानुषं कर्मरूपं पितृलोकप्राप्तिसाधनं विद्यां च दैवं वित्तं देवलोकप्राप्तिसाधनम् सोऽकामयत' (बृ० १.४.१७) इति अविद्याकामवत व सर्वाणि कर्माणि श्रौतादीनि दर्शितानि। तेभ्यः व्युत्थाय प्रव्रजन्ति' (बृ० ४.४.२२) इति व्युत्थानमात्मानमेव लोकमिच्छतोऽकामस्य विहितम्। तदेतद्विभागवचनमनुपपन्नं स्याद्यदि श्रौतकर्मज्ञानयोः समुच्चयोऽभिप्रेतः स्याद्भगवतः।।

न च अर्जुनस्य प्रश्न उपपन्नो भवति 'ज्यायसी चेत्कर्मणस्ते' (गीता ३.१) इत्यादिः।
कपुरुषानुष्ठेयत्वासंभवं
बुद्धिकर्मणोः भगवता पूर्वमनुक्तं कथमर्जुनः अश्रुतं बुद्धेश्च कर्मणो ज्यायस्त्वं भगवत्यध्यारोपयेन्मृषैव 'ज्यायसी चेत्कर्मणस्ते मता बुद्धिः' (गीता ३.१) इति।।

किञ्च -- यदि बुद्धिकर्मणोः सर्वेषां समुच्चय उक्तः स्यात् अर्जुनस्यापि स उक्त वेति, 'यच्छ्रेय तयोरेकं तन्मे ब्रूहि सुनिश्चितम्' (गीता ५.१) इति कथमुभयोरुपदेशे सति अन्यतरविषय व प्रश्नः स्यात्? न हि पित्तप्रशमनार्थिनः वैद्येन मधुरं शीतलं च भोक्तव्यम् इत्युपदिष्टे तयोरन्यतत्पित्तप्रशमनकारणं ब्रूहि इति प्रश्नः संभवति।।

अथ अर्जुनस्य भगवदुक्तवचनार्थविवेकानवधारणनिमित्तः प्रश्नः कल्प्येत, तथापि भगवता प्रश्नानुरूपं प्रतिवचनं देयम् -- मया बुद्धिकर्मणोः समुच्चय उक्तः, किमर्थमित्थं त्वं भ्रान्तोऽसि -- इति। न तु पुनः प्रतिवचनमननुरूपं पृष्टादन्यदेव 'द्वे निष्ठे मया पुरा प्रोक्ते' इति वक्तुं युक्तम्।।

नापि स्मार्तेनैव कर्मणा बुद्धेः समुच्चये अभिप्रेते विभागवचनादि सर्वमुपपन्नम्। किञ्च -- क्षत्रियस्य युद्धं स्मार्तं कर्म स्वधर्म इति जानतः 'तत्किं कर्मणि घोरे मां नियोजयसि' (गीता ३.१) इति उपालम्भोऽनुपपन्नः।।

तस्माद्गीताशास्त्रे ईषन्मात्रेणापि श्रौतेन स्मार्तेन वा कर्मणा आत्मज्ञानस्य समुच्चयो न केनचिद्दर्शयितुं शक्यः। यस्य तु अज्ञानात् रागादिदोषतो वा कर्मणि प्रवृत्तस्य यज्ञेन दानेन तपसा वा विशुद्धसत्त्वस्य ज्ञानमुत्पन्नं परमार्थतत्त्वविषयम् 'एकमेवेदं सर्वं ब्रह्म अकर्तृ च' इति, तस्य कर्मणि कर्मप्रयोजने च निवृत्तेऽपि लोकसंग्रहार्थं यत्नपूर्वं यथा प्रवृत्तिः, तथैव प्रवृत्तस्य यत्प्रवृत्तिरूपं दृश्यते न तत्कर्म येन बुद्धेः समुच्चयः स्यात्; यथा भगवतो वासुदेवस्य क्षत्रधर्मचेष्टितं न ज्ञानेन समुच्चीयते पुरुषार्थसिद्धये, तद्वत् तत्फलाभिसंध्यहंकाराभावस्य तुल्यत्वाद्विदुषः। तत्त्ववित्राहं करोमीति मन्यते, न च तत्फलमभिसंधत्ते। यथा च स्वर्गादिकामार्थिनः अग्निहोत्रादिकर्मलक्षणधर्मानुष्ठानाय आहिताग्नेः काम्ये व अग्निहोत्रादौ प्रवृत्तस्य सामि कृते विनष्टेऽपि कामे तदेव अग्निहोत्राद्यनुतिष्ठतोऽपि न तत्काम्यमग्निहोत्रादि भवति। तथा च दर्शयति भगवान् -- 'कुर्वन्नपि न लिप्यते' (गीता ५.१) 'न करोति न लिप्यते' (गीता १३.३१) इति तत्र तत्र।।

यच्च 'पूर्वैः पूर्वतरं कृतम्' (गीता ४.१५) 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' (गीता ३.२०) इति, तत्तु प्रविभज्य विज्ञेयम्। तत्कथम्? यदि तावत् पूर्वे जनकादयः तत्त्वविदोऽपि प्रवृत्तकर्माणः स्युः, ते लोकसंग्रहार्थम् 'गुणा गुणेषु वर्तन्ते' (गीता ३.२८) इति ज्ञानेनैव संसिद्धिमास्थिताः, कर्मसंन्यासे प्राप्तेऽपि कर्मणा सहैव संसिद्धिमास्थिताः, न कर्मसंन्यासं कृतवन्त इत्यर्थः। अथ न ते तत्त्वविदः; ईश्वरसमर्पितेन कर्मणा साधनभूतेन संसिद्धिं सत्त्वशुद्धिम्, ज्ञानोत्पत्तिलक्षणां वा संसिद्धिम्, आस्थिता जनकादय इति व्याख्येयम्। तमेवार्थं वक्ष्यति भगवान् 'सत्त्वशुद्धये कर्म कुर्वन्ति ' इति। '(गीता ५.११) स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' (गीता (१८.४६) इत्युक्त्वा सिद्धिं प्राप्तस्य पुनर्ज्ञाननिष्ठां वक्ष्यति -- 'सिद्धिं प्राप्तो यथा ब्रह्म' (गीता १८.५०) इत्यादिना।।

तस्माद्गीताशास्त्रे केवलादेव तत्त्वज्ञानान्मोक्षप्राप्तिः न कर्मसमुच्चितात्, इति निश्चितोऽर्थः। यथा चायमर्थः, तथा प्रकरणशो विभज्य तत्र तत्र दर्शयिष्यामः।।

तत्रैव धर्मसंमूढचेतसो मिथ्याज्ञानवतो महति शोकसागरे निमग्नस्य अर्जुनस्य अन्यत्रात्मज्ञानादुद्धरणमपश्यन् भगवान्वासुदेवः ततः कृपया अर्जुनमुद्दिधारयिषुः आत्मज्ञानायावतारयन्नाह --

श्रीभगवानुवाच --

।।२.११।। --

अशोच्यान् इत्यादि। न शोच्या अशोच्याः भीष्मद्रोणादयः, सद्वृत्तत्वात् परमार्थस्वरूपेण च नित्यत्वात् , तान् अशोच्यान् अन्वशोचः अनुशोचितवानसि 'ते म्रियन्ते मन्निमित्तम्, अहं तैर्विनाभूतः किं करिष्यामि राज्यसुखादिना' इति। त्वं प्रज्ञावादान् प्रज्ञावतां बुद्धिमतां वादांश्च वचनानि च भाषसे। तदेतत् मौढ्यं पाण्डित्यं च विरुद्धम्

आत्मनि दर्शयसि उन्मत्त इव इत्यभिप्रायः। यस्मात् गतासून् गतप्राणान् मृतान्, अगतासून् अगतप्राणान् जीवतश्च न अनुशोचन्ति पण्डिताः आत्मज्ञाः। पण्डा आत्मविषया बुद्धिः येषां ते हि पण्डिताः, 'पाण्डित्यं निर्विद्य' इति श्रुतेः।

परमार्थतस्तु तान् नित्यान् अशोच्यान् अनुशोचसि, अतो मूढोऽसि इत्यभिप्रायः।।

कुतस्ते अशोच्याः, यतो नित्याः। कथम्? --

।।२.१२।। --

न तु व जातु कदाचित् अहं नासम्, किं तु आसमेव। अतीतेषु देहोत्पत्तिविनाशेषु घटादिषु वियदिव नित्य व अहमासमित्यभिप्रायः। तथा न त्वं न आसीः, किं तु आसीरेव। तथा न इमे जनाधिपाः न आसन्, किं तु आसन्नेव। तथा न च व न भविष्यामः, किं तु भविष्याम व, सर्वे वयम् अतः अस्मात् देहविनाशात् परम् उत्तरकाले अपि। त्रिष्वपि कालेषु नित्या आत्मस्वरूपेण इत्यर्थः। देहेभेदानुवृत्त्या बहुवचनम्, नात्मभेदाभिप्रायेण।।

तत्र कथमिव नित्य आत्मेति दृष्टान्तमाह --

।।२.१३।। --

देहः अस्य अस्तीति देही, तस्य देहिनो देहवतः आत्मनः अस्मिन् वर्तमाने देहे यथा येन प्रकारेण कौमारं कुमारभावो बाल्यावस्था, यौवनं यूनो भावो मध्यमावस्था, जरा वयोहानिः जीर्णावस्था, इत्येताः तिस्रः अवस्थाः अन्योन्यविलक्षणाः। तासां प्रथमावस्थानाशे न नाशः, द्वितीयावस्थोपजने न उपजन नम् आत्मनः। किं तर्हि? अविक्रियस्यैव द्वितीयतृतीयावस्थाप्राप्तिः आत्मनो दृष्टा। तथा तद्वदेव देहात् अन्यो देहो देहान्तरम्, तस्य प्राप्तिः देहान्तरप्राप्तिः अविक्रियस्यैव आत्मनः इत्यर्थः। धीरो धीमान्, तत्र वं सति न मुह्यति न मोहमापद्यते।।

यद्यपि आत्मविनाशनिमित्तो मोहो न संभवति नित्य आत्मा इति विजानतः, तथापि शीतोष्णसुखदुःखप्राप्तिनिमित्तो मोहो लौकिको दृश्यते, सुखवियोगनिमित्तो मोहः दुःखसंयोगनिमित्तश्च शोकः। इत्येतदर्जुनस्य वचनमाशङ्क्य भगवानाह --

।।२.१४।। --

मात्रा आभिः मीयन्ते शब्दादय इति श्रोत्रादीनि इन्द्रियाणि। मात्राणां स्पर्शाः शब्दादिभिः संयोगाः। ते शीतोष्णसुखदुःखदाः शीतम् उष्णं सुखं दुःखं च प्रयच्छन्तीति। अथवा स्पृश्यन्त इति स्पर्शाः विषयाः शब्दादयः। मात्राश्च स्पर्शाश्च शीतोष्णसुखदुःखदाः। शीतं कदाचित् सुखं कदाचित् दुःखम्। तथा उष्णमपि अनियतस्वरूपम्। सुखदुःखे पुनः नियतरूपे यतो न व्यभिचरतः। अतः ताभ्यां पृथक् शीतोष्णयोः ग्रहणम्। यस्मात् ते मात्रास्पर्शादयः आगमापायिनः आगमापायशीलाः तस्मात् अनित्याः। अतः तान् शीतोष्णादीन् तितिक्षस्व प्रसहस्व। तेषु हर्षं विषादं वा मा कार्षीः इत्यर्थः।।

शीतोष्णादीन् सहतः किं स्यादिति श्रृणु --

।।२.१५।। --

यं हि पुरुषं समे दुःखसुखे यस्य तं समदुःखसुखं सुखदुःखप्राप्तौ हर्षविषादरहितं धीरं धीमन्तं न व्यथयन्ति न चालयन्ति नित्यात्मदर्शनात् ते यथोक्ताः शीतोष्णादयः, सः नित्यात्मस्वरूपदर्शननिष्ठो द्वन्द्वसहिष्णुः अमृतत्वाय अमृतभावाय मोक्षायेत्यर्थः कल्पते समर्थो भवति।।

इतश्च शोकमोहौ अकृत्वा शीतोष्णादिसहनं युक्तम्, यस्मात् --

।।२.१६।। --

न असतः अविद्यमानस्य शीतोष्णादेः सकारणस्य न विद्यते नास्ति भावो भवनम् अस्तिता।।

न हि शीतोष्णादि सकारणं प्रमाणैर्निरूप्यमाणं वस्तु सम्भवति। विकारो हि सः, विकारश्च व्यभिचरति। यथा घटादिसंस्थानं चक्षुषा निरूप्यमाणं मृद्व्यतिरेकेणानुपलब्धेरसत्, तथा सर्वो विकारः कारणव्यतिरेकेणानुपलब्धेरसन्।

जन्मप्रध्वंसाभ्यां प्रागूर्ध्वं च अनुपलब्धेः कार्यस्य घटादेः मृदादिकारणस्य च तत्कारणव्यतिरेकेणानुपलब्धेरसत्त्वम्।।

तदसत्त्वे सर्वाभावप्रसङ्ग इति चेत्, न; सर्वत्र बुद्धिद्वयोपलब्धेः, सद्बुद्धिरसद्बुद्धिरिति। यद्विषया बुद्धिर्न

व्यभिचरति, तत् सत्; यद्विषया व्यभिचरति, तदसत्; इति सदसद्विभागे बुद्धितन्त्रे स्थिते, सर्वत्र द्वे बुद्धी सर्वैरुपलभ्येते समानाधिकरणे न नीलोत्पलवत्, सन् घटः, सन् पटः, सन् हस्ती इति। वं सर्वत्र। तयोर्बुद्धयोः घटादिबुद्धिः व्यभिचरति। तथा च दर्शितम्। न तु सद्बुद्धिः। तस्मात् घटादिबुद्धिविषयः असन्, व्यभिचारात्; न तु सद्बुद्धिविषयः, अव्यभिचारात्।।

घटे विनष्टे घटबुद्धौ व्यभिचरन्त्यां सद्बुद्धिरपि व्यभिचरतीति चेत्, न; पटादावपि सद्बुद्धिदर्शनात्। विशेषणविषयैव सा सद्बुद्धिः।।

सद्बुद्धिवत् घटबुद्धिरपि घटान्तरे दृश्यत इति चेत्, न; पटादौ अदर्शनात्।।

सद्बुद्धिरपि नष्टे घटे न दृश्यत इति चेत्, न; विशेष्याभावात्। सद्बुद्धिः विशेषणविषया सती विशेष्याभावे विशेषणानुपपत्तौ किंविषया स्यात्? न तु पुनः सद्बुद्धेः विषयाभावात्।।

एकाधिकरणत्वं घटादिविशेष्याभावे न युक्तमिति चेत्, न; 'इदमुदकम्' इति मरीच्यादौ अन्यतराभावेऽपि सामानाधिकरण्यदर्शनात्।।

तस्माद्देहादेः द्वन्द्वस्य च सकारणस्य असतो न विद्यते भाव इति। तथा सतश्च आत्मनः अभावः अविद्यमानता न विद्यते, सर्वत्र अव्यभिचारात् इति अवोचाम।।

एवम् आत्मानात्मनोः सदसतोः उभयोरपि दृष्टः उपलब्धः अन्तो निर्णयः सत् सदेव असत् असदेवेति, तु अनयोः यथोक्तयोः तत्त्वदर्शिभिः। तदिति सर्वनाम्, सर्वं च ब्रह्म, तस्य नाम तदिति, तद्भावः तत्त्वम्, ब्रह्मणो याथात्म्यम्। तत् द्रष्टुं शीलं येषां ते तत्त्वदर्शिनः, तैः तत्त्वदर्शिभिः। त्वमपि तत्त्वदर्शिनां दृष्टिमाश्रित्य शोकं मोहं च हित्वा शीतोष्णादीनि नियतानियतरूपाणि द्वन्द्वानि 'विकारोऽयमसन्नेव मरीचिजलवन्मिथ्यावभासते' इति मनसि निश्चित्य तितिक्षस्व इत्यभिप्रायः।।

किं पुनस्तत् यत् सदेव सर्वदा इति; उच्यते --

।।२.१७।। --

अविनाशि न विनष्टुं शीलं यस्येति। तु शब्दः असतो विशेषणार्थः। तत् विद्धि विजानीहि। किम्? येन सर्वम् इदं जगत् ततं व्याप्तं सदाख्येन ब्रह्मणा साकाशम्, आकाशेनेव घटादयः। विनाशम् अदर्शनम् अभावम्। अव्ययस्य न व्येति उपचयापचयौ न याति इति अव्ययं तस्य अव्ययस्य। नैतत् सदाख्यं ब्रह्म स्वेन रूपेण व्येति व्यभिचरति, निरवयवत्वात्, देहादिवत्। नाप्यात्मीयेन, आत्मीयाभावात्।

यथा देवदत्तो धनहान्या व्येति, न तु वं ब्रह्म व्येति। अतः अव्ययस्य अस्य ब्रह्मणः विनाशं न कश्चित् कर्तुमर्हति, न कश्चित् अत्मानं विनाशयितुं शक्नोति ईश्वरोऽपि। आत्मा हि ब्रह्म, स्वात्मनि च क्रियाविरोधात्।।

किं पुनस्तदसत् यत्स्वात्मसत्तां व्यभिचरतीति, उच्यते --

।।२.१८।। --

अन्तः विनाशः विद्यते येषां ते अन्तवन्तः। यथा मृगतृष्णिकादौ सद्बुद्धिः अनुवृत्ता प्रमाणनिरूपणान्ते विच्छिद्यते, स तस्य अन्तः; तथा इमे देहाः स्वप्नमायादेहादिवच्च अन्तवन्तः नित्यस्य शरीरिणः शरीरवतः अनाशिनः अप्रमेयस्य आत्मनः अन्तवन्त इति उक्ताः विवेकिभिरित्यर्थः। 'नित्यस्य ' 'अनाशिनः' इति न पुनरुक्तम्; नित्यत्वस्य

द्विविधत्वात् लोके, नाशस्य च। यथा देहो भस्मीभूतः अदर्शनं गतो नष्ट उच्यते। विद्यमानोऽपि यथा अन्यथा परिणतो व्याध्यादियुक्तो जातो नष्ट उच्यते। तत्र 'नित्यस्य' 'अनाशिनः ' इति द्विविधेनापि नाशेन असंबन्धः

अस्येत्यर्थः। अन्यथा पृथिव्यादिवदपि नित्यत्वं स्यात् आत्मनः; तत् मा भूदिति 'नित्यस्य ' 'अनाशिनः ' इत्याह।

अप्रमेयस्य न प्रमेयस्य प्रत्यक्षादिप्रमाणैः अपरिच्छेद्यस्येत्यर्थः।।

ननु आगमेन आत्मा परिच्छिद्यते, प्रत्यक्षादिना च पूर्वम्। न आत्मनः स्वतःसिद्धत्वात्। सिद्धे हि आत्मनि प्रमातरि प्रमित्सोः प्रमाणान्वेषणा भवति। न हि पूर्वम् 'इत्थमहम् ' इति आत्मानमप्रमाय पश्चात् प्रमेयपरिच्छेदाय प्रवर्तते। न हि आत्मा नाम कस्यचित् अप्रसिद्धो भवति। शास्त्रं तु अन्त्यं प्रमाणम् अतद्धर्माध्यारोपणमात्रनिवर्तकत्वेन प्रमाणत्वम् आत्मनः प्रतिपद्यते, न तु अज्ञातार्थज्ञापकत्वेन। तथा च श्रुतिः -- 'यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः' इति।।

यस्मादेवं नित्यः अविक्रियश्च आत्मा तस्मात् युध्यस्व, युद्धात् उपरमं मा कार्षीः इत्यर्थः।।

न हि अत्र युद्धकर्तव्यता विधीयते, युद्धे प्रवृत्त व हि असौ शोकमोहप्रतिबद्धः तूष्णीमास्ते। अतः तस्य प्रतिबन्धापनयनमात्रं भगवता क्रियते। तस्मात् 'युध्यस्व' इति अनुवादमात्रम् , न विधिः।।

शोकमोहादिसंसारकारणनिवृत्त्यर्थं गीताशास्त्रम्, न प्रवर्तकम् इत्येतस्यार्थस्य साक्षिभूते

चौ आनिनाय भगवान्।

यत्तु मन्यसे 'युद्धे भीष्मादयो मया हन्यन्ते' 'अहमेव तेषां हन्ता' इति, षा बुद्धिः मृषैव ते। कथम्? --

।।२.१९।। --

य नं प्रकृतं देहिनं वेत्ति विजानाति हन्तारं हननक्रियायाः कर्तारं यश्च नम् अन्यो मन्यते हतं देहहननेन 'हतः अहम्' इति हननक्रियायाः कर्मभूतम्, तौ उभौ न विजानीतः न ज्ञातवन्तौ अविवेकेन आत्मानम्। 'हन्ता अहम् ' 'हतः अस्मि अहम् ' इति देहहननेन आत्मानमहंप्रत्ययविषयं यौ विजानीतः तौ आत्मस्वरूपानभिज्ञौ इत्यर्थः। यस्मात् न अयम् आत्मा हन्ति न हननक्रियायाः कर्ता भवति, न च हन्यते न च कर्म भवतीत्यर्थः, अविक्रियत्वात्।।

कथमविक्रय आत्मेति द्वितीयो मन्त्रः --

।।२.२०।। --

न जायते न उत्पद्यते, जनिलक्षणा वस्तुविक्रिया न आत्मनो विद्यते इत्यर्थः। तथा न म्रियते वा। वाशब्दः चार्थे। न म्रियते च इति अन्त्या विनाशलक्षणा विक्रिया प्रतिषिध्यते। कदाचिच्छब्दः

सर्वविक्रियाप्रतिषेधैः संबध्यते -- न कदाचित् जायते, न कदाचित् म्रियते, इत्येवम्। यस्मात् अयम् आत्मा भूत्वा भवनक्रियामनुभूय पश्चात् अभविता अभावं गन्ता न भूयः पुनः, तस्मात् न म्रियते। यो हि भूत्वा न भविता स म्रियत इत्युच्यते लोके। वाशब्दात् न शब्दाच्च अयमात्मा अभूत्वा वा भविता देहवत् न भूयः। तस्मात् न जायते। यो हि अभूत्वा भविता स जायत इत्युच्यते। नैवमात्मा। अतो न जायते। यस्मादेवं तस्मात् अजः, यस्मात् न म्रियते तस्मात् नित्यश्च। यद्यपि आद्यन्तयोर्विक्रिययोः प्रतिषेधे सर्वा विक्रियाः प्रतिषिद्धा भवन्ति, तथापि मध्यभाविनीनां विक्रियाणां स्वशब्दैरेव प्रतिषेधः कर्तव्यः अनुक्तानामपि यौवनादिसमस्तविक्रियाणां प्रतिषेधो यथा स्यात् इत्याह -- शाश्वत इत्यादिना। शाश्वत इति अपक्षयलक्षणा विक्रिया प्रतिषिध्यते। शश्वद्भवः शाश्वतः। न अपक्षीयते स्वरूपेण, निरवयवत्वात्। नापि गुणक्षयेण अपक्षयः, निर्गुणत्वात्। अपक्षयविपरीतापि वृद्धिलक्षणा विक्रिया प्रतिषिध्यते -- पुराण इति। यो हि अवयवागमेन उपचीयते स वर्धते अभिनव इति च उच्यते। अयं तु आत्मा निरवयवत्वात् पुरापि नव वेति पुराणः; न वर्धते इत्यर्थः। तथा न हन्यते। हन्तिः अत्र विपरिणामार्थे द्रष्टव्यः अपुनरुक्तताये। न विपरिणम्यते इत्यर्थः।

हन्यमाने विपरिणम्यमानेऽपि शरीरे। अस्मिन् मन्त्रे षड् भावविकारा लौकिकवस्तुविक्रिया आत्मनि प्रतिषिध्यन्ते। सर्वप्रकारविक्रियारहित आत्मा इति वाक्यार्थः। यस्मादेवं तस्मात् 'उभौ तौ न विजानीतः ' इति पूर्वेण मन्त्रेण अस्य संबन्धः।।

'य नं वेत्ति हन्तारम्' इत्यनेन मन्त्रेण हननक्रियायाः कर्ता कर्म च न भवति इति प्रतिज्ञाय, 'न जायते' इत्यनेन अविक्रियत्वं हेतुमुक्त्वा प्रतिज्ञातार्थमुपसंहरति --

।।२.२१।। --

वेद विजानाति अविनाशिनम् अन्त्यभावविकाररहितं नित्यं विपरिणामरहितं यो वेद इति संबन्धः। नं पूर्वेण

मन्त्रेणोक्तलक्षणम् अजं जन्मरहितम् अव्ययम् अपक्षयरहितं कथं केन प्रकारेण सः विद्वान् पुरुषः अधिकृतः हन्ति हननक्रिया करोति, कथं वा घातयति हन्तारं प्रयोजयति। न कथञ्चित् कञ्चित् हन्ति, न कथञ्चित् कञ्चित् घातयति इति उभयत्र आक्षेप वार्थः, प्रश्नार्थासंभवात्। हेत्वर्थस्य च अविक्रियत्वस्य तुल्यत्वात् विदुषः सर्वकर्मप्रतिषेध व प्रकरणार्थः अभिप्रेतो भगवता। हन्तेस्तु आक्षेपः उदाहरणार्थत्वेन कथितः।।

विदुषः कं कर्मासंभवहेतुविशेषं पश्यन् कर्माण्याक्षिपति भगवान् 'कथं स पुरुषः' इति। ननु उक्त वात्मनः अविक्रियत्वं सर्वकर्मासंभवकारणविशेषः। सत्यमुक्तः। न तु सः कारणविशेषः, अन्यत्वात् विदुषः अविक्रियादात्मनः। न हि अविक्रियं स्थाणुं विदितवतः कर्म न संभवति इति चेत्, न; विदुषः आत्मत्वात्। न देहादिसंघातस्य विद्वत्ता। अतः पारिशेष्यात् असंहतः आत्मा विद्वान् अविक्रियः इति तस्य विदुषः कर्मासंभवात् आक्षेपो युक्तः 'कथं स पुरुषः' इति। यथा बुद्ध्याद्याहृतस्य शब्दाद्यर्थस्य अविक्रिय व सन् बुद्धिवृत्त्यविवेकविज्ञानेन अविद्यया उपलब्धा आत्मा कल्प्यते, वमेव आत्मानात्मविवेकज्ञानेन बुद्धिवृत्त्या विद्यया असत्यरूपयैव परमार्थतः अविक्रिय व आत्मा विद्वानुच्यते। विदुषः कर्मासंभववचनात् यानि कर्माणि शास्त्रेण विधीयन्ते तानि अविदुषो विहितानि इति भगवतो निश्चयोऽवगम्यते।।

ननु विद्यापि अविदुष व विधीयते, विदितविद्यस्य पिष्टपेषणवत् विद्याविधानानर्थक्यात्। तत्र अविदुषः कर्माणि विधीयन्ते न विदुषः इति विशेषो नोपपद्यते इति चेत्, न; अनुष्ठेयस्य भावाभावविशेषोपपत्तेः। अग्निहोत्रादिविध्यर्थज्ञानोत्तरकालम् अग्निहोत्रादिकर्म अनेकसाधनोपसंहारपूर्वकमनुष्ठेयम् 'कर्ता अहम्, मम कर्तव्यम् ' इत्येवंप्रकारविज्ञानवतः अविदुषः यथा अनुष्ठेयं भवति, न तु तथा 'न जायते' इत्याद्यात्मस्वरूपविध्यर्थज्ञानोत्तरकालभावि किञ्चिदनुष्ठेयं भवति; किं तु 'नाहं कर्ता, नाहं भोक्ता' इत्याद्यात्मैकत्वाकर्तृत्वादिविषयज्ञानात् नान्यदुत्पद्यते इति ष विशेष उपपद्यते। यः पुनः 'कर्ता अहम्' इति वेत्ति आत्मानम्, तस्य 'मम इदं कर्तव्यम् ' इति अवश्यंभाविनी बुद्धिः स्यात्; तदपेक्षया सः अधिक्रियते इति तं प्रति कर्माणि संभवन्ति। स च अविद्वान्' उभौ तौ न

विजानीतः' इति वचनात् विशेषितस्य च विदुषः कर्माक्षेपवचनाच्च 'कथं स पुरुषः' इति। तस्मात् विशेषितस्य अविक्रियात्मदर्शिनः विदुषः मुमुक्षोश्च सर्वकर्मसंन्यासे व अधिकारः। अत व भगवान् नारायणः सांख्यान् विदुषः अविदुषश्च कर्मिणः प्रविभज्य द्वे निष्ठे ग्राहयति -- 'ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्' इति। तथा च पुत्राय आह भगवान् व्यासः -- 'द्वाविमावथ पन्थानौ' इत्यादि। तथा च क्रियापथश्चैव पुरस्तात् पश्चात्संन्यासश्चेति। तमेव विभागं पुनः पुनर्दर्शयिष्यति भगवान् -- अतत्त्ववित् 'अहंकारविमूढात्मा कर्ताहमिति मन्यते', तत्त्ववित्तु नाहं करोमि इति। तथा च 'सर्वकर्माणि मनसा संन्यस्यास्ते' इत्यादि।।

तत्र केचित्पण्डितंमन्या वदन्ति -- 'जन्मादिषड्भावविक्रियारहितः अविक्रियः अकर्ता कः अहमात्मा' इति न कस्यचित् ज्ञानम् उत्पद्यते, यस्मिन् सति सर्वकर्मसंन्यासः उपदिश्यते इति। तन्न; 'न जायते' इत्यादिशास्त्रोपदेशानर्थक्यप्रसङ्गात्। यथा च शास्त्रोपदेशसामर्थ्यात् धर्माधर्मास्तित्वविज्ञानं कर्तुश्च देहान्तरसंबन्धविज्ञानमुत्पद्यते, तथा शास्त्रात् तस्यैव आत्मनः अविक्रियत्वाकर्तृत्वैकत्वादिविज्ञानं कस्मात् नोत्पद्यते इति प्रष्टव्याः ते। करणागोचरत्वात् इति चेत्, न; 'मनसैवानुद्रष्टव्यम्' इति श्रुतेः। शास्त्राचार्योपदेशशमदमादिसंस्कृतं मनः आत्मदर्शने करणम्। तथा च तदधिगमाय अनुमाने आगमे च सति ज्ञानं नोत्पद्यत इति साहसमात्रमेतत्। ज्ञानं च उत्पद्यमानं तद्विपरीतमज्ञानम् अवश्यं बाधते इत्यभ्युपगन्तव्यम्। तच्च अज्ञानं दर्शितम् 'हन्ता अहम् , हतः अस्मि ' इति 'उभौ तौ न विजानीतः' इति। अत्र च आत्मनः हननक्रियायाः कर्तृत्वं कर्मत्वं हेतुकर्तृत्वं च अज्ञानकृतं दर्शितम्। तच्च सर्वक्रियास्वपि समानं कर्तृत्वादेः अविद्याकृतत्वम्, अविक्रियत्वात् आत्मनः। विक्रियावान् हि कर्ता आत्मनः कर्मभूतमन्यं प्रयोजयति 'कुरु' इति। तदेतत् अविशेषेण विदुषः

सर्वक्रियासु कर्तृत्वं हेतुकर्तृत्वं च प्रतिषेधति भगवान्वासुदेवः विदुषः कर्माधिकाराभावप्रदर्शनार्थम् 'वेदाविनाशिनं... कथं स पुरुषः इत्यादिना। क्व पुनः विदुषः अधिकार इति तदुक्तं पूर्वमेव 'ज्ञानयोगेन सांख्यानाम्' इति। तथा च सर्वकर्मसंन्यासं वक्ष्यति 'सर्वकर्माणि मनसा' इत्यादिना।।

ननु मनसा इति वचनात् न वाचिकानां कायिकाना च संन्यासः इति चेत्, न; सर्वकर्माणि इति विशेषितत्वात्।

मानसानामेव सर्वकर्मणामिति चेत्, न; मनोव्यापारपूर्वकत्वाद्वाक्कायव्यापाराणां मनोव्यापाराभावे तदनुपपत्तेः। शास्त्रीयाणां वाक्कायकर्मणां कारणानि मानसानि कर्माणि वर्जयित्वा अन्यानि सर्वकर्माणि मनसा संन्यस्येदिति चेत्, न; 'नैव कुर्वन्न कारयन्' इति विशेषणात्। सर्वकर्मसंन्यासः अयं भगवता उक्तः मरिष्यतः न जीवतः इति चेत्, न; 'नवद्वारे पुरे देही आस्ते' इति विशेणानुपपत्तेः। न हि सर्वकर्मसंन्यासेन मृतस्य तद्देहे आसनं संभवति। अकुर्वतः अकारयतश्च देहे संन्यस्य इति संबन्धः न देहे आस्ते इति चेत्, न; सर्वत्र आत्मनः अविक्रियत्वावधारणात्, आसनक्रियायाश्च अधिकरणापेक्षत्वात्, तदनपेक्षत्वाच्च संन्यासस्य। संपूर्वस्तु न्यासशब्दः अत्र त्यागार्थः, न निक्षेपार्थः। तस्मात् गीताशास्त्रे आत्मज्ञानवतः संन्यासे व अधिकारः, न कर्मणि इति तत्र तत्र उपरिष्टात् आत्मज्ञानप्रकरणे दर्शयिष्यामः।।

प्रकृतं तु वक्ष्यामः। तत्र आत्मनः अविनाशित्वं प्रतिज्ञातम्। तत्किमिवेति, उच्यते --

।।२.२२।। --

वासांसि वस्त्राणि जीर्णानि दुर्बलतां गतानि यथा लोके विहाय परित्यज्य नवानि अभिनवानि गृह्णाति उपादत्ते नरः पुरुषः अपराणि अन्यानि, तथा तद्वदेव शरीराणि विहाय जीर्णानि अन्यानि संयाति संगच्छति नवानि देही आत्मा पुरुषवत् अविक्रिय वेत्यर्थः।।

कस्मात् अविक्रिय वेति, आह --

।।२.२३।। --

एनं प्रकृतं देहिनं न च्छिन्दन्ति शस्त्राणि, निरवयवत्वात् न अवयवविभागं कुर्वन्ति। शस्त्राणि अस्यादीनि। तथा न नं दहति पावकः, अग्निरपि न भस्मीकरोति। तथा न च नं क्लेदयन्ति आपः। अपां हि सावयवस्य वस्तुनः आर्द्रीभावकरणेन अवयवविश्लेषापादने सामर्थ्यम्। तत् न निरवयवे आत्मनि संभवति। तथा स्नेहवत् द्रव्यं स्नेहशोषणेन नाशयति वायुः। नं तु आत्मानं न शोषयति मारुतोऽपि।।

यतः वं तस्मात् --

।।२.२४।। --

यस्मात् अन्योन्यनाशहेतुभूतानि नमात्मानं नाशयितुं नोत्सहन्ते अस्यादीनि तस्मात् नित्यः। नित्यत्वात् सर्वगतः। सर्वगतत्वात् स्थाणुः इव, स्थिर इत्येतत्। स्थिरत्वात् अचलः अयम् आत्मा। अतः सनातनः चिरंतनः, न कारणात्कुतश्चित् निष्पन्नः, अभिनव इत्यर्थः।।

नैतेषां श्लोकानां पौनरुक्त्यं चोदनीयम्, यतः केनैव श्लोकेन आत्मनः नित्यत्वमविक्रियत्वं चोक्तम् 'न जायते म्रियते वा' इत्यादिना। तत्र यदेव आत्मविषयं किञ्चिदुच्यते, तत् तस्मात् श्लोकार्थात् न अतिरिच्यते; किञ्चिच्छब्दतः पुनरुक्तम्, किञ्चिदर्थतः इति। दुबोर्धत्वात् आत्मवस्तुनः पुनः पुनः प्रसङ्गमापाद्य शब्दान्तरेण तदेव वस्तु निरूपयति भगवान् वासुदेवः कथं नु नाम संसारिणामसंसारित्वबुद्धिगोचरतामापन्नं सत् अव्यक्तं तत्त्वं संसारनिवृत्तये स्यात् इति।।

किञ्च --

।।२.२५।। --

सर्वकरणाविषयत्वात् न व्यज्यत इति अव्यक्तः अयम् आत्मा। अत व अचिन्त्यः अयम्। यद्धि इन्द्रियगोचरः तत् चिन्ताविषयत्वमापद्यते। अयं त्वात्मा अनिन्द्रियगोचरत्वात् अचिन्त्यः। अत व अविकार्यः, यथा क्षीरं

दध्यातञ्चनादिना विकारि न तथा अयमात्मा। निरवयवत्वाच्च अविक्रियः। न हि निरवयवं किञ्चित् विक्रियात्मकं दृष्टम्। अविक्रियत्वात् अविकार्यः अयम् आत्मा उच्यते। तस्मात् वं यथोक्तप्रकारेण नम् आत्मानं विदित्वा त्वं न अनुशोचितुमर्हसि हन्ताहमेषाम्, मयैते हन्यन्त इति।।

आत्मनः अनित्यत्वमभ्युपगम्य इदमुच्यते --

।।२.२६।। --

अथ च इति अभ्युपगमार्थः। नं प्रकृतमात्मानं नित्यजातं लोकप्रसिद्ध्या प्रत्यनेकशरीरोत्पत्ति जातो जात इति मन्यसे तथा प्रतितत्तद्विनाशं नित्यं वा मन्यसे मृतं मृतो मृत इति; तथापि तथाभावेऽपि आत्मनि त्वं महाबाहो, न वं शोचितुमर्हसि, जन्मवतो नाशो नाशवतो जन्मश्चेत्येतावश्यंभाविनाविति।।

तथा च सति --

।।२.२७।। --

जातस्य हि लब्धजन्मनः ध्रुवः अव्यभिचारी मृत्युः मरणं ध्रुवं जन्म मृतस्य च।

तस्मादपरिहार्योऽयं जन्ममरणलक्षणोऽर्थः। तस्मिन्नपरिहार्येऽर्थे न त्वं शोचितुमर्हसि।।

कार्यकरणसंघातात्मकान्यपि भूतान्युद्दिश्य शोको न युक्तः कर्तुम्, यतः --

।।२.२८।। --

अव्यक्तादीनि अव्यक्तम् अदर्शनम् अनुपलब्धिः आदिः येषां भूतानां पुत्रमित्रादिकार्यकरणसंघातात्मकानां तानि अव्यक्तादीनि भूतानि प्रागुत्पत्तेः, उत्पन्नानि च प्राङ्मरणात् व्यक्तमध्यानि। अव्यक्तनिधनान्येव पुनः अव्यक्तम् अदर्शनं निधनं मरणं येषां तानि अव्यक्तनिधनानि। मरणादूर्ध्वमप्यव्यक्ततामेव प्रतिपद्यन्ते इत्यर्थः। तथा चोक्तम् --

'अदर्शनादापतितः पुनश्चादर्शनं गतः। नासौ तव न तस्य त्वं वृथा का परिदेवना' इति। तत्र का परिदेवना को वा प्रलापः अदृष्टदृष्टप्रनष्टभ्रान्तिभूतेषु भूतेष्वित्यर्थः।।

दुर्विज्ञेयोऽयं प्रकृत आत्मा; किं त्वामेवैकमुपालभे साधारणे भ्रान्तिनिमित्ते। कथं दुर्विज्ञेयोऽयमात्मा इत्यत आह --

।।२.२९।। --

आश्चर्यवत् आश्चर्यम् अदृष्टपूर्वम् अद्भुतम् अकस्माद्दृश्यमानं तेन तुल्यं आश्चर्यवत् आश्चर्यमिव नम् आत्मानं पश्यति कश्चित्। आश्चर्यवत् नं वदति तथैव च अन्यः। आश्चर्यवच्च नमन्यः श्रृणोति। श्रुत्वा दृष्ट्वा उक्त्वापि नमात्मानं वेद न चैव कश्चित्। अथवा योऽयमात्मानं पश्यति स आश्चर्यतुल्यः, यो वदति यश्च श्रृणोति सः अनेकसहस्रेषु कश्चिदेव भवति। अतो दुर्बोध आत्मा इत्यभिप्रायः।।

अथेदानीं प्रकरणार्थमुपसंहरन्ब्रूते --

।।२.३०।। --

देही शरीरी नित्यं सर्वदा सर्वावस्थासु अवध्यः निरवयवत्वान्नित्यत्वाच्च तत्र अवध्योऽयं देहे शरीरे सर्वस्य सर्वगतत्वात्स्थावरादिषु स्थितोऽपि सर्वस्य प्राणिजातस्य देहे वध्यमानेऽपि अयं देही न वध्यः यस्मात्, तस्मात्, भीष्मादीनि सर्वाणि भूतानि उद्दिश्य न त्वं शोचितुमर्हसि।।

इह परमार्थतत्त्वापेक्षायां शोको मोहो वा न संभवतीत्युक्तम्। न केवलं परमार्थतत्त्वापेक्षायामेव। किं तु --

।।२.३१।। --

स्वधर्ममपि स्वो धर्मः क्षत्रियस्य युद्धं तमपि अवेक्ष्य त्वं न विकम्पितुं प्रचलितुम् नार्हसि क्षत्रियस्य स्वाभाविकाद्धर्मात् आत्मस्वाभाव्यादित्यभिप्रायः। तच्च युद्धं पृथिवीजयद्वारेण धर्मार्थं प्रजारक्षणार्थं चेति धर्मादनपेतं परं धर्म्यम्। तस्मात् धर्म्यात् युद्धात् श्रेयः अन्यत् क्षत्रियस्य न विद्यते हि यस्मात्।।

कुतश्च तत् युद्धं कर्तव्यमिति, उच्यते --

।।२.३२।। --

यदृच्छया च अप्रार्थिततया उपपन्नम् आगतं स्वर्गद्वारम् अपावृतम् उद्घाटितं ये तत् ईदृशं युद्धं लभन्ते क्षत्रियाः हे पार्थ, किं न सुखिनः ते?

एवं कर्तव्यताप्राप्तमपि --

।।२.३३।। --

अथ चेत् त्वम् इमं धर्म्यं धर्मादनपेतं विहितं संग्रामं युद्धं न करिष्यसि चेत्, ततः तदकरणात् स्वधर्मं कीर्तिं च महादेवादिसमागमनिमित्तां हित्वा केवलं पापम् अवाप्स्यसि।।

न केवलं स्वधर्मकीर्तिपरित्यागः --

।।२.३४।। --

अकीर्तिं चापि युद्धे भूतानि कथयिष्यन्ति ते तव अव्ययां दीर्घकालाम्। धर्मात्मा शूर इत्येवमादिभिः गुणैः संभावितस्य च अकीर्तिः मरणात् अतिरिच्यते, संभावितस्य च अकीर्तेः वरं मरणमित्यर्थः।।

किञ्च --

।।२.३५।। --

भयात् कर्णादिभ्यः रणात् युद्धात् उपरतं निवृत्तं मंस्यन्ते चिन्तयिष्यन्ति न कृपयेति त्वां महारथाः दुर्योधनप्रभृतयः। येषां च त्वं दुर्योधनादीनां बहुमतो बहुभिः गुणैः युक्तः इत्येवं मतः बहुमतः भूत्वा पुनः यास्यसि लाघवं लघुभावम्।।

किञ्च --

।।२.३६।। --

अवाच्यवादान् अवक्तव्यवादांश्च बहून् अनेकप्रकारान् वदिष्यन्ति तव अहिताः शत्रवः निन्दन्तः कुत्सयन्तः तव त्वदीयं सामर्थ्यं निवातकवचादियुद्धनिमित्तम्। ततः तस्मात् निन्दाप्राप्तेर्दुःखात् दुःखतरं नु किम्, ततः कष्टतरं दुःखं नास्तीत्यर्थः।।

युद्धे पुनः क्रियमाणे कर्णादिभिः --

।।२.३७।। --

हतो वा प्राप्स्यसि स्वर्गम्, हतः सन् स्वर्गं प्राप्स्यसि। जित्वा वा कर्णादीन् शूरान् भोक्ष्यसे महीम्। उभयथापि तव लाभ वेत्यभिप्रायः। यत वं तस्मात् उत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः 'जेष्यामि शत्रून्, मरिष्यामि वा' इति निश्चयं कृत्वेत्यर्थः।।

तत्र युद्धं स्वधर्म इत्येवं युध्यमानस्योपदेशमिमं श्रृणु --

।।२.३८।। --

सुखदुःखे समे तुल्ये कृत्वा, रागद्वेषावप्यकृत्वेत्येतत्। तथा लाभालाभौ जयाजयौ च समौ कृत्वा ततो युद्धाय युज्यस्व घटस्व। न वं युद्धं कुर्वन् पापम् अवाप्स्यसि। इत्येष उपदेशः प्रासङ्गिकः।।

शोकमोहापनयनाय लौकिको न्यायः 'स्वधर्ममपि चावेक्ष्य' इत्याद्यैः श्लोकैरुक्तः, न तु तात्पर्येण। परमार्थदर्शनमिह प्रकृतम्। तच्चोक्तमुपसंह्रियते -- 'एषा तेऽभिहिता' (गीता २.३९) इति शास्त्रविषयविभागप्रदर्शनाय। इह हि प्रदर्शिते पुनः शास्त्रविषयविभागे उपरिष्टात्

'ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्' इति निष्ठाद्वयविषयं शास्त्रं सुखं प्रवर्तिष्यते, श्रोतारश्च विषयविभागेन सुखं ग्रहीष्यन्ति इत्यत आह --

।।२.३९।। --

षा ते तुभ्यम् अभिहिता उक्ता सांख्ये परमार्थवस्तुविवेकविषये बुद्धिः ज्ञानं साक्षात् शोकमोहादिसंसारहेतुदोषनिवृत्तिकारणम्। योगे तु तत्प्राप्त्युपाये निःसङ्गतया द्वन्द्वप्रहाणपूर्वकम् ईश्वराराधनार्थे कर्मयोगे कर्मानुष्ठाने समाधियोगे च इमाम् अनन्तरमेवोच्यमानां बुद्धिं शृणु। तां च बुद्धिं स्तौति प्ररोचनार्थम् --

बुद्धया यया योगविषयया युक्तः हे पार्थ, कर्मबन्धं कर्मैव धर्माधर्माख्यो बन्धः कर्मबन्धः तं प्रहास्यसि ईश्वरप्रसादनिमित्तज्ञानप्राप्त्यैव इत्यभिप्रायः।।

किञ्च अन्यत् --

।।२.४०।। --

न इह मोक्षमार्गे कर्मयोगे अभिक्रमनाशः अभिक्रमणमभिक्रमः प्रारम्भः तस्य नाशः नास्ति यथा कृष्यादेः। योगविषये

प्रारम्भस्य न अनैकान्तिकफलत्वमित्यर्थः। किञ्चनापि चिकित्सावत् प्रत्यवायः विद्यते भवति। किं तु स्वल्पमपि अस्य धर्मस्य योगधर्मस्य अनुष्ठितं त्रायते रक्षति महतः भयात् संसारभयात् जन्ममरणादिलक्षणात्।।

येयं सांख्ये बुद्धिरुक्ता योगे च, वक्ष्यमाणलक्षणा सा --

।।२.४१।। --

व्यवसायात्मिका निश्चयस्वभावा का व बुद्धिः इतरविपरीतबुद्धिशाखाभेदस्य बाधिका, सम्यक्प्रमाणजनितत्वात् , इह श्रेयोमार्गे हे कुरुनन्दन। याः पुनः इतरा विपरीतबुद्धयः, यासां शाखाभेदप्रचारवशात् अनन्तः अपारः अनुपरतः संसारो नित्यप्रततो विस्तीर्णो भवति, प्रमाणजनितविवेकबुद्धिनिमित्तवशाच्च उपरतास्वनन्तभेदबुद्धिषु संसारोऽप्युपरमते ता बुद्धयः बहुशाखाः बह्व्यः शाखाः यासां ताः बहुशाखाः, बहुभेदा इत्येतत्। प्रतिशाखाभेदेन हि अनन्ताश्च बुद्धयः। केषाम्? अव्यवसायिनां प्रमाणजनितविवेकबुद्धिरहितानामित्यर्थः।।

येषां व्यवसायात्मिका बुद्धिर्नास्ति ते --

।।२.४२।। --

याम् इमां वक्ष्यमाणां पुष्पितां पुष्पित इव वृक्षः शोभमानां श्रूयमाणरमणीयां वाचं वाक्यलक्षणां प्रवदन्ति। के? अविपश्चितः अमेधसः अविवेकिन इत्यर्थः। वेदवादरताः बह्वर्थवादफलसाधनप्रकाशकेषु वेदवाक्येषु रताः हे पार्थ, न अन्यत् स्वर्गपश्वादिफलसाधनेभ्यः कर्मभ्यः अस्ति इति वं वादिनः वदनशीलाः।।

ते च --

।।२.४३।। --

कामात्मानः कामस्वभावाः, कामपरा इत्यर्थः। स्वर्गपराः स्वर्गः परः पुरुषार्थः येषां ते स्वर्गपराः स्वर्गप्रधानाः। जन्मकर्मफलप्रदां कर्मणः फलं कर्मफलं जन्मैव कर्मफलं जन्मकर्मफलं तत्

प्रददातीति जन्मकर्मफलप्रदा, तां वाचम्। प्रवदन्ति इत्यनुषज्यते। क्रियाविशेषबहुलां क्रियाणां विशेषाः क्रियाविशेषाः ते बहुला यस्यां वाचि तां स्वर्गपशुपुत्राद्यर्थाः यया वाचा बाहुल्येन प्रकाश्यन्ते। भोगैश्वर्यगतिं प्रति भोगश्च ऽश्वर्यं च भोगैश्वर्ये, तयोर्गतिः प्राप्तिः भोगैश्वर्यगतिः, तां प्रति साधनभूताः ये क्रियाविशेषाः तद्बहुलां तां वाचं प्रवदन्तः मूढाः संसारे परिवर्तन्ते इत्यभिप्रायः।।

तेषां च --

।।२.४४।। --

भोगैश्वर्यप्रसक्तानां भोगः कर्तव्यः ऽश्वर्यं च इति भोगैश्वर्ययोरेव प्रणयवतां तदात्मभूतानाम्। तया क्रियाविशेषबहुलया वाचा अपहृतचेतसाम् आच्छादितविवेकप्रज्ञानां व्यवसायात्मिका सांख्ये योगे वा बुद्धिः समाधौ समाधीयते अस्मिन् पुरुषोपभोगाय सर्वमिति समाधिः अन्तःकरणं बुद्धिः तस्मिन् समाधौ, न विधीयते न भवति इत्यर्थः।।

ये वं विवेकबुद्धिरहिताः तेषां कामात्मनां यत् फलं तदाह --

।।२.४५।। --

त्रैगुण्यविषयाः त्रैगुण्यं संसारो विषयः प्रकाशयितव्यः येषां ते वेदाः त्रैगुण्यविषयाः। त्वं तु निस्त्रैगुण्यो भव अर्जुन, निष्कामो भव इत्यर्थः। निर्द्वन्द्वः सुखदुःखहेतू सप्रतिपक्षौ पदार्थौ द्वन्द्वशब्दवाच्यौ, ततः निर्गतः निर्द्वन्द्वो भव। नित्यसत्त्वस्थः सदा सत्त्वगुणाश्रितो भव। तथा निर्योगक्षेमः अनुपात्तस्य उपादानं योगः, उपात्तस्य रक्षणं क्षेमः,

योगक्षेमप्रधानस्य श्रेयसि प्रवृत्तिर्दुष्करा इत्यतः निर्योगक्षेमो भव। आत्मवान् अप्रमत्तश्च भव। ष

तव उपदेशः स्वधर्ममनुतिष्ठतः।।

सर्वेषु वेदोक्तेषु कर्मसु यान्युक्तान्यनन्तानि फलानि तानि नापेक्ष्यन्ते चेत्, किमर्थं तानि ईश्वरायेत्यनुष्ठीयन्ते इत्युच्यते; श्रृणु --

।।२.४६।। --

यथा लोके कूपतडागाद्यनेकस्मिन् उदपाने परिच्छिन्नोदके यावान् यावत्परिमाणः स्नानपानादिः अर्थः फलं प्रयोजनं स सर्वः अर्थः सर्वतःसंप्लुतोदकेऽपि यः अर्थः तावानेव संपद्यते, तत्र अन्तर्भवतीत्यर्थः। वं तावान् तावत्परिमाण व संपद्यते सर्वेषु वेदेषु वेदोक्तेषु कर्मसु यः अर्थः यत्कर्मफलं सः अर्थः ब्राह्मणस्य संन्यासिनः परमार्थतत्त्वं विजानतो यः अर्थः यत् विज्ञानफलं सर्वतःसंप्लुतोदकस्थानीयं तस्मिन् तावानेव संपद्यते तत्रैवान्तर्भवतीत्यर्थः। 'यथा कृताय विजितायाधरेयाः संयन्त्येवमेनं सर्वं तदभिसमेति यत् किञ्चित् प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद' इति श्रुतेः। ०'सर्वं कर्माखिलम्' इति च वक्ष्यति। तस्मात् प्राक् ज्ञाननिष्ठाधिकारप्राप्तेः कर्मण्यधिकृतेन कूपतडागाद्यर्थस्थानीयमपि कर्म कर्तव्यम्।।

तव च --

।।२.४७।। --

कर्मण्येव अधिकारः न ज्ञाननिष्ठायां ते तव। तत्र च कर्म कुर्वतः मा फलेषु अधिकारः अस्तु, कर्मफलतृष्णा मा भूत् कदाचन कस्याञ्चिदप्यवस्थायामित्यर्थः। यदा कर्मफले तृष्णा ते स्यात् तदा कर्मफलप्राप्तेः हेतुः स्याः, वं मा कर्मफलहेतुः भूः। यदा हि कर्मफलतृष्णाप्रयुक्तः कर्मणि प्रवर्तते तदा कर्मफलस्यैव जन्मनो हेतुर्भवेत्। यदि कर्मफलं नेष्यते, किं कर्मणा दुःखरूपेण? इति मा ते तव सङ्गः अस्तु अकर्मणि अकरणे प्रीतिर्मा भूत्।।

यदि कर्मफलप्रयुक्तेन न कर्तव्यं कर्म, कथं तर्हि कर्तव्यमिति; उच्यते --

।।२.४८।। --

योगस्थः सन् कुरु कर्माणि केवलमीश्वरार्थम्; तत्रापि 'ईश्वरो मे तुष्यतु' इति सङ्गं त्यक्त्वा धनञ्जय। फलतृष्णाशून्येन क्रियमाणे कर्मणि सत्त्वशुद्धिजा ज्ञानप्राप्तिलक्षणा सिद्धिः, तद्विपर्ययजा असिद्धिः, तयोः सिद्ध्यसिद्ध्योः अपि समः तुल्यः भूत्वा कुरु कर्माणि। कोऽसौ योगः यत्रस्थः कुरु इति उक्तम्? इदमेव तत् -- सिद्ध्यसिद्ध्योः समत्वं योगः उच्यते।।

यत्पुनः समत्वबुद्धियुक्तमीश्वराराधनार्थं कर्मोक्तम्, तस्मात्कर्मणः --

।।२.४९।। --

दूरेण अतिविप्रकर्षेण अत्यन्तमेव हि अवरम् अधमं निकृष्टं कर्म फलार्थिना क्रियमाणं बुद्धियोगात् समत्वबुद्धियुक्तात् कर्मणः, जन्ममरणादिहेतुत्वात्। हे धनञ्जय, यत वं ततः योगविषयायां बुद्धौ तत्परिपाकजायां वा सांख्यबुद्धौ शरणम् आश्रयमभयप्राप्तिकारणम् अन्विच्छ प्रार्थयस्व, परमार्थज्ञानशरणो भवेत्यर्थः। यतः अवरं कर्म कुर्वाणाः कृपणाः दीनाः फलहेतवः फलतृष्णाप्रयुक्ताः सन्तः, 'यो वा तदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपणः' इति श्रुतेः।।

समत्वबुद्धियुक्तः सन् स्वधर्ममनुतिष्ठन् यत्फलं प्राप्नोति तच्छृणु --

।।२.५०।। --

बुद्धियुक्तः कर्मसमत्वविषयया बुद्ध्या युक्तः बुद्धियुक्तः सः जहाति परित्यजति इह अस्मिन्

लोके उभे सुकृतदुष्कृते पुण्यपापे सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण यतः, तस्मात् समत्वबुद्धियोगाय युज्यस्व घटस्व। योगो हि कर्मसु कौशलम् स्वधर्माख्येषु कर्मसु वर्तमानस्य या सिद्ध्यसिद्ध्योः समत्वबुद्धिः ईश्वरार्पितचेतस्तया तत् कौशलं कुशलभावः। तद्धि कौशलं यत् बन्धनस्वभावान्यपि कर्माणि समत्वबुद्ध्या स्वभावात् निवर्तन्ते। तस्मात्समत्वबुद्धियुक्तो भव त्वम्।।

यस्मात् --

।।२.५१।। --

कर्मजं फलं त्यक्त्वा इति व्यवहितेन संबन्धः। इष्टानिष्टदेहप्राप्तिः कर्मजं फलं कर्मभ्यो जातं बुद्धियुक्ताः समत्वबुद्धियुक्ताः सन्तः हि यस्मात् फलं त्यक्त्वा परित्यज्य मनीषिणः ज्ञानिनो भूत्वा, जन्मबन्धविनिर्मुक्ताः जन्मैव बन्धः जन्मबन्धः तेन विनिर्मुक्ताः जीवन्त व जन्मबन्धात् विनिर्मुक्ताः सन्तः, पदं परमं विष्णोः मोक्षाख्यं गच्छन्ति अनामयं सर्वोपद्रवरहितमित्यर्थः। अथवा 'बुद्धियोगाद्धनञ्जय' इत्यारभ्य परमार्थदर्शनलक्षणैव
सर्वतःसंप्लुतोदकस्थानीया कर्मयोगजसत्त्वशुद्धिजनिता बुद्धिर्दर्शिता,
साक्षात्सुकृतदुष्कृतप्रहाणादिहेतुत्वश्रवणात्।।

योगानुष्ठानजनितसत्त्वशुद्धजा बुद्धिः कदा प्राप्स्यते इत्युच्यते --

।।२.५२।। --

यदा यस्मिन्काले ते तव मोहकलिलं मोहात्मकमविवेकरूपं कालुष्यं येन आत्मानात्मविवेकबोधं कलुषीकृत्य विषयं प्रत्यन्तःकरणं प्रवर्तते, तत् तव बुद्धिः व्यतितरिष्यति व्यतिक्रमिष्यति, अतिशुद्धभावमापत्स्यते इत्यर्थः। तदा तस्मिन् काले गन्तासि प्राप्स्यसि निर्वेदं वैराग्यं श्रोतव्यस्य

श्रुतस्य च, तदा श्रोतव्यं श्रुतं च ते निष्फलं प्रतिभातीत्यभिप्रायः।।

मोहकलिलात्ययद्वारेण लब्धात्मविवेकजप्रज्ञः कदा कर्मयोगजं फलं परमार्थयोगमवाप्स्यामीति चेत्, तत् शृणु --

।।२.५३।। --

श्रुतिविप्रतिपन्ना अनेकसाध्यसाधनसंबन्धप्रकाशनश्रुतिभिः श्रवणैः प्रवृत्तिनिवृत्तिलक्षणैः विप्रतिपन्ना नानाप्रतिपन्ना विक्षिप्ता सती ते तव बुद्धिः यदा यस्मिन् काले स्थास्यति स्थिरीभूता भविष्यति निश्चला विक्षेपचलनवर्जिता सती समाधौ, समाधीयते चित्तमस्मिन्निति समाधिः आत्मा, तस्मिन् आत्मनि इत्येतत्। अचला तत्रापि विकल्पवर्जिता इत्येतत्। बुद्धिः अन्तःकरणम्। तदा तस्मिन्काले योगम् अवाप्स्यसि विवेकप्रज्ञां समाधिं प्राप्स्यसि।।

प्रश्नबीजं प्रतिलभ्य अर्जुन उवाच लब्धसमाधिप्रज्ञस्य लक्षणबुभुत्सया --

अर्जुन उवाच --

।।२.५४।। --

स्थिता प्रतिष्ठिता 'अहमस्मि परं ब्रह्म' इति प्रज्ञा यस्य सः स्थितप्रज्ञः तस्य स्थितप्रज्ञस्य का भाषा किं भाषणं वचनं कथमसौ परैर्भाष्यते समाधिस्थस्य समाधौ स्थितस्य हे केशव। स्थितधीः स्थितप्रज्ञः स्वयं वा किं प्रभाषेत। किम् आसीत व्रजेत किम् आसनं व्रजनं वा तस्य कथमित्यर्थः। स्थितप्रज्ञस्य लक्षणमनेन श्लोकेन पृच्छ्यते।।

यो ह्यादित व संन्यस्य कर्माणि ज्ञानयोगनिष्ठायां प्रवृत्तः, यश्च कर्मयोगेन, तयोः 'प्रजहाति' इत्यारभ्य आ अध्यायपरिसमाप्तेः स्थितप्रज्ञलक्षणं साधनं चोपदिश्यते। सर्वत्रैव हि

अध्यात्मशास्त्रे कृतार्थलक्षणानि यानि तान्येव साधनानि उपदिश्यन्ते, यत्नसाध्यत्वात्। यानि यत्नसाध्यानि साधनानि लक्षणानि च भवन्ति तानि श्रीभगवानुवाच --

श्रीभगवानुवाच --

।।२.५५।। --

प्रजहाति प्रकर्षेण जहाति परित्यजति यदा यस्मिन्काले सर्वान् समस्तान् कामान् इच्छाभेदान् हे पार्थ, मनोगतान् मनसि प्रविष्टान् हृदि प्रविष्टान्। सर्वकामपरित्यागे तुष्टिकारणाभावात् शरीरधारणनिमित्तशेषे च सति उन्मत्तप्रमत्तस्येव प्रवृत्तिः प्राप्ता, इत्यत उच्यते -- आत्मन्येव प्रत्यगात्मस्वरूपे व आत्मना स्वेनैव बाह्यलाभनिरपेक्षः तुष्टः परमार्थदर्शनामृतरसलाभेन अन्यस्मादलंप्रत्ययवान् स्थितप्रज्ञः स्थिता प्रतिष्ठिता आत्मानात्मविवेकजा प्रज्ञा यस्य सः स्थितप्रज्ञः विद्वान् तदा उच्यते। त्यक्तपुत्रवित्तलोकैषणः संन्यासी आत्माराम आत्मक्रीडः स्थितप्रज्ञ इत्यर्थः।।

किञ्च --

।।२.५६।। --

दुःखेषु आध्यात्मिकादिषु प्राप्तेषु न उद्विग्नं न प्रक्षुभितं दुःखप्राप्तौ मनो यस्य सोऽयम् अनुद्विग्नमनाः। तथा सुखेषु प्राप्तेषु विगता स्पृहा तृष्णा यस्य, न अग्निरिव इन्धनाद्याधाने सुखान्यनु विवर्धते स विगतस्पृहः। वीतरागभयक्रोधः रागश्च भयं च क्रोधश्च वीता विगता यस्मात् स वीतरागभयक्रोधः। स्थितधीः स्थितप्रज्ञो मुनिः संन्यासी तदा उच्यते।।

किञ्च --

।।२.५७।। --

यः मुनिः सर्वत्र देहजीवितादिष्वपि अनभिस्नेहः अभिस्नेहवर्जितः तत्तत् प्राप्य शुभाशुभं तत्तत् शुभं अशुभं वा लब्ध्वा

न अभिनन्दति न द्वेष्टि शुभं प्राप्य न तुष्यति न हृष्यति, अशुभं च प्राप्य न द्वेष्टि इत्यर्थः। तस्य वं हर्षविषादवर्जितस्य विवेकजा प्रज्ञा प्रतिष्ठिता भवति।।

किञ्च --

।।२.५८।। --

यदा संहरते सम्यगुपसंहरते च अयं ज्ञाननिष्ठायां प्रवृत्तो यतिः कूर्मः अङ्गानि इव यथा कूर्मः भयात् स्वान्यङ्गानि उपसंहरति सर्वशः सर्वतः, वं ज्ञाननिष्ठः इन्द्रियाणि इन्द्रियार्थेभ्यः सर्वविषयेभ्यः उपसंहरते। तस्य प्रज्ञा प्रतिष्ठिता इत्युक्तार्थं वाक्यम्।।

तत्र विषयाननाहरतः आतुरस्यापि इन्द्रियाणि कूर्माङ्गानीव संह्रियन्ते न तु तद्विषयो रागः स कथं संह्रियते इति उच्यते --

।।२.५९।। --

यद्यपि विषयाः विषयोपलक्षितानि विषयशब्दवाच्यानि इन्द्रियाणि निराहारस्य अनाह्रियमाणविषयस्य कष्टे तपसि स्थितस्य मूर्खस्यापि विनिवर्तन्ते देहिनो देहवतः रसवर्जं रसो रागो विषयेषु यः तं वर्जयित्वा। रसशब्दो रागे प्रसिद्धः, स्वरसेन प्रवृत्तः रसिकः रसज्ञः, इत्यादिदर्शनात्। सोऽपि रसो रञ्जनारूपः सूक्ष्मः अस्य यतेः परं परमार्थतत्त्वं ब्रह्म दृष्ट्वा उपलभ्य 'अहमेव तत्' इति वर्तमानस्य निवर्तते निर्बीजं विषयविज्ञानं संपद्यते इत्यर्थः। न

असति सम्यग्दर्शने रसस्य उच्छेदः। तस्मात् सम्यग्दर्शनात्मिकायाः प्रज्ञायाः स्थैर्यं कर्तव्यमित्यभिप्रायः।।

सम्यग्दर्शनलक्षणप्रज्ञास्थैर्यं चिकीर्षता आदौ इन्द्रियाणि स्ववशे स्थापयितव्यानि, यस्मात्तदनवस्थापने दोषमाह --

।।२.६०।। --

यततः प्रयत्नं कुर्वतः अपि हि यस्मात् कौन्तेय पुरुषस्य विपश्चितः मेधाविनः अपि इति व्यवहितेन संबन्धः। इन्द्रियाणि प्रमाथीनि प्रमथनशीलानि विषयाभिमुखं हि पुरुषं विक्षोभयन्ति आकुलीकुर्वन्ति, आकुलीकृत्य च हरन्ति प्रसभं प्रसह्य प्रकाशमेव पश्यतो विवेकविज्ञानयुक्तं मनः।।

यतः तस्मात् --

।।२.६१।। --

तानि सर्वाणि संयम्य संयमनं वशीकरणं कृत्वा युक्तः समाहितः सन् आसीत मत्परः अहं वासुदेवः सर्वप्रत्यगात्मा परो यस्य सः मत्परः, 'न अन्योऽहं तस्मात्' इति आसीत इत्यर्थः। वमासीनस्य यतेः वशे हि यस्य इन्द्रियाणि वर्तन्ते अभ्यासबलात् तस्य प्रज्ञा प्रतिष्ठिता।।

अथेदानीं पराभविष्यतः सर्वानर्थमूलमिदमुच्यते --

।।२.६२।। --

ध्यायतः चिन्तयतः विषयान् शब्दादीन् विषयविशेषान् आलोचयतः पुंसः पुरुषस्य सङ्गः आसक्तिः प्रीतिः तेषु विषयेषु उपजायते उत्पद्यते। सङ्गात् प्रीतेः संजायते समुत्पद्यते कामः तृष्णा। कामात् कुतश्चित् प्रतिहतात् क्रोधः अभिजायते।।

।।२.६३।। --

क्रोधात् भवति संमोहः अविवेकः कार्याकार्यविषयः। क्रुद्धो हि संमूढः सन् गुरुमप्याक्रोशति। संमोहात् स्मृतिविभ्रमः शास्त्राचार्योपदेशाहितसंस्कारजनितायाः स्मृतेः स्यात् विभ्रमो भ्रंशः स्मृत्युत्पत्तिनिमित्तप्राप्तौ अनुत्पत्तिः। ततः स्मृतिभ्रंशात् बुद्धिनाशः बुद्धेर्नाशः। कार्याकार्यविषयविवेकायोग्यता अन्तःकरणस्य बुद्धेर्नाश उच्यते। बुद्धिनाशात् प्रणश्यति। तावदेव हि पुरुषः यावदन्तःकरणं तदीयं कार्याकार्यविषयविवेकयोग्यम्। तदयोग्यत्वे नष्ट व पुरुषो भवति। अतः तस्यान्तःकरणस्य बुद्धेर्नाशात् प्रणश्यति पुरुषार्थायोग्यो भवतीत्यर्थः।।

सर्वानर्थस्य मूलमुक्तं विषयाभिध्यानम्। अथ इदानीं मोक्षकारणमिदमुच्यते --

।।२.६४।। --

रागद्वेषवियुक्तैः रागश्च द्वेषश्च रागद्वेषौ, तत्पुरःसरा हि इन्द्रियाणां प्रवृत्तिः स्वाभाविकी, तत्र यो मुमुक्षुः भवति सः

ताभ्यां वियुक्तैः श्रोत्रादिभिः इन्द्रियैः विषयान् अवर्जनीयान् चरन् उपलभमानः आत्मवश्यैः आत्मनः वश्यानि वशीभूतानि इन्द्रियाणि तैः आत्मवश्यैः विधेयात्मा इच्छातः विधेयः आत्मा

अन्तःकरणं यस्य सः अयं प्रसादम् अधिगच्छति। प्रसादः प्रसन्नता स्वास्थ्यम्।।

प्रसादे सति किं स्यात् इत्युच्यते --

।।२.६५।। --

प्रसादे सर्वदुःखानाम् आध्यात्मिकादीनां हानिः विनाशः अस्य यतेः उपजायते। किञ्च -- प्रसन्नचेतसः स्वस्थान्तःकरणस्य हि यस्मात् आशु शीघ्रं बुद्धिः पर्यवतिष्ठते आकाशमिव परि समन्तात् अवतिष्ठते, आत्मस्वरूपेणैव निश्चलीभवतीत्यर्थः।।

एवं प्रसन्नचेतसः अवस्थितबुद्धेः कृतकृत्यता यतः, तस्मात् रागद्वेषवियुक्तैः इन्द्रियैः शास्त्राविरुद्धेषु अवर्जनीयेषु युक्तः समाचरेत् इति वाक्यार्थः।।

सेयं प्रसन्नता स्तूयते --

।।२.६६।। --

नास्ति न विद्यते न भवतीत्यर्थः, बुद्धिः आत्मस्वरूपविषया अयुक्तस्य असमाहितान्तःकरणस्य। न च अस्ति अयुक्तस्य भावना आत्मज्ञानाभिनिवेशः। तथा -- न च अस्ति अभावयतः आत्मज्ञानाभिनिवेशमकुर्वतः शान्तिः उपशमः। अशान्तस्य कुतः सुखम्? इन्द्रियाणां हि विषयसेवातृष्णातः निवृत्तिर्या तत्सुखम् , न विषयविषया तृष्णा। दुःखमेव हि सा। न तृष्णायां सत्यां सुखस्य गन्धमात्रमप्युपपद्यते इत्यर्थः।।

अयुक्तस्य कस्माद्बुद्धिर्नास्ति इत्युच्यते --

।।२.६७।। --

इन्द्रियाणां हि यस्मात् चरतां स्वस्वविषयेषु प्रवर्तमानानां यत् मनः अनुविधीयते अनुप्रवर्तते तत् इन्द्रियविषयविकल्पनेन प्रवृत्तं मनः अस्य यतेः हरति प्रज्ञाम् आत्मानात्मविवेकजां नाशयति। कथम्? वायुः नावमिव अम्भसि उदके जिगमिषतां मार्गादुद्धृत्य उन्मार्गे यथा वायुः नावं प्रवर्तयति, वमात्मविषयां प्रज्ञां हृत्वा मनो विषयविषयां करोति।।

'यततो हि' इत्युपन्यस्तस्यार्थस्य अनेकधा उपपत्तिमुक्त्वा तं चार्थमुपपाद्य उपसंहरति --

।।२.६८।। --

इन्द्रियाणां प्रवृत्तौ दोष उपपादितो यस्मात्, तस्मात् यस्य यतेः हे महाबाहो, निगृहीतानि सर्वशः सर्वप्रकारैः मानसादिभेदैः इन्द्रियाणि इन्द्रियार्थेभ्यः शब्दादिभ्यः तस्य प्रज्ञा प्रतिष्ठिता।।

योऽयं लौकिको वैदिकश्च व्यवहारः स उत्पन्नविवेकज्ञानस्य स्थितप्रज्ञस्य अविद्याकार्यत्वात् अविद्यानिवृत्तौ निवर्तते, अविद्यायाश्च विद्याविरोधात् निवृत्तिः, इत्येतमर्थं स्फुटीकुर्वन् आह --

।।२.६९।। --

या निशा रात्रिः सर्वपदार्थानामविवेककरी तमःस्वभावत्वात् सर्वभूतानां सर्वेषां भूतानाम्। किं तत् परमार्थतत्त्वं स्थितप्रज्ञस्य विषयः। यथा नक्तञ्चराणाम् अहरेव सदन्येषां निशा भवति, तद्वत् नक्तञ्चरस्थानीयानामज्ञानां सर्वभूतानां निशेव निशा परमार्थतत्त्वम्, अगोचरत्वादतद्बुद्धीनाम्। तस्यां परमार्थतत्त्वलक्षणायामज्ञाननिद्रायाः प्रबुद्धो जागर्ति संयमी संयमवान्, जितेन्द्रियो योगीत्यर्थः। यस्यां ग्राह्यग्राहकभेदलक्षणायामविद्यानिशायां प्रसुप्तान्येव भूतानि

जाग्रति इति उच्यन्ते, यस्यां निशायां प्रसुप्ता इव स्वप्नदृशः, सा निशा अविद्यारूपत्वात् परमार्थतत्त्वं पश्यतो मुनेः।।

अतः कर्माणि अविद्यावस्थायामेव चोद्यन्ते, न विद्यावस्थायाम्। विद्यायां हि सत्याम् उदिते सवितरि शार्वरमिव तमः प्रणाशमुपगच्छति अविद्या। प्राक् विद्योत्पत्तेः अविद्या प्रमाणबुद्ध्या गृह्यमाणा क्रियाकारकफलभेदरूपा सती
सर्वकर्महेतुत्वं प्रतिपद्यते। न अप्रमाणबुद्ध्या गृह्यमाणायाः कर्महेतुत्वोपपत्तिः, 'प्रमाणभूतेन वेदेन मम चोदितं कर्तव्यं कर्म' इति हि कर्मणि कर्ता प्रवर्तते, न 'अविद्यामात्रमिदं सर्वं निशेव ' इति। यस्य पुनः 'निशेव अविद्यामात्रमिदं

सर्वं भेदजातम्' इति ज्ञानं तस्य आत्मज्ञस्य सर्वकर्मसंन्यासे व अधिकारो न प्रवृत्तौ। तथा च दर्शयिष्यति -- ठतद्बुद्धयस्तदात्मानः' इत्यादिना ज्ञाननिष्ठायामेव तस्य अधिकारम्।।

तत्रापि प्रवर्तकप्रमाणाभावे प्रवृत्त्यनुपपत्तिः इति चेत्, न; स्वात्मविषयत्वादात्मविज्ञानस्य। न हि आत्मनः स्वात्मनि प्रवर्तकप्रमाणापेक्षता, आत्मत्वादेव। तदन्तत्वाच्च सर्वप्रमाणानां प्रमाणत्वस्य। न हि आत्मस्वरूपाधिगमे सति पुनः प्रमाणप्रमेयव्यवहारः संभवति। प्रमातृत्वं हि आत्मनः निवर्तयति अन्त्यं प्रमाणम्; निवर्तयदेव च अप्रमाणीभवति, स्वप्नकालप्रमाणमिव प्रबोधे। लोके च वस्त्वधिगमे प्रवृत्तिहेतुत्वादर्शनात् प्रमाणस्य। तस्मात् न आत्मविदः कर्मण्यधिकार इति सिद्धम्।।

विदुषः त्यक्तैषणस्य स्थितप्रज्ञस्य यतेरेव मोक्षप्राप्तिः, न तु असंन्यासिनः कामकामिनः इत्येतमर्थं दृष्टान्तेन प्रतिपादयिष्यन् आह --

।।२.७०।। --

आपूर्यमाणम् अद्भिः अचलप्रतिष्ठम् अचलतया प्रतिष्ठा अवस्थितिः यस्य तम् अचलप्रतिष्ठं समुद्रम् आपः सर्वतो गताः प्रविशन्ति स्वात्मस्थमविक्रियमेव सन्तं यद्वत्, तद्वत् कामाः विषयसंनिधावपि सर्वतः इच्छाविशेषाः यं पुरुषम् -- समुद्रमिव आपः -- अविकुर्वन्तः प्रविशन्ति सर्वे आत्मन्येव प्रलीयन्ते न स्वात्मवशं कुर्वन्ति, सः शान्तिं मोक्षम् आप्नोति, न इतरः कामकामी, काम्यन्त इति कामाः विषयाः तान् कामयितुं शीलं यस्य सः कामकामी, नैव प्राप्नोति इत्यर्थः।।

यस्मादेवं तस्मात् --

।।२.७१।। --

विहाय परित्यज्य कामान् यः संन्यासी पुमान् सर्वान् अशेषतः कात्स्न्र्येन चरति, जीवनमात्रचेष्टाशेषः पर्यटतीत्यर्थः। निःस्पृहः शरीरजीवनमात्रेऽपि निर्गता स्पृहा यस्य सः निःस्पृहः सन्, निर्ममः शरीरजीवनमात्राक्षिप्तपरिग्रहेऽपि ममेदम् इत्यभिनिवेशवर्जितः, निरहंकारः विद्यावत्त्वादिनिमित्तात्मसंभावनारहितः इत्येतत्। सः वंभूतः स्थितप्रज्ञः ब्रह्मवित् शान्तिं सर्वसंसारदुःखोपरमलक्षणां निर्वाणाख्याम् अधिगच्छति प्राप्नोति ब्रह्मभूतो भवति इत्यर्थः।।

सैषा ज्ञाननिष्ठा स्तूयते।।

।।२.७२।। --

षा यथोक्ता ब्राह्मी ब्रह्मणि भवा इयं स्थितिः सर्वं कर्म संन्यस्य ब्रह्मरूपेणैव अवस्थानम् इत्येतत्। हे पार्थ, न नां स्थितिं प्राप्य लब्ध्वा न विमुह्यति न मोहं प्राप्नोति। स्थित्वा अस्यां स्थितौ ब्राह्म्यां यथोक्तायां अन्तकालेऽपि अन्त्ये वयस्यपि ब्रह्मनिर्वाणं ब्रह्मनिर्वृतिं मोक्षम्

च्छति गच्छति। किमु वक्तव्यं ब्रह्मचर्यादेव संन्यस्य यावज्जीवं यो ब्रह्मण्येव अवतिष्ठते स ब्रह्मनिर्वाणमृच्छति इति।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
द्वितीयोऽध्यायः।।

BHAGAVADGITA
Sanskrit Commentary - Sri Sankaracharya
Chapter 3
DV

।।३.१।। --

ज्यायसी श्रेयसी चेत् यदि कर्मणः सकाशात् ते तव मता अभिप्रेता बुद्धिः ज्ञानं हे जनार्दन। यदि बुद्धिकर्मणी समुच्चिते इष्टे तदा कं श्रेयःसाधनमिति कर्मणो ज्यायसी बुद्धिः इति कर्मणः अतिरिक्तकरणं बुद्धेरनुपपन्नम् अर्जुनेन कृतं स्यात्; न हि तदेव तस्मात् फलतोऽतिरिक्तं स्यात्। तथा च, कर्मणः श्रेयस्करी भगवतोक्ता बुद्धिः, अश्रेयस्करं च कर्म कुर्विति मां प्रतिपादयति, तत् किं नु कारणमिति भगवत उपालम्भमिव कुर्वन् तत् किं कस्मात् कर्मणि घोरे क्रूरे हिंसालक्षणे मां नियोजयसि केशव इति च यदाह, तच्च नोपपद्यते। अथ स्मार्तेनैव कर्मणा समुच्चयः सर्वेषां भगवता उक्तः अर्जुनेन च अवधारितश्चेत् , 'तत्किं कर्मणि घोरे मां नियोजयसि' (गीता ३.१) इत्यादि कथं युक्तं वचनम्।।

किञ्च --

।।३.२।। --

व्यामिश्रेणेव, यद्यपि विविक्ताभिधायी भगवान्, तथापि मम मन्दबुद्धेः व्यामिश्रमिव भगवद्वाक्यं प्रतिभाति। तेन मम बुद्धिं मोहयसि इव, मम बुद्धिव्यामोहापनयाय हि प्रवृत्तः त्वं तु कथं मोहयसि? अतः ब्रवीमि बुद्धिं मोहयसि इव मे मम इति। त्वं तु भिन्नकर्तृकयोः ज्ञानकर्मणोः कपुरुषानुष्ठानासंभवं यदि मन्यसे, तत्रैवं सति तत् तयोः कं बुद्धिं कर्म वा इदमेव अर्जुनस्य योग्यं बुद्धिशक्त्यवस्थानुरूपमिति निश्चित्य वद ब्रूहि, येन ज्ञानेन कर्मणा वा अन्यतरेण श्रेयः अहम् आप्नुयां प्राप्नुयाम्; इति यदुक्तं तदपि नोपपद्यते।।

यदि हि कर्मनिष्ठायां गुणभूतमपि ज्ञानं भगवता उक्तं स्यात् , तत् कथं तयोः 'एकं वद' इति

कविषयैव अर्जुनस्य शुश्रूषा स्यात्। न हि भगवता पूर्वमुक्तम् 'अन्यतरदेव ज्ञानकर्मणोः वक्ष्यामि, नैव द्वयम्' इति, येन उभयप्राप्त्यसंभवम् आत्मनो मन्यमानः कमेव प्रार्थयेत्।।

प्रश्नानुरूपमेव प्रतिवचनं श्रीभगवानुवाच --

।।३.३।। --

लोके अस्मिन् शास्त्रार्थानुष्ठानाधिकृतानां त्रैवर्णिकानां द्विविधा द्विप्रकारा निष्ठा स्थितिः अनुष्ठेयतात्पर्यं पुरा पूर्वं सर्गादौ प्रजाः सृष्ट्वा तासाम् अभ्युदयनिःश्रेयसप्राप्तिसाधनं वेदार्थसंप्रदायमाविष्कुर्वता प्रोक्ता मया सर्वज्ञेन ईश्वरेण हे अनघ अपाप। तत्र का सा द्विविधा निष्ठा इत्याह -- तत्र ज्ञानयोगेन ज्ञानमेव योगः तेन सांख्यानाम् अत्मानात्मविषयविवेकविज्ञानवतां ब्रह्मचर्याश्रमादेव कृतसंन्यासानां वेदान्तविज्ञानसुनिश्चितार्थानां परमहंसपरिव्राजकानां ब्रह्मण्येव अवस्थितानां निष्ठा प्रोक्ता। कर्मयोगेन कर्मैव योगः कर्मयोगः तेन कर्मयोगेन योगिनां कर्मिणां निष्ठा प्रोक्ता इत्यर्थः। यदि च केन पुरुषेण कस्मै पुरुषार्थाय ज्ञानं कर्म च समुच्चित्य अनुष्ठेयं भगवता इष्टम् उक्तं वक्ष्यमाणं वा गीतासु वेदेषु चोक्तम् , कथमिह अर्जुनाय उपसन्नाय प्रियाय विशिष्टभिन्नपुरुषकर्तृके व ज्ञानकर्मनिष्ठे ब्रूयात्? यदि पुनः 'अर्जुनः ज्ञानं कर्म च द्वयं श्रुत्वा स्वयमेवानुष्ठास्यति अन्येषां तु भिन्नपुरुषानुष्ठेयतां वक्ष्यामि इति' मतं भगवतः कल्प्येत, तदा रागद्वेषवान् अप्रमाणभूतो भगवान् कल्पितः स्यात्। तच्चायुक्तम्। तस्मात् कयापि युक्त्या न समुच्चयो ज्ञानकर्मणोः।।

यत् अर्जुनेन उक्तं कर्मणो ज्यायस्त्वं बुद्धेः तच्च स्थितम्, अनिराकरणात्। तस्याश्च ज्ञाननिष्ठायाः संन्यासिनामेवानुष्ठेयत्वम् , भिन्नपुरुषानुष्ठेयत्ववचनात्। भगवतः वमेव अनुमतमिति गम्यते।।

'मां च बन्धकारणे कर्मण्येव नियोजयसि' इति विषण्णमनसमर्जुनम् 'कर्म नारभे' इत्येवं

मन्वानमालक्ष्य आह भगवान् -- न कर्मणामनारम्भात् इति। अथवा -- ज्ञानकर्मनिष्ठयोः परस्परविरोधात् केन पुरुषेण युगपत् अनुष्ठातुमशक्यत्वे सति इतरेतरानपेक्षयोरेव पुरुषार्थहेतुत्वे प्राप्ते कर्मनिष्ठाया ज्ञाननिष्ठाप्राप्तिहेतुत्वेन पुरुषार्थहेतुत्वम्, न स्वातन्त्र्येण; ज्ञाननिष्ठा तु कर्मनिष्ठोपायलब्धात्मिका सती स्वातन्त्र्येण पुरुषार्थहेतुः अन्यानपेक्षा, इत्येतमर्थं प्रदर्शयिष्यन् आह भगवान् --

।।३.४।। --

न कर्मणां क्रियाणां यज्ञादीनाम् इह जन्मनि जन्मान्तरे वा अनुष्ठितानाम् उपात्तदुरितक्षयहेतुत्वेन सत्त्वशुद्धिकारणानां तत्कारणत्वेन च ज्ञानोत्पत्तिद्वारेण ज्ञाननिष्ठाहेतूनाम्, 'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः। यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि' (महा० शान्ति० २०४।८) इत्यादिस्मरणात्, अनारम्भात् अननुष्ठानात् नैष्कर्म्यं निष्कर्मभावं कर्मशून्यतां ज्ञानयोगेन निष्ठां निष्क्रियात्मस्वरूपेणैव अवस्थानमिति यावत्। पुरुषः न अश्नुते न प्राप्नोतीत्यर्थः।।

कर्मणामनारम्भान्नैष्कर्म्यं नाश्नुते इति वचनात् तद्विपर्ययात् तेषामारम्भात् नैष्कर्म्यमश्नुते इति गम्यते। कस्मात् पुनः कारणात् कर्मणामनारम्भान्नैष्कर्म्यं नाश्नुते इति? उच्यते, कर्मारम्भस्यैव नैष्कर्म्योपायत्वात्। न ह्युपायमन्तरेण उपेयप्राप्तिरस्ति। कर्मयोगोपायत्वं च नैष्कर्म्यलक्षणस्य ज्ञानयोगस्य, श्रुतौ इह च, प्रतिपादनात्। श्रुतौ तावत् प्रकृतस्य आत्मलोकस्य वेद्यस्य वेदनोपायत्वेन 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन' (बृह० उ० ४।४।२२) इत्यादिना कर्मयोगस्य ज्ञानयोगोपायत्वं प्रतिपादितम्। इहापि च -- 'संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः' (गीता ५।६) 'योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ' (गीता ५।११) 'यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्' (गीता १८।५) इत्यादि प्रतिपादयिष्यति।।

ननु च 'अभयं सर्वभूतेभ्यो दत्त्वा नैष्कर्म्यमाचरेत्' इत्यादौ कर्तव्यकर्मसंन्यासादपि नैष्कर्म्यप्राप्तिं दर्शयति। लोके च कर्मणामनारम्भान्नैष्कर्म्यमिति प्रसिद्धतरम्। अतश्च नैष्कर्म्यार्थिनः किं कर्मारम्भेण? इति प्राप्तम्। अत आह -- न च संन्यसनादेवेति। नापि संन्यसनादेव केवलात् कर्मपरित्यागमात्रादेव ज्ञानरहितात् सिद्धिं नैष्कर्म्यलक्षणां ज्ञानयोगेन निष्ठां समधिगच्छति न प्राप्नोति।।

कस्मात् पुनः कारणात् कर्मसंन्यासमात्रादेव केवलात् ज्ञानरहितात् सिद्धिं नैष्कर्म्यलक्षणां पुरुषो नाधिगच्छति इति हेत्वाकाङ्क्षायामाह --

।।३.५।। --

न हि यस्मात् क्षणमपि कालं जातु कदाचित् कश्चित् तिष्ठति अकर्मकृत् सन्। कस्मात्? कार्यते प्रवर्त्यते हि यस्मात् अवश व अस्वतन्त्र व कर्म सर्वः प्राणी प्रकृतिजैः प्रकृतितो जातैः सत्त्वरजस्तमोभिः गुणैः। अज्ञ इति वाक्यशेषः, यतो वक्ष्यति
'गुणैर्यो न विचाल्यते' इति। सांख्यानां पृथक्करणात् अज्ञानामेव हि कर्मयोगः, न ज्ञानिनाम्। ज्ञानिनां तु गुणैरचाल्यमानानां स्वतश्चलनाभावात् कर्मयोगो नोपपद्यते। तथा च व्याख्यातम् 'वेदाविनाशिनम्' इत्यत्र।।

यत्त्वनात्मज्ञः चोदितं कर्म नारभते इति तदसदेवेत्याह --

।।३.६।। --

कर्मेन्द्रियाणि हस्तादीनि संयम्य संहृत्य यः आस्ते तिष्ठति मनसा स्मरन् चिन्तयन् इन्द्रियार्थान् विषयान् विमूढात्मा विमूढान्तःकरणः मिथ्याचारो मृषाचारः पापाचारः सः उच्यते।।

।।३.७।। --

यस्तु पुनः कर्मण्यधिकृतः अज्ञः बुद्धीन्द्रियाणि मनसा नियम्य आरभते अर्जुन कर्मेन्द्रियैः वाक्पाण्यादिभिः। किमारभते इत्याह -- कर्मयोगम् असक्तः सन् फलाभिसंधिवर्जितः सः विशिष्यते इतरस्मात् मिथ्याचारात्।।

यतः वम् अतः --

।।३.८।। --

नियतं नित्यं शास्त्रोपदिष्टम्, यो यस्मिन् कर्मणि अधिकृतः फलाय च अश्रुतं तत् नियतं कर्म, तत् कुरु त्वं हे अर्जुन, यतः कर्म ज्यायः अधिकतरं फलतः, हि यस्मात् अकर्मणः अकरणात् अनारम्भात्। कथम्? शरीरयात्रा शरीरस्थितिः अपि च ते तव न प्रसिध्येत् प्रसिद्धिं न गच्छेत् अकर्मणः अकरणात्। अतः दृष्टः कर्माकर्मणोर्विशेषो लोके।।

यच्च मन्यसे बन्धार्थत्वात् कर्म न कर्तव्यमिति तदप्यसत्। कथम् --

।।३.९।। --

'यज्ञो वै विष्णुः' (तै० सं० १.७.४) इति श्रुतेः यज्ञः ईश्वरः, तदर्थं यत् क्रियते तत् यज्ञार्थं कर्म। तस्मात् कर्मणः अन्यत्र अन्येन कर्मणा लोकः अयम् अधिकृतः कर्मकृत् कर्मबन्धनः कर्म बन्धनं यस्य सोऽयं कर्मबन्धनः लोकः, न तु यज्ञार्थात्। अतः तदर्थं यज्ञार्थं कर्म कौन्तेय, मुक्तसङ्गः कर्मफलसङ्गवर्जितः सन् समाचर निर्वर्तय।।

इतश्च अधिकृतेन कर्म कर्तव्यम् --

।।३.१०।। --

सहयज्ञाः यज्ञसहिताः प्रजाः त्रयो वर्णाः ताः सृष्ट्वा उत्पाद्य पुरा पूर्वं सर्गादौ उवाच उक्तवान् प्रजापतिः प्रजानां स्रष्टा अनेन यज्ञेन प्रसविष्यध्वं प्रसवः वृद्धिः उत्पत्तिः तं कुरुध्वम्। ष यज्ञः वः युष्माकम् अस्तु भवतु इष्टकामधुक् इष्टान् अभिप्रेतान् कामान् फलविशेषान् दोग्धीति इष्टकामधुक्।।

कथम् --

।।३.११।। --

देवान् इन्द्रादीन् भावयत वर्धयत अनेन यज्ञेन। ते देवा भावयन्तु आप्याययन्तु वृष्ट्यादिना वः युष्मान्। वं परस्परम् अन्योन्यं भावयन्तः श्रेयः परं मोक्षलक्षणं ज्ञानप्राप्तिक्रमेण अवाप्स्यथ। स्वर्गं वा परं श्रेयः अवाप्स्यथ।।

किञ्च --

।।३.१२।। --

इष्टान् अभिप्रेतान् भोगान् हि वः युष्मभ्यं देवाः दास्यन्ते वितरिष्यन्ति स्त्रीपशुपुत्रादीन् यज्ञभाविताः यज्ञैः वर्धिताः तोषिताः इत्यर्थः। तैः देवैः दत्तान् भोगान् अप्रदाय अदत्त्वा, आनृण्यमकृत्वा इत्यर्थः, भ्यः देवेभ्यः, यः भुङ्क्ते स्वदेहेन्द्रियाण्येव तर्पयति स्तेन व तस्कर व

सः देवादिस्वापहारी।।

ये पुनः --

।।३.१३।। --

देवयज्ञादीन् निर्वर्त्य तच्छिष्टम् अशनम् अमृताख्यम् अशितुं शीलं येषां ते यज्ञशिष्टाशिनः सन्तः मुच्यन्ते सर्वकिल्बिषैः सर्वपापैः चुल्ल्यादिपञ्चसूनाकृतैः प्रमादकृतहिंसादिजनितैश्च अन्यैः। ये तु आत्मंभरयः, भुञ्जते ते तु अघं पापं स्वयमपि पापाः -- ये पचन्ति पाकं निर्वर्तयन्ति आत्मकारणात् आत्महेतोः।।

इतश्च अधिकृतेन कर्म कर्तव्यम् जगच्चक्रप्रवृत्तिहेतुर्हि कर्म। कथमिति उच्यते --

।।३.१४।। --

अन्नात् भुक्तात् लोहितरेतःपरिणतात् प्रत्यक्षं भवन्ति जायन्ते भूतानि। पर्जन्यात् वृष्टेः अन्नस्य संभवः अन्नसंभवः। यज्ञात् भवति पर्जन्यः, 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः (मनु० ३.७६)' इति स्मृतेः। यज्ञः अपूर्वम्। स च यज्ञः कर्मसमुद्भवः

त्विग्यजमानयोश्च व्यापारः कर्म, तत् समुद्भवः यस्य यज्ञस्य अपूर्वस्य स यज्ञः कर्मसमुद्भवः।।

तञ्चैवंविधं कर्म कुतो जातमित्याह --

।।३.१५।। --

कर्म ब्रह्मोद्भवं ब्रह्म वेदः सः उद्भवः कारणं प्रकाशको यस्य तत् कर्म ब्रह्मोद्भवं विद्धि विजानीहि। ब्रह्म पुनः वेदाख्यम् अक्षरसमुद्भवम् अक्षरं ब्रह्म परमात्मा समुद्भवो यस्य तत् अक्षरसमुद्भवम्। ब्रह्म वेद इत्यर्थः। यस्मात् साक्षात् परमात्माख्यात् अक्षरात् पुरुषनिःश्वासवत् समुद्भूतं ब्रह्म तस्मात् सर्वार्थप्रकाशकत्वात् सर्वगतम्; सर्वगतमपि सत् नित्यं सदा यज्ञविधिप्रधानत्वात् यज्ञे प्रतिष्ठितम्।।

।।३.१६।। --

वम् इत्थम् ईश्वरेण वेदयज्ञपूर्वक जगच्चक्रं प्रवर्तितं न अनुवर्तयति इह लोके यः कर्मणि अधिकृतः सन् अघायुः अघं पापम् आयुः जीवनं यस्य सः अघायुः, पापजीवनः इति यावत्। इन्द्रियारामः इन्द्रियैः आरामः आरमणम् आक्रीडा विषयेषु यस्य सः इन्द्रियारामः मोघं वृथा हे पार्थ, स जीवति।।

तस्मात् अज्ञेन अधिकृतेन कर्तव्यमेव कर्मेति प्रकरणार्थः। प्राक् आत्मज्ञाननिष्ठायोग्यताप्राप्तेः तादर्थ्येन कर्मयोगानुष्ठानम् अधिकृतेन अनात्मज्ञेन कर्तव्यमेवेत्येतत् 'न कर्मणामनारम्भात्' इत्यत आरभ्य 'शरीरयात्रापि च ते न प्रसिध्येदकर्मणः' इत्येवमन्तेन प्रतिपाद्य, 'यज्ञार्थात् कर्मणोऽन्यत्र' इत्यादिना 'मोघं पार्थ स जीवति' इत्येवमन्तेनापि ग्रन्थेन प्रासङ्गिकम् अधिकृतस्य अनात्मविदः कर्मानुष्ठाने बहु कारणमुक्तम्। तदकरणे च दोषसंकीर्तनं कृतम्।।

एवं स्थिते किमेवं प्रवर्तितं चक्रं सर्वेणानुवर्तनीयम्, आहोस्वित् पूर्वोक्तकर्मयोगानुष्ठानोपायप्राप्याम् अनात्मविदः ज्ञानयोगेनैव निष्ठाम् आत्मविद्भिः सांख्यैः

अनुष्ठेयामप्राप्तेनैव, इत्येवमर्थम् अर्जुनस्य प्रश्नमाशङ्क्य स्वयमेव वा शास्त्रार्थस्य विवेकप्रतिपत्त्यर्थम् 'एतं वै तमात्मानं विदित्वा निवृत्तमिथ्याज्ञानाः सन्तः ब्राह्मणाः मिथ्याज्ञानवद्भिः अवश्यं कर्तव्येभ्यः पुत्रैषणादिभ्यो व्युत्थायाथ भिक्षाचर्यं शरीरस्थितिमात्रप्रयुक्तं चरन्ति न तेषामात्मज्ञाननिष्ठाव्यतिरेकेण अन्यत् कार्यमस्ति' इत्येवं श्रुत्यर्थमिह गीताशास्त्रे प्रतिपिपादयिषितमाविष्कुर्वन् आह भगवान् --

।।३.१७।। --

यस्तु सांख्यः आत्मज्ञाननिष्ठः आत्मरतिः आत्मन्येव रतिः न विषयेषु यस्य सः आत्मरतिरेव स्यात् भवेत् आत्मतृप्तश्च आत्मनैव तृप्तः न अन्नरसादिना सः मानवः मनुष्यः संन्यासी आत्मन्येव च संतुष्टः। संतोषो हि बाह्यार्थलाभे सर्वस्य भवति, तमनपेक्ष्य आत्मन्येव च संतुष्टः सर्वतो वीततृष्ण इत्येतत्। यः ईदृशः आत्मवित् तस्य कार्यं करणीयं न विद्यते नास्ति इत्यर्थः।।

किञ्च --

।।३.१८।। --

नैव तस्य परमात्मरतेः कृतेन कर्मणा अर्थः प्रयोजनमस्ति। अस्तु तर्हि अकृतेन अकरणेन प्रत्यवायाख्यः अनर्थः, न अकृतेन इह लोके कश्चन कश्चिदपि प्रत्यवायप्राप्तिरूपः आत्महानिलक्षणो वा नैव अस्ति। न च अस्य सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु भूतेषु कश्चित् अर्थव्यपाश्रयः प्रयोजननिमित्तक्रियासाध्यः व्यपाश्रयः व्यपाश्रयणम् आलम्बनं कञ्चित् भूतविशेषमाश्रित्य न साध्यः कश्चिदर्थः अस्ति, येन तदर्था क्रिया अनुष्ठेया स्यात्। न त्वम् तस्मिन् सर्वतःसंप्लुतोदकस्थानीये सम्यग्दर्शने वर्तसे।।

यतः वम् --

।।३.१९।। --

तस्मात् असक्तः सङ्गवर्जितः सततं सर्वदा कार्यं कर्तव्यं नित्यं कर्म समाचर निर्वर्तय। असक्तो हि यस्मात् समाचरन् ईश्वरार्थं

कर्म कुर्वन् परं मोक्षम् आप्नोति पूरुषः सत्त्वशुद्धिद्वारेण इत्यर्थः।।

यस्माच्च --

।।३.२०।। --

कर्मणैव हि यस्मात् पूर्वे क्षत्रियाः विद्वांसः संसिद्धिं मोक्षं गन्तुम् आस्थिताः प्रवृत्ताः। के? जनकादयः जनकाश्वपतिप्रभृतयः। यदि ते प्राप्तसम्यग्दर्शनाः, ततः लोकसंग्रहार्थं प्रारब्धकर्मत्वात् कर्मणा सहैव असंन्यस्यैव कर्म संसिद्धिमास्थिता इत्यर्थः। अथ अप्राप्तसम्यग्दर्शनाः जनकादयः, तदा कर्मणा सत्त्वशुद्धिसाधनभूतेन क्रमेण संसिद्धिमास्थिता इति व्याख्येयः श्लोकः। अथ मन्यसे पूर्वैरपि जनकादिभिः अजानद्भिरेव कर्तव्यं कर्म कृतम्; तावता नावश्यमन्येन कर्तव्यं सम्यग्दर्शनवता कृतार्थेनेति; तथापि प्रारब्धकर्मायत्तः त्वं लोकसंग्रहम् व अपि लोकस्य उन्मार्गप्रवृत्तिनिवारणं लोकसंग्रहः, तमेवापि प्रयोजनं संपश्यन् कर्तुम् अर्हसि।।

लोकसंग्रहः किमर्थं कर्तव्य इत्युच्यते --

।।३.२१।। --

यद्यत् कर्म आचरति करोति श्रेष्ठः प्रधानः तत्तदेव कर्म आचरति इतरः अन्यः जनः तदनुगतः। किञ्च सः श्रेष्ठः यत् प्रमाणं कुरुते लौकिकं वैदिकं वा लोकः तत् अनुवर्तते तदेव प्रमाणीकरोति इत्यर्थः।।

यदि अत्र ते लोकसंग्रहकर्तव्यतायां विप्रतिपत्तिः तर्हि मां किं न पश्यसि? --

।।३.२२।। --

न मे मम पार्थ न अस्ति न विद्यते कर्तव्यं त्रिषु अपि लोकेषु किञ्चन किञ्चिदपि। कस्मात्? न अनवाप्तम् अप्राप्तम् अवाप्तव्यं प्रापणीयम्, तथापि वर्ते व च कर्मणि अहम्।।

।।३.२३।। --

यदि हि पुनः अहं न वर्तेय जातु कदाचित् कर्मणि अतन्द्रितः अनलसः सन् मम श्रेष्ठस्य सतः वर्त्म मार्गम् अनुवर्तन्ते मनुष्याः हे पार्थ, सर्वशः सर्वप्रकारैः।।

।।३.२४।। --

उत्सीदेयुः विनश्येयुः इमे सर्वे लोकाः लोकस्थितिनिमित्तस्य कर्मणः अभावात् न कुर्यां कर्म चेत् अहम्। किञ्च, संकरस्य च कर्ता स्याम्। तेन कारणेन उपहन्याम् इमाः प्रजाः। प्रजानामनुग्रहाय प्रवृत्तः उपहतिम् उपहननं कुर्याम् इत्यर्थः। मम ईश्वरस्य अननुरूपमापद्येत।।

यदि पुनः अहमिव त्वं कृतार्थबुद्धिः, आत्मवित् अन्यो वा, तस्यापि आत्मनः कर्तव्याभावेऽपि परानुग्रह व कर्तव्य इत्याह --

।।३.२५।। --

सक्ताः कर्मणि 'अस्य कर्मणः फलं मम भविष्यति' इति केचित् अविद्वांसः यथा कुर्वन्ति भारत, कुर्यात् विद्वान् आत्मवित् तथा असक्तः सन्। तद्वत् किमर्थं करोति? तत् श्रृणु -- चिकीर्षुः कर्तुमिच्छुः लोकसंग्रहम्।।

एवं लोकसंग्रहं चिकीर्षोः न मम आत्मविदः कर्तव्यमस्ति अन्यस्य वा लोकसंग्रहं मुक्त्वा। ततः तस्य आत्मविदः इदमुपदिश्यते --

।।३.२६।। --

बुद्धेर्भेदः बुद्धिभेदः 'मया इदं कर्तव्यं भोक्तव्यं चास्य कर्मणः फलम्' इति निश्चयरूपाया बुद्धेः भेदनं चालनं बुद्धिभेदः तं न जनयेत् न उत्पादयेत् अज्ञानाम् अविवेकिनां कर्मसङ्गिनां कर्मणि आसक्तानां आसङ्गवताम्। किं नु कुर्यात्? जोषयेत् कारयेत् सर्वकर्माणि विद्वान् स्वयं तदेव अविदुषां कर्म युक्तः अभियुक्तः समाचरन्।।

अविद्वानज्ञः कथं कर्मसु सज्जते इत्याह --

।।३.२७।। --

प्रकृतेः प्रकृतिः प्रधानं सत्त्वरजस्तमसां गुणानां साम्यावस्था तस्याः प्रकृतेः गुणैः विकारैः कार्यकरणरूपैः क्रियमाणानि कर्माणि

लौकिकानि शास्त्रीयाणि च सर्वशः सर्वप्रकारैः अहंकारविमूढात्मा कार्यकरणसंघातात्मप्रत्ययः अहंकारः तेन विविधं नानाविधं मूढः आत्मा अन्तःकरणं यस्य सः अयं कार्यकरणधर्मा कार्यकरणाभिमानी अविद्यया कर्माणि आत्मनि मन्यमानः तत्तत्कर्मणाम् अहं कर्ता इति मन्यते।।

यः पुनर्विद्वान् --

।।३.२८।। --

तत्त्ववित् तु महाबाहो। कस्य तत्त्ववित्? गुणकर्मविभागयोः गुणविभागस्य कर्मविभागस्य च तत्त्ववित् इत्यर्थः। गुणाः करणात्मकाः गुणेषु विषयात्मकेषु वर्तन्ते न आत्मा इति मत्वा न सज्जते सक्तिं न करोति।।

ये पुनः --

।।३.२९।। --

प्रकृतेः गुणैः सम्यक् मूढाः संमोहिताः सन्तः सज्जन्ते गुणानां कर्मसु गुणकर्मसु 'वयं कर्म कुर्मः फलाय' इति। तान् कर्मसङ्गिनः अकृत्स्नविदः कर्मफलमात्रदर्शिनः मन्दान् मन्दप्रज्ञान् कृत्स्नवित् आत्मवित् स्वयं न विचालयेत् बुद्धिभेदकरणमेव चालनं तत् न कुर्यात् इत्यर्थः।।

कथं पुनः कर्मण्यधिकृतेन अज्ञेन मुमुक्षुणा कर्म कर्तव्यमिति, उच्यते --

।।३.३०।। --

मयि वासुदेवे परमेश्वरे सर्वज्ञे सर्वात्मनि सर्वाणि कर्माणि संन्यस्य निक्षिप्य अध्यात्मचेतसा

विवेकबुद्ध्या 'अहं कर्ता ईश्वराय भृत्यवत् करोमि' इत्यनया बुद्ध्या। किञ्च, निराशीः त्यक्ताशीः निर्ममः ममभावश्च निर्गतः यस्य तव स त्वं निर्ममो भूत्वा युध्यस्व विगतज्वरः विगतसंतापः विगतशोकः सन्नित्यर्थः।।

यदेतन्मम मतं कर्म कर्तव्यम् इति सप्रमाणमुक्तं तत् तथा --

।।३.३१।। --

ये मे मदीयम् इदं मतं नित्यम् अनुतिष्ठन्ति अनुवर्तन्ते मानवाः मनुष्याः श्रद्धावन्तः श्रद्दधानाः अनसूयन्तः असूयां च मयि परमगुरौ वासुदेवे अकुर्वन्तः, मुच्यन्ते तेऽपि वंभूताः कर्मभिः धर्माधर्माख्यैः।।

।।३.३२।। --

ये तु तद्विपरीताः तत् मम मतम् अभ्यसूयन्तः निन्दन्तः न अनुतिष्ठन्ति नानुवर्तन्ते मे मतम्, सर्वेषु ज्ञानेषु विविधं मूढाः ते। सर्वज्ञानविमूढान् तान् विद्धि जानीहि नष्टान् नाशं गतान् अचेतसः अविवेकिनः।।

कस्मात् पुनः कारणात् त्वदीयं मतं नानुतिष्ठन्ति, परधर्मान् अनुतिष्ठन्ति, स्वधर्मं च नानुवर्तन्ते, त्वत्प्रतिकूलाः कथं न बिभ्यति त्वच्छासनातिक्रमदोषात्? तत्राह --

।।३.३३।। --

सदृशम् अनुरूपं चेष्टते चेष्टां करोति। कस्य? स्वस्याः स्वकीयायाः प्रकृतेः। प्रकृतिर्नाम

पूर्वकृतधर्माधर्मादिसंस्कारः वर्तमानजन्मादौ अभिव्यक्तः; सा प्रकृतिः। तस्याः सदृशमेव सर्वो जन्तुः ज्ञानवानपि चेष्टते, किं पुनर्मूर्खः। तस्मात् प्रकृतिं यान्ति अनुगच्छन्ति भूतानि प्राणिनः। निग्रहः निषेधरूपः किं करिष्यति मम वा अन्यस्य वा।।

यदि सर्वो जन्तुः आत्मनः प्रकृतिसदृशमेव चेष्टते, न च प्रकृतिशून्यः कश्चित् अस्ति, ततः पुरुषकारस्य विषयानुपपत्तेः शास्त्रानर्थक्यप्राप्तौ इदमुच्यते --

।।३.३४।। --

इन्द्रियस्येन्द्रियस्य अर्थे सर्वेन्द्रियाणामर्थे शब्दादिविषये इष्टे रागः अनिष्टे द्वेषः इत्येवं प्रतीन्द्रियार्थं रागद्वेषौ अवश्यंभाविनौ तत्र अयं पुरुषकारस्य शास्त्रार्थस्य च विषय उच्यते। शास्त्रार्थे प्रवृत्तः पूर्वमेव रागद्वेषयोर्वशं नागच्छेत्। या हि पुरुषस्य प्रकृतिः सा रागद्वेषपुरःसरैव स्वकार्ये पुरुषं प्रवर्तयति। तदा स्वधर्मपरित्यागः परधर्मानुष्ठानं च भवति। यदा पुनः रागद्वेषौ तत्प्रतिपक्षेण नियमयति तदा शास्त्रदृष्टिरेव पुरुषः भवति, न प्रकृतिवशः। तस्मात् तयोः रागद्वेषयोः वशं न आगच्छेत्, यतः तौ हि अस्य पुरुषस्य परिपन्थिनौ श्रेयोमार्गस्य विघ्नकर्तारौ तस्करौ इव पथीत्यर्थः।।

तत्र रागद्वेषप्रयुक्तो मन्यते शास्त्रार्थमप्यन्यथा 'परधर्मोऽपि धर्मत्वात् अनुष्ठेय व ' इति, तदसत् --

।।३.३५।। --

श्रेयान् प्रशस्यतरः स्वो धर्मः स्वधर्मः विगुणः अपि विगतगुणोऽपि अनुष्ठीयमानः परधर्मात् स्वनुष्ठितात् साद्गुण्येन संपादितादपि। स्वधर्मे स्थितस्य निधनं मरणमपि श्रेयः परधर्मे स्थितस्य जीवितात्। कस्मात्? परधर्मः भयावहः नरकादिलक्षणं भयमावहति यतः।।

यद्यपि अनर्थमूलम् 'ध्यायतो विषयान्पुंसः (गीता २.६२)' इति 'रागद्वेषौ ह्यस्य परिपन्थिनौ' इति च उक्तम्, विक्षिप्तम् अनवधारितं च तदुक्तम्। तत् संक्षिप्तं निश्चितं च इदमेवेति ज्ञातुमिच्छन् अर्जुनः उवाच 'ज्ञाते हि तस्मिन् तदुच्छेदाय यत्नं कुर्याम्' इति

अर्जुन उवाच --

।।३.३६।। --

अथ केन हेतुभूतेन प्रयुक्तः सन् राज्ञेव भृत्यः अयं पापं कर्म चरति आचरति पूरुषः पुरुषः स्वयम् अनिच्छन् अपि हे वार्ष्णेय वृष्णिकुलप्रसूत, बलात् इव नियोजितः राज्ञेव इत्युक्तो दृष्टान्तः।।

शृणु त्वं तं वैरिणं सर्वानर्थकरं यं त्वं पृच्छसि इति भगवान् उवाच --

।।३.३७।। --

'ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः। वैराग्यस्याथ मोक्षस्य षण्णां भग इतीरणा' (विष्णु पु० ६।५।७४)`श्वर्यादिषट्कं यस्मिन् वासुदेवे नित्यमप्रतिबद्धत्वेन सामस्त्येन च वर्तते, 'उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम्। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति' (विष्णु प० ६।५।७८) उत्पत्त्यादिविषयं च विज्ञानं यस्य स वासुदेवः वाच्यः भगवान् इति।।

काम षः सर्वलोकशत्रुः यन्निमित्ता सर्वानर्थप्राप्तिः प्राणिनाम्। स ष कामः प्रतिहतः केनचित्

क्रोधत्वेन परिणमते। अतः क्रोधः अपि ष व रजोगुणसमुद्भवः रजश्च तत् गुणश्च रजोगुणः सः समुद्भवः यस्य सः कामः रजोगुणसमुद्भवः, रजोगुणस्य वा समुद्भवः। कामो हि उद्भूतः रजः प्रवर्तयन् पुरुषं प्रवर्तयति; 'तृष्णया हि अहं कारितः' इति दुःखिनां रजःकार्ये सेवादौ प्रवृत्तानां प्रलापः श्रूयते। महाशनः महत् अशनं अस्येति महाशनः; अत व महापाप्मा; कामेन हि प्रेरितः जन्तुः पापं करोति। अतः विद्धि नं कामम् इह संसारे वैरिणम्।।

कथं वैरी इति दृष्टान्तैः प्रत्याययति --

।।३.३८।। --

धूमेन सहजेन आव्रियते वह्निः प्रकाशात्मकः अप्रकाशात्मकेन, यथा वा आदर्शो मलेन च, यथा उल्बेन च जरायुणा गर्भवेष्टनेन आवृतः आच्छादितः गर्भः तथा तेन इदम् आवृतम्।।

किं पुनस्तत् इदंशब्दवाच्यं यत् कामेनावृतमित्युच्यते --

।।३.३९।। --

आवृतम् तेन ज्ञानं ज्ञानिनः नित्यवैरिणा, ज्ञानी हि जानाति 'अनेन अहमनर्थे प्रयुक्तः' इति पूर्वमेव। दुःखी च भवति नित्यमेव। अतः असौ ज्ञानिनो नित्यवैरी, न तु मूर्खस्य। स हि कामं तृष्णाकाले मित्रमिव पश्यन् तत्कार्ये दुःखे प्राप्ते जानाति 'तृष्णया अहं दुःखित्वमापादितः' इति, न पूर्वमेव। अतः ज्ञानिन व नित्यवैरी। किंरूपेण? कामरूपेण कामः इच्छैव रूपमस्य इति कामरूपः तेन दुष्पूरेण दुःखेन पूरणमस्य इति दुष्पूरः तेन अनलेन न अस्य अलं पर्याप्तिः विद्यते इत्यनलः तेन च।।

किमधिष्ठानः पुनः कामः ज्ञानस्य आवरणत्वेन वैरी सर्वस्य लोकस्य? इत्यपेक्षायामाह, ज्ञाते

हि शत्रोरधिष्ठाने सुखेन निबर्हणं कर्तुं शक्यत इति --

।।३.४०।। --

इन्द्रियाणि मनः बुद्धिश्च अस्य कामस्य अधिष्ठानम् आश्रयः उच्यते। तैः इन्द्रियादिभिः आश्रयैः विमोहयति विविधं मोहयति

ष कामः ज्ञानम् आवृत्य आच्छाद्य देहिनं शरीरिणम्।।

यतः वम् --

।।३.४१।। --

तस्मात् त्वम् इन्द्रियाणि आदौ पूर्वमेव नियम्य वशीकृत्य भरतर्षभ पाप्मानं पापाचारं कामं प्रजहिहि परित्यज नं प्रकृतं वैरिणं ज्ञानविज्ञाननाशनं ज्ञानं शास्त्रतः आचार्यतश्च आत्मादीनाम् अवबोधः, विज्ञानं विशेषतः तदनुभवः, तयोः ज्ञानविज्ञानयोः श्रेयःप्राप्तिहेत्वोः नाशनं नाशकरं प्रजहिहि आत्मनः परित्यजेत्यर्थः।।

इन्द्रियाण्यादौ नियम्य कामं शत्रुं जहिहि इत्युक्तम्; तत्र किमाश्रयः कामं जह्यात् इत्युच्यते --

।।३.४२।। --

इन्द्रियाणि श्रोत्रादीनि पञ्च देहं स्थूलं बाह्यं परिच्छिन्नं च अपेक्ष्य सौक्ष्म्यान्तरत्वव्यापित्वाद्यपेक्षया पराणि प्रकृष्टानि आहुः पण्डिताः। तथा इन्द्रियेभ्यः परं मनः संकल्पविकल्पात्मकम्। तथा मनसः तु परा बुद्धिः निश्चयात्मिका। तथा यः सर्वदृश्येभ्यः बुद्ध्यन्तेभ्यः आभ्यन्तरः, यं देहिनम् इन्द्रियादिभिः आश्रयैः युक्तः कामः ज्ञानावरणद्वारेण

मोहयति इत्युक्तम्। बुद्धेः परतस्तु सः सः बुद्धेः द्रष्टा परमात्मा।।

ततः किम् --

।।३.४३।। --

वं बुद्धेः परम् आत्मानं बुद्ध्वा ज्ञात्वा संस्तभ्य सम्यक् स्तम्भनं कृत्वा आत्मानं स्वेनैव आत्मना संस्कृतेन मनसा सम्यक् समाधायेत्यर्थः। जहि नं शत्रुं हे महाबाहो कामरूपं दुरासदं दुःखेन आसदः आसादनं प्राप्तिः यस्य तं दुरासदं दुर्विज्ञेयानेकविशेषमिति।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
तृतीयोऽध्यायः।।

BHAGAVADGITA
Sanskrit Commentary - Sri Sankaracharya
Chapter 4
DV

।।४.१।। --

इमम् अध्यायद्वयेनोक्तं योगं विवस्वते आदित्याय सर्गादौ प्रोक्तवान् अहं जगत्परिपालयितृणां क्षत्रियाणां बलाधानाय तेन योगबलेन युक्ताः समर्था भवन्ति ब्रह्म परिरक्षितुम्। ब्रह्मक्षत्रे परिपालिते जगत् परिपालयितुमलम्। अव्ययम् अव्ययफलत्वात्। न ह्यस्य योगस्य सम्यग्दर्शननिष्ठालक्षणस्य मोक्षाख्यं फलं व्येति। स च विवस्वान् मनवे प्राह। मनुः इक्ष्वाकवे स्वपुत्राय आदिराजाय अब्रवीत्।।

।।४.२।। --

वं क्षत्रियपरम्पराप्राप्तम् इमं राजर्षयः राजानश्च ते

षयश्च राजर्षयः विदुः इमं योगम्। स योगः कालेन इह महता दीर्घेण नष्टः विच्छिन्नसंप्रदायः संवृत्तः। हे परंतप, आत्मनः विपक्षभूताः परा इति उच्यन्ते, तान् शौर्यतेजोगभस्तिभिः भानुरिव तापयतीति परंतपः शत्रुतापन इत्यर्थः।।

दुर्बलानजितेन्द्रियान् प्राप्य नष्टं योगमिममुपलभ्य लोकं च अपुरुषार्थसंबन्धिनम् --

।।४.३।। --

स व अयं मया ते तुभ्यम् अद्य इदानीं योगः प्रोक्तः पुरातनः भक्तः असि मे सखा च असि इति। रहस्यं हि यस्मात् तत् उत्तमं योगः ज्ञानम् इत्यर्थः।।

भगवता विप्रतिषिद्धमुक्तमिति मा भूत् कस्यचित् बुद्धिः इति परिहारार्थं चोद्यमिव कुर्वन् अर्जुन उवाच --

अर्जुन उवाच --

।।४.४।। --

अपरम् अर्वाक् वसुदेवगृहे भवतो जन्म। परं पूर्वं सर्गादौ जन्म उत्पत्तिः विवस्वतः आदित्यस्य। तत् कथम् तत् विजानीयाम् अविरुद्धार्थतया, यः त्वमेव आदौ प्रोक्तवान् इमं योगं स व इदानीं मह्यं प्रोक्तवानसि इति।।

या वासुदेवे अनीश्वरासर्वज्ञाशङ्का मूर्खाणाम्, तां परिहरन् श्रीभगवानुवाच, यदर्थो ह्यर्जुनस्य प्रश्नः --

श्रीभगवानुवाच --

।।४.५।। --

बहूनि मे मम व्यतीतानि अतिक्रान्तानि जन्मानि तव च हे अर्जुन। तानि अहं वेद जाने सर्वाणि न त्वं वेत्थ न जानीषे, धर्माधर्मादिप्रतिबद्धज्ञानशक्तित्वात्। अहं पुनः नित्यशुद्धबुद्धमुक्तस्वभावत्वात् अनावरणज्ञानशक्तिरिति वेद अहं हे परंतप।।

कथं तर्हि तव नित्येश्वरस्य धर्माधर्माभावेऽपि जन्म इति, उच्यते --

।।४.६।। --

अजोऽपि जन्मरहितोऽपि सन्, तथा अव्ययात्मा अक्षीणज्ञानशक्तिस्वभावोऽपि सन्, तथा भूतानां ब्रह्मादिस्तम्बपर्यन्तानाम् ईश्वरः ईशनशीलोऽपि सन्, प्रकृतिं स्वां मम वैष्णवीं मायां त्रिगुणात्मिकाम्, यस्या वशे सर्वं जगत् वर्तते, यया मोहितं सत् स्वमात्मानं वासुदेवं न जानाति, तां प्रकृतिं स्वाम् अधिष्ठाय वशीकृत्य संभवामि देहवानिव भवामि जात इव आत्ममायया आत्मनः मायया, न परमार्थतो लोकवत्।।

तच्च जन्म कदा किमर्थं च इत्युच्यते --

।।४.७।। --

यदा यदा हि धर्मस्य ग्लानिः हानिः वर्णाश्रमादिलक्षणस्य प्राणिनामभ्युदयनिःश्रेयससाधनस्य भवति भारत, अभ्युत्थानम् उद्भवः अधर्मस्य, तदा तदा आत्मानं सृजामि अहं मायया।।

किमर्थम्? --

।।४.८।। --

परित्राणाय परिरक्षणाय साधूनां सन्मार्गस्थानाम्, विनाशाय च दुष्कृतां पापकारिणाम्, किञ्च धर्मसंस्थापनार्थाय धर्मस्य सम्यक् स्थापनं तदर्थं संभवामि युगे युगे प्रतियुगम्।।

तत् --

।।४.९।। --

जन्म मायारूपं कर्म च साधूनां परित्राणादि मे मम दिव्यम् अप्राकृतम् ेश्वरम् वं यथोक्तं यः वेत्ति तत्त्वतः तत्त्वेन यथावत् त्यक्त्वा देहम् इमं पुनर्जन्म पुनरुत्पत्तिं न ति न प्राप्नोति। माम् ति आगच्छति सः मुच्यते हे अर्जुन।।

नैष मोक्षमार्ग इदानीं प्रवृत्तः; किं तर्हि? पूर्वमपि --

।।४.१०।। --

वीतरागभयक्रोधाः रागश्च भयं च क्रोधश्च वीताः विगताः येभ्यः ते वीतरागभयक्रोधाः मन्मयाः ब्रह्मविदः ईश्वराभेददर्शिनः मामेव च परमेश्वरम् उपाश्रिताः केवलज्ञाननिष्ठा इत्यर्थः। बहवः अनेके ज्ञानतपसा ज्ञानमेव च परमात्मविषयं तपः तेन ज्ञानतपसा पूताः परां शुद्धिं गताः सन्तः मद्भावम् ईश्वरभावं मोक्षम् आगताः समनुप्राप्ताः। इतरतपोनिरपेक्षज्ञाननिष्ठा इत्यस्य लिङ्गम् 'ज्ञानतपसा' इति विशेषणम्।।

तव तर्हि रागद्वेषौ स्तः, येन केभ्यश्चिदेव आत्मभावं प्रयच्छसि न सर्वेभ्यः इत्युच्यते --

।।४.११।। --

ये यथा येन प्रकारेण येन प्रयोजनेन यत्फलार्थितया मां प्रपद्यन्ते तान् तथैव तत्फलदानेन भजामि अनुगृह्णामि अहम् इत्येतत्। तेषां मोक्षं प्रति अनर्थित्वात्। न हि कस्य मुमुक्षुत्वं फलार्थित्वं च युगपत् संभवति। अतः ये फलार्थिनः तान् फलप्रदानेन, ये यथोक्तकारिणस्तु अफलार्थिनः मुमुक्षवश्च तान् ज्ञानप्रदानेन, ये ज्ञानिनः संन्यासिनः मुमुक्षवश्च तान् मोक्षप्रदानेन, तथा आर्तान् आर्तिहरणेन इत्येवं यथा प्रपद्यन्ते ये तान् तथैव भजामि इत्यर्थः। न पुनः रागद्वेषनिमित्तं मोहनिमित्तं वा कञ्चित् भजामि। सर्वथापि सर्वावस्थस्य मम ईश्वरस्य वर्त्म

मार्गम् अनुवर्तन्ते मनुष्याः -- यत्फलार्थितया यस्मिन् कर्मणि अधिकृताः ये प्रयतन्ते ते मनुष्या अत्र उच्यन्ते -- हे पार्थ सर्वशः सर्वप्रकारैः।।

यदि तव ईश्वरस्य रागादिदोषाभावात् सर्वप्राणिषु अनुजिघृक्षायां तुल्यायां सर्वफलप्रदानसमर्थे च त्वयि सति 'वासुदेवः
सर्वम्' इति ज्ञानेनैव मुमुक्षवः सन्तः कस्मात् त्वामेव सर्वे न प्रतिपद्यन्ते इति? शृणु तत्र कारणम् --

।।४.१२।। --

काङ्क्षन्तः अभीप्सन्तः कर्मणां सिद्धिं फलनिष्पत्तिं प्रार्थयन्तः यजन्ते इह अस्मिन् लोके देवताः इन्द्राग्न्याद्याः;' अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानाम् (बृ० उ० १.४.१०)' इति श्रुतेः। तेषां हि भिन्नदेवतायाजिनां फलाकाङ्क्षिणां क्षिप्रं शीघ्रं हि यस्मात् मानुषे लोके, मनुष्यलोके हि शास्त्राधिकारः। 'क्षिप्रं हि मानुषे लोके' इति विशेषणात् अन्येष्वपि कर्मफलसिद्धिं दर्शयति भगवान्। मानुषे लोके वर्णाश्रमादिकर्माणि इति विशेषः, तेषां च वर्णाश्रमाद्यधिकारिकर्मणां फलसिद्धिः क्षिप्रं भवति। कर्मजा कर्मणो जाता।।

मानुषे व लोके वर्णाश्रमादिकर्माधिकारः, न अन्येषु लोकेषु इति नियमः किंनिमित्त इति? अथवा वर्णाश्रमादिप्रविभागोपेताः मनुष्याः मम वर्त्म अनुवर्तन्ते सर्वशः इत्युक्तम्। कस्मात्पुनः कारणात् नियमेन तवैव वर्त्म अनुवर्तन्ते न अन्यस्य इति? उच्यते --

।।४.१३।। --

चत्वार व वर्णाः चातुर्वर्ण्यं मया ईश्वरेण सृष्टम् उत्पादितम्, 'ब्राह्मणोऽस्य मुखमासीत्'

इत्यादिश्रुतेः। गुणकर्मविभागशः

गुणविभागशः कर्मविभागशश्च। गुणाः सत्त्वरजस्तमांसि। तत्र सात्त्विकस्य सत्त्वप्रधानस्य ब्राह्मणस्य 'शमो दमस्तपः' इत्यादीनि कर्माणि, सत्त्वोपसर्जनरजःप्रधानस्य क्षत्रियस्य शौर्यतेजःप्रभृतीनि कर्माणि, तमउपसर्जनरजःप्रधानस्य वैश्यस्य कृष्यादीनि कर्माणि, रजउपसर्जनतमःप्रधानस्य शूद्रस्य शुश्रूषैव कर्म इत्येवं गुणकर्मविभागशः चातुर्वर्ण्यं मया सृष्टम् इत्यर्थः। तच्च इदं चातुर्वर्ण्यं न अन्येषु लोकेषु, अतः मानुषे लोके इति विशेषणम्। हन्त तर्हि चातुर्वर्ण्यस्य सर्गादेः कर्मणः कर्तृत्वात् तत्फलेन युज्यसे, अतः न त्वं नित्यमुक्तः नित्येश्वरश्च इति? उच्यते -- यद्यपि मायासंव्यवहारेण तस्य कर्मणः कर्तारमपि सन्तं मां परमार्थतः विद्धि अकर्तारम्। अत व अव्ययम् असंसारिणं च मां विद्धि।।

येषां तु कर्मणां कर्तारं मां मन्यसे परमार्थतः तेषाम् अकर्ता वाहम्, यतः --

।।४.१४।। --

न मां तानि कर्माणि लिम्पन्ति देहाद्यारम्भकत्वेन, अहंकाराभावात्। न च तेषां कर्मणां फलेषु मे मम स्पृहा तृष्णा। येषां तु संसारिणाम्' अहं कर्ता' इत्यभिमानः कर्मसु, स्पृहा तत्फलेषु च, तान् कर्माणि लिम्पन्ति इति युक्तम्, तदभावात् न मां कर्माणि लिम्पन्ति। इति वं यः अन्योऽपि माम् आत्मत्वेन अभिजानाति' नाहं कर्ता न मे कर्मफले स्पृहा' इति सः कर्मभिः न बध्यते, तस्यापि न देहाद्यारम्भकाणि कर्माणि भवन्ति इत्यर्थः।।

'नाहं कर्ता न मे कर्मफले स्पृहा' इति --

।।४.१५।। --

वं ज्ञात्वा कृतं कर्म पूर्वैः अपि अतिक्रान्तैः मुमुक्षुभिः। कुरु तेन कर्मैव त्वम्, न तूष्णीमासनं

नापि संन्यासः कर्तव्यः, तस्मात् त्वं पूर्वैरपि अनुष्ठितत्वात्, यदि अनात्मज्ञः त्वं तदा आत्मशुद्ध्यर्थम्, तत्त्वविच्चेत् लोकसंग्रहार्थं पूर्वैः जनकादिभिः पूर्वतरं कृतं न अधुनातनं कृतं निर्वर्तितम्।।

तत्र कर्म चेत् कर्तव्यं त्वद्वचनादेव करोम्यहम्, किं विशेषितेन 'पूर्वैः पूर्वतरं कृतम्' (गीता ४.१५) इत्युच्यते; यस्मात् महत् वैषम्यं कर्मणि। कथम्? --

।।४.१६।। --

किं कर्म किं च अकर्म इति कवयः मेधाविनः अपि अत्र अस्मिन् कर्मादिविषये मोहिताः मोहं गताः। तत् अतः ते तुभ्यम् अहं कर्म अकर्म च प्रवक्ष्यामि, यत् ज्ञात्वा विदित्वा कर्मादि मोक्ष्यसे अशुभात् संसारात्।।

न चैतत्त्वया मन्तव्यम् -- कर्म नाम देहादिचेष्टा लोकप्रसिद्धम्, अकर्म नाम तदक्रिया तूष्णीमासनम्; किं तत्र बोद्धव्यम् ? इति। कस्मात्, उच्यते --

।।४.१७।। --

कर्मणः शास्त्रविहितस्य हि यस्मात् अपि अस्ति बोद्धव्यम्, बोद्धव्यं च अस्त्येव विकर्मणः प्रतिषिद्धस्य, तथा अकर्मणश्च तूष्णींभावस्य बोद्धव्यम् अस्ति इति त्रिष्वप्यध्याहारः कर्तव्यः। यस्मात् गहना विषमा दुर्ज्ञेया -- कर्मणः इति उपलक्षणार्थं कर्मादीनाम् -- कर्माकर्मविकर्मणां गतिः याथात्म्यं तत्त्वम् इत्यर्थः।।

किं पुनस्तत्त्वं कर्मादेः यत् बोद्धव्यं वक्ष्यामि इति प्रतिज्ञातम्? उच्यते --

।।४.१८।। --

कर्मणि, क्रियते इति कर्म व्यापारमात्रम्, तस्मिन् कर्मणि अकर्म कर्माभावं यः पश्येत्, अकर्मणि च कर्माभावे कर्तृतन्त्रत्वात् प्रवृत्तिनिवृत्त्योः -- वस्तु अप्राप्यैव हि सर्व व क्रियाकारकादिव्यवहारः अविद्याभूमौ व -- कर्म यः पश्येत् पश्यति, सः बुद्धिमान् मनुष्येषु, सः युक्तः योगी च, कृत्स्नकर्मकृत् समस्तकर्मकृच्च सः, इति स्तूयते कर्माकर्मणोरितरेतरदर्शी।।

ननु किमिदं विरुद्धमुच्यते 'कर्मणि अकर्म यः पश्येत् ' इति 'अकर्मणि च कर्म' इति; न हि कर्म अकर्म स्यात्, अकर्म वा कर्म। तत्र विरुद्धं कथं पश्येत् द्रष्टा? -- न, अकर्म व परमार्थतः सत् कर्मवत् अवभासते मूढदृष्टेः लोकस्य, तथा कर्मैव अकर्मवत्। तत्र यथाभूतदर्शनार्थमाह भगवान् -- कर्मण्यकर्म यः पश्येत् (गीता ४.१८) इत्यादि। अतो न विरुद्धम्। बुद्धिमत्त्वाद्युपपत्तेश्च। 'बोद्धव्यम्' इति च यथाभूतदर्शनमुच्यते। न च विपरीतज्ञानात् अशुभात् मोक्षणं स्यात्; 'यत् ज्ञात्वा मोक्ष्यसेऽशुभात्' (गीता ४.१६) इति च उक्तम्। तस्मात् कर्माकर्मणी विपर्ययेण गृहीते प्राणिभिः तद्विपर्ययग्रहणनिवृत्त्यर्थं भगवतो वचनम् 'कर्मण्यकर्म यः' इत्यादि। न च अत्र कर्माधिकरणमकर्म अस्ति, कुण्डे बदराणीव। नापि अकर्माधिकरणं कर्मास्ति, कर्माभावत्वादकर्मणः। अतः विपरीतगृहीते व कर्माकर्मणी लौकिकैः, यथा मृगतृष्णिकायामुदकं शुक्तिकायां वा रजतम्। ननु कर्म कर्मैव सर्वेषां न क्वचित् व्यभिचरति -- तत् न, नौस्थस्य नावि गच्छन्त्यां तटस्थेषु अगतिषु नगेषु प्रतिकूलगतिदर्शनात्, दूरेषु चक्षुषा असंनिकृष्टेषु गच्छत्सु गत्यभावदर्शनात् , वम् इहापि अकर्मणि कर्मदर्शनं कर्मणि च अकर्मदर्शनं विपरीतदर्शनं येन तन्निराकरणार्थमुच्यते 'कर्मण्यकर्म यः पश्येत्' इत्यादि।।

तदेतत् उक्तप्रतिवचनमपि असकृत् अत्यन्तविपरीतदर्शनभावितया मोमुह्यमानो लोकः श्रुतमपि

असकृत् तत्त्वं विस्मृत्य विस्मृत्य मिथ्याप्रसङ्गम् अवतार्यावतार्य चोदयति इति पुनः पुनः उत्तरमाह भगवान्, दुर्विज्ञेयत्वं च आलक्ष्य वस्तुनः।

'अव्यक्तोऽयमचिन्त्योऽयम्' 'न जायते म्रियते' इत्यादिना आत्मनि कर्माभावः श्रुतिस्मृतिन्यायप्रसिद्धः उक्तः वक्ष्यमाणश्च। तस्मिन् आत्मनि कर्माभावे अकर्मणि कर्मविपरीतदर्शनम् अत्यन्तनिरूढम्; यतः, 'किं कर्म किमकर्मेति कवयोऽप्यत्र

मोहिताः' (गीता ४.१६)। देहाद्याश्रयं कर्म आत्मन्यध्यारोप्य 'अहं कर्ता, मम तत् कर्म, मया अस्य कर्मणः फलं भोक्तव्यम् ' इति च, तथा 'अहं तूष्णीं भवामि, येन अहं निरायासः अकर्मा सुखी स्याम्' इति कार्यकरणाश्रयं व्यापारोपरमं तत्कृतं च सुखित्वम् आत्मनि अध्यारोप्य 'न करोमि किंचित्, तूष्णीं सुखमासे ' इति अभिमन्यते लोकः। तत्रेदं लोकस्य विपरीतदर्शनापनयाय आह भगवान् -- 'कर्मण्यकर्म यः पश्येत् ' इत्यादि।।

अत्र च कर्म कर्मैव सत् कार्यकरणाश्रयं कर्मरहिते अविक्रिये आत्मनि सर्वैः अध्यस्तम्, यतः पण्डितोऽपि 'अहं करोमि ' इति मन्यते। अतः आत्मसमवेततया सर्वलोकप्रसिद्धे कर्मणि नदीकूलस्थेष्विव वृक्षेषु गतिप्रातिलोम्येन अकर्म कर्माभावं यथाभूतं गत्यभावमिव वृक्षेषु यः पश्येत्, अकर्मणि च कार्यकरणव्यापारोपरमे कर्मवत् आत्मनि अध्यारोपिते, 'तूष्णीं अकुर्वन् सुखं

आसे' इत्यहंकाराभिसंधिहेतुत्वात्, तस्मिन् अकर्मणि च कर्म यः पश्येत्, यः वं कर्माकर्मविभागज्ञः सः बुद्धिमान् पण्डितः मनुष्येषु, सः युक्तः योगी कृत्स्नकर्मकृच्च सः अशुभात् मोक्षितः कृतकृत्यो भवति इत्यर्थः।।

अयं श्लोकः अन्यथा व्याख्यातः कैश्चित्। कथम्? नित्यानां किल कर्मणाम् ईश्वरार्थे अनुष्ठीयमानानां तत्फलाभावात् अकर्माणि तानि उच्यन्ते गौण्या वृत्त्या। तेषां च अकरणम् अकर्म; तच्च प्रत्यवायफलत्वात् कर्म उच्यते गौण्यैव वृत्त्या। तत्र नित्ये कर्मणि अकर्म यः पश्येत् फलाभावात्; यथा धेनुरपि गौः अगौः इत्युच्यते क्षीराख्यं फलं न प्रयच्छति इति, तद्वत्।

तथा नित्याकरणे तु अकर्मणि च कर्म यः पश्येत् नरकादिप्रत्यवायफलं प्रयच्छति इति।।

नैतत् युक्तं व्याख्यानम्। वं ज्ञानात् अशुभात् मोक्षानुपपत्तेः 'यज्ज्ञात्वा मोक्ष्यसेऽशुभात्' इति भगवता उक्तं वचनं बाध्येत। कथम्? नित्यानामनुष्ठानात् अशुभात् स्यात् नाम मोक्षणम्, न तु तेषां फलाभावज्ञानात्। न हि नित्यानां फलाभावज्ञानम् अशुभमुक्तिफलत्वेन चोदितम्, नित्यकर्मज्ञानं वा। न च भगवतैवेहोक्तम्। तेन अकर्मणि कर्मदर्शनं प्रत्युक्तम्। न हि अकर्मणि 'कर्म' इति दर्शनं कर्तव्यतया इह चोद्यते, नित्यस्य तु कर्तव्यतामात्रम्। न च 'अकरणात् नित्यस्य प्रत्यवायो भवति ' इति विज्ञानात् किञ्चित् फलं स्यात्। नापि नित्याकरणं ज्ञेयत्वेन चोदितम्। नापि 'कर्म अकर्म' इति मिथ्यादर्शनात् अशुभात् मोक्षणं बुद्धिमत्त्वं युक्तता कृत्स्नकर्मकृत्त्वादि च फलम् उपपद्यते, स्तुतिर्वा। मिथ्याज्ञानमेव हि साक्षात् अशुभरूपम्। कुतः अन्यस्मादशुभात् मोक्षणम्? न हि तमः तमसो निवर्तकं भवति।।

ननु कर्मणि यत् अकर्मदर्शनम् अकर्मणि वा कर्मदर्शनं न तत् मिथ्याज्ञानम्; किं तर्हि? गौणं फलभावाभावनिमित्तम् -- न, कर्माकर्मविज्ञानादपि गौणात् फलस्य अश्रवणात्। नापि श्रुतहान्यश्रुतपरिकल्पनायां कश्चित् विशेष उपलभ्यते। स्वशब्देनापि शक्यं वक्तुम् 'नित्यकर्मणां फलं नास्ति, अकरणाच्च तेषां नरकपातः स्यात्' इति; तत्र व्याजेन परव्यामोहरूपेण 'कर्मण्यकर्म यः पश्येत्' इत्यादिना किम्? तत्र वं व्याचक्षाणेन भगवतोक्तं वाक्यं लोकव्यामोहार्थमिति व्यक्तं कल्पितं स्यात्। न च तत् छद्मरूपेण वाक्येन रक्षणीयं वस्तु; नापि शब्दान्तरेण पुनः पुनः उच्यमानं सुबोधं स्यात् इत्येवं वक्तुं युक्तम्। 'कर्मण्येवाधिकारस्ते' इत्यत्र हि स्फुटतर उक्तः अर्थः, न पुनर्वक्तव्यो भवति। सर्वत्र च प्रशस्तं बोद्धव्यं च कर्तव्यमेव। न निष्प्रयोजनं बोद्धव्यमित्युच्यते।।

न च मिथ्याज्ञानं बोद्धव्यं भवति, तत्प्रत्युपस्थापितं वा वस्त्वाभासम्। नापि नित्यानाम् अकरणात् अभावात् प्रत्यवायभावोत्पत्तिः, 'नासतो विद्यते भावः' (गीता २.१६) इति वचनात् 'कथं असतः सज्जायेत ' (बृ० उ० ६.२.२) इति च दर्शितम् असतः सज्जन्मप्रतिषेधात्। असतः

सदुत्पत्तिं ब्रुवता असदेव सद्भवेत्, सच्चापि असत् भवेत् इत्युक्तं स्यात्। तच्च अयुक्तम्, सर्वप्रमाणविरोधात्। न च निष्फलं विदध्यात् कर्म शास्त्रम्, दुःखस्वरूपत्वात्, दुःखस्य च बुद्धिपूर्वकतया कार्यत्वानुपपत्तेः। तदकरणे च नरकपाताभ्युपगमात् अनर्थायैव उभयथापि करणे च अकरणे च शास्त्रं निष्फलं कल्पितं स्यात्। स्वाभ्युपगमविरोधश्च 'नित्यं निष्फलं कर्म' इति अभ्युपगम्य 'मोक्षफलाय' इति ब्रुवतः। तस्मात् यथाश्रुत वार्थः 'कर्मण्यकर्म यः' इत्यादेः। तथा च व्याख्यातः अस्माभिः श्लोकः।।

तदेतत् कर्मणि अकर्मदर्शनं स्तूयते --

।।४.१९।। --

यस्य यथोक्तदर्शिनः सर्वे यावन्तः समारम्भाः सर्वाणि कर्माणि, समारभ्यन्ते इति समारम्भाः, कामसंकल्पवर्जिताः कामैः तत्कारणैश्च संकल्पैः वर्जिताः मुधैव चेष्टामात्रा अनुष्ठीयन्ते; प्रवृत्तेन चेत् लोकसंग्रहार्थम्, निवृत्तेन चेत् जीवनमात्रार्थम्। तं ज्ञानाग्निदग्धकर्माणं कर्मादौ अकर्मादिदर्शनं ज्ञानं तदेव अग्निः तेन ज्ञानाग्निना दग्धानि शुभाशुभलक्षणानि कर्माणि यस्य तम् आहुः परमार्थतः पण्डितं बुधाः ब्रह्मविदः।।

यस्तु अकर्मादिदर्शी, सः अकर्मादिदर्शनादेव निष्कर्मा संन्यासी जीवनमात्रार्थचेष्टः सन् कर्मणि न प्रवर्तते, यद्यपि प्राक् विवेकतः प्रवृत्तः। यस्तु प्रारब्धकर्मा सन् उत्तरकालमुत्पन्नात्मसम्यग्दर्शनः स्यात्, सः सर्वकर्मणि प्रयोजनमपश्यन् ससाधनं कर्म परित्यजत्येव। सः कुतश्चित् निमित्तात् कर्मपरित्यागासंभवे सति कर्मणि तत्फले च सङ्गरहिततया स्वप्रयोजनाभावात् लोकसंग्रहार्थं पूर्ववत् कर्मणि प्रवृत्तोऽपि नैव किञ्चित् करोति, ज्ञानाग्निदग्धकर्मत्वात् तदीयं कर्म अकर्मैव संपद्यते इत्येतमर्थं दर्शयिष्यन् आह --

।।४.२०।। --

त्यक्त्वा कर्मसु अभिमानं फलासङ्गं च यथोक्तेन ज्ञानेन नित्यतृप्तः निराकाङ्क्षो विषयेषु इत्यर्थः। निराश्रयः आश्रयरहितः, आश्रयो नाम यत् आश्रित्य पुरुषार्थं सिसाधयिषति, दृष्टादृष्टेष्टफलसाधनाश्रयरहित इत्यर्थः। विदुषा क्रियमाणं कर्म परमार्थतोऽकर्मैव, तस्य निष्क्रियात्मदर्शनसंपन्नत्वात्। तेन वंभूतेन स्वप्रयोजनाभावात् ससाधनं कर्म परित्यक्तव्यमेव इति प्राप्ते, ततः निर्गमासंभवात् लोकसंग्रहचिकीर्षया शिष्टविगर्हणापरिजिहीर्षया वा पूर्ववत् कर्मणि अभिप्रवृत्तोऽपि निष्क्रियात्मदर्शनसंपन्नत्वात् नैव किञ्चित् करोति सः।।

यः पुनः पूर्वोक्तविपरीतः प्रागेव कर्मारम्भात् ब्रह्मणि सर्वान्तरे प्रत्यगात्मनि निष्क्रिये संजातात्मदर्शनः स दृष्टादृष्टेष्टविषयाशीर्विवर्जिततया दृष्टादृष्टार्थे कर्मणि प्रयोजनमपश्यन् ससाधनं कर्म संन्यस्य शरीरयात्रामात्रचेष्टः यतिः ज्ञाननिष्ठो मुच्यते इत्येतमर्थं दर्शयितुमाह --

।।४.२१।। --

निराशीः निर्गताः आशिषः यस्मात् सः निराशीः, यतचित्तात्मा चित्तम् अन्तःकरणम् आत्मा बाह्यः कार्यकरणसंघातः तौ उभावपि यतौ संयतौ येन सः यतचित्तात्मा, त्यक्तसर्वपरिग्रहः त्यक्तः सर्वः परिग्रहः येन सः त्यक्तसर्वपरिग्रहः, शारीरं शरीरस्थितिमात्रप्रयोजनम्, केवलं तत्रापि अभिमानवर्जितम्, कर्म कुर्वन् न आप्नोति न प्राप्नोति किल्बिषम् अनिष्टरूपं पापं धर्मं च। धर्मोऽपि मुमुक्षोः किल्बिषमेव बन्धापादकत्वात्। तस्मात् ताभ्यां मुक्तः भवति, संसारात् मुक्तो भवति इत्यर्थः।।

'शारीरं केवलं कर्म' इत्यत्र किं शरीरनिर्वर्त्यं शारीरं कर्म अभिप्रेतम्, आहोस्वित् शरीरस्थितिमात्रप्रयोजनं शारीरं कर्म इति? किं च अतः यदि शरीरनिर्वर्त्यं शारीरं कर्म यदि वा शरीरस्थितिमात्रप्रयोजनं शारीरम् इति? उच्यते -- यदा शरीरनिर्वर्त्यं कर्म शारीरम् अभिप्रेतं

स्यात्, तदा दृष्टादृष्टप्रयोजनं कर्म प्रतिषिद्धमपि शरीरेण कुर्वन् नाप्नोति किल्बिषम् इत्यपि ब्रुवतो विरुद्धाभिधानं प्रसज्येत। शास्त्रीयं च कर्म दृष्टादृष्टप्रयोजनं शरीरेण कुर्वन् नाप्नोति किल्बिषम् इत्यपि ब्रुवतः अप्राप्तप्रतिषेधप्रसङ्गः। 'शारीरं कर्म कुर्वन्' इति विशेषणात् केवलशब्दप्रयोगाच्च वाङ्मनसनिर्वर्त्यं कर्म विधिप्रतिषेधविषयं धर्माधर्मशब्दवाच्यं कुर्वन् प्राप्नोति किल्बिषम् इत्युक्तं स्यात्। तत्रापि वाङ्मनसाभ्यां विहितानुष्ठानपक्षे किल्बिषप्राप्तिवचनं विरुद्धम् आपद्येत। प्रतिषिद्धसेवापक्षेऽपि भूतार्थानुवादमात्रम् अनर्थकं स्यात्। यदा तु शरीरस्थितिमात्रप्रयोजनं शारीरं कर्म अभिप्रेतं भवेत्, तदा दृष्टादृष्टप्रयोजनं कर्म विधिप्रतिषेधगम्यं शरीरवाङ्मनसनिर्वर्त्यम् अन्यत् अकुर्वन् तैरेव शरीरादिभिः शरीरस्थितिमात्रप्रयोजनं केवलशब्दप्रयोगात् 'अहं करोमि' इत्यभिमानवर्जितः शरीरादिचेष्टामात्रं लोकदृष्ट्या कुर्वन् नाप्नोति किल्बिषम्। वंभूतस्य पापशब्दवाच्यकिल्बिषप्राप्त्यसंभवात् किल्बिषं संसारं न आप्नोति; ज्ञानाग्निदग्धसर्वकर्मत्वात् अप्रतिबन्धेन मुच्यत व इति पूर्वोक्तसम्यग्दर्शनफलानुवाद व षः। वम् 'शारीरं केवलं कर्म' इत्यस्य अर्थस्य परिग्रहे निरवद्यं भवति।।

त्यक्तसर्वपरिग्रहस्य यतेः अन्नादेः शरीरस्थितिहेतोः परिग्रहस्य अभावात् याचनादिना शरीरस्थितौ कर्तव्यतायां प्राप्तायाम्

'अयाचितमसंक्लृप्तमुपपन्नं यदृच्छया' (बोधा० स्मृ० २१.८.१२) इत्यादिना वचनेन अनुज्ञातं यतेः शरीरस्थितिहेतोः अन्नादेः प्राप्तिद्वारम् आविष्कुर्वन् आह --

।।४.२२)

यदृच्छालाभसंतुष्टः अप्रार्थितोपनतो लाभो यदृच्छालाभः तेन संतुष्टः संजातालंप्रत्ययः। द्वन्द्वातीतः द्वन्द्वैः शीतोष्णादिभिः हन्यमानोऽपि अविषण्णचित्तः द्वन्द्वातीतः उच्यते। विमत्सरः

विगतमत्सरः निर्वैरबुद्धिः समः तुल्यः यदृच्छालाभस्य सिद्धौ असिद्धौ च। यः वंभूतो यतिः अन्नादेः शरीरस्थितिहेतोः लाभालाभयोः समः हर्षविषादवर्जितः कर्मादौ अकर्मादिदर्शी यथाभूतात्मदर्शननिष्ठः सन् शरीरस्थितिमात्रप्रयोजने भिक्षाटनादिकर्मणि शरीरादिनिर्वर्त्ये 'नैव किञ्चित् करोम्यहम्, गुणा गुणेषु वर्तन्ते' (गीता ३.२८) इत्येवं सदा संपरिचक्षाणः आत्मनः कर्तृत्वाभावं पश्यन्नैव किञ्चित् भिक्षाटनादिकं कर्म करोति, लोकव्यवहारसामान्यदर्शनेन तु लौकिकैः आरोपितकर्तृत्वे भिक्षाटनादौ कर्मणि कर्ता भवति। स्वानुभवेन तु शास्त्रप्रमाणादिजनितेन अकर्तैव। स वं पराध्यारोपितकर्तृत्वः शरीरस्थितिमात्रप्रयोजनं भिक्षाटनादिकं कर्म कृत्वापि न निबध्यते बन्धहेतोः कर्मणः सहेतुकस्य ज्ञानाग्निना दग्धत्वात् इति उक्तानुवाद व षः।।

'त्यक्त्वा कर्मफलासङ्गम्' (गीता ४.२०) इत्यनेन श्लोकेन यः प्रारब्धकर्मा सन् यदा निष्क्रियब्रह्मात्मदर्शनसंपन्नः स्यात् तदा तस्य आत्मनः कर्तृकर्मप्रयोजनाभावदर्शिनः कर्मपरित्यागे प्राप्ते कुतश्चिन्निमित्तात् तदसंभवे सति पूर्ववत् तस्मिन् कर्मणि अभिप्रवृत्तस्य अपि 'नैव किञ्चित् करोति सः' इति कर्माभावः प्रदर्शितः। यस्य वं कर्माभावो दर्शितः तस्यैव --

।।४.२३।। --

गतसङ्गस्य सर्वतोनिवृत्तासक्तेः, मुक्तस्य निवृत्तधर्माधर्मादिबन्धनस्य, ज्ञानावस्थितचेतसः ज्ञाने व अवस्थितं चेतः यस्य सोऽयं ज्ञानावस्थितचेताः तस्य, यज्ञाय यज्ञनिर्वृत्त्यर्थम् आचरतः निर्वर्तयतः कर्म समग्रं सह अग्रेण फलेन वर्तते इति समग्रं कर्म तत् समग्रं प्रविलीयते विनश्यति इत्यर्थः।।

कस्मात् पुनः कारणात् क्रियमाणं कर्म स्वकार्यारम्भम् अकुर्वत् समग्रं प्रविलीयते इत्युच्यते यतः --

।।४.२४)

ब्रह्म अर्पणं येन करणेन ब्रह्मवित् हविः अग्नौ अर्पयति तत् ब्रह्मैव इति पश्यति, तस्य आत्मव्यतिरेकेण अभावं पश्यति, यथा शुक्तिकायां रजताभावं पश्यति; तदुच्यते ब्रह्मैव अर्पणमिति, यथा यद्रजतं तत् शुक्तिकैवेति। 'ब्रह्म अर्पणम्' इति असमस्ते पदे। यत् अर्पणबुद्ध्या गृह्यते लोके तत् अस्य ब्रह्मविदः ब्रह्मैव इत्यर्थः। ब्रह्म हविः तथा यत् हविर्बुद्ध्या गृह्यमाणं तत् ब्रह्मैव अस्य। तथा ब्रह्माग्नौ इति समस्तं पदम्। अग्निरपि ब्रह्मैव यत्र हूयते ब्रह्मणा कर्त्रा, ब्रह्मैव कर्तेत्यर्थः। यत् तेन हुतं हवनक्रिया तत् ब्रह्मैव। यत् तेन गन्तव्यं फलं तदपि ब्रह्मैव ब्रह्मकर्मसमाधिना ब्रह्मैव कर्म ब्रह्मकर्म तस्मिन् समाधिः यस्य सः ब्रह्मकर्मसमाधिः तेन ब्रह्मकर्मसमाधिना ब्रह्मैव गन्तव्यम्।।

एवं लोकसंग्रहं चिकीर्षुणापि क्रियमाणं कर्म परमार्थतः अकर्म, ब्रह्मबुद्ध्युपमृदितत्वात्। वं सति निवृत्तकर्मणोऽपि सर्वकर्मसंन्यासिनः सम्यग्दर्शनस्तुत्यर्थं यज्ञत्वसंपादनं ज्ञानस्य सुतरामुपपद्यते; यत् अर्पणादि अधियज्ञे प्रसिद्धं तत् अस्य अध्यात्मं ब्रह्मैव परमार्थदर्शिन इति। अन्यथा सर्वस्य ब्रह्मत्वे अर्पणादीनामेव विशेषतो ब्रह्मत्वाभिधानम् अनर्थकं स्यात्। तस्मात् ब्रह्मैव इदं सर्वमिति अभिजानतः विदुषः कर्माभावः। कारकबुद्ध्यभावाच्च। न हि कारकबुद्धिरहितं यज्ञाख्यं कर्म दृष्टम्। सर्वमेव अग्निहोत्रादिकं कर्म शब्दसमर्पितदेवताविशेषसंप्रदानादिकारकबुद्धिमत् कर्त्रभिमानफलाभिसंधिमच्च दृष्टम्; न उपमृदितक्रियाकारकफलभेदबुद्धिमत् कर्तृत्वाभिमानफलाभिसंधिरहितं वा। इदं तु ब्रह्मबुद्ध्युपमृदितार्पणादिकारकक्रियाफलभेदबुद्धि कर्म। अतः अकर्मैव तत्। तथा च दर्शितम् 'कर्मण्यकर्म यः पश्येत् '

'कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः' 'गुणा गुणेषु वर्तन्ते' 'नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित्' इत्यादिभिः। तथा च दर्शयन् तत्र तत्र क्रियाकारकफलभेदबुद्ध्युपमर्दं करोति। दृष्टा च काम्याग्निहोत्रादौ कामोपमर्देन काम्याग्निहोत्रादिहानिः। तथा मतिपूर्वकामतिपूर्वकादीनां कर्मणां कार्यविशेषस्य आरम्भकत्वं दृष्टम्। तथा इहापि

ब्रह्मबुद्ध्युपमृदितार्पणादिकारकक्रियाफलभेदबुद्धेः बाह्यचेष्टामात्रेण कर्मापि विदुषः अकर्म संपद्यते। अतः उक्तम् 'समग्रं प्रविलीयते' इति।।

अत्र केचिदाहुः -- यत् ब्रह्म तत् अर्पणादीनि; ब्रह्मैव किल अर्पणादिना पञ्चविधेन कारकात्मना व्यवस्थितं सत् तदेव कर्म करोति। तत्र न अर्पणादिबुद्धिः निवर्त्यते, किं तु अर्पणादिषु ब्रह्मबुद्धिः आधीयते; यथा प्रतिमादौ विष्ण्वादिबुद्धिः यथा वा नामादौ ब्रह्मबुद्धिरिति।।

सत्यम्, वमपि स्यात् यदि ज्ञानयज्ञस्तुत्यर्थं प्रकरणं न स्यात्। अत्र तु सम्यग्दर्शनं ज्ञानयज्ञशब्दितम् अनेकान् यज्ञशब्दितान् क्रियाविशेषान् उपन्यस्य 'श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः' (गीता ४.३३) इति ज्ञानं स्तौति। अत्र च समर्थमिदं वचनम् 'ब्रह्मार्पणम्' इत्यादि ज्ञानस्य यज्ञत्वसंपादने; अन्यथा सर्वस्य ब्रह्मत्वे अर्पणादीनामेव विशेषतो ब्रह्मत्वाभिधानमनर्थकं स्यात्। ये तु अर्पणादिषु प्रतिमायां विष्णुदृष्टिवत् ब्रह्मदृष्टिः क्षिप्यते नामादिष्विव चेति ब्रुवते न तेषां ब्रह्मविद्या उक्ता इह विवक्षिता स्यात्, अर्पणादिविषयत्वात् ज्ञानस्य। न च दृष्टिसंपादनज्ञानेन मोक्षफलं प्राप्यते। 'ब्रह्मैव तेन गन्तव्यम्' इति चोच्यते। विरुद्धं च सम्यग्दर्शनम् अन्तरेण मोक्षफलं प्राप्यते इति। प्रकृतविरोधश्च; सम्यग्दर्शनं च प्रकृतम् 'कर्मण्यकर्म यः पश्येत्' इत्यत्र, अन्ते च सम्यग्दर्शनम्, तस्यैव उपसंहारात्। 'श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः', 'ज्ञानं लब्ध्वा परां शान्तिम्' इत्यादिना सम्यग्दर्शनस्तुतिमेव कुर्वन् उपक्षीणः अध्यायः। तत्र अकस्मात् अर्पणादौ ब्रह्मदृष्टिः अप्रकरणे प्रतिमायामिव विष्णुदृष्टिः उच्यते इति अनुपपन्नम्। तस्मात् यथाव्याख्यातार्थ व अयं श्लोकः।।

तत्र अधुना सम्यग्दर्शनस्य यज्ञत्वं संपाद्य तत्स्तुत्यर्थम् अन्येऽपि यज्ञा उपक्षिप्यन्ते --

।।४.२५)

दैवमेव देवा इज्यन्ते येन यज्ञेन असौ दैवो यज्ञः तमेव अपरे यज्ञं योगिनः कर्मिणः पर्युपासते कुर्वन्तीत्यर्थः। ब्रह्माग्नौ 'सत्यं ज्ञानमनन्तं ब्रह्म' (तैत्ति० उ० २.१) 'विज्ञानमानन्दं ब्रह्म' (बृह० उ० ३.९.२२) 'यत् साक्षादपरोक्षात् ब्रह्म य आत्मा सर्वान्तरः' (बृह० उ० ३.४.१) इत्यादिवचनोक्तम् अशनायादिसर्वसंसारधर्मवर्जितम् 'नेति नेति' इति निरस्ताशेषविशेषं ब्रह्मशब्देन उच्यते। ब्रह्म च तत् अग्निश्च सः होमाधिकरणत्वविवक्षया ब्रह्माग्निः। तस्मिन् ब्रह्माग्नौ अपरे अन्ये ब्रह्मविदः यज्ञम् -- यज्ञशब्दवाच्य आत्मा, आत्मनामसु यज्ञशब्दस्य पाठात् -- तम् आत्मानं यज्ञं परमार्थतः परमेव ब्रह्म सन्तं बुद्ध्याद्युपाधिसंयुक्तम् अध्यस्तसर्वोपाधिधर्मकम् आहुतिरूपं यज्ञेनैव आत्मनैव उक्तलक्षणेन उपजुह्वति प्रक्षिपन्ति, सोपाधिकस्य आत्मनः निरुपाधिकेन परब्रह्मस्वरूपेणैव यद्दर्शनं स तस्मिन् होमः तं कुर्वन्ति ब्रह्मात्मैकत्वदर्शननिष्ठाः संन्यासिनः इत्यर्थः।।

सोऽयं सम्यग्दर्शनलक्षणः यज्ञः दैवयज्ञादिषु यज्ञेषु उपक्षिप्यते 'ब्रह्मार्पणम्' इत्यादिश्लोकैः प्रस्तुतः 'श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परंतप' (गीता ४.३३) इत्यादिना स्तुत्यर्थम् --

।।४.२६।। --

श्रोत्रादीनि इन्द्रियाणि अन्ये योगिनः संयमाग्निषु। प्रतीन्द्रियं संयमो भिद्यते इति बहुवचनम्। संयमा व अग्नयः तेषु जुह्वति इन्द्रियसंयममेव कुर्वन्ति इत्यर्थः। शब्दादीन् विषयान् अन्ये इन्द्रियाग्निषु इन्द्रियाण्येव अगन्यः तेषु इन्द्रियाग्निषु जुह्वति श्रोत्रादिभिरविरुद्धविषयग्रहणं होमं मन्यन्ते।।

किञ्च --

।।४.२७।। --

सर्वाणि इन्द्रियकर्माणि इन्द्रियाणां कर्माणि इन्द्रियकर्माणि, तथा प्राणकर्माणि प्राणो वायुः आध्यात्मिकः तत्कर्माणि आकुञ्चनप्रसारणादीनि तानि च अपरे आत्मसंयमयोगाग्नौ आत्मनि संयमः आत्मसंयमः स व योगाग्निः तस्मिन् आत्मसंयमयोगाग्नौ जुह्वति प्रक्षिपन्ति ज्ञानदीपिते स्नेहेनेव प्रदीपे विवेकविज्ञानेन उज्ज्वलभावम् आपादिते जुह्वति प्रविलापयन्ति इत्यर्थः।।

।।४.२८।। --

द्रव्ययज्ञाः तीर्थेषु द्रव्यविनियोगं यज्ञबुद्ध्या कुर्वन्ति ये ते द्रव्ययज्ञाः। तपोयज्ञाः तपः यज्ञः येषां तपस्विनां ते तपोयज्ञाः। योगयज्ञाः प्राणायामप्रत्याहारादिलक्षणो योगो यज्ञो येषां ते योगयज्ञाः। तथा अपरे स्वाध्यायज्ञानयज्ञाश्च स्वाध्यायः यथाविधि

गाद्यभ्यासः यज्ञः येषां ते स्वाध्याययज्ञाः। ज्ञानयज्ञाः ज्ञानं शास्त्रार्थपरिज्ञानं यज्ञः येषां ते ज्ञानयज्ञाश्च यतयः यतनशीलाः संशितव्रताः सम्यक् शितानि तनूकृतानि तीक्ष्णीकृतानि व्रतानि येषां ते संशितव्रताः।।

किञ्च --

।।४.२९।। --

अपाने अपानवृत्तौ जुह्वति प्रक्षिपन्ति प्राणं प्राणवृत्तिम्, पूरकाख्यं प्राणायामं कुर्वन्तीत्यर्थः। प्राणे अपानं तथा अपरे जुह्वति, रेचकाख्यं च प्राणायामं कुर्वन्तीत्येतत्। प्राणापानगती

मुखनासिकाभ्यां वायोः निर्गमनं प्राणस्य गतिः, तद्विपर्ययेण अधोगमनम् अपानस्य गतिः, ते प्राणापानगती ते रुद्ध्वा निरुध्य प्राणायामपरायणाः प्राणायामतत्पराः; कुम्भकाख्यं प्राणायामं कुर्वन्तीत्यर्थः।।

किञ्च --

।।४.३०।। --

अपरे नियताहाराः नियतः परिमितः आहारः येषां ते नियताहाराः सन्तः प्राणान् वायुभेदान् प्राणेषु व जुह्वति यस्य यस्य वायोः जयः क्रियते इतरान् वायुभेदान् तस्मिन् तस्मिन् जुह्वति, ते तत्र प्रविष्टा इव भवन्ति। सर्वेऽपि ते यज्ञविदः यज्ञक्षपितकल्मषाः यज्ञैः यथोक्तैः क्षपितः नाशितः कल्मषो येषां ते यज्ञक्षपितकल्मषाः।।

एवं यथोक्तान् यज्ञान् निर्वर्त्य --

।।४.३१।। --

यज्ञशिष्टामृतभुजः यज्ञानां शिष्टं यज्ञशिष्टं यज्ञशिष्टं च तत् अमृतं च यज्ञशिष्टामृतं तत् भुञ्जते इति यज्ञशिष्टामृतभुजः। यथोक्तान् यज्ञान् कृत्वा तच्छिष्टेन कालेन यथाविधिचोदितम् अन्नम् अमृताख्यं भुञ्जते इति यज्ञशिष्टामृतभुजः यान्ति गच्छन्ति ब्रह्म सनातनं चिरन्तनं मुमुक्षवश्चेत्; कालातिक्रमापेक्षया इति सामर्थ्यात् गम्यते। न अयं लोकः सर्वप्राणिसाधारणोऽपि अस्ति यथोक्तानां यज्ञानां कोऽपि यज्ञः यस्य नास्ति सः अयज्ञः तस्य। कुतः अन्यो विशिष्टसाधनसाध्यः कुरुसत्तम।।

।।४.३२।। --

वं यथोक्ता बहुविधा बहुप्रकारा यज्ञाः विततााः विस्तीर्णाः ब्रह्मणो वेदस्य मुखे द्वारे वेदद्वारेण अवगम्यमानाः ब्रह्मणो मुखे वितता उच्यन्ते; तद्यथा 'वाचि हि प्राणं जुहुमः' इत्यादयः। कर्मजान् कायिकवाचिकमानसकर्मोद्भवान् विद्धि तान् सर्वान् अनात्मजान्, निर्व्यापारो हि आत्मा। अत वं ज्ञात्वा विमोक्ष्यसे अशुभात्। न मद्व्यापारा इमे, निर्व्यापारोऽहम् उदासीन इत्येवं ज्ञात्वा अस्मात् सम्यग्दर्शनात् मोक्ष्यसे संसारबन्धनात् इत्यर्थः।।

'ब्रह्मार्पणम्' इत्यादिश्लोकेन सम्यग्दर्शनस्य यज्ञत्वं संपादितम्। यज्ञाश्च अनेके उपदिष्टाः। तैः सिद्धपुरुषार्थप्रयोजनैः ज्ञानं स्तूयते। कथम्? --

।।४.३३।। --

श्रेयान् द्रव्यमयात् द्रव्यसाधनसाध्यात् यज्ञात् ज्ञानयज्ञः हे परंतप। द्रव्यमयो हि यज्ञः फलस्यारम्भकः, ज्ञानयज्ञः न फलारम्भकः, अतः श्रेयान् प्रशस्यतरः। कथम्? यतः सर्वं कर्म समस्तम् अखिलम् अप्रतिबद्धं पार्थ ज्ञाने मोक्षसाधने सर्वतःसंप्लुतोदकस्थानीये परिसमाप्यते अन्तर्भवतीत्यर्थः 'यथा कृताय विजितायाधरेयाः संयन्त्येवमेनं सर्वं तदभिसमेति यत् किञ्चित्प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद' (छा० उ० ४.१.४) इति श्रुतेः।।

तदेतत् विशिष्टं ज्ञानं तर्हि केन प्राप्यते इत्युच्यते --

।।४.३४।। --

तत् विद्धि विजानीहि येन विधिना प्राप्यते इति। आचार्यान् अभिगम्य, प्रणिपातेन प्रकर्षेण नीचैः

पतनं प्रणिपातः दीर्घनमस्कारः तेन, 'कथं बन्धः? कथं मोक्षः? का विद्या? का चाविद्या? इति परिप्रश्नेन, सेवया गुरुशुश्रूषया वमादिना। प्रश्रयेण आवर्जिता आचार्या उपदेक्ष्यन्ति कथयिष्यन्ति ते ज्ञानं यथोक्तविशेषणं ज्ञानिनः। ज्ञानवन्तोऽपि केचित् यथावत् तत्त्वदर्शनशीलाः, अपरे न; अतो विशिनष्टि तत्त्वदर्शिनः इति। ये सम्यग्दर्शिनः तैः उपदिष्टं ज्ञानं कार्यक्षमं भवति नेतरत् इति भगवतो मतम्।।

तथा च सति इदमपि समर्थं वचनम् --

।।४.३५।। --

यत् ज्ञात्वा यत् ज्ञानं तैः उपदिष्टं अधिगम्य प्राप्य पुनः भूयः मोहम् वं यथा इदानीं मोहं गतोऽसि पुनः वं न यास्यसि हे पाण्डव। किञ्च -- -येन ज्ञानेन भूतानि अशेषेण ब्रह्मादीनि स्तम्बपर्यन्तानि द्रक्ष्यसि साक्षात् आत्मनि प्रत्यगात्मनि '

मत्संस्थानि इमानि भूतानि' इति अथो अपि मयि वासुदेवे 'परमेश्वरे च इमानि' इति; क्षेत्रज्ञेश्वरैकत्वं सर्वोपनिषत्प्रसिद्धं द्रक्ष्यसि इत्यर्थः।।

किञ्च तस्य ज्ञानस्य माहात्म्यम् --

।।४.३६।। --

अपि चेत् असि पापेभ्यः पापकृद्भ्यः सर्वेभ्यः अतिशयेन पापकृत् पापकृत्तमः सर्वं ज्ञानप्लवेनैव ज्ञानमेव प्लवं कृत्वा वृजिनं वृजिनार्णवं पापसमुद्रं संतरिष्यसि। धर्मोऽपि इह मुमुक्षोः पापम् उच्यते।।

ज्ञानं कथं नाशयति पापमिति दृष्टान्त उच्यते --

।।४.३७।। --

यथा धांसि काष्ठानि समिद्धः सम्यक् इद्धः दीप्तः अग्निः भस्मसात् भस्मीभावं कुरुते हे अर्जुन, ज्ञानमेव अग्निः ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा निर्बीजीकरोतीत्यर्थः। न हि साक्षादेव ज्ञानाग्निः कर्माणि इन्धनवत् भस्मीकर्तुं शक्नोति। तस्मात् सम्यग्दर्शनं सर्वकर्मणां निर्बीजत्वे कारणम् इत्यभिप्रायः। सामर्थ्यात् येन कर्मणा शरीरम् आरब्धं तत् प्रवृत्तफलत्वात् उपभोगेनैव क्षीयते। अतो यानि अप्रवृत्तफलानि ज्ञानोत्पत्तेः प्राक् कृतानि ज्ञानसहभावीनि च अतीतानेकजन्मकृतानि च तान्येव सर्वाणि भस्मसात् कुरुते।।

यतः वम् अतः --

।।४.३८।। --

न हि ज्ञानेन सदृशं तुल्यं पवित्रं पावनं शुद्धिकरम् इह विद्यते। तत् ज्ञानं स्वयमेव योगसंसिद्धः योगेन कर्मयोगेन समाधियोगेन च संसिद्धः संस्कृतः योग्यताम् आपन्नः सन् मुमुक्षुः कालेन महता आत्मनि विन्दति लभते इत्यर्थः।।

येन कान्तेन ज्ञानप्राप्तिः भवति स उपायः उपदिश्यते --

।।४.३९।। --

श्रद्धावान् श्रद्धालुः लभते ज्ञानम्। श्रद्धालुत्वेऽपि भवति कश्चित् मन्दप्रस्थानः, अत आह -- तत्परः, गुरूपासदनादौ अभियुक्तः ज्ञानलब्ध्युपाये श्रद्धावान्। तत्परः अपि अजितेन्द्रियः स्यात् इत्यतः आह -- संयतेन्द्रियः, संयतानि विषयेभ्यो निवर्तितानि यस्य इन्द्रियाणि स संयतेन्द्रियः।

य वंभूतः श्रद्धावान् तत्परः संयतेन्द्रियश्च सः अवश्यं ज्ञानं लभते। प्रणिपातादिस्तु बाह्योऽनैकान्तिकोऽपि भवति, मायावित्वादिसंभवात्; न तु तत् श्रद्धावत्त्वादौ इत्येकान्ततः ज्ञानलब्ध्युपायः। किं पुनः ज्ञानलाभात् स्यात् इत्युच्यते -- ज्ञानं लब्ध्वा परं मोक्षाख्यां शान्तिम् उपरतिम् अचिरेण क्षिप्रमेव अधिगच्छति। सम्यग्दर्शनात् क्षिप्रमेव मोक्षो भवतीति सर्वशास्त्रन्यायप्रसिद्धः सुनिश्चितः अर्थः।।

अत्र संशयः न कर्तव्यः, पापिष्ठो हि संशयः; कथम् इति उच्यते --

।।४.४०।। --

अज्ञश्च अनात्मज्ञश्च अश्रद्दधानश्च गुरुवाक्यशास्त्रेषु अविश्वासवांश्च संशयात्मा च संशयचित्तश्च विनश्यति। अज्ञाश्रद्दधानौ यद्यपि विनश्यतः, न तथा यथा संशयात्मा। संशयात्मा तु पापिष्ठः सर्वेषाम्। कथम्? नायं साधारणोऽपि लोकोऽस्ति। तथा न परः लोकः। न सुखम्, तत्रापि संशयोत्पत्तेः संशयात्मनः संशयचित्तस्य। तस्मात् संशयो न कर्तव्यः।।

कस्मात्? -- -

।।४.४१।। -- -

योगसंन्यस्तकर्माणं परमार्थदर्शनलक्षणेन योगेन संन्यस्तानि कर्माणि येन परमार्थदर्शिना धर्माधर्माख्यानि तं योगसंन्यस्तकर्माणम्। कथं योगसंन्यस्तकर्मेत्याह -- ज्ञानसंछिन्नसंशयं ज्ञानेन आत्मेश्वरैकत्वदर्शनलक्षणेन संछिन्नः संशयो यस्य सः ज्ञानसंछिन्नसंशयः। य वं योगसंन्यस्तकर्मा तम् आत्मवन्तम् अप्रमत्तं गुणचेष्टारूपेण दृष्टानि कर्माणि न निबध्नन्ति अनिष्टादिरूपं फलं नारभन्ते हे धनञ्जय।।

यस्मात् कर्मयोगानुष्ठानात् अशुद्धिक्षयहेतुकज्ञानसंछिन्नसंशयः न निबध्यते कर्मभिः ज्ञानाग्निदग्धकर्मत्वादेव, यस्माच्च ज्ञानकर्मानुष्ठानविषये संशयवान् विनश्यति --

।।४.४२) तस्मात् पापिष्ठम् अज्ञानसंभूतम् अज्ञानात् अविवेकात् जातं हृत्स्थं हृदि बुद्धौ स्थितं ज्ञानासिना शोकमोहादिदोषहरं सम्यग्दर्शनं ज्ञानं तदेव असिः खड्गः तेन ज्ञानासिना आत्मनः स्वस्य, आत्मविषयत्वात् संशयस्य। न हि परस्य संशयः परेण च्छेत्तव्यतां प्राप्तः, येन स्वस्येति विशेष्येत। अतः आत्मविषयोऽपि स्वस्यैव भवति। छित्त्वा नं संशयं स्वविनाशहेतुभूतम्, योगं सम्यग्दर्शनोपायं कर्मानुष्ठानम् आतिष्ठ कुर्वित्यर्थः। उत्तिष्ठ च इदानीं युद्धाय भारत इति।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रोगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
चतुर्थोऽध्यायः।।

BHAGAVADGITA
Sanskrit Commentary - Sri Sankaracharya
Chapter 5
DV

।।५.१।। --

संन्यासं परित्यागं कर्मणां शास्त्रीयाणाम् अनुष्ठेयविशेषाणां शंससि प्रशंससि कथयसि इत्येतत्। पुनः योगं च तेषामेव अनुष्ठानम् अवश्यकर्तव्यंत्वं शंससि। अतः मे कतरत् श्रेयः इति संशयः -- किं कर्मानुष्ठानं श्रेयः, किं वा तद्ध्यानम् इति। प्रशस्यतरं च अनुष्ठेयम्। अतश्च यत् श्रेयः प्रशस्यतरम् तयोः कर्मसंन्यासकर्मयोगयोः यदनुष्ठानात् श्रेयोऽवाप्तिः मम स्यादिति मन्यसे, तत् कम् अन्यतरत् सह कपुरुषानुष्ठेयत्वासंभवात् मे ब्रूहि सुनिश्चितम् अभिप्रेतं तवेति।।

स्वाभिप्रायम् आचक्षाणो निर्णयाय श्रीभगवानुवाच --

।।५.२।। --

संन्यासः कर्मणां परित्यागः कर्मयोगश्च तेषामनुष्ठानं तौ उभौ अपि निःश्रेयसकरौ मोक्षं कुर्वाते ज्ञानोत्पत्तिहेतुत्वेन। उभौ यद्यपि निःश्रेयसकरौ, तथापि तयोस्तु निःश्रेयसहेत्वोः कर्मसंन्यासात् केवलात् कर्मयोगो विशिष्यते इति कर्मयोगं स्तौति।।

कस्मात् इति आह --

।।५.३।। --

ज्ञेयः ज्ञातव्यः स कर्मयोगी नित्यसंन्यासी इति यो न द्वेष्टि किञ्चित् न काङ्क्षति दुःखसुखे तत्साधने च। वंविधो यः, कर्मणि वर्तमानोऽपि स नित्यसंन्यासी इति ज्ञातव्यः इत्यर्थः। निर्द्वन्द्वः

द्वन्द्ववर्जितः हि यस्मात् महाबाहो सुखं बन्धात् अनायासेन प्रमुच्यते।।

संन्यासकर्मयोगयोः भिन्नपुरुषानुष्ठेययोः विरुद्धयोः फलेऽपि विरोधो युक्तः, न तु उभयोः निःश्रेयसकरत्वमेव इति प्राप्ते इदम् उच्यते --

।।५.४।। --

सांख्ययोगौ पृथक् विरुद्धभिन्नफलौ बालाः प्रवदन्ति न पण्डिताः। पण्डितास्तु ज्ञानिन कं फलम् अविरुद्धम् इच्छन्ति। कथम्? कमपि सांख्ययोगयोः सम्यक् आस्थितः सम्यगनुष्ठितवान् इत्यर्थः, उभयोः विन्दते फलम्। उभयोः तदेव हि निःश्रेयसं फलम्; अतः न फले विरोधः अस्ति।।

ननु संन्यासकर्मयोगशब्देन प्रस्तुत्य सांख्ययोगयोः फलैकत्वं कथम् इह अप्रकृतं ब्रवीति? नैष दोषः -- यद्यपि अर्जुनेन

संन्यासं कर्मयोगं च केवलम् अभिप्रेत्य प्रश्नः कृतः, भगवांस्तु तदपरित्यागेनैव स्वाभिप्रेतं च विशेषं संयोज्य शब्दान्तरवाच्यतया प्रतिवचनं ददौ 'सांख्ययोगौ' इति। तौ व संन्यासकर्मयोगौ ज्ञानतदुपायसमबुद्धित्वादिसंयुक्तौ सांख्ययोगशब्दवाच्यौ इति भगवतो मतम्। अतः न अप्रकृतप्रक्रियेति।।

एकस्यापि सम्यगनुष्ठानात् कथम् उभयोः फलं विन्दते इति उच्यते --

।।५.५।। --

यत् सांख्यैः ज्ञाननिष्ठैः संन्यासिभिः प्राप्यते स्थानं मोक्षाख्यम्, तत् योगैरपि ज्ञानप्राप्त्युपायत्वेन ईश्वरे समर्प्य कर्माणि आत्मनः फलम् अनभिसंधाय अनुतिष्ठन्ति ये ते योगाः योगिनः तैरपि

परमार्थज्ञानसंन्यासप्राप्तिद्वारेण गम्यते इत्यभिप्रायः। अतः कं साख्यं च योगं च यः पश्यति फलैकत्वात् स सम्यक् पश्यतीत्यर्थः।।

एवं तर्हि योगात् संन्यास व विशिष्यते; कथं तर्हि इदमुक्तम् 'तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते (गीता ५.२)' इति? श्रृणु तत्र कारणम् -- त्वया पृष्टं केवलं कर्मसंन्यासं कर्मयोगं च अभिप्रेत्य तयोः अन्यतरः कः श्रेयान् इति। तदनुरूपं प्रतिवचनं मया उक्तं कर्मसंन्यासात् कर्मयोगः विशिष्यते इति ज्ञानम् अनपेक्ष्य। ज्ञानापेक्षस्तु संन्यासः सांख्यमिति मया अभिप्रेतः। परमार्थयोगश्च स व। यस्तु कर्मयोगः वैदिकः स च तादर्थ्यात् योगः संन्यास इति च उपचर्यते। कथं तादर्थ्यम् इति उच्यते --

।।५.६।। --

संन्यासस्तु पारमार्थिकः हे महाबाहो दुःखम् आप्तुं प्राप्तुम् अयोगतः योगेन विना। योगयुक्तः वैदिकेन कर्मयोगेन ईश्वरसमर्पितरूपेण फलनिरपेक्षेण युक्तः, मुनिः मननात् ईश्वरस्वरूपस्य मुनिः, ब्रह्म -- परमात्मज्ञाननिष्ठालक्षणत्वात् प्रकृतः संन्यासः ब्रह्म उच्यते, 'न्यास इति ब्रह्मा ब्रह्मा हि परः (ना० उ० २.७८)' इति श्रुतेः -- ब्रह्म परमार्थसंन्यासं परमार्थज्ञाननिष्ठालक्षणं न चिरेण क्षिप्रमेव अधिगच्छति प्राप्नोति। अतः मया उक्तम् 'कर्मयोगो विशिष्यते' इति।।

यदा पुनः अयं सम्यग्ज्ञानप्राप्त्युपायत्वेन --

।।५.७।। --

योगेन युक्तः योगयुक्तः, विशुद्धात्मा विशुद्धसत्त्वः, विजितात्मा विजितदेहः, जितेन्द्रियश्च,

सर्वभूतात्मभूतात्मा सर्वेषां ब्रह्मादीनां स्तम्बपर्यन्तानां भूतानाम् आत्मभूतः आत्मा प्रत्यक्चेतनो यस्य सः सर्वभूतात्मभूतात्मा सम्यग्दर्शीत्यर्थः, स तत्रैवं वर्तमानः लोकसंग्रहाय कर्म कुर्वन्नपि न लिप्यते न कर्मभिः बध्यते इत्यर्थः।।

न च असौ परमार्थतः करोतीत्यतः --

।।५.८ -- ५.९।। --

नैव किञ्चित् करोमीति युक्तः समाहितः सन् मन्येत चिन्तयेत्, तत्त्ववित् आत्मनो याथात्म्यं तत्त्वं वेत्तीति तत्त्ववित् परमार्थदर्शीत्यर्थः।।

कदा कथं वा तत्त्वमवधारयन् मन्येत इति, उच्यते -- पश्यन्निति। मन्येत इति पूर्वेण संबन्धः। यस्य वं तत्त्वविदः सर्वकार्यकरणचेष्टासु कर्मसु अकर्मैव, पश्यतः सम्यग्दर्शिनः तस्य सर्वकर्मसंन्यासे व अधिकारः, कर्मणः अभावदर्शनात्। न हि मृगतृष्णिकायाम् उदकबुद्ध्या पानाय प्रवृत्तः उदकाभावज्ञानेऽपि तत्रैव पानप्रयोजनाय प्रवर्तते।।

यस्तु पुनः अतत्त्ववित् प्रवृत्तश्च कर्मयोगे --

।।५.८ -- ५.९।। --

नैव किञ्चित् करोमीति युक्तः समाहितः सन् मन्येत चिन्तयेत्, तत्त्ववित् आत्मनो याथात्म्यं तत्त्वं वेत्तीति तत्त्ववित् परमार्थदर्शीत्यर्थः।।

कदा कथं वा तत्त्वमवधारयन् मन्येत इति, उच्यते -- पश्यन्निति। मन्येत इति पूर्वेण संबन्धः। यस्य वं तत्त्वविदः सर्वकार्यकरणचेष्टासु कर्मसु अकर्मैव, पश्यतः सम्यग्दर्शिनः तस्य सर्वकर्मसंन्यासे व अधिकारः, कर्मणः अभावदर्शनात्। न हि मृगतृष्णिकायाम् उदकबुद्ध्या

पानाय प्रवृत्तः उदकाभावज्ञानेऽपि तत्रैव पानप्रयोजनाय प्रवर्तते।।

यस्तु पुनः अतत्त्ववित् प्रवृत्तश्च कर्मयोगे --

।।५.१०।। --

ब्रह्मणि ईश्वरे आधाय निक्षिप्य' तदर्थं कर्म करोमि' इति भृत्य इव स्वाम्यर्थं सर्वाणि कर्माणि मोक्षेऽपि फले सङ्गं त्यक्त्वा करोति यः सर्वकर्माणि, लिप्यते न स पापेन न संबध्यते पद्मपत्रमिव अम्भसा उदकेन। केवलं सत्त्वशुद्धिमात्रमेव फलं तस्य कर्मणः स्यात्।।

यस्मात् --

।।५.११।। --

कायेन देहेन मनसा बुद्ध्या च केवलैः ममत्ववर्जितैः' ईश्वरायैव कर्म करोमि, न मम फलाय' इति ममत्वबुद्धिशून्यैः

इन्द्रियैरपि -- केवलशब्दः कायादिभिरपि प्रत्येकं संबध्यते -- सर्वव्यापारेषु ममतावर्जनाय। योगिनः कर्मिणः कर्म कुर्वन्ति सङ्गं त्यक्त्वा फलविषयम् आत्मशुद्धये सत्त्वशुद्धये इत्यर्थः। तस्मात् तत्रैव तव अधिकारः इति कुरु कर्मैव।।

यस्माच्च --

।।५.१२।। --

युक्तः' ईश्वराय कर्माणि करोमि न मम फलाय' इत्येवं समाहितः सन् कर्मफलं त्यक्त्वा

परित्यज्य शान्तिं मोक्षाख्याम् आप्नोति नैष्ठिकीं निष्ठायां भवां सत्त्वशुद्धिज्ञानप्राप्तिसर्वकर्मसंन्यासज्ञाननिष्ठाक्रमेणेति वाक्यशेषः। यस्तु पुनः अयुक्तः असमाहितः कामकारेण करणं कारः कामस्य कारः कामकारः तेन कामकारेण, कामप्रेरिततयेत्यर्थः, 'मम फलाय इदं करोमि कर्म' इत्येवं फले सक्तः निबध्यते। अतः त्वं युक्तो भव इत्यर्थः।।

यस्तु परमार्थदर्शी सः --

।।५.१३।। --

सर्वाणि कर्माणि सर्वकर्माणि संन्यस्य परित्यज्य नित्यं नैमित्तिकं काम्यं प्रतिषिद्धं च तानि सर्वाणि कर्माणि मनसा विवेकबुद्ध्या, कर्मादौ अकर्मसंदर्शनेन संत्यज्येत्यर्थः, आस्ते तिष्ठति सुखम्। त्यक्तवाङ्मनःकायचेष्टः निरायासः प्रसन्नचित्तः आत्मनः अन्यत्र निवृत्तसर्वबाह्यप्रयोजनः इति 'सुखम् आस्ते' इत्युच्यते। वशी जितेन्द्रिय इत्यर्थः। क्व कथम् आस्ते इति, आह -- नवद्वारे पुरे। सप्त शीर्षण्यानि आत्मन उपलब्धिद्वाराणि, अवाग् द्वे मूत्रपुरीषविसर्गार्थे, तैः द्वारैः नवद्वारं पुरम् उच्यते शरीरम्, पुरमिव पुरम्, आत्मैकस्वामिकम्, तदर्थप्रयोजनैश्च इन्द्रियमनोबुद्धिविषयैः अनेकफलविज्ञानस्य उत्पादकैः पौरैरिव अधिष्ठितम्। तस्मिन् नवद्वारे पुरे देही सर्वं कर्म संन्यस्य आस्ते; किं विशेषणेन? सर्वो हि देही संन्यासी असंन्यासी वा देहे व आस्ते; तत्र अनर्थकं विशेषणमिति। उच्यते -- यस्तु अज्ञः देही देहेन्द्रियसंघातमात्रात्मदर्शी स सर्वोऽपि 'गेहे भूमौ आसने वा आसे' इति मन्यते। न हि देहमात्रात्मदर्शिनः गेहे इव देहे आसे इति प्रत्ययः संभवति। देहादिसंघातव्यतिरिक्तात्मदर्शिनस्तु 'देहे आसे' इति प्रत्ययः उपपद्यते। परकर्मणां च परस्मिन् आत्मनि अविद्यया अध्यारोपितानां विद्यया विवेकज्ञानेन मनसा संन्यास उपपद्यते। उत्पन्नविवेकज्ञानस्य सर्वकर्मसंन्यासिनोऽपि गेहे इव देहे व नवद्वारे पुरे आसनम् प्रारब्धफलकर्मसंस्कारशेषानुवृत्त्या देह व विशेषविज्ञानोत्पत्तेः। देहे व आस्ते इति अस्त्येव विशेषणफलम्, विद्वदविद्वत्प्रत्ययभेदापेक्षत्वात्।।

यद्यपि कार्यकरणकर्माणि अविद्यया आत्मनि अध्यारोपितानि' संन्यस्यास्ते' इत्युक्तम्, तथापि आत्मसमवायि तु कर्तृत्वं कारयितृत्वं च स्यात् इति आशङ्क्य आह -- नैव कुर्वन् स्वयम्, न च कार्यकरणानि कारयन् क्रियासु प्रवर्तयन्। किं यत् तत् कर्तृत्वं कारयितृत्वं च देहिनः स्वात्मसमवायि सत् संन्यासात् न संभवति, यथा गच्छतो गतिः गमनव्यापारपरित्यागे न स्यात् तद्वत्? किं वा स्वत व आत्मनः न अस्ति इति? अत्र उच्यते -- न अस्ति आत्मनः स्वतः कर्तृत्वं कारयितृत्वं च। उक्तं हि 'अविकार्योऽयमुच्यते (गीता २.२५)' 'शरीरस्थोऽपि न करोति न लिप्यते (गीता १३.३१)' इति।' ध्यायतीव लेलायतीव (बृ० उ० ४.३४)' इति श्रुतेः।।

किञ्च --

।।५.१४।। --

न कर्तृत्वं स्वतः कुरु इति नापि कर्माणि रथघटप्रासादादीनि ईप्सिततमानि लोकस्य सृजति उत्पादयति प्रभुः आत्मा। नापि रथादि कृतवतः तत्फलेन संयोगं न कर्मफलसंयोगम्। यदि किञ्चिदपि स्वतः न करोति न कारयति च देही, कः तर्हि कुर्वन् कारयंश्च प्रवर्तते इति, उच्यते -- स्वभावस्तु स्वो भावः स्वभावः अविद्यालक्षणा प्रकृतिः माया प्रवर्तते 'दैवी हि' इत्यादिना वक्ष्यमाणा।।

परमार्थतस्तु --

।।५.१५।। --

न आदत्ते न च गृह्णाति भक्तस्यापि कस्यचित् पापम्। न चैव आदत्ते सुकृतं भक्तैः प्रयुक्तं

विभुः। किमर्थं तर्हि भक्तैः पूजादिलक्षणं यागदानहोमादिकं च सुकृतं प्रयुज्यते इत्याह -- अज्ञानेन आवृतं ज्ञानं विवेकविज्ञानम्, तेन मुह्यन्ति 'करोमि कारयामि भोक्ष्ये भोजयामि' इत्येवं मोहं गच्छन्ति अविवेकिनः संसारिणो जन्तवः।।

।।५.१६।। --

ज्ञानेन तु येन अज्ञानेन आवृताः मुह्यन्ति जन्तवः तत् अज्ञानं येषां जन्तूनां विवेकज्ञानेन आत्मविषयेण नाशितम् आत्मनः भवति, तेषां जन्तूनाम् आदित्यवत् यथा आदित्यः समस्तं रूपजातम् अवभासयति तद्वत् ज्ञानं ज्ञेयं वस्तु सर्वं प्रकाशयति तत् परं परमार्थतत्त्वम्।।

यत् परं ज्ञानं प्रकाशितम् --

।।५.१७।। --

तस्मिन् ब्रह्मणि गता बुद्धिः येषां ते तद्बुद्धयः, तदात्मानः तदेव परं ब्रह्म आत्मा येषां ते तदात्मानः, तन्निष्ठाः निष्ठा अभिनिवेशः तात्पर्यं सर्वाणि कर्माणि संन्यस्य तस्मिन् ब्रह्मण्येव अवस्थानं येषां ते तन्निष्ठाः, तत्परायणाश्च तदेव परम् अयनं परा गतिः येषां भवति ते तत्परायणाः केवलात्मरतय इत्यर्थः। येषां ज्ञानेन नाशितम् आत्मनः अज्ञानं ते गच्छन्ति वंविधाः अपुनरावृत्तिम् अपुनर्देहसंबन्धं ज्ञाननिर्धूतकल्मषाः यथोक्तेन ज्ञानेन निर्धूतः नाशितः कल्मषः पापादिसंसारकारणदोषः येषां ते ज्ञाननिर्धूतकल्मषाः यतयः इत्यर्थः।।

येषां ज्ञानेन नाशितम् आत्मनः अज्ञानं ते पण्डिताः कथं तत्त्वं पश्यन्ति इत्युच्यते --

।।५.१८।। --

विद्याविनयसंपन्ने विद्या च विनयश्च विद्याविनयौ, विद्या आत्मनो बोधो विनयः उपशमः, ताभ्यां विद्याविनयाभ्यां संपन्नः विद्याविनयसंपन्नः विद्वान् विनीतश्च यो ब्राह्मणः तस्मिन् ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पण्डिताः समदर्शिनः। विद्याविनयसंपन्ने उत्तमसंस्कारवति ब्राह्मणे सात्त्विके, मध्यमायां च राजस्यां गवि, संस्कारहीनायाम् अत्यन्तमेव केवलतामसे हस्त्यादौ च, सत्त्वादिगुणैः तज्जैश्च संस्कारैः तथा राजसैः तथा तामसैश्च संस्कारैः अत्यन्तमेव अस्पृष्टं समम् कम् अविक्रियं तत् ब्रह्म द्रष्टुं शीलं येषां ते पण्डिताः समदर्शिनः।।

ननु अभोज्यान्नाः ते दोषवन्तः, 'समासमाभ्यां विषमसमे पूजातः (गौ० स्म० १७.२०)' इति स्मृतेः। न ते दोषवन्तः। कथम्? --

।।५.१९।। --

इह व जीवद्भिरेव तैः समदर्शिभिः पण्डितैः जितः वशीकृतः सर्गः जन्म, येषां साम्ये सर्वभूतेषु ब्रह्मणि समभावे स्थितं निश्चलीभूतं मनः अन्तःकरणम्। निर्दोषं यद्यपि दोषवत्सु श्वपाकादिषु मूढैः तद्दोषैः दोषवत् इव विभाव्यते, तथापि तद्दोषैः अस्पृष्टम् इति निर्दोषं दोषवर्जितं हि यस्मात्; नापि स्वगुणभेदभिन्नम्, निर्गुणत्वात् चैतन्यस्य। वक्ष्यति च भगवान् इच्छादीनां क्षेत्रधर्मत्वम्, 'अनादित्वान्निर्गुणत्वात् (गीता १३.३१)' इति च। नापि अन्त्या विशेषाः आत्मनो भेदकाः सन्ति, प्रतिशरीरं तेषां सत्त्वे प्रमाणानुपपत्तेः। अतः समं ब्रह्म कं च। तस्मात् ब्रह्मणि व ते स्थिताः। तस्मात् न दोषगन्धमात्रमपि तान् स्पृशति, देहादिसंघातात्मदर्शनाभिमानाभावात् तेषाम्। देहादिसंघातात्मदर्शनाभिमानवद्विषयं तु तत् सूत्रम् 'समासमाभ्यां विषमसमे पूजातः (गौ० स्मृ० १७.२०)' इति, पूजाविषयत्वेन विशेषणात्। दृश्यते हि ब्रह्मवित् षडङ्गवित्

चतुर्वेदवित् इति पूजादानादौ गुणविशेषसंबन्धः कारणम्। ब्रह्म तु सर्वगुणदोषसंबन्धवर्जितमित्यतः 'ब्रह्मणि ते स्थिताः' इति युक्तम्। कर्मविषयं च 'समासमाभ्याम्' इत्यादि। इदं तु सर्वकर्मसंन्यासविषयं प्रस्तुतम्, 'सर्वकर्माणि मनसा (गीता ५.१३)' इत्यारभ्य आध्यायपरिसमाप्तेः।।

यस्मात् निर्दोषं समं ब्रह्म आत्मा, तस्मात् --

।।५.२०।। --

न प्रहृष्येत् प्रहर्षं न कुर्यात् प्रियम् इष्टं प्राप्य लब्ध्वा। न उद्विजेत् प्राप्य च अप्रियम् अनिष्टं लब्ध्वा। देहमात्रात्मदर्शिनां हि प्रियाप्रियप्राप्ती हर्षविषादौ कुर्वाते, न केवलात्मदर्शिनः, तस्य प्रियाप्रियप्राप्त्यसंभवात्। किञ्च -- 'सर्वभूतेषु कः समः निर्दोषः आत्मा' इति स्थिरा निर्विचिकित्सा बुद्धिः यस्य सः स्थिरबुद्धिः असंमूढः संमोहवर्जितश्च स्यात् यथोक्तब्रह्मवित् ब्रह्मणि स्थितः, अकर्मकृत् सर्वकर्मसंन्यासी इत्यर्थः

किञ्च, ब्रह्मणि स्थितः --

।।५.२१।। --

बाह्यस्पर्शेषु बाह्याश्च ते स्पर्शाश्च बाह्यस्पर्शाः स्पृश्यन्ते इति स्पर्शाः शब्दादयो विषयाः तेषु बाह्यस्पर्शेषु, असक्तः आत्मा अन्तःकरणं यस्य सः अयम् असक्तात्मा विषयेषु प्रीतिवर्जितः सन् विन्दति लभते आत्मनि यत् सुखं तत् विन्दति इत्येतत्। स ब्रह्मयोगयुक्तात्मा ब्रह्मणि योगः समाधिः ब्रह्मयोगः तेन ब्रह्मयोगेन युक्तः समाहितः तस्मिन् व्यापृतः आत्मा अन्तःकरणं यस्य सः ब्रह्मयोगयुक्तात्मा, सुखम् अक्षयम् अश्नुते व्याप्नोति। तस्मात् बाह्यविषयप्रीतेः क्षणिकायाः इन्द्रियाणि निवर्तयेत् आत्मनि अक्षयसुखार्थी इत्यर्थः।।

इतश्च निवर्तयेत् --

।।५.२२।। --

ये हि यस्मात् संस्पर्शजाः विषयेन्द्रियसंस्पर्शेभ्यो जाताः भोगा भुक्तयः दुःखयोनय व ते, अविद्याकृतत्वात्। दृश्यन्ते हि आध्यात्मिकादीनि दुःखानि तन्निमित्तान्येव। यथा इहलोके तथा परलोकेऽपि इति गम्यते वशब्दात्। न संसारे सुखस्य गन्धमात्रमपि अस्ति इति बुद्ध्वा विषयमृगतृष्णिकाया इन्द्रियाणि निवर्तयेत्। न केवलं दुःखयोनय व, आद्यन्तवन्तश्च, आदिः विषयेन्द्रियसंयोगो भोगानाम् अन्तश्च तद्वियोग व; अतः आद्यन्तवन्तः अनित्याः, मध्यक्षणभावित्वात् इत्यर्थः। कौन्तेय, न तेषु भोगेषु रमते बुधः विवेकी अवगतपरमार्थतत्त्वः; अत्यन्तमूढानामेव हि विषयेषु रतिः दृश्यते, यथा पशुप्रभृतीनाम्।।

अयं च श्रेयोमार्गप्रतिपक्षी कष्टतमो दोषः सर्वानर्थप्राप्तिहेतुः दुर्निवारश्च इति तत्परिहारे यत्नाधिक्यं कर्तव्यम् इत्याह भगवान् --

।।५.२३।। --

शक्नोति उत्सहते इहैव जीवन्नेव यः सोढुं प्रसहितुं प्राक् पूर्वं शरीरविमोक्षणात् आ मरणात् इत्यर्थः। मरणसीमाकरणं जीवतोऽवश्यंभावि हि कामक्रोधोद्भवो वेगः, अनन्तनिमित्तवान् हि सः इति यावत् मरणं तावत् न विश्रम्भणीय इत्यर्थः। कामः इन्द्रियगोचरप्राप्ते इष्टे विषये श्रूयमाणे स्मर्यमाणे वा अनुभूते सुखहेतौ या गर्धिः तृष्णा स कामः; क्रोधश्च आत्मनः प्रतिकूलेषु दुःखहेतुषु दृश्यमानेषु श्रूयमाणेषु स्मर्यमाणेषु वा यो द्वेषः सः क्रोधः; तौ कामक्रोधौ उद्भवो यस्य वेगस्य सः कामक्रोधोद्भवः वेगः। रोमाञ्चनप्रहृष्टनेत्रवदनादिलिङ्गः अन्तःकरणप्रक्षोभरूपः कामोद्भवो वेगः, गात्रप्रकम्पप्रस्वेदसंदष्टोष्ठपुटरक्तनेत्रादिलिङ्गः

क्रोधोद्भवो वेगः, तं कामक्रोधोद्भवं वेगं यः उत्सहते प्रसहते सोढुं प्रसहितुम्, सः युक्तः योगी सुखी च इह लोके नरः।।कथंभूतश्च ब्रह्मणि स्थितः ब्रह्म प्राप्नोति इति आह भगवान् --

।।५.२४।। --

यः अन्तःसुखः अन्तः आत्मनि सुखं यस्य सः अन्तःसुखः, तथा अन्तरेव आत्मनि आरामः आरमणं क्रीडा यस्य सः अन्तरारामः, तथा व अन्तः व आत्मन्येव ज्योतिः प्रकाशो यस्य सः अन्तर्ज्योतिरेव, यः ईदृशः सः योगी ब्रह्मनिर्वाणं ब्रह्मणि निर्वृतिं मोक्षम् इह जीवन्नेव ब्रह्मभूतः सन् अधिगच्छति प्राप्नोति।।

किञ्च --

।।५.२५।। --

लभन्ते ब्रह्मनिर्वाणं मोक्षम्

षयः सम्यग्दर्शिनः संन्यासिनः क्षीणकल्मषाः क्षीणपापाः निर्दोषाः छिन्नद्वैधाः छिन्नसंशयाः यतात्मानः संयतेन्द्रियाः सर्वभूतहिते रताः सर्वेषां भूतानां हिते आनुकूल्ये रताः अहिंसका इत्यर्थः।।

किञ्च --

।।५.२६।। --

कामक्रोधवियुक्तानां कामश्च क्रोधश्च कामक्रोधौ ताभ्यां वियुक्तानां यतीनां संन्यासिनां यतचेतसां संयतान्तःकरणानाम् अभितः उभयतः जीवतां मृतानां च ब्रह्मनिर्वाणं मोक्षो वर्तते विदितात्मनां विदितः ज्ञातः आत्मा येषां ते विदितात्मानः तेषां विदितात्मनां सम्यग्दर्शिनामित्यर्थः।।

सम्यग्दर्शननिष्ठानां संन्यासिनां सद्यः मुक्तिः उक्ता। कर्मयोगश्च ईश्वरार्पितसर्वभावेन ईश्वरे ब्रह्मणि आधाय क्रियमाणः सत्त्वशुद्धिज्ञानप्राप्तिसर्वकर्मसंन्यासक्रमेण मोक्षाय इति भगवान् पदे पदे अब्रवीत्, वक्ष्यति च। अथ इदानीं ध्यानयोगं सम्यग्दर्शनस्य अन्तरङ्गं विस्तरेण वक्ष्यामि इति तस्य सूत्रस्थानीयान् श्लोकान् उपदिशति स्म -- -

।।५.२७ -- ५.२८।। --

स्पर्शान् शब्दादीन् कृत्वा बहिः बाह्यान् -- श्रोत्रादिद्वारेण अन्तः बुद्धौ प्रवेशिताः शब्दादयः विषयाः तान् अचिन्तयतः शब्दादयो बाह्या बहिरेव कृताः भवन्ति -- तान् वं बहिः कृत्वा चक्षुश्चैव अन्तरे भ्रुवोः 'कृत्वा' इति अनुषज्यते। तथा प्राणापानौ नासाभ्यन्तरचारिणौ समौ कृत्वा, यतेन्द्रियमनोबुद्धिः यतानि संयतानि इन्द्रियाणि मनः बुद्धिश्च यस्य सः यतेन्द्रियमनोबुद्धिः, मननात् मुनिः संन्यासी, मोक्षपरायणः वं देहसंस्थानात् मोक्षपरायणः मोक्ष व परम् अयनं परा गतिः यस्य सः अयं मोक्षपरायणो मुनिः भवेत्। विगतेच्छाभयक्रोधः इच्छा च भयं च क्रोधश्च इच्छाभयक्रोधाः ते विगताः यस्मात् सः विगतेच्छाभयक्रोधः, यः वं वर्तते सदा संन्यासी, मुक्त व सः न तस्य मोक्षायान्यः कर्तव्योऽस्ति।।

एवं समाहितचित्तेन किं विज्ञेयम् इति, उच्यते --

भोक्तारं यज्ञतपसां यज्ञानां तपसां च कर्तृरूपेण देवतारूपेण च, सर्वलोकमहेश्वरं सर्वेषां

लोकानां महान्तम् ईश्वरं सुहृदं सर्वभूतानां सर्वप्राणिनां प्रत्युपकारनिरपेक्षतया उपकारिणं सर्वभूतानां हृदयेशयं सर्वकर्मफलाध्यक्षं सर्वप्रत्ययसाक्षिणं मां नारायणं ज्ञात्वा शान्तिं सर्वसंसारोपरतिम्

च्छति प्राप्नोति।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
पञ्चमोऽध्यायः।।

।।५.२७ -- ५.२८।। --

स्पर्शान् शब्दादीन् कृत्वा बहिः बाह्यान् -- श्रोत्रादिद्वारेण अन्तः बुद्धौ प्रवेशिताः शब्दादयः विषयाः तान् अचिन्तयतः शब्दादयो बाह्या बहिरेव कृताः भवन्ति -- तान् वं बहिः कृत्वा चक्षुश्चैव अन्तरे भ्रुवोः 'कृत्वा' इति अनुषज्यते। तथा प्राणापानौ नासाभ्यन्तरचारिणौ समौ कृत्वा, यतेन्द्रियमनोबुद्धिः यतानि संयतानि इन्द्रियाणि मनः बुद्धिश्च यस्य सः यतेन्द्रियमनोबुद्धिः, मननात् मुनिः संन्यासी, मोक्षपरायणः वं देहसंस्थानात् मोक्षपरायणः मोक्ष व परम् अयनं परा गतिः यस्य सः अयं मोक्षपरायणो मुनिः भवेत्। विगतेच्छाभयक्रोधः इच्छा च भयं च क्रोधश्च इच्छाभयक्रोधाः ते विगताः यस्मात् सः विगतेच्छाभयक्रोधः, यः वं वर्तते सदा संन्यासी, मुक्त व सः न तस्य मोक्षायान्यः कर्तव्योऽस्ति।।

एवं समाहितचित्तेन किं विज्ञेयम् इति, उच्यते --

भोक्तारं यज्ञतपसां यज्ञानां तपसां च कर्तृरूपेण देवतारूपेण च, सर्वलोकमहेश्वरं सर्वेषां लोकानां महान्तम् ईश्वरं सुहृदं सर्वभूतानां सर्वप्राणिनां प्रत्युपकारनिरपेक्षतया उपकारिणं सर्वभूतानां हृदयेशयं सर्वकर्मफलाध्यक्षं सर्वप्रत्ययसाक्षिणं मां नारायणं ज्ञात्वा शान्तिं

सर्वसंसारोपरतिम्

च्छति प्राप्नोति।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
पञ्चमोऽध्यायः।।

।।५.२९।। --
एवं समाहितचित्तेन किं विज्ञेयम् इति, उच्यते --
भोक्तारं यज्ञतपसां यज्ञानां तपसां च कर्तृरूपेण देवतारूपेण च, सर्वलोकमहेश्वरं सर्वेषां लोकानां महान्तम् ईश्वरं सुहृदं सर्वभूतानां सर्वप्राणिनां प्रत्युपकारनिरपेक्षतया उपकारिणं सर्वभूतानां हृदयेशयं सर्वकर्मफलाध्यक्षं सर्वप्रत्ययसाक्षिणं मां नारायणं ज्ञात्वा शान्तिं
सर्वसंसारोपरतिम्

च्छति प्राप्नोति।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
पञ्चमोऽध्यायः।।

BHAGAVADGITA
Sanskrit Commentary - Sri Sankaracharya
Chapter 6
DV

।।६.१।। --

अनाश्रितः न आश्रितः अनाश्रितः। किम्? कर्मफलं कर्मणां फलं कर्मफलं यत् तदनाश्रितः, कर्मफलतृष्णारहित इत्यर्थः। यो हि कर्मफले तृष्णावान् सः कर्मफलमाश्रितो भवति, अयं तु तद्विपरीतः, अतः अनाश्रितः कर्मफलम्। वंभूतः सन् कार्यं कर्तव्यं

नित्यं काम्यविपरीतम् अग्निहोत्रादिकं कर्म करोति निर्वर्तयति यः कश्चित् ईदृशः कर्मी स कर्म्यन्तरेभ्यो विशिष्यते इत्येवमर्थमाह -- स संन्यासी च योगी च इति। संन्यासः परित्यागः स यस्यास्ति स संन्यासी च, योगी च योगः चित्तसमाधानं स यस्यास्ति स योगी च इति वंगुणसंपन्नः अयं मन्तव्यः; न केवलं निरग्निः अक्रिय व संन्यासी योगी च इति मन्तव्यः। निर्गताः अग्नयः कर्माङ्गभूताः यस्मात् स निरग्निः, अक्रियश्च अनग्निसाधना अपि अविद्यमानाः क्रियाः तपोदानादिकाः यस्य असौ अक्रियः।।

ननु च निरग्नेः अक्रियस्यैव श्रुतिस्मृतियोगशास्त्रेषु संन्यासित्वं योगित्वं च प्रसिद्धम्। कथम् इह साग्नेः सक्रियस्य च संन्यासित्वं योगित्वं च अप्रसिद्धमुच्यते इति। नैष दोषः, कयाचित् गुणवृत्त्या उभयस्य संपिपादयिषितत्वात्। तत् कथम्? कर्मफलसंकल्पसंन्यासात् संन्यासित्वम्, योगाङ्गत्वेन च कर्मानुष्ठानात् कर्मफलसंकल्पस्य च चित्तविक्षेपहेतोः परित्यागात् योगित्वं च इति गौणमुभयम्; न पुनः मुख्यं संन्यासित्वं योगित्वं च अभिप्रेतमित्येतमर्थं दर्शयितुमाह --

।।६.२।। --

यं सर्वकर्मतत्फलपरित्यागलक्षणं परमार्थसंन्यासं संन्यासम् इति प्राहुः श्रुतिस्मृतिविदः, योगं कर्मानुष्ठानलक्षणं तं परमार्थसंन्यासं विद्धि जानीहि हे पाण्डव। कर्मयोगस्य प्रवृत्तिलक्षणस्य

तद्विपरीतेन निवृत्तिलक्षणेन परमार्थसंन्यासेन कीदृशं सामान्यमङ्गीकृत्य तद्भाव उच्यते इत्यपेक्षायाम् इदमुच्यते -- अस्ति हि परमार्थसंन्यासेन सादृश्यं कर्तृद्वारकं कर्मयोगस्य। यो हि परमार्थसंन्यासी स त्यक्तसर्वकर्मसाधनतया सर्वकर्मतत्फलविषयं संकल्पं प्रवृत्तिहेतुकामकारणं संन्यस्यति। अयमपि कर्मयोगी कर्म कुर्वाण व फलविषयं संकल्पं संन्यस्यति इत्येतमर्थं दर्शयिष्यन् आह -- न हि यस्मात् असंन्यस्तसंकल्पः असंन्यस्तः अपरित्यक्तः फलविषयः संकल्पः अभिसंधिः येन सः असंन्यस्तसंकल्पः कश्चन कश्चिदपि कर्मी योगी समाधानवान् भवति न संभवतीत्यर्थः, फलसंकल्पस्य चित्तवेक्षेपहेतुत्वात्। तस्मात् यः कश्चन कर्मी संन्यस्तफलसंकल्पो

भवेत् स योगी समाधानवान् अविक्षिप्तचित्तो भवेत्, चित्तविक्षेपहेतोः फलसंकल्पस्य संन्यस्तत्वादित्यभिप्रायः।।

एवं परमार्थसंन्यासकर्मयोगयोः कर्तृद्वारकं संन्याससामान्यमपेक्ष्य 'यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव' इति कर्मयोगस्य स्तुत्यर्थं संन्यासत्वम् उक्तम्। ध्यानयोगस्य फलनिरपेक्षः कर्मयोगो बहिरङ्गं साधनमिति तं संन्यासत्वेन स्तुत्वा अधुना कर्मयोगस्य ध्यानयोगसाधनत्वं दर्शयति --

।।६.३।। --

आरुरुक्षोः आरोढुमिच्छतः, अनारूढस्य, ध्यानयोगे अवस्थातुमशक्तस्यैवेत्यर्थः। कस्य तस्य आरुरुक्षोः? मुनेः, कर्मफलसंन्यासिन इत्यर्थः। किमारुरुक्षोः? योगम्। कर्म कारणं साधनम् उच्यते। योगारूढस्य पुनः तस्यैव शमः उपशमः सर्वकर्मभ्यो निवृत्तिः कारणं योगारूढस्य साधनम् उच्यते इत्यर्थः। यावद्यावत् कर्मभ्यः उपरमते, तावत्तावत् निरायासस्य जितेन्द्रियस्य चित्तं समाधीयते। तथा सति स झटिति योगारूढो भवति। तथा चोक्तं व्यासेन -- 'नैतादृशं

ब्राह्मणस्यास्ति चित्तं यथैकता समता सत्यता च। शीलं स्थितिर्दण्डनिधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्यः (महा० शान्ति० १७५।३७)' इति।।

अथेदानीं कदा योगारूढो भवति इत्युच्यते --

।।६.४।। --

यदा समाधीयमानचित्तो योगी हि इन्द्रियार्थेषु इन्द्रियाणामर्थाः शब्दादयः तेषु इन्द्रियार्थेषु कर्मसु च नित्यनैमित्तिककाम्यप्रतिषिद्धेषु प्रयोजनाभावबुद्ध्या न अनुषज्जते अनुषङ्गं कर्तव्यताबुद्धिं न करोतीत्यर्थः। सर्वसंकल्पसंन्यासी सर्वान् संकल्पान् इहामुत्रार्थकामहेतून् संन्यसितुं शीलम् अस्य इति सर्वसंकल्पसंन्यासी, योगारूढः प्राप्तयोग इत्येतत्, तदा तस्मिन् काले उच्यते। 'सर्वसंकल्पसंन्यासी' इति वचनात् सर्वांश्च कामान् सर्वाणि च कर्माणि संन्यस्येदित्यर्थः। संकल्पमूला हि सर्वे कामाः -- 'संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः (मनु २।३)। काम जानामि ते मूलं संकल्पात्किल जायसे। न त्वां संकल्पयिष्यामि तेन मे न भविष्यसि (महा० शान्ति० १७७।२५)' इत्यादिस्मृतेः। सर्वकामपरित्यागे च सर्वकर्मसंन्यासः सिद्धो भवति, 'स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते (बृह० उ० ४।४।५)' इत्यादिश्रुतिभ्यः; 'यद्यद्धि कुरुते जन्तुः तत्तत् कामस्य चेष्टितम् (मनु० २।४)' इत्यादिस्मृतिभ्यश्च; न्यायाच्च -- न हि सर्वसंकल्पसंन्यासे कश्चित् स्पन्दितुमपि शक्तः। तस्मात् 'सर्वसंकल्पसंन्यासी' इति वचनात् सर्वान् कामान् सर्वाणि कर्माणि च त्याजयति भगवान्।।

यदा वं योगारूढः, तदा तेन आत्मा उद्धृतो भवति संसारादनर्थजातात्। अतः --

।।६.५।। --

उद्धरेत् संसारसागरे निमग्नम् आत्मना आत्मानं ततः उत् ऊर्ध्वं हरेत् उद्धरेत्, योगारूढतामापादयेदित्यर्थः। न आत्मानम् अवसादयेत् न अधः नयेत्, न अधः गमयेत्। आत्मैव हि यस्मात् आत्मनः बन्धुः। न हि अन्यः कश्चित् बन्धुः, यः संसारमुक्तये भवति। बन्धुरपि तावत् मोक्षं प्रति प्रतिकूल व, स्नेहादिबन्धनायतनत्वात्। तस्मात् युक्तमवधारणम् 'आत्मैव ह्यात्मनो बन्धुः' इति। आत्मैव रिपुः शत्रुः। यः अन्यः अपकारी बाह्यः शत्रुः सोऽपि आत्मप्रयुक्त वेति युक्तमेव अवधारणम् 'आत्मैव
रिपुरात्मनः' इति।।

आत्मैव बन्धुः आत्मैव रिपुः आत्मनः इत्युक्तम्। तत्र किंलक्षण आत्मा आत्मनो बन्धुः, किंलक्षणो वा आत्मा आत्मनो रिपुः इत्युच्यते --

।।६.६।। --

बन्धुः आत्मा आत्मनः तस्य, तस्य आत्मनः स आत्मा बन्धुः येन आत्मना आत्मैव जितः, आत्मा कार्यकरणसंघातो येन वशीकृतः, जितेन्द्रिय इत्यर्थः। अनात्मनस्तु अजितात्मनस्तु शत्रुत्वे शत्रुभावे वर्तेत आत्मैव शत्रुवत्, यथा अनात्मा शत्रुः आत्मनः अपकारी, तथा आत्मा आत्मन अपकारे वर्तेत इत्यर्थः।।

।।६.७।। --

जितात्मनः कार्यकरणसंघात आत्मा जितो येन सः जितात्मा तस्य जितात्मनः, प्रशान्तस्य प्रसन्नान्तःकरणस्य सतः संन्यासिनः परमात्मा समाहितः साक्षादात्मभावेन वर्तते इत्यर्थः। किञ्च शीतोष्णसुखदुःखेषु तथा माने अपमाने च मानापमानयोः पूजापरिभवयोः समः स्यात्।।

।।६.८।। --

ज्ञानविज्ञानतृप्तात्मा ज्ञानं शास्त्रोक्तपदार्थानां परिज्ञानम्, विज्ञानं तु शास्त्रतो ज्ञातानां तथैव स्वानुभवकरणम्, ताभ्यां ज्ञानविज्ञानाभ्यां तृप्तः संजातालंप्रत्ययः आत्मा अन्तःकरणं यस्य सः ज्ञानविज्ञानतृप्तात्मा, कूटस्थः अप्रकम्प्यः, भवति इत्यर्थः; विजितेन्द्रियश्च। य ईदृशः, युक्तः समाहितः इति स उच्यते कथ्यते। स योगी समलोष्टाश्मकाञ्चनः लोष्टाश्मकाञ्चनानि समानि यस्य सः समलोष्टाश्मकाञ्चनः।।

किञ्च --

।।६.९।। --

'सुहृत्' इत्यादिश्लोकार्धम् कं पदम्। सुहृत् इति प्रत्युपकारमनपेक्ष्य उपकर्ता, मित्रं स्नेहवान्, अरिः शत्रुः, उदासीनः न कस्यचित् पक्षं भजते, मध्यस्थः यो विरुद्धयोः उभयोः हितैषी, द्वेष्यः आत्मनः अप्रियः, बन्धुः संबन्धी इत्येतेषु साधुषु शास्त्रानुवर्तिषु अपि च पापेषु प्रतिषिद्धकारिषु सर्वेषु तेषु समबुद्धिः 'कः किंकर्मा' इत्यव्यापृतबुद्धिरित्यर्थः। विशिष्यते,
'विमुच्यते' इति वा पाठान्तरम्। योगारूढानां सर्वेषाम् अयम् उत्तम इत्यर्थः।।

अत वमुत्तमफलप्राप्तये --

।।६.१०।। --

योगी ध्यायी युञ्जीत समादध्यात् सततं सर्वदा आत्मानम् अन्तःकरणं रहसि कान्ते

गिरिगुहादौ स्थितः सन् काकी असहायः। 'रहसि स्थितः काकी च' इति विशेषणात् संन्यासं कृत्वा इत्यर्थः। यतचित्तात्मा चित्तम् अन्तःकरणम् आत्मा देहश्च संयतौ यस्य सः यतचित्तात्मा, निराशीः वीततृष्णः अपरिग्रहः परिग्रहरहितश्चेत्यर्थः। संन्यासित्वेऽपि त्यक्तसर्वपरिग्रहः सन् युञ्जीत इत्यर्थः।।

अथेदानीं योगं युञ्जतः आसनाहारविहारादीनां योगसाधनत्वेन नियमो वक्तव्यः, प्राप्तयोगस्य लक्षणं तत्फलादि च, इत्यत आरभ्यते। तत्र आसनमेव तावत् प्रथममुच्यते --

।।६.११।। --

शुचौ शुद्धे विविक्ते स्वभावतः संस्कारतो वा, देशे स्थाने प्रतिष्ठाप्य स्थिरम् अचलम् आत्मनः आसनं नात्युच्छ्रितं नातीव

उच्छ्रितं न अपि अतिनीचम्, तच्च चैलाजिनकुशोत्तरं चैलम् अजिनं कुशाश्च उत्तरे यस्मिन् आसने तत् आसनं चैलाजिनकुशोत्तरम्। पाठक्रमाद्विपरीतः अत्र क्रमः चैलादीनाम्।।

प्रतिष्ठाप्य, किम्? --

।।६.१२।। --

तत्र तस्मिन् आसने उपविश्य योगं युञ्ज्यात्। कथम्? सर्वविषयेभ्यः उपसंहृत्य काग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः चित्तं च इन्द्रियाणि च चित्तेन्द्रियाणि तेषां क्रियाः संयता यस्य सः यतचित्तेन्द्रियक्रियः। स किमर्थं योगं युञ्ज्यात् इत्याह -- आत्मविशुद्धये अन्तःकरणस्य विशुद्ध्यर्थमित्येतत्।।

बाह्यमासनमुक्तम्; अधुना शरीरधारणं कथम् इत्युच्यते --

।।६.१३।। --

समं कायशिरोग्रीवं कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवं तत् समं धारयन् अचलं च। समं धारयतः चलनं संभवति; अतः विशिनष्टि -- अचलमिति। स्थिरः स्थिरो भूत्वा इत्यर्थः। स्वं नासिकाग्रं संप्रेक्ष्य सम्यक् प्रेक्षणं दर्शनं कृत्वेव इति। इवशब्दो लुप्तो द्रष्टव्यः। न हि स्वनासिकाग्रसंप्रेक्षणमिह विधित्सितम्। किं तर्हि? चक्षुषो दृष्टिसंनिपातः। स च अन्तःकरणसमाधानापेक्षो विवक्षितः। स्वनासिकाग्रसंप्रेक्षणमेव चेत् विवक्षितम्, मनः तत्रैव समाधीयेत, नात्मनि। आत्मनि हि मनसः समाधानं वक्ष्यति 'आत्मसंस्थं मनः कृत्वा (गीता ६।२५)' इति। तस्मात् इवशब्दलोपेन अक्ष्णोः दृष्टिसंनिपात व 'संप्रेक्ष्य' इत्युच्यते। दिशश्च अनवलोकयन् दिशां च अवलोकनमन्तराकुर्वन् इत्येतत्।।

किञ्च --

।।६.१४।। --

प्रशान्तात्मा प्रकर्षेण शान्तः आत्मा अन्तःकरणं यस्य सोऽयं प्रशान्तात्मा, विगतभीः विगतभयः, ब्रह्मचारिव्रते स्थितः ब्रह्मचारिणो व्रतं ब्रह्मचर्यं गुरुशुश्रूषाभिक्षान्नभुक्त्यादि तस्मिन् स्थितः, तदनुष्ठाता भवेदित्यर्थः। किञ्च, मनः संयम्य मनसः वृत्तीः उपसंहृत्य इत्येतत्, मच्चित्तः मयि परमेश्वरे चित्तं यस्य सोऽयं मच्चित्तः, युक्तः समाहितः सन् आसीत उपविशेत्। मत्परः अहं परो यस्य सोऽयं मत्परो भवति। कश्चित् रागी स्त्रीचित्तः, न तु स्त्रियमेव परत्वेन गृह्णाति; किं तर्हि? राजानं महादेवं वा। अयं तु मच्चित्तो मत्परश्च।।

अथेदानीं योगफलमुच्यते --

।।६.१५।। --

युञ्जन् समाधानं कुर्वन् वं यथोक्तेन विधानेन सदा आत्मानं सर्वदा योगी नियतमानसः नियतं संयतं मानसं मनो यस्य सोऽयं नियतमानसः, शान्तिम् उपरतिं निर्वाणपरमां निर्वाणं मोक्षः तत् परमा निष्ठा यस्याः शान्तेः सा निर्वाणपरमा तां निर्वाणपरमाम्. मत्संस्थां मदधीनाम् अधिगच्छति प्राप्नोति।।

इदानीं योगिनः आहारादिनियम उच्यते -- -

।।६.१६।। --

न अत्यश्नतः आत्मसंमितमन्नपरिमाणमतीत्याश्नतः अत्यश्नतः न योगः अस्ति। न च कान्तम् अनश्नतः योगः अस्ति। 'यदु ह वा आत्मसंमितमन्नं तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत् कनीयोऽन्नं न तदवति (शतपथ)' इति श्रुतेः। तस्मात् योगी न आत्मसंमितात् अन्नात् अधिकं न्यूनं वा अश्नीयात्। अथवा, योगिनः योगशास्त्रे परिपठितात् अन्नपरिमाणात् अतिमात्रमश्नतः योगो नास्ति। उक्तं हि -- -'अधर्मशब्दस्य सव्यञ्जनान्नस्य तृतीयमुदकस्य च। वायोः संचरणार्थं तु चतुर्थमवशेषयेत्' इत्यादिपरिमाणम्। तथा -- न च अतिस्वप्नशीलस्य योगो भवति नैव च अतिमात्रं जाग्रतो भवति च अर्जुन।।

कथं पुनः योगो भवति इत्युच्यते --

।।६.१७।। --

युक्ताहारविहारस्य आह्रियते इति आहारः अन्नम्, विहरणं विहारः पादक्रमः, तौ युक्तौ

नियतपरिमाणौ यस्य सः युक्ताहारविहारः तस्य, तथा युक्तचेष्टस्य युक्ता नियता चेष्टा यस्य कर्मसु तस्य, तथा युक्तस्वप्नावबोधस्य युक्तौ स्वप्नश्च अवबोधश्च तौ

नियतकालौ यस्य तस्य, युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगिनो योगो भवति दुःखहा दुःखानि सर्वाणि हन्तीति दुःखहा, सर्वसंसारदुःखक्षयकृत योगः भवतीत्यर्थः।।

अथ अधुना कदा युक्तो भवति इत्युच्यते --

।।६.१८।। --

यदा विनियतं चित्तं विशेषेण नियतं संयतम् काग्रतामापन्नं चित्तं हित्वा बाह्यार्थचिन्ताम् आत्मन्येव केवले अवतिष्ठते, स्वात्मनि स्थितिं लभते इत्यर्थः। निःस्पृहः सर्वकामेभ्यः निर्गता दृष्टादृष्टविषयेभ्यः स्पृहा तृष्णा यस्य योगिनः सः युक्तः समाहितः इत्युच्यते तदा तस्मिन्काले।।

तस्य योगिनः समाहितं यत् चित्तं तस्योपमा उच्यते --

।।६.१९।। --

यथा दीपः प्रदीपः निवातस्थः निवाते वातवर्जिते देशे स्थितः न इङ्गते न चलति, सा उपमा उपमीयते अनया इत्युपमा योगज्ञैः चित्तप्रचारदर्शिभिः स्मृता चिन्तिता योगिनो यतचित्तस्य संयतान्तःकरणस्य युञ्जतो योगम् अनुतिष्ठतः आत्मनः समाधिमनुतिष्ठत इत्यर्थः।।

एवं योगाभ्यासबलादेकाग्रीभूतं निवातप्रदीपकल्पं सत् --

।।६.२०।। -- -

यत्र यस्मिन् काले उपरमते चित्तम् उपरतिं गच्छति निरुद्धं सर्वतो निवारितप्रचारं योगसेवया योगानुष्ठानेन, यत्र चैव यस्मिंश्च काले आत्मना समाधिपरिशुद्धेन अन्तःकरणेन आत्मानं परं चैतन्यं ज्योतिःस्वरूपं पश्यन् उपलभमानः स्वे व आत्मनि तुष्यति तुष्टिं भजते।।

किञ्च --

।।६.२१।। --

सुखम् आत्यन्तिकं अत्यन्तमेव भवति इत्यात्यन्तिकम् अनन्तमित्यर्थः, यत् तत् बुद्धिग्राह्यं बुद्ध्यैव इन्द्रियनिरपेक्षया गृह्यते इति बुद्धिग्राह्यम् अतीन्द्रियम् इन्द्रियगोचरातीतम् अविषयजनितमित्यर्थः, वेत्ति तत् ईदृशं सुखमनुभवति यत्र यस्मिन् काले, न च व अयं विद्वान् आत्मस्वरूपे स्थितः तस्मात् नैव चलति तत्त्वतः तत्त्वस्वरूपात् न प्रच्यवते इत्यर्थः।।

किञ्च --

।।६.२२।। --

यं लब्ध्वाम् यम् आत्मलाभं लब्ध्वा प्राप्य च अपरम् अन्यत् लाभं लाभान्तरं ततः अधिकम् अस्तीति न मन्यते न चिन्तयति। किञ्च, यस्मिन् आत्मतत्त्वे स्थितः दुःखेन शस्त्रनिपातादिलक्षणेन गुरुणा महता अपि न विचाल्यते।।

'यत्रोपरमते (गीता ६।२०)' इत्याद्यारभ्य यावद्भिः विशेषणैः विशिष्ट आत्मावस्थाविशेषः योग उक्तः -- -

।।६.२३।। --

तं विद्यात् विजानीयात् दुःखसंयोगवियोगं दुःखैः संयोगः दुःखसंयोगः, तेन वियोगः दुःखसंयोगवियोगः, तं दुःखसंयोगवियोगं योग इत्येव संज्ञितं विपरीतलक्षणेन विद्यात् विजानीयादित्यर्थः। योगफलमुपसंहृत्य पुनरन्वारम्भेण योगस्य कर्तव्यता उच्यते निश्चयानिर्वेदयोः योगसाधनत्वविधानार्थम्। स यथोक्तफलो योगः निश्चयेन अध्यवसायेन योक्तव्यः अनिर्विण्णचेतसा न निर्विण्णम् अनिर्विण्णम्। किं तत्? चेतः तेन निर्वेदरहितेन चेतसा चित्तेनेत्यर्थः।।

किञ्च --

।।६.२४।। --

संकल्पप्रभवान् संकल्पः प्रभवः येषां कामानां ते संकल्पप्रभवाः कामाः तान् त्यक्त्वा परित्यज्य सर्वान् अशेषतः निर्लेपेन। किञ्च, मनसैव विवेकयुक्तेन इन्द्रियग्रामम् इन्द्रियसमुदायं विनियम्य नियमनं कृत्वा समन्ततः समन्तात्।।

।।६.२५।। --

शनैः शनैः न सहसा उपरमेत् उपरतिं कुर्यात्। कया? बुद्ध्या। किंविशिष्टया? धृतिगृहीतया धृत्या धैर्येण गृहीतया धृतिगृहीतया धैर्येण युक्तया इत्यर्थः। आत्मसंस्थम् आत्मनि संस्थितम् 'आत्मैव सर्वं न ततोऽन्यत् किञ्चिदस्ति' इत्येवमात्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्। ष योगस्य परमो विधिः।।

तत्र वमात्मसंस्थं मनः कर्तुं प्रवृत्तो योगी --

।।६.२६।। -- -

यतो यतः यस्माद्यस्मात् निमित्तात् शब्दादेः निश्चरति निर्गच्छति स्वभावदोषात् मनः चञ्चलम् अत्यर्थं चलम्, अत व अस्थिरम्, ततस्ततः तस्मात्तस्मात् शब्दादेः निमित्तात् नियम्य तत्तन्निमित्तं याथात्म्यनिरूपणेन आभासीकृत्य वैराग्यभावनया च तत् मनः आत्मन्येव वशं नयेत् आत्मवश्यतामापादयेत्। वं योगाभ्यासबलात् योगिनः आत्मन्येव प्रशाम्यति मनः।।

।।६.२७।। --

प्रशान्तमनसं प्रकर्षेण शान्तं मनः यस्य सः प्रशान्तमनाः तं प्रशान्तमनसं हि नं योगिनं सुखम् उत्तमं निरतिशयम् उपैति उपगच्छति शान्तरजसं प्रक्षीणमोहादिक्लेशरजसमित्यर्थः, ब्रह्मभूतं जीवन्मुक्तम्' ब्रह्मैव सर्वम्' इत्येवं निश्चयवन्तं ब्रह्मभूतम् अकल्मषं धर्माधर्मादिवर्जितम्।।

।।६.२८।। --

युञ्जन् वं यथोक्तेन क्रमेण योगी योगान्तरायवर्जितः सदा सर्वदा आत्मानं विगतकल्मषः विगतपापः, सुखेन अनायासेन ब्रह्मसंस्पर्शं ब्रह्मणा परेण संस्पर्शो यस्य तत् ब्रह्मसंस्पर्शं सुखम् अत्यन्तम् अन्तमतीत्य वर्तत इत्यत्यन्तम् उत्कृष्टं निरतिशयम् अश्नुते व्याप्नोति।।

इदानीं योगस्य यत् फलं ब्रह्मैकत्वदर्शनं सर्वसंसारविच्छेदकारणं तत् प्रदर्श्यते -- -

।।६.२९।। --

सर्वभूतस्थं सर्वेषु भूतेषु स्थितं स्वम् आत्मानं सर्वभूतानि च आत्मनि ब्रह्मादीनि स्तम्बपर्यन्तानि च सर्वभूतानि आत्मनि कतां गतानि ईक्षते पश्यति योगयुक्तात्मा समाहितान्तःकरणः सर्वत्र समदर्शनः सर्वेषु ब्रह्मादिस्थावरान्तेषु विषमेषु सर्वभूतेषु समं निर्विशेषं ब्रह्मात्मैकत्वविषयं दर्शनं ज्ञानं यस्य स सर्वत्र समदर्शनः।।

एतस्य आत्मैकत्वदर्शनस्य फलम् उच्यते --

।।६.३०।। --

यो मां पश्यति वासुदेवं सर्वस्य आत्मानं सर्वत्र सर्वेषु भूतेषु सर्वं च ब्रह्मादिभूतजातं मयि सर्वात्मनि पश्यति, तस्य वं आत्मैकत्वदर्शिनः अहम् ईश्वरो न प्रणश्यामि न परोक्षतां गमिष्यामि। स च मे न प्रणश्यति स च विद्वान् मम वासुदेवस्य न प्रणश्यति न परोक्षो भवति, तस्य च मम च कात्मकत्वात्; स्वात्मा हि नाम आत्मनः प्रिय व भवति, यस्माच्च अहमेव सर्वात्मैकत्वदर्शी।।

इत्येतत् पूर्वश्लोकार्थं सम्यग्दर्शनमनूद्य तत्फलं मोक्षः अभिधीयते -- -

।।६.३१।। -- -

सर्वथा सर्वप्रकारैः वर्तमानोऽपि सम्यग्दर्शी योगी मयि वैष्णवे परमे पदे वर्तते, नित्यमुक्त व सः, न मोक्षं प्रति केनचित् प्रतिबध्यते इत्यर्थः।।

किञ्च अन्यत् --

।।६.३२।। --

आत्मौपम्येन आत्मा स्वयमेव उपमीयते अनया इत्युपमा तस्या उपमाया भावः औपम्यं तेन आत्मौपम्येन, सर्वत्र सर्वभूतेषु समं तुल्यं पश्यति यः अर्जुन, स च किं समं पश्यति इत्युच्यते -- यथा मम सुखम् इष्टं तथा सर्वप्राणिनां सुखम् अनुकूलम्। वाशब्दः चार्थे। यदि वा यच्च दुःखं मम प्रतिकूलम् अनिष्टं यथा तथा सर्वप्राणिनां दुःखम् अनिष्टं प्रतिकूलं इत्येवम् आत्मौपम्येन सुखदुःखे अनुकूलप्रतिकूले तुल्यतया सर्वभूतेषु समं पश्यति, न कस्यचित् प्रतिकूलमाचरति, अहिंसक इत्यर्थः। यः वमहिंसकः सम्यग्दर्शननिष्ठः स योगी परमः उत्कृष्टः मतः अभिप्रेतः सर्वयोगिनां मध्ये।।

एतस्य यथोक्तस्य सम्यग्दर्शनलक्षणस्य योगस्य दुःखसंपाद्यतामालक्ष्य शुश्रूषुः ध्रुवं तत्प्राप्त्युपायम् --

अर्जुन उवाच --

।।६.३३।। --

यः अयं योगः त्वया प्रोक्तः साम्येन समत्वेन हे मधुसूदन तस्य योगस्य अहं न पश्यामि नोपलभे, चञ्चलत्वात् मनसः। किम्? स्थिराम् अचलां स्थितिम्।।

प्रसिद्धमेतत् --

।।६.३४।। --

चञ्चलं हि मनः कृष्ण इति कृष्यतेः विलेखनार्थस्य रूपम्। भक्तजनपापादिदोषाकर्षणात् कृष्णः, तस्य संबुद्धिः हे कृष्ण। हि यस्मात् मनः चञ्चलं न केवलमत्यर्थं चञ्चलम्, प्रमाथि च प्रमथनशीलम्, प्रमथ्नाति शरीरम् इन्द्रियाणि च विक्षिपत् सत् परवशीकरोति। किञ्च -- बलवत् प्रबलम्, न केनचित् नियन्तुं शक्यम्, दुर्निवारत्वात्। किञ्च -- दृढं तन्तुनागवत् अच्छेद्यम्। तस्य वंभूतस्य मनसः अहं निग्रहं निरोधं मन्ये वायोरिव यथा वायोः दुष्करो निग्रहः ततोऽपि दुष्करं मन्ये इत्यभिप्रायः।।

श्रीभगवानुवाच, वम् तत् यथा ब्रवीषि --

श्रीभगवानुवाच --

।।६.३५।। --

असंशयं नास्ति संशयः मनो दुर्निग्रहं चलम् इत्यत्र हे महाबाहो। किंतु अभ्यासेन तु अभ्यासो नाम चित्तभूमौ कस्यांचित् समानप्रत्ययावृत्तिः चित्तस्य। वैराग्येण वैराग्यं नाम दृष्टादृष्टेष्टभोगेषु दोषदर्शनाभ्यासात् वैतृष्ण्यम्। तेन च वैराग्येण गृह्यते विक्षेपरूपः प्रचारः चित्तस्य। वं तत् मनः गृह्यते निगृह्यते निरुध्यते इत्यर्थः।।

यः पुनः असंयतात्मा, तेन --

।।६.३६।। --

असंयतात्मना अभ्यासवैराग्याभ्यामसंयतः आत्मा अन्तःकरणं यस्य सोऽयम् असंयतात्मा तेन असंयतात्मना योगो दुष्प्रापः दुःखेन प्राप्यत इति मे मतिः। यस्तु पुनः वश्यात्मा अभ्यासवैराग्याभ्यां वश्यत्वमापादितः आत्मा मनः यस्य सोऽयं वश्यात्मा तेन वश्यात्मना तु

यतता भूयोऽपि प्रयत्नं कुर्वता शक्यः अवाप्तुं योगः उपायतः यथोक्तादुपायात्।।

तत्र योगाभ्यासाङ्गीकरणेन इहलोकपरलोकप्राप्तिनिमित्तानि कर्माणि संन्यस्तानि, योगसिद्धिफलं च मोक्षसाधनं सम्यग्दर्शनं न प्राप्तमिति, योगी योगमार्गात् मरणकाले चलितचित्तः इति तस्य नाशमाशङ्क्य अर्जुन उवाच --

अर्जुन उवाच --

।।६.३७।। --

अयतिः अप्रयत्नवान् योगमार्गे श्रद्धया आस्तिक्यबुद्ध्या च उपेतः योगात् अन्तकाले च चलितं मानसं मनो यस्य सः चलितमानसः भ्रष्टस्मृतिः सः अप्राप्य योगसंसिद्धिं योगफलं सम्यग्दर्शनं कां गतिं हे कृष्ण गच्छति।।

।।६.३८।। --

कच्चित् किं न उभयविभ्रष्टः कर्ममार्गात् योगमार्गाच्च विभ्रष्टः सन् छिन्नाभ्रमिव नश्यति, किं वा न नश्यति अप्रतिष्ठो निराश्रयः हे महाबाहो विमूढः सन् ब्रह्मणः पथि ब्रह्मप्राप्तिमार्गे।।

।।६.३९।। --

तत् मे मम संशयं कृष्ण छेत्तुम् अपनेतुम् अर्हसि अशेषतः। त्वदन्यः त्वत्तः अन्यः

षिः देवो वा च्छेत्ता नाशयिता संशयस्य अस्य न हि यस्मात् उपपद्यते न संभवति। अतः त्वमेव छेत्तुमर्हसि इत्यर्थः।।

श्रीभगवानुवाच --

।।६.४०।। --

हे पार्थ नैव इह लोके नामुत्र परस्मिन् वा लोके विनाशः तस्य विद्यते नास्ति। नाशो नाम पूर्वस्मात् हीनजन्मप्राप्तिः स योगभ्रष्टस्य नास्ति। न हि यस्मात् कल्याणकृत् शुभकृत् कश्चित् दुर्गतिं कुत्सितां गतिं हे तात, तनोति आत्मानं पुत्ररूपेणेति पिता तात उच्यते। पितैव पुत्र इति पुत्रोऽपि तात उच्यते। शिष्योऽपि पुत्र उच्यते। यतो न गच्छति।।

किं तु अस्य भवति? --

।।६.४१।। --

योगमार्गे प्रवृत्तः संन्यासी सामर्थ्यात् प्राप्य गत्वा पुण्यकृताम् अश्वमेधादियाजिनां लोकान्, तत्र च उषित्वा वासमनुभूय शाश्वतीः नित्याः समाः संवत्सरान्, तद्भोगक्षये शुचीनां यथोक्तकारिणां श्रीमतां विभूतिमतां गेहे गृहे योगभ्रष्टः अभिजायते।।

।।६.४२।। --

अथवा श्रीमतां कुलात् अन्यस्मिन् योगिनामेव दरिद्राणां कुले भवति जायते धीमतां बुद्धिमताम्। तत् हि जन्म, यत् दरिद्राणां योगिनां कुले, दुर्लभतरं दुःखलभ्यतरं पूर्वमपेक्ष्य लोके

जन्म यत् ईदृशं यथोक्तविशेषणे कुले।।

यस्मात् --

।।६.४३।। --

तत्र योगिनां कुले तं बुद्धिसंयोगं बुद्ध्या संयोगं बुद्धिसंयोगं लभते पौर्वदेहिकं पूर्वस्मिन् देहे भवं पौर्वदेहिकम्। यतते च प्रयत्नं च करोति ततः तस्मात् पूर्वकृतात् संस्कारात् भूयः बहुतरं संसिद्धौ संसिद्धिनिमित्तं हे कुरुनन्दन।।

कथं पूर्वदेहबुद्धिसंयोग इति तदुच्यते --

।।६.४४।। --

यः पूर्वजन्मनि कृतः अभ्यासः सः पूर्वाभ्यासः, तेनैव बलवता ह्रियते संसिद्धौ हि यस्मात् अवशोऽपि सः योगभ्रष्टः; न कृतं चेत् योगाभ्यासजात् संस्कारात् बलवत्तरमधर्मादिलक्षणं कर्म, तदा योगाभ्यासजनितेन संस्कारेण ह्रियते; अधर्मश्चेत् बलवत्तरः कृतः, तेन योगजोऽपि संस्कारः अभिभूयत व, तत्क्षये तु योगजः संस्कारः स्वयमेव कार्यमारभते, न दीर्घकालस्थस्यापि विनाशः तस्य अस्ति इत्यर्थः। अतः जिज्ञासुरपि योगस्य स्वरूपं ज्ञातुमिच्छन् अपि योगमार्गे प्रवृत्तः संन्यासी योगभ्रष्टः, सामर्थ्यात् सोऽपि शब्दब्रह्म वेदोक्तकर्मानुष्ठानफलम् अतिवर्तते अतिक्रामति अपाकरिष्यति; किमुत बुद्ध्वा यः योगं तन्निष्ठः अभ्यासं कुर्यात्।।

कुतश्च योगित्वं श्रेयः इति --

।।६.४५।। --

प्रयत्नात् यतमानः, अधिकं यतमान इत्यर्थः। तत्र योगी विद्वान् संशुद्धकिल्बिषः विशुद्धकिल्बिषः संशुद्धपापः अनेकजन्मसंसिद्धः अनेकेषु जन्मसु किञ्चित्किञ्चित् संस्कारजातम् उपचित्य तेन उपचितेन अनेकजन्मकृतेन संसिद्धः अनेकजन्मसंसिद्धः ततः लब्धसम्यग्दर्शनः सन् याति परां प्रकृष्टां गतिम्।।

यस्मादेवं तस्मात् --

।।६.४६।। --

तपस्विभ्यः अधिकः योगी, ज्ञानिभ्योऽपि ज्ञानमत्र शास्त्रार्थपाण्डित्यम्, तद्वद्भ्योऽपि मतः ज्ञातः अधिकः श्रेष्ठः इति। कर्मिभ्यः, अग्निहोत्रादि कर्म, तद्वद्भ्यः अधिकः योगी विशिष्टः यस्मात् तस्मात् योगी भव अर्जुन।।

।।६.४७।। --

योगिनामपि सर्वेषां रुद्रादित्यादिध्यानपराणां मध्ये मद्गतेन मयि वासुदेवे समाहितेन अन्तरात्मना अन्तःकरणेन श्रद्धावान् श्रद्दधानः सन् भजते सेवते यो माम्, स मे मम युक्ततमः अतिशयेन युक्तः मतः अभिप्रेतः इति।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपाद-
शिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
षष्ठोऽध्यायः।।

BHAGAVADGITA
Sanskrit Commentary - Sri Sankaracharya
Chapter 7
DV

।।७.१।। --

मयि वक्ष्यमाणविशेषणे परमेश्वरे आसक्तं मनः यस्य सः मय्यासक्तमनाः, हे पार्थ योगं युञ्जन् मनःसमाधानं कुर्वन्, मदाश्रयः अहमेव परमेश्वरः आश्रयो यस्य सः मदाश्रयः। यो हि कश्चित् पुरुषार्थेन केनचित् अर्थी भवति स तत्साधनं कर्म अग्निहोत्रादि तपः दानं वा किञ्चित् आश्रयं प्रतिपद्यते, अयं तु योगी मामेव आश्रयं प्रतिपद्यते, हित्वा अन्यत् साधनान्तरं मय्येव आसक्तमनाः भवति। यः त्वं वंभूतः सन् असंशयं समग्रं समस्तं विभूतिबलशक्त्यैश्वर्यादिगुणसंपन्नं मां यथा येन प्रकारेण ज्ञास्यसि संशयमन्तरेण 'एवमेव भगवान्' इति, तत् श्रृणु उच्यमानं मया।।

तच्च मद्विषयम् --

।।७.२।। --

ज्ञानं ते तुभ्यम् अहं सविज्ञानं विज्ञानसहितं स्वानुभवयुक्तम् इदं वक्ष्यामि कथयिष्यामि अशेषतः कात्स्न्र्येन। तत् ज्ञानं विवक्षितं स्तौति श्रोतुः अभिमुखीकरणाय -- यत् ज्ञात्वा यत् ज्ञानं ज्ञात्वा न इह भूयः पुनः अन्यत् ज्ञातव्यं पुरुषार्थसाधनम् अवशिष्यते नावशिष्टं भवति। इति मत्तत्त्वज्ञो यः, सः सर्वज्ञो भवतीत्यर्थः। अतो विशिष्टफलत्वात् दुर्लभं ज्ञानम्।।

कथमित्युच्यते --

।।७.३।। --

मनुष्याणां मध्ये सहस्रेषु अनेकेषु कश्चित् यतति प्रयत्नं करोति सिद्धये सिद्ध्यर्थम्। तेषां

यततामपि सिद्धानाम्, सिद्धा व हि ते ये मोक्षाय यतन्ते, तेषां कश्चित् व हि मां वेत्ति तत्त्वतः यथावत्।।

श्रोतारं प्ररोचनेन अभिमुखीकृत्याह -- -

।।७.४।। --

भूमिः इति पृथिवीतन्मात्रमुच्यते, न स्थूला, 'भिन्ना प्रकृतिरष्टधा' इति वचनात्। तथा अबादयोऽपि तन्मात्राण्येव उच्यन्ते -- आपः अनलः वायुः खम्। मनः इति मनसः कारणमहंकारो गृह्यते। बुद्धिः इति अहंकारकारणं महत्तत्त्वम्। अहंकारः इति अविद्यासंयुक्तमव्यक्तम्। यथा विषसंयुक्तमन्नं विषमित्युच्यते, वमहंकारवासनावत् अव्यक्तं मूलकारणमहंकार इत्युच्यते, प्रवर्तकत्वात् अहंकारस्य। अहंकार व हि सर्वस्य प्रवृत्तिबीजं दृष्टं लोके। इतीयं यथोक्ता प्रकृतिः मे मम ेश्वरी मायाशक्तिः अष्टधा भिन्ना भेदमागता।।

।।७.५।। --

अपरा न परा निकृष्टा अशुद्धा अनर्थकरी संसारबन्धनात्मिका इयम्। इतः अस्याः यथोक्तायाः तु अन्यां विशुद्धां प्रकृतिं मम आत्मभूतां विद्धि मे परां प्रकृष्टां जीवभूतां क्षेत्रज्ञलक्षणां प्राणधारणनिमित्तभूतां हे महाबाहो, यया प्रकृत्या इदं धार्यते जगत् अन्तः प्रविष्टया।।

।।७.६) --

तद्योनीनि ते परापरे क्षेत्रक्षेत्रज्ञलक्षणे प्रकृती योनिः येषां भूतानां तानि तद्योनीनि, भूतानि

सर्वाणि इति वम् उपधारय जानीहि। यस्मात् मम प्रकृती योनिः कारणं सर्वभूतानाम्, अतः अहं कृत्स्नस्य समस्तस्य जगतः प्रभवः उत्पत्तिः प्रलयः विनाशः तथा। प्रकृतिद्वयद्वारेण अहं सर्वज्ञः ईश्वरः जगतः कारणमित्यर्थः।।

यतः तस्मात् -- -

।।७.७।। --

मत्तः परमेश्वरात् परतरम् अन्यत् कारणान्तरं किञ्चित् नास्ति न विद्यते, अहमेव जगत्कारणमित्यर्थः, हे धनञ्जय। यस्मादेवं तस्मात् मयि परमेश्वरे सर्वाणि भूतानि सर्वमिदं जगत् प्रोतं अनुस्यूतम् अनुगतम् अनुविद्धं ग्रथितमित्यर्थ, दीर्घतन्तुषु पटवत्, सूत्रे च मणिगणा इव।।

केन केन धर्मेण विशिष्टे त्वयि सर्वमिदं प्रोतमित्युच्यते --

।।७.८।। --

रसः अहम्, अपां यः सारः स रसः, तस्मिन् रसभूते मयि आपः प्रोता इत्यर्थः। वं सर्वत्र। यथा अहम् अप्सु रसः, वं प्रभा अस्मि शशिसूर्ययोः। प्रणवः ओंकारः सर्ववेदेषु, तस्मिन् प्रणवभूते मयि सर्वे वेदाः प्रोताः। तथा खे आकाशे शब्दः सारभूतः, तस्मिन् मयि खं प्रोतम्। तथा पौरुषं पुरुषस्य भावः पौरुषं यतः पुंबुद्धिः नृषु, तस्मिन् मयि पुरुषाः प्रोताः।।

।।७.९।। --

पुण्यः सुरभिः गन्धः पृथिव्यां च अहम्, तस्मिन् मयि गन्धभूते पृथिवी प्रोता। पुण्यत्वं गन्धस्य स्वभावत व पृथिव्यां दर्शितम् अबादिषु रसादेः पुण्यत्वोपलक्षणार्थम्। अपुण्यत्वं तु गन्धादीनाम् अविद्याधर्माद्यपेक्षं संसारिणां भूतविशेषसंसर्गनिमित्तं भवति। तेजश्च दीप्तिश्च अस्मि विभावसौ अग्नौ। तथा जीवनं सर्वभूतेषु, येन जीवन्ति सर्वाणि भूतानि तत् जीवनम्। तपश्च अस्मि तपस्विषु, तस्मिन् तपसि मयि तपस्विनः प्रोताः।।

।।७.१०।। --

बीजं प्ररोहकारणं मां विद्धि सर्वभूतानां हे पार्थ सनातनं चिरन्तनम्। किञ्च, बुद्धिः विवेकशक्तिः अन्तःकरणस्य बुद्धिमतां विवेकशक्तिमताम् अस्मि, तेजः प्रागल्भ्यं तद्वतां तेजस्विनाम् अहम्।।

।।७.११।। --

बलं सामर्थ्यम् ओजो बलवताम् अहम्, तच्च बलं कामरागविवर्जितम्, कामश्च रागश्च कामरागौ -- कामः तृष्णा असंनिकृष्टेषु विषयेषु, रागो रञ्जना प्राप्तेषु विषयेषु -- ताभ्यां कामरागाभ्यां विवर्जितं देहादिधारणमात्रार्थं बलं सत्त्वमहमस्मि; न तु यत्संसारिणां तृष्णारागकारणम्। किञ्च -- धर्माविरुद्धः धर्मेण शास्त्रार्थेन अविरुद्धो यः प्राणिषु भूतेषु कामः, यथा देहधारणमात्राद्यर्थः अशनपानादिविषयः, स कामः अस्मि हे भरतर्षभ।।

किञ्च --

।।७.१२।। --

ये चैव सात्त्विकाः सत्त्वनिर्वृत्ताः भावाः पदार्थाः, राजसाः रजोनिर्वृत्ताः, तामसाः तमोनिर्वृत्ता च, ये केचित् प्राणिनां स्वकर्मवशात् जायन्ते भावाः, तान् मत्त व जायमानान् इति वं विद्धि सर्वान् समस्तानेव। यद्यपि ते मत्तः जायन्ते, तथापि न तु अहं तेषु तदधीनः तद्वशः, यथा संसारिणः। ते पुनः मयि मद्वशाः मदधीनाः।।

एवंभूतमपि परमेश्वरं नित्यशुद्धबुद्धमुक्तस्वभावं सर्वभूतात्मानं निर्गुणं संसारदोषबीजप्रदाहकारणं मां नाभिजानाति जगत् इति अनुक्रोशं दर्शयति भगवान्। तच्च किंनिमित्तं जगतः अज्ञानमित्युच्यते --

।।७.१३।। --

त्रिभिः गुणमयैः गुणविकारैः रागद्वेषमोहादिप्रकारैः भावैः पदार्थैः भिः यथोक्तैः सर्वम् इदं प्राणिजातं जगत् मोहितम् अविवेकितामापादितं सत् न अभिजानाति माम्, भ्यः यथोक्तेभ्यः गुणेभ्यः परं व्यतिरिक्तं विलक्षणं च अव्ययं व्ययरहितं जन्मादिसर्वभावविकारवर्जितम् इत्यर्थः।।

कथं पुनः दैवीम् तां त्रिगुणात्मिकां वैष्णवीं मायामतिक्रामति इत्युच्यते --

।।७.१४।। --

दैवी देवस्य मम ईश्वरस्य विष्णोः स्वभावभूता हि यस्मात् षा यथोक्ता गुणमयी मम माया दुरत्यया दुःखेन अत्ययः अतिक्रमणं यस्याः सा दुरत्यया। तत्र वं सति सर्वधर्मान् परित्यज्य मामेव मायाविनं स्वात्मभूतं सर्वात्मना ये प्रपद्यन्ते ते मायाम् तां सर्वभूतमोहिनीं तरन्ति अतिक्रामन्ति; ते संसारबन्धनात् मुच्यन्ते इत्यर्थः।।

यदि त्वां प्रपन्नाः मायामेतां तरन्ति, कस्मात् त्वामेव सर्वे न प्रपद्यन्ते इत्युच्यते --

।।७.१५।। --

न मां परमेश्वरं नारायणं दुष्कृतिनः पापकारिणः मूढाः प्रपद्यन्ते नराधमाः नराणां मध्ये अधमाः निकृष्टाः। ते च मायया अपहृतज्ञानाः संमुषितज्ञानाः आसुरं भावं हिंसानृतादिलक्षणम् आश्रिताः।।

ये पुनर्नरोत्तमाः पुण्यकर्माणः --

।।७.१६।। --

चतुर्विधाः चतुःप्रकाराः भजन्ते सेवन्ते मां जनाः सुकृतिनः पुण्यकर्माणः हे अर्जुन। आर्तः आर्तिपरिगृहीतः तस्करव्याघ्ररोगादिना अभिभूतः आपन्नः, जिज्ञासुः भगवत्तत्त्वं ज्ञातुमिच्छति यः, अर्थार्थी धनकामः, ज्ञानी विष्णोः तत्त्वविच्च हे भरतर्षभ।।

।।७.१७।। --

तेषां चतुर्णां मध्ये ज्ञानी तत्त्ववित् तत्त्ववित्त्वात् नित्ययुक्तः भवति कभक्तिश्च, अन्यस्य भजनीयस्य अदर्शनात्; अतः स कभक्तिः विशिष्यते विशेषम् आधिक्यम् आपद्यते, अतिरिच्यते इत्यर्थः। प्रियो हि यस्मात् अहम् आत्मा ज्ञानिनः, अतः तस्य अहम् अत्यर्थं प्रियः; प्रसिद्धं हि लोके 'आत्मा प्रियो भवति' इति। तस्मात् ज्ञानिनः आत्मत्वात् वासुदेवः प्रियो भवतीत्यर्थः। स च ज्ञानी मम वासुदेवस्य आत्मैवेति मम अत्यर्थं प्रियः।।

न तर्हि आर्तादयः त्रयः वासुदेवस्य प्रियाः? न; किं तर्हि? --

।।७.१८।। --

उदाराः उत्कृष्टाः सर्व व ते, त्रयोऽपि मम प्रिया वेत्यर्थः। न हि कश्चित् मद्भक्तः मम वासुदेवस्य अप्रियः भवति। ज्ञानी तु अत्यर्थं प्रियो भवतीति विशेषः। तत् कस्मात् इत्यत आह -- ज्ञानी तु आत्मैव न अन्यो मत्तः इति मे मम मतं निश्चयः। आस्थितः आरोढुं प्रवृत्तः सः ज्ञानी हि यस्मात् 'अहमेव भगवान् वासुदेवः न अन्योऽस्मि' इत्येवं युक्तात्मा समाहितचित्तः सन् मामेव परं ब्रह्म गन्तव्यम् अनुत्तमां गतिं गन्तुं प्रवृत्त इत्यर्थः।।

ज्ञानी पुनरपि स्तूयते --

।।७.१९।। --

बहूनां जन्मनां ज्ञानार्थसंस्काराश्रयाणाम् अन्ते समाप्तौ ज्ञानवान् प्राप्तपरिपाकज्ञानः मां वासुदेवं प्रत्यगात्मानं प्रत्यक्षतः प्रपद्यते। कथम्? वासुदेवः सर्वम् इति। यः वं सर्वात्मानं मां नारायणं प्रतिपद्यते, सः महात्मा; न तत्समः अन्यः अस्ति, अधिको वा। अतः सुदुर्लभः, 'मनुष्याणां सहस्रेषु' इति हि उक्तम्।।

आत्मैव सर्वो वासुदेव इत्येवमप्रतिपत्तौ कारणमुच्यते --

।।७.२०।। --

कामैः तैस्तैः पुत्रपशुस्वर्गादिविषयैः हृतज्ञानाः अपहृतविवेकविज्ञानाः प्रपद्यन्ते अन्यदेवताः

प्राप्नुवन्ति वासुदेवात् आत्मनः अन्याः देवताः; तं तं नियमं देवताराधने प्रसिद्धो यो यो नियमः तं तम् आस्थाय आश्रित्य प्रकृत्या स्वभावेन जन्मान्तरार्जितसंस्कारविशेषेण नियताः नियमिताः स्वया आत्मीयया।।

तेषां च कामिनाम् --

।।७.२१।। --

यः यः कामी यां यां देवतातनुं श्रद्धया संयुक्तः भक्तश्च सन् अर्चितुं पूजयितुम् इच्छति, तस्य तस्य कामिनः अचलां स्थिरां श्रद्धां तामेव विदधामि स्थिरीकरोमि।।

ययैव पूर्वं प्रवृत्तः स्वभावतो यः यां देवतातनुं श्रद्धया अर्चितुम् इच्छति --

।।७.२२।। --

स तया मद्विहितया श्रद्धया युक्तः सन् तस्याः देवतातन्वाः राधनम् आराधनम् ईहते चेष्टते। लभते च ततः तस्याः आराधितायाः देवतातन्वाः कामान् ईप्सितान् मयैव परमेश्वरेण सर्वज्ञेन कर्मफलविभागज्ञतया विहितान् निर्मितान् तान्, हि

यस्मात् ते भगवता विहिताः कामाः तस्मात् तान् अवश्यं लभते इत्यर्थः। 'हितान्' इति पदच्छेदे हितत्वं कामानामुपचरितं कल्प्यम्; न हि कामा हिताः कस्यचित्।।

यस्मात् अन्तवत्साधनव्यापारा अविवेकिनः कामिनश्च ते, अतः --

।।७.२३।। --

अन्तवत् विनाशि तु फलं तेषां तत् भवति अल्पमेधसां अल्पप्रज्ञानाम्। देवान्देवयजो यान्ति देवान् यजन्त इति देवयजः, ते देवान् यान्ति, मद्भक्ता यान्ति मामपि। वं समाने अपि आयासे मामेव न प्रपद्यन्ते अनन्तफलाय, अहो खलु कष्टं वर्तन्ते, इत्यनुक्रोशं दर्शयति भगवान्।।

किंनिमित्तं मामेव न प्रपद्यन्ते इत्युच्यते --

।।७.२४।। --

अव्यक्तम् अप्रकाशं व्यक्तिम् आपन्नं प्रकाशं गतम् इदानीं मन्यन्ते मां नित्यप्रसिद्धमीश्वरमपि सन्तम् अबुद्धयः अविवेकिनः परं भावं परमात्मस्वरूपम् अजानन्तः अविवेकिनः मम अव्ययं व्ययरहितम् अनुत्तमं निरतिशयं मदीयं भावमजानन्तः मन्यन्ते इत्यर्थः।।

तदज्ञानं किंनिमित्तमित्युच्यते --

।।७.२५।। --

न अहं प्रकाशः सर्वस्य लोकस्य, केषांचिदेव मद्भक्तानां प्रकाशः अहमित्यभिप्रायः। योगमायासमावृतः योगः गुणानां युक्तिः घटनं सैव माया योगमाया, तया योगमायया समावृतः, संछन्नः इत्यर्थः। अत व मूढो लोकः अयं न अभिजानाति माम् अजम् अव्ययम्।।

यया योगमायया समावृतं मां लोकः नाभिजानाति, नासौ योगमाया मदीया सती मम ईश्वरस्य मायाविनो ज्ञानं प्रतिबध्नाति, यथा अन्यस्यापि मायाविनः मायाज्ञानं तद्वत्।।

यतः वम्, अतः --

।।७.२६।। --

अहं तु वेद जाने समतीतानि समतिक्रान्तानि भूतानि, वर्तमानानि च अर्जुन, भविष्याणि च भूतानि वेद अहम्। मां तु वेद न कश्चन मद्भक्तं मच्छरणम् कं मुक्त्वा; मत्तत्त्ववेदनाभावादेव न मां भजते।।

केन पुनः मत्तत्त्ववेदनप्रतिबन्धेन प्रतिबद्धानि सन्ति जायमानानि सर्वभूतानि मां न विदन्ति इत्यपेक्षायामिदमाह --

।।७.२७।। --

इच्छाद्वेषसमुत्थेन इच्छा च द्वेषश्च इच्छाद्वेषौ ताभ्यां समुत्तिष्ठतीति इच्छाद्वेषसमुत्थः तेन इच्छाद्वेषसमुत्थेन। केनेति विशेषापेक्षायामिदमाह -- द्वन्द्वमोहेन द्वन्द्वनिमित्तः मोहः द्वन्द्वमोहः तेन। तावेव इच्छाद्वेषौ शीतोष्णवत् परस्परविरुद्धौ सुखदुःखतद्धेतुविषयौ यथाकालं सर्वभूतैः संबध्यमानौ द्वन्द्वशब्देन अभिधीयेते। तत्र यदा इच्छाद्वेषौ सुखदुःखतद्धेतुसंप्राप्त्या लब्धात्मकौ भवतः, तदा तौ सर्वभूतानां प्रज्ञायाः स्ववशापादनद्वारेण
परमार्थात्मतत्त्वविषयज्ञानोत्पत्तिप्रतिबन्धकारणं मोहं जनयतः। न हि
इच्छाद्वेषदोषवशीकृतचित्तस्य यथाभूतार्थविषयज्ञानमुत्पद्यते बहिरपि; किमु वक्तव्यं ताभ्यामाविष्टबुद्धेः संमूढस्य प्रत्यगात्मनि बहुप्रतिबन्धे ज्ञानं नोत्पद्यत इति। अतः तेन इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन, भारत भरतान्वयज, सर्वभूतानि संमोहितानि सन्ति संमोहं संमूढतां सर्गे जन्मनि, उत्पत्तिकाले इत्येतत्, यान्ति गच्छन्ति हे परंतप। मोहवशान्येव सर्वभूतानि जायमानानि जायन्ते इत्यभिप्रायः। यतः वम्, अतः तेन द्वन्द्वमोहेन प्रतिबद्धप्रज्ञानानि सर्वभूतानि संमोहितानि मामात्मभूतं न जानन्ति; अत व आत्मभावेन मां न भजन्ते।।

के पुनः अनेन द्वन्द्वमोहेन निर्मुक्ताः सन्तः त्वां विदित्वा यथाशास्त्रमात्मभावेन भजन्ते

इत्यपेक्षितमर्थं दर्शयितुम् उच्यते --

।।७.२८।। --

येषां तु पुनः अन्तगतं समाप्तप्रायं क्षीणं पापं जनानां पुण्यकर्मणां पुण्यं कर्म येषां सत्त्वशुद्धिकारणं विद्यते ते पुण्यकर्माणः तेषां पुण्यकर्मणाम्, ते द्वन्द्वमोहनिर्मुक्ताः यथोक्तेन द्वन्द्वमोहेन निर्मुक्ताः भजन्ते मां परमात्मानं दृढव्रताः। 'एवमेव परमार्थतत्त्वं नान्यथा' इत्येवं सर्वपरित्यागव्रतेन निश्चितविज्ञानाः दृढव्रताः उच्यन्ते।।

ते किमर्थं भजन्ते इत्युच्यते --

।।७.२९।। --

जरामरणमोक्षाय जरामरणयोः मोक्षार्थं मां परमेश्वरम् आश्रित्य मत्समाहितचित्ताः सन्तः यतन्ति प्रयतन्ते ये, ते यत् ब्रह्म परं तत् विदुः कृत्स्नं समस्तम् अध्यात्मं प्रत्यगात्मविषयं वस्तु तत् विदुः, कर्म च अखिलं समस्तं विदुः।।

।।७.३०।। --

साधिभूताधिदैवम् अधिभूतं च अधिदैवं च अधिभूताधिदैवम्, सह अधिभूताधिदैवेन वर्तते इति साधिभूताधिदैवं च मां ये विदुः, साधियज्ञं च सह अधियज्ञेन साधियज्ञं ये विदुः, प्रयाणकाले अपि च मरणकाले अपि च मां ते विदुः युक्तचेतसः समाहितचित्ता इति।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य

श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये

सप्तमोऽध्यायः।।

BHAGAVADGITA
Sanskrit Commentary - Sri Sankaracharya
Chapter 8
DV

।।८.१ -- ८.२।। --

'ते ब्रह्म तद्विदुः कृत्स्नम् (गीता ७।२९)' इत्यादिना भगवता अर्जुनस्य प्रश्नबीजानि उपदिष्टानि। अतः तत्प्रश्नार्थम् अर्जुनः उवाच -- -

एषां प्रश्नानां यथाक्रमं निर्णयाय श्रीभगवानुवाच --

श्रीभगवानुवाच --

।।८.१ -- ८.२।। --

'ते ब्रह्म तद्विदुः कृत्स्नम् (गीता ७।२९)' इत्यादिना भगवता अर्जुनस्य प्रश्नबीजानि उपदिष्टानि। अतः तत्प्रश्नार्थम् अर्जुनः उवाच -- -

एषां प्रश्नानां यथाक्रमं निर्णयाय श्रीभगवानुवाच --

श्रीभगवानुवाच --

।।८.३।। --

अक्षरं न क्षरतीति अक्षरं परमात्मा, 'एतस्य वा अक्षरस्य प्रशासने गार्गि (बृह० उ० ३।८।९' इति श्रुतेः। ओंकारस्य च 'ओमित्येकाक्षरं ब्रह्म (गीता ८।१३)' इति परेण विशेषणात् अग्रहणम्। परमम् इति च निरतिशये ब्रह्मणि अक्षरे उपपन्नतरम् विशेषणम्। तस्यैव परस्य ब्रह्मणः प्रतिदेहं प्रत्यगात्मभावः स्वभावः, स्वो भावः स्वभावः अध्यात्मम् उच्यते। आत्मानं देहम् अधिकृत्य

प्रत्यगात्मतया प्रवृत्तं परमार्थब्रह्मावसानं वस्तु स्वभावः अध्यात्मम् उच्यते अध्यात्मशब्देन अभिधीयते। भूतभावोद्भवकरः भूतानां भावः भूतभावः तस्य उद्भवः भूतभावोद्भवः तं करोतीति भूतभावोद्भवकरः, भूतवस्तूत्पत्तिकर इत्यर्थः। विसर्गः विसर्जनं देवतोद्देशेन चरुपुरोडाशादेः द्रव्यस्य परित्यागः; स ष विसर्गलक्षणो यज्ञः कर्मसंज्ञितः कर्मशब्दित इत्येतत्। तस्मात् हि बीजभूतात् वृष्ट्यादिक्रमेण स्थावरजङ्गमानि भूतानि उद्भवन्ति।।

।।८.४।। --

अधिभूतं प्राणिजातम् अधिकृत्य भवतीति। कोऽसौ? क्षरः क्षरतीति क्षरः विनाशी, भावः यत्किञ्चित् जनिमत् वस्तु इत्यर्थः। पुरुषः पूर्णम् अनेन सर्वमिति, पुरि शयनात् वा, पुरुषः आदित्यान्तर्गतो हिण्यगर्भः, सर्वप्राणिकरणानाम् अनुग्राहकः, सः अधिदैवतम्। अधियज्ञः सर्वयज्ञाभिमानिनी विष्ण्वाख्या देवता, 'यज्ञो वै विष्णुः' इति श्रुतेः। स हि विष्णुः अहमेव; अत्र अस्मिन् देहे यो यज्ञः तस्य अहम् अधियज्ञः; यज्ञो हि देहनिर्वर्त्यत्वेन देहसमवायी इति देहाधिकरणो भवति, देहभृतां वर।।

।।८.५।। -- -

अन्तकाले च मरणकाले च मामेव परमेश्वरं विष्णुं स्मरन् मुक्त्वा परित्यज्य कलेवरं शरीरं यः प्रयाति गच्छति, सः मद्भावं वैष्णवं तत्त्वं याति। नास्ति न विद्यते अत्र अस्मिन् अर्थे संशयः ---याति वा न वा इति।।

न मद्विषय व अयं नियमः। किं तर्हि? --

।।८.६।। --

यं यं वापि यं यं भावं देवताविशेषं स्मरन् चिन्तयन् त्यजति परित्यजति अन्ते अन्तकाले प्राणवियोगकाले कलेवरं शरीरं तं तमेव स्मृतं भावमेव ति नान्यं कौन्तेय, सदा सर्वदा तद्भावभावितः तस्मिन् भावः तद्भावः स भावितः स्मर्यमाणतया अभ्यस्तः येन सः तद्भावभावितः सन्।।

यस्मात् वम् अन्त्या भावना देहान्तरप्राप्तौ कारणम् --

।।८.७।। --

तस्मात् सर्वेषु कालेषु माम् अनुस्मर यथाशास्त्रम्। युध्य च युद्धं च स्वधर्मं कुरु। मयि वासुदेवे अर्पिते मनोबुद्धी यस्य तव स त्वं मयि अर्पितमनोबुद्धिः सन् मामेव यथास्मृतम् ष्यसि आगमिष्यसि; असंशयः न संशयः अत्र विद्यते।।

किञ्च --

।।८.८।। --

अभ्यासयोगयुक्तेन मयि चित्तसमर्पणविषयभूते कस्मिन् तुल्यप्रत्ययावृत्तिलक्षणः विलक्षणप्रत्ययानन्तरितः अभ्यासः स

चाभ्यासो योगः तेन युक्तं तत्रैव व्यापृतं योगिनः चेतः तेन, चेतसा नान्यगामिना न अन्यत्र विषयान्तरे गन्तुं शीलम् अस्येति नान्यगामि तेन नान्यगामिना, परमं निरतिशयं पुरुषं दिव्यं दिवि सूर्यमण्डले भवं याति गच्छति हे पार्थ अनुचिन्तयन् शास्त्राचार्योपदेशम् अनुध्यायन् इत्येतत्।।

किं विशिष्टं च पुरुषं याति इति उच्यते --

।।८.९।। --

कविं क्रान्तदर्शिनं सर्वज्ञं पुराणं चिरन्तनम् अनुशासितारं सर्वस्य जगतः प्रशासितारम् अणोः सूक्ष्मादपि अणीयांसं सूक्ष्मतरम् अनुस्मरेत् अनुचिन्तयेत् यः कश्चित्, सर्वस्य कर्मफलजातस्य धातारं विधातारं विचित्रतया प्राणिभ्यो विभक्तारम्, अचिन्त्यरूपं न अस्य रूपं नियतं विद्यमानमपि केनचित् चिन्तयितुं शक्यते इति अचिन्त्यरूपः तम्, आदित्यवर्णम् आदित्यस्येव नित्यचैतन्यप्रकाशो वर्णो यस्य तम् आदित्यवर्णम्, तमसः परस्तात् अज्ञानलक्षणात् मोहान्धकारात् परं तम् अनुचिन्तयत् याति इति पूर्वेण संबन्धः।।

किञ्च --

।।८.१०।। --

प्रयाणकाले मरणकाले मनसा अचलेन चलनवर्जितेन भक्त्या युक्तः भजनं भक्तिः तया युक्तः योगबलेन चैव योगस्य बलं योगबलं समाधिजसंस्कारप्रचयजनितचित्तस्थैर्यलक्षणं योगबलं तेन च युक्तः इत्यर्थः, पूर्वं हृदयपुण्डरीके वशीकृत्य चित्तं ततः ऊर्ध्वगामिन्या नाड्या भूमिजयक्रमेण भ्रुवोः मध्ये प्राणम् आवेश्य स्थापयित्वा सम्यक् अप्रमत्तः सन्, सः वं विद्वान् योगी 'कविं पुराणम्' इत्यादिलक्षणं तं परं परतरं पुरुषम् उपैति प्रतिपद्यते दिव्यं द्योतनात्मकम्।।

पुनरपि वक्ष्यमाणेन उपायेन प्रतिपित्सितस्य ब्रह्मणो वेदविद्वदनादिविशेषणविशेष्यस्य अभिधानं करोति भगवान् --

।।८.११।। --

यत् अक्षरं न क्षरतीति अक्षरम् अविनाशि वेदविदः वेदार्थज्ञाः वदन्ति, 'तद्वा तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति (बृ० उ० ३।८।८)' इति श्रुतेः, सर्वविशेषनिवर्तकत्वेन अभिवदन्ति 'अस्थूलमनणु (बृ० उ० ३।८।८)' इत्यादि। किञ्च -- विशन्ति प्रविशन्ति सम्यग्दर्शनप्राप्तौ सत्यां यत् यतयः यतनशीलाः संन्यासिनः वीतरागाः वीतः विगतः रागः येभ्यः ते वीतरागाः। यच्च अक्षरमिच्छन्तः -- ज्ञातुम् इति वाक्यशेषः -- ब्रह्मचर्यं गुरौ चरन्ति आचरन्ति, तत् ते पदं तत् अक्षराख्यं पदं पदनीयं ते तव संग्रहेण संग्रहः संक्षेपः तेन संक्षेपेण प्रवक्ष्ये कथयिष्यामि।।

'स यो ह वै तद्भगवन्मनुष्येषु प्रायणान्तमोंकारमभिध्यायीत कतमं वाव स तेन लोकं जयतीति। तस्मै स होवाच तद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः' इत्युपक्रम्य 'यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत (प्र० उ० ५।१।२।५।। -- स सामभिरुन्नीयते ब्रह्मलोकम्' इत्यादिना वचनेन, 'अन्यत्र धर्मादन्यत्राधर्मात्' इति च उपक्रम्य 'सर्वे वेदा यत्पदमामनन्ति। तपांसि सर्वाणि च यद्वदन्ति। यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् (क० उ० १।२।१४.१५)' इत्यादिभिश्च वचनैः परस्य ब्रह्मणो वाचकरूपेण, प्रतिमावत् प्रतीकरूपेण वा, परब्रह्मप्रतिपत्तिसाधनत्वेन मन्दमध्यमबुद्धीनां विवक्षितस्य ओंकारस्य उपासनं कालान्तरे मुक्तिफलम् उक्तं यत्, तदेव इहापि' कविं पुराणमनुशासितारम् (गीता ८।९)' 'यदक्षरं वेदविदो वदन्ति (गीता ८।११)' इति च उपन्यस्तस्य परस्य ब्रह्मणः पूर्वोक्तरूपेण प्रतिपत्त्युपायभूतस्य ओंकारस्य कालान्तरमुक्तिफलम् उपासनं योगधारणासहितं वक्तव्यम्, प्रसक्तानुप्रसक्तं च यत्किञ्चित्, इत्येवमर्थः उत्तरो ग्रन्थ आरभ्यते --

।।८.१२।। --

सर्वद्वाराणि सर्वाणि च तानि द्वाराणि च सर्वद्वाराणि उपलब्धौ, तानि सर्वाणि संयम्य संयमनं कृत्वा मनः हृदि हृदयपुण्डरीके निरुध्य निरोधं कृत्वा निष्प्रचारमापाद्य, तत्र वशीकृतेन मनसा हृदयात् ऊर्ध्वगामिन्या नाड्या ऊर्ध्वमारुह्य मूर्ध्नि आधाय आत्मनः प्राणम् आस्थितः प्रवृत्तः योगधारणां धारयितुम्।।

तत्रैव च धारयन् -- -

।।८.१३।। --

ओमिति काक्षरं ब्रह्म ब्रह्मणः अभिधानभूतम् ओंकारं व्याहरन् उच्चारयन्, तदर्थभूतं माम् ईश्वरम् अनुस्मरन् अनुचिन्तयन् यः

प्रयाति म्रियते, सः त्यजन् परित्यजन् देहं शरीरम् -- 'त्यजन् देहम्' इति प्रयाणविशेषणार्थम् देहत्यागेन प्रयाणम् आत्मनः, न स्वरूपनाशेनेत्यर्थः -- सः वं याति गच्छति परमां प्रकृष्टां गतिम्।।

किञ्च --

।।८.१४।। --

अनन्यचेताः न अन्यविषये चेतः यस्य सोऽयम् अनन्यचेताः, योगी सततं सर्वदा यः मां परमेश्वरं स्मरति नित्यशः। सततम् इति नैरन्तर्यम् उच्यते, नित्यशः इति दीर्घकालत्वम् उच्यते। न षण्मासं संवत्सरं वा; किं तर्हि? यावज्जीवं नैरन्तर्येण यः मां स्मरतीत्यर्थः। तस्य योगिनः अहं सुलभः सुखेन लभ्यः हे पार्थ, नित्ययुक्तस्य सदा समाहितचित्तस्य योगिनः। यतः वम्, अतः अनन्यचेताः सन् मयि सदा समाहितः भवेत्।।

तव सौलभ्येन किं स्यात् इत्युच्यते; श्रृणु तत् मम सौलभ्येन यत् भवति --

।।८.१५।। --

माम् उपेत्य माम् ईश्वरम् उपेत्य मद्भावमापद्य पुनर्जन्म पुनरुत्पत्तिं नाप्नुवन्ति न प्राप्नुवन्ति। किं विशिष्टं पुनर्जन्म न प्राप्नुवन्ति इति, तद्विशेषणमाह -- दुःखालयं दुःखानाम् आध्यात्मिकादीनां आलयम् आश्रयम् आलीयन्ते यस्मिन् दुःखानि इति दुःखालयं जन्म। न केवलं दुःखालयम्, अशाश्वतम् अनवस्थितस्वरूपं च। नाप्नुवन्ति ईदृशं पुनर्जन्म महात्मानः यतयः संसिद्धिं मोक्षाख्यां परमां प्रकृष्टां गताः प्राप्ताः। ये पुनः मां न प्राप्नुवन्ति ते पुनः आवर्तन्ते।।

किं पुनः त्वत्तः अन्यत् प्राप्ताः पुनरावर्तन्ते इति, उच्यते --

।।८.१६।। --

आ ब्रह्मभुवनात् भवन्ति अस्मिन् भूतानि इति भुवनम्, ब्रह्मणो भुवनं ब्रह्मभुवनम्, ब्रह्मलोक इत्यर्थः, आ ब्रह्मभुवनात् सह ब्रह्मभुवनेन लोकाः सर्वे पुनरावर्तिनः पुनरावर्तनस्वभावाः हे अर्जुन। माम् कम् उपेत्य तु कौन्तेय पुनर्जन्म पुनरुत्पत्तिः न विद्यते।।

ब्रह्मलोकसहिताः लोकाः कस्मात् पुनरावर्तिनः? कालपरिच्छिन्नत्वात्। कथम्? --

।।८.१७।। --

सहस्रयुगपर्यन्तं सहस्राणि युगानि पर्यन्तः पर्यवसानं यस्य अह्नः तत् अहः सहस्रयुगपर्यन्तम्,

ब्रह्मणः प्रजापतेः विराजः विदुः, रात्रिम् अपि युगसहस्रान्तां अहःपरिमाणामेव। के विदुरित्याह -- ते अहोरात्रविदः कालसंख्याविदो जनाः इत्यर्थः। यतः वं कालपरिच्छिन्नाः ते, अतः पुनरावर्तिनो लोकाः।।प्रजापतेः अहनि यत् भवति रात्रौ च, तत् उच्यते --

।।८.१८।। --

अव्यक्तात् अव्यक्तं प्रजापतेः स्वापावस्था तस्मात् अव्यक्तात् व्यक्तयः व्यज्यन्त इति व्यक्तयः स्थावरजङ्गमलक्षणाः सर्वाः प्रजाः प्रभवन्ति अभिव्यज्यन्ते, अह्नः आगमः अहरागमः तस्मिन् अहरागमे काले ब्रह्मणः प्रबोधकाले। तथा रात्र्यागमे ब्रह्मणः स्वापकाले प्रलीयन्ते सर्वाः व्यक्तयः तत्रैव पूर्वोक्ते अव्यक्तसंज्ञके।।

अकृताभ्यागमकृतविप्रणाशदोषपरिहारार्थम्, बन्धमोक्षशास्त्रप्रवृत्तिसाफल्यप्रदर्शनार्थम् अविद्यादिक्लेशमूलकर्माशयवशाच्च अवशः भूतग्रामः भूत्वा भूत्वा प्रलीयते इत्यतः संसारे वैराग्यप्रदर्शनार्थं च इदमाह --

।।८.१९।। --

भूतग्रामः भूतसमुदायः स्थावरजङ्गमलक्षणः यः पूर्वस्मिन् कल्पे आसीत् स व अयं नान्यः। भूत्वा भूत्वा अहरागमे, प्रलीयते पुनः पुनः रात्र्यागमे अह्नः क्षये अवशः अस्वतन्त्र व, हे पार्थ, प्रभवति जायते अवश व अहरागमे।।

यत् उपन्यस्तम् अक्षरम्, तस्य प्राप्त्युपायो निर्दिष्टः 'ओमित्येकाक्षरं ब्रह्म (गीता ८।१३)' इत्यादिना। अथ इदानीम् अक्षरस्यैव स्वरूपनिर्दिदिक्षया इदम् उच्यते, अनेन योगमार्गेण इदं

गन्तव्यमिति --

।।८.२०।। --

परः व्यतिरिक्तः भिन्नः; कुतः? तस्मात् पूर्वोक्तात्। तु-शब्दः अक्षरस्य विवक्षितस्य अव्यक्तात् वैलक्षण्यविशेषणार्थः। भावः अक्षराख्यं परं ब्रह्म। व्यतिरिक्तत्वे सत्यपि सालक्षण्यप्रसङ्गोऽस्तीति तद्विनिवृत्त्यर्थम् आह -- अन्यः इति। अन्यः विलक्षणः।

स च अव्यक्तः अनिन्द्रियगोचरः। 'परस्तस्मात्' इत्युक्तम्; कस्मात् पुनः परः? पूर्वोक्तात् भूतग्रामबीजभूतात् अविद्यालक्षणात् अव्यक्तात्। अन्यः विलक्षणः भावः इत्यभिप्रायः। सनातनः चिरन्तनः यः सः भावः सर्वेषु भूतेषु ब्रह्मादिषु नश्यत्सु न विनश्यति।।

।।८.२१।। --

योऽसौ अव्यक्तः अक्षरः इत्युक्तः, तमेव अक्षरसंज्ञकम् अव्यक्तं भावम् आहुः परमां प्रकृष्टां गतिम्। यं परं भावं प्राप्य गत्वा न निवर्तन्ते संसाराय, तत् धाम स्थानं परमं प्रकृष्टं मम, विष्णोः परमं पदमित्यर्थः।।

तल्लब्धेः उपायः उच्यते --

।।८.२२।। --

पुरुषः पुरि शयनात् पूर्णत्वाद्वा, स परः पार्थ, परः निरतिशयः, यस्मात् पुरुषात् न परं किञ्चित्। सः भक्त्या लभ्यस्तु ज्ञानलक्षणया अनन्यया आत्मविषयया। यस्य पुरुषस्य अन्तःस्थानि मध्यस्थानि भूतानि कार्यभूतानि; कार्यं हि कारणस्य अन्तर्वर्ति भवति। येन पुरुषेण

सर्वं इदं जगत् ततं व्याप्तम् आकाशेनेव घटादि।।

प्रकृतानां योगिनां प्रणवावेशितब्रह्मबुद्धीनां कालान्तरमुक्तिभाजां ब्रह्मप्रतिपत्तये उत्तरो मार्गो वक्तव्य इति 'यत्र काले' इत्यादि विवक्षितार्थसमर्पणार्थम् उच्यते, आवृत्तिमार्गोपन्यासः इतरमार्गस्तुत्यर्थः --

।।८.२३।। --

यत्र काले प्रयाताः इति व्यवहितेन संबन्धः। यत्र यस्मिन् काले तु अनावृत्तिम् अपुनर्जन्म आवृत्तिं तद्विपरीतां चैव। योगिनः इति योगिनः कर्मिणश्च उच्यन्ते, कर्मिणस्तु गुणतः -- 'कर्मयोगेन योगिनाम् (गीता ३।३)' इति विशेषणात् -- योगिनः। यत्र काले प्रयाताः मृताः योगिनः अनावृत्तिं यान्ति, यत्र काले च प्रयाताः आवृत्तिं यान्ति, तं कालं वक्ष्यामि भरतर्षभ।।

तं कालमाह --

।।८.२४।। --

अग्निः कालाभिमानिनी देवता। तथा ज्योतिरपि देवतैव कालाभिमानिनी। अथवा, अग्निज्योतिषी यथा श्रुते व देवते। भूयसा तु निर्देशो 'यत्र काले (गीता ८।२३)' 'तं कालम् (गीता ८।२३)' इति आम्रवणवत्। तथा अहः देवता अहरभिमानिनी; अहः शुक्लः शुक्लपक्षदेवता; षण्मासा उत्तरायणम्, तत्रापि देवतैव मार्गभूता इति स्थितः अन्यत्र अयं न्यायः। तत्र तस्मिन् मार्गे प्रयाताः मृताः गच्छन्ति ब्रह्म ब्रह्मविदो ब्रह्मोपासकाः ब्रह्मोपासनपरा जनाः। 'क्रमेण' इति वाक्यशेषः। न हि सद्योमुक्तिभाजां सम्यग्दर्शननिष्ठानां गतिः आगतिर्वा

क्वचित् अस्ति, 'न तस्य प्राणा उत्क्रामन्ति' इति श्रुतेः। ब्रह्मसंलीनप्राणा व ते ब्रह्ममया ब्रह्मभूता व ते।

।।८.२५।। --

धूमो रात्रिः धूमाभिमानिनी रात्र्यभिमानिनी च देवता। तथा कृष्णः कृष्णपक्षदेवता। षण्मासा दक्षिणायनम् इति च पूर्ववत् देवतैव। तत्र चन्द्रमसि भवं चान्द्रमसं ज्योतिः फलम् इष्टादिकारी योगी कर्मी प्राप्य भुक्त्वा तत्क्षयात् इह पुनः निवर्तते।।

।।८.२६।। --

शुक्लकृष्णे शुक्ला च कृष्णा च शुक्लकृष्णे, ज्ञानप्रकाशकत्वात् शुक्ला, तदभावात् कृष्णा; ते शुक्लकृष्णे हि गती जगतः इति अधिकृतानां ज्ञानकर्मणोः, न जगतः सर्वस्यैव ते गती संभवतः; शाश्वते नित्ये, संसारस्य नित्यत्वात्, मते अभिप्रेते। तत्र कया शुक्लया याति अनावृत्तिम्, अन्यया इतरया आवर्तते पुनः भूयः।।

।।८.२७।। --

न ते यथोक्ते सृती मार्गौ पार्थ जानन् संसाराय का, अन्या मोक्षाय इति, योगी न मुह्यति कश्चन कश्चिदपि। तस्मात् सर्वेषु कालेषु योगयुक्तः समाहितो भव अर्जुन।।

शृणु तस्य योगस्य माहात्म्यम् --

।।८.२८।। --

वेदेषु सम्यगधीतेषु यज्ञेषु च सादगुण्येन अनुष्ठितेषु तपःसु च सुतप्तेषु दानेषु च सम्यग्दत्तेषु, यद् तेषु यत् पुण्यफलं प्रदिष्टं शास्त्रेण, अत्येति अतीत्य गच्छति तत् सर्वं फलजातम्; इदं विदित्वा सप्तप्रश्ननिर्णयद्वारेण उक्तम् अर्थं सम्यक् अवधार्य अनुष्ठाय योगी, परम् उत्कृष्टम् ऐश्वरं स्थानम् उपैति च प्रतिपद्यते आद्यम् आदौ भवम्, कारणं ब्रह्म इत्यर्थः।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
अष्टमोऽध्यायः।।

BHAGAVADGITA
Sanskrit Commentary - Sri Sankaracharya
Chapter 9
DV

।।९.१।। --

इदं ब्रह्मज्ञानं वक्ष्यमाणम् उक्तं च पूर्वषु अध्यायेषु, तत् बुद्धौ संनिधीकृत्य इदम् इत्याह। तु-शब्दो विशेषनिर्धारणार्थः। इदमेव तु सम्यग्ज्ञानं साक्षात् मोक्षप्राप्तिसाधनम् 'वासुदेवः सर्वमिति' 'आत्मैवेदं सर्वम् (बृ० उ० २।४।६)' 'एकमेवाद्वितीयम् (छा० उ० ६।२।१)' इत्यादिश्रुतिस्मृतिभ्यः; नान्यत्, 'अथ ते येऽन्यथातो विदुः अन्यराजानः ते क्षय्यलोका भवन्ति' इत्यादिश्रुतिभ्यश्च। ते तुभ्यं गुह्यतमं गोप्यतमं प्रवक्ष्यामि कथयिष्यामि अनसूयवे असूयारहिताय। किं तत्? ज्ञानम्। किंविशिष्टम्? विज्ञानसहितम् अनुभवयुक्तम्, यत् ज्ञात्वा प्राप्य मोक्ष्यसे अशुभात् संसारबन्धनात्।।

तञ्च --

।।९.२।। --

राजविद्या विद्यानां राजा, दीप्त्यतिशयवत्त्वात्; दीप्यते हि इयम् अतिशयेन ब्रह्मविद्या सर्वविद्यानाम्। तथा राजगुह्यं गुह्यानां राजा। पवित्रं पावनं इदम् उत्तमं सर्वेषां पावनानां शुद्धिकारणं ब्रह्मज्ञानम् उत्कृष्टतमम्। अनेकजन्मसहस्रसंचितमपि धर्माधर्मादि समूलं कर्म क्षणमात्रादेव भस्मीकरोति इत्यतः किं तस्य पावनत्वं वक्तव्यम्। किञ्च -- प्रत्यक्षावगमं प्रत्यक्षेण सुखादेरिव अवगमो यस्य तत् प्रत्यक्षावगमम्। अनेकगुणवतोऽपि धर्मविरुद्धत्वं दृष्टम्, न तथा आत्मज्ञानं धर्मविरोधि, किंतु धर्म्यं धर्मादनपेतम्। वमपि, स्याद्दुःखसंपाद्यमित्यत आह -- सुसुखं कर्तुम्, यथा रत्नविवेकविज्ञानम्। तत्र अल्पायासानामन्येषां कर्मणां सुखसंपाद्यानाम् अल्पफलत्वं दुष्कराणां च महाफलत्वं दृष्टमिति, इदं तु सुखसंपाद्यत्वात् फलक्षयात् व्येति इति प्राप्ते, आह

-- अव्ययम् इति। न अस्य फलतः कर्मवत् व्ययः अस्तीति अव्ययम्। अतः श्रद्धेयम् आत्मज्ञानम्।।

ये पुनः --

।।९.३।। --

अश्रद्दधानाः श्रद्धाविरहिताः आत्मज्ञानस्य धर्मस्य अस्यस्वरूपे तत्फले च नास्तिकाः पापकारिणः, असुराणाम् उपनिषदं देहमात्रात्मदर्शनमेव प्रतिपन्नाः असुतृपः पापाः पुरुषाः अश्रद्दधानाः, परंतप, अप्राप्य मां परमेश्वरम्, मत्प्राप्तौ नैव आशङ्का इति मत्प्राप्तिमार्गसाधनभेदभक्तिमात्रमपि अप्राप्य इत्यर्थः। निवर्तन्ते निश्चयेन वर्तन्ते; क्व? -- मृत्युसंसारवर्त्मनि मृत्युयुक्तः संसारः मृत्युसंसारः तस्य वर्त्म नरकतिर्यगादिप्राप्तिमार्गः, तस्मिन्नेव वर्तन्ते इत्यर्थः।।

स्तुत्या अर्जुनमभिमुखीकृत्य आह --

।।९.४।। --

मया मम यः परो भावः तेन ततं व्याप्तं सर्वम् इदं जगत् अव्यक्तमूर्तिना न व्यक्ता मूर्तिः स्वरूपं यस्य मम सोऽहमव्यक्तमूर्तिः तेन मया अव्यक्तमूर्तिना, करणगोचरस्वरूपेण इत्यर्थः। तस्मिन् मयि अव्यक्तमूर्तौ स्थितानि मत्स्थानि, सर्वभूतानि ब्रह्मादीनि स्तम्बपर्यन्तानि। न हि निरात्मकं किञ्चित् भूतं व्यवहाराय अवकल्पते। अतः मत्स्थानि मया आत्मना आत्मवत्त्वेन स्थितानि, अतः मयि स्थितानि इति उच्यन्ते। तेषां भूतानाम् अहमेव आत्मा इत्यतः तेषु स्थितः इति मूढबुद्धीनां अवभासते; अतः ब्रवीमि -- न च अहं तेषु भूतेषु अवस्थितः, मूर्तवत् संश्लेषाभावेन आकाशस्यापि अन्तरतमो हि अहम्। न हि असंसर्गि वस्तु क्वचित् आधेयभावेन अवस्थितं

भवति।।

अत व असंसर्गित्वात् मम --

।।९.५।। --

न च मत्स्थानि भूतानि ब्रह्मादीनि। पश्य मे योगं युक्तिं घटनं मे मम`श्वरम् ईश्वरस्य इमम् `श्वरम्, योगम् आत्मनो याथात्म्यमित्यर्थः। तथा च श्रुतिः असंसर्गित्वात् असङ्गतां दर्शयति -- 'असङ्गो न हि सज्जते (बृह० उ० ३।९।२६)' इति। इदं च आश्चर्यम् अन्यत् पश्य -- भूतभृत् असङ्गोऽपि सन् भूतानि बिभर्ति; न च भूतस्थः, यथोक्तेन न्यायेन दर्शितत्वात् भूतस्थत्वानुपपत्तेः। कथं पुनरुच्यते 'असौ मम आत्मा' इति? विभज्य देहादिसङ्घातं तस्मिन् अहंकारम् अध्यारोप्य लोकबुद्धिम् अनुसरन् व्यपदिशति मम आत्मा इति, न पुनः आत्मनः आत्मा अन्यः इति लोकवत् अजानन्। तथा भूतभावनः भूतानि भावयति उत्पादयति वर्धयतीति वा भूतभावनः।।

यथोक्तेन श्लोकद्वयेन उक्तम् अर्थं दृष्टान्तेन उपपादयन् आह -- -

।।९.६।। --

यथा लोके आकाशस्थितः आकाशे स्थितः नित्यं सदा वायुः सर्वत्र गच्छतीति सर्वत्रगः महान् परिमाणतः, तथा आकाशवत् सर्वगते मयि असंश्लेषेणैव स्थितानि इत्येवम् उपधारय विजानीहि।।

एवं वायुः आकाशे इव मयि स्थितानि सर्वभूतानि स्थितिकाले; तानि --

।।९.७।। --

सर्वभूतानि कौन्तेय प्रकृतिं त्रिगुणात्मिकाम् अपरां निकृष्टां यान्ति मामिकां मदीयां कल्पक्षये प्रलयकाले। पुनः भूयः तानि भूतानि उत्पत्तिकाले कल्पादौ विसृजामि उत्पादयामि अहं पूर्ववत्।।

एवम् अविद्यालक्षणाम् --

।।९.८।। --

प्रकृतिं स्वां स्वीयाम् अवष्टभ्य वशीकृत्य विसृजामि पुनः पुनः प्रकृतितो जातं भूतग्रामं भूतसमुदायम् इमं वर्तमानं कृत्स्नं समग्रम् अवशम् अस्वतन्त्रम्, अविद्यादिदोषैः परवशीकृतम्, प्रकृतेः वशात् स्वभाववशात्।।

तर्हि तस्य ते परमेश्वरस्य, भूतग्रामम् इमं विषमं विदधतः, तन्निमित्ताभ्यां धर्माधर्माभ्यां संबन्धः स्यादिति, इदम् आह भगवान् --

।।९.९।। -- -

न च माम् ईश्वरं तानि भूतग्रामस्य विषमसर्गनिमित्तानि कर्माणि निबध्नन्ति धनंजय। तत्र कर्मणां असंबन्धित्वे कारणमाह -- उदासीनवत् आसीनं यथा उदासीनः उपेक्षकः कश्चित् तद्वत् आसीनम्, आत्मनः अविक्रियत्वात्, असक्तं फलासङ्गरहितम्, अभिमानवर्जितम् 'अहं करोमि इति तेषु कर्मसु। अतः अन्यस्यापि कर्तृत्वाभिमानाभावः फलासङ्गाभावश्च असंबन्धकारणम्, अन्यथा कर्मभिः बध्यते मूढः कोशकारवत् इत्यभिप्रायः।।

तत्र 'भूतग्राममिमं विसृजामि' 'उदासीनवदासीनम्' इति च विरुद्धम् उच्यते, इति तत्परिहारार्थम् आह --

।।९.१०।। --

मया अध्यक्षेण सर्वतो दृशिमात्रस्वरुपेण अविक्रियात्मना अध्यक्षेण मया, मम माया त्रिगुणात्मिका अविद्यालक्षणा प्रकृतिः सूयते उत्पादयति सचराचरं जगत्। तथा च मन्त्रवर्णः -- ' को देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च (श्वे० उ० ६।११)' इति। हेतुना निमित्तेन अनेन अध्यक्षत्वेन कौन्तेय जगत् सचराचरं व्यक्ताव्यक्तात्मकं विपरिवर्तते सर्वावस्थासु। दृशिकर्मत्वापत्तिनिमित्ता हि जगतः सर्वा प्रवृत्तिः -- अहम् इदं भोक्ष्ये, पश्यामि इदम्, शृणोमि इदम्, सुखमनुभवामि, दुःखमनुभवामि, तदर्थमिदं करिष्ये, इदं ज्ञास्यामि, इत्याद्या अवगतिनिष्ठा अवगत्यवसानैव।' यो अस्याध्यक्षः परमे व्योमन् (तै० ब्रा० २।८।९)' इत्यादयश्च मन्त्राः तमर्थं दर्शयन्ति। ततश्च कस्य देवस्य सर्वाध्यक्षभूतचैतन्यमात्रस्य परमार्थतः सर्वभोगानभिसंबन्धिनः अन्यस्य चेतनान्तरस्य अभावे भोक्तुः अन्यस्य अभावात्। किंनिमित्ता इयं सृष्टिः इत्यत्र प्रश्नप्रतिवचने अनुपपन्ने,' को अद्धा वेद क इह प्रवोचत्। कुत आजाता कुत इयं विसृष्टिः (तै० ब्रा० २।८।९)' इत्यादिमन्त्रवर्णेभ्यः। दर्शितं च भगवता -- ' अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः (गीता ५।१५)' इति।।

एवं मां नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वजन्तूनाम् आत्मानमपि सन्तम् --

।।९.११।। --

अवजानन्ति अवज्ञां परिभवं कुर्वन्ति मां मूढाः अविवेकिनः मानुषीं मनुष्यसंबन्धिनीं तनुं देहम्

आश्रितम्, मनुष्यदेहेन व्यवहरन्तमित्येतत्, परं प्रकृष्टं भावं परमात्मतत्त्वम् आकाशकल्पम् आकाशादपि अन्तरतमम् अजानन्तो मम भूतमहेश्वरं सर्वभूतानां महान्तम् ईश्वरं स्वात्मानम्। ततश्च तस्य मम अवज्ञानभावनेन आहताः ते वराकाः।।

कथम्? --

।।९.१२।। --

मोघाशाः वृथा आशाः आशिषः येषां ते मोघाशाः, तथा मोघकर्माणः यानि च अग्निहोत्रादीनि तैः अनुष्ठीयमानानि कर्माणि तानि च, तेषां भगवत्परिभवात्, स्वात्मभूतस्य अवज्ञानात्, मोघान्येव निष्फलानि कर्माणि भवन्तीति मोघकर्माणः। तथा मोघज्ञानाः मोघं निष्फलं ज्ञानं येषां ते मोघज्ञानाः, ज्ञानमपि तेषां निष्फलमेव स्यात्। विचेतसः विगतविवेकाश्च ते भवन्ति इत्यभिप्रायः। किञ्च -- ते भवन्ति राक्षसीं रक्षसां प्रकृतिं स्वभावम् आसुरीम् असुराणां च प्रकृतिं मोहिनीं मोहकरीं देहात्मवादिनीं श्रिताः आश्रिताः, छिन्द्धि, भिन्द्धि, पिब, खाद, परस्वमपहर, इत्येवं वदनशीलाः क्रूरकर्माणो भवन्ति इत्यर्थः,

' असुर्या नाम ते लोकाः (ई० उ० ३)' इति श्रुतेः।।

ये पुनः श्रद्दधानाः भगवद्भक्तिलक्षणे मोक्षमार्गे प्रवृत्ताः --

।।९.१३।। -- -

महात्मानस्तु अक्षुद्रचित्ताः माम् ईश्वरं पार्थ दैवीं देवानां प्रकृतिं शमदमदयाश्रद्धादिलक्षणाम् आश्रिताः सन्तः भजन्ति सेवन्ते अनन्यमनसः अनन्यचित्ताः ज्ञात्वा भूतादिं भूतानां वियदादीनां प्राणिनां च आदिं कारणम् अव्ययम्।।

कथम्? -- --

।।९.१४।। -- -

सततं सर्वदा भगवन्तं ब्रह्मस्वरूपं मां कीर्तयन्तः, यतन्तश्च इन्द्रियोपसंहारशमदमदयाहिंसादिलक्षणैः धर्मैः प्रयतन्तश्च, दृढव्रताः दृढं स्थिरम् अचाल्यं व्रतं येषां ते दृढव्रताः नमस्यन्तश्च मां हृदयेशम् आत्मानं भक्त्या नित्ययुक्ताः सन्तः उपासते सेवन्ते।।

ते केन केन प्रकारेण उपासते इत्युच्यते --

।।९.१५।। -- --

ज्ञानयज्ञेन ज्ञानमेव भगवद्विषयं यज्ञः तेन ज्ञानयज्ञेन, यजन्तः पूजयन्तः माम् ईश्वरं च अपि अन्ये अन्याम् उपासनां परित्यज्य उपासते। तच्च ज्ञानम् -- कत्वेन' कमेव परं ब्रह्म' इति परमार्थदर्शनेन यजन्तः उपासते। केचिच्च पृथक्त्वेन ' आदित्यचन्द्रादिभेदेन स व भगवान् विष्णुः अवस्थितः' इति उपासते। केचित्' बहुधा अवस्थितः स व भगवान् सर्वतोमुखः विश्वरुपः' इति तं विश्वरूपं सर्वतोमुखं बहुधा बहुप्रकारेण उपासते।।

यदि बहुभिः प्रकारैः उपासते, कथं त्वामेव उपासते इति, अत आह --

।।९.१६।। --

अहं क्रतुः श्रौतकर्मभेदः अहमेव। अहं यज्ञः स्मार्तः। किञ्च स्वधा अन्नम् अहम्, पितृभ्यो यत् दीयते। अहम् औषधं सर्वप्राणिभिः यत् अद्यते तत् औषधशब्दशब्दितं व्रीहियवादिसाधारणम्। अथवा स्वधा इति सर्वप्राणिसाधारणम् अन्नम्, औषधम् इति व्याध्युपशमनार्थं भेषजम्। मन्त्रः अहम्, येन पितृभ्यो देवताभ्यश्च हविः दीयते। अहमेव आज्यं हविश्च। अहम् अग्निः, यस्मिन् हूयते हविः सः अग्निः अहम्। अहं हुतं हवनकर्म च।।

किञ्च -- -

।।९.१७।। --

पिता जनयिता अहम् अस्य जगतः, माता जनयित्री, धाता कर्मफलस्य प्राणिभ्यो विधाता, पितामहः पितुः पिता, वेद्यं वेदितव्यम्, पवित्रं पावनम् ओंकारः,

क् साम यजुः व च।।

किञ्च --

।।९.१८।। --

गतिः कर्मफलम्, भर्ता पोष्टा, प्रभुः स्वामी, साक्षी प्राणिनां कृताकृतस्य, निवासः यस्मिन् प्राणिनो निवसन्ति, शरणम् आर्तानाम्, प्रपन्नानामार्तिहरः। सुहृत् प्रत्युपकारानपेक्षः सन् उपकारी, प्रभवः उत्पत्तिः जगतः, प्रलयः प्रलीयते अस्मिन् इति, तथा स्थानं तिष्ठति अस्मिन् इति, निधानं निक्षेपः कालान्तरोपभोग्यं प्राणिनाम्, बीजं प्ररोहकारणं प्ररोहधर्मिणाम्, अव्ययं यावत्संसारभावित्वात् अव्ययम्, न हि अबीजं किञ्चित् प्ररोहति; नित्यं च प्ररोहदर्शनात्

बीजसंततिः न व्येति इति गम्यते।।

किञ्च --

।।९.१९।। --

तपामि अहम् आदित्यो भूत्वा कैश्चित् रश्मिभिः उल्बणैः। अहं वर्षं कैश्चित् रश्मिभिः उत्सृजामि। उत्सृज्य पुनः निगृह्णामि कैश्चित् रश्मिभिः अष्टभिः मासैः पुनः उत्सृजामि प्रावृषि। अमृतं चैव देवानाम्, मृत्युश्च मर्त्यानाम्। सत् यस्य यत् संबन्धितया विद्यमानं तत्, तद्विपरीतम् असच्च व अहम् अर्जुन। न पुनः अत्यन्तमेव असत् भगवान्, स्वयं कार्यकारणे वा सदसती।।

ये पूर्वोक्तैः निवृत्तिप्रकारैः कत्वपृथक्त्वादिविज्ञानैः यज्ञैः मां पूजयन्तः उपासते ज्ञानविदः, ते यथाविज्ञानं मामेव प्राप्नुवन्ति। ये पुनः अज्ञाः कामकामाः --

।।९.२०।। --

त्रैविद्याः

ग्यजुःसामविदः मां वस्वादिदेवरूपिणं सोमपाः सोमं पिबन्तीति सोमपाः, तेनैव सोमपानेन पूतपापाः शुद्धकिल्बिषाः, यज्ञैः अग्निष्टोमादिभिः इष्ट्वा पूजयित्वा स्वर्गतिं स्वर्गगमनं स्वरेव गतिः स्वर्गतिः ताम्, प्रार्थयन्ते। ते च पुण्यं पुण्यफलम् आसाद्य संप्राप्य सुरेन्द्रलोकं शतक्रतोः स्थानम् अश्नन्ति भुञ्जते दिव्यान् दिवि भवान् अप्राकृतान् देवभोगान् देवानां भोगान्।।

।।९.२१।। --

ते तं भुक्त्वा स्वर्गलोकं विशालं विस्तीर्णं क्षीणे पुण्ये मर्त्यलोकं विशन्ति आविशन्ति। वं यथोक्तेन प्रकारेण त्रयीधर्मं केवलं वैदिकं कर्म अनुप्रपन्नाः गतागतं गतं च आगतं च गतागतं गमनागमनं कामकामाः कामान् कामयन्ते इति कामकामाः लभन्ते गतागतमेव, न तु स्वातन्त्र्यं क्वचित् लभन्ते इत्यर्थः।।

ये पुनः निष्कामाः सम्यग्दर्शनिः -- -

।।९.२२।। -- -

अनन्याः अपृथग्भूताः परं देवं नारायणम् आत्मत्वेन गताः सन्तः चिन्तयन्तः मां ये जनाः संन्यासिनः पर्युपासते, तेषां परमार्थदर्शिनां नित्याभियुक्तानां सततामियोगिनां योगक्षेमं योगः अप्राप्तस्य प्रापणं क्षेमः तद्रक्षणं तदुभयं वहामि प्रापयामि अहम्; 'ज्ञानी त्वात्मैव मे मतम्' 'स च मम प्रियः' यस्मात्, तस्मात् ते मम आत्मभूताः प्रियाश्च इति।।

ननु अन्येषामपि भक्तानां योगक्षेमं वहत्येव भगवान्। सत्यं वहत्येव; किं तु अयं विशेषः -- अन्ये ये भक्ताः ते आत्मार्थं स्वयमपि योगक्षेमम् ईहन्ते; अनन्यदर्शिनस्तु न आत्मार्थं योगक्षेमम् ईहन्ते; न हि ते जीविते मरणे वा आत्मनः गृद्धिं कुर्वन्ति; केवलमेव भगवच्छरणाः ते; अतः भगवानेव तेषां योगक्षेमं वहतीति।।

ननु अन्या अपि देवताः त्वमेव चेत् तद्भक्ताश्च त्वामेव यजन्ते। सत्यमेवम् --

।।९.२३।। --

येऽपि अन्यदेवताभक्ताः अन्यासु देवतासु भक्ताः अन्यदेवताभक्ताः सन्तः यजन्ते पूजयन्ति श्रद्धया आस्तिक्यबुद्ध्या अन्विताः अनुगताः, तेऽपि मामेव कौन्तेय यजन्ति अविधिपूर्वकम् अविधिः अज्ञानं तत्पूर्वकं यजन्ते इत्यर्थः।।

कस्मात् ते अविधिपूर्वकं यजन्ते इत्युच्यते; यस्मात् --

।।९.२४।। --

अहं हि सर्वयज्ञानां श्रौतानां स्मार्तानां च सर्वेषां यज्ञानां देवतात्मत्वेन भोक्ता च प्रभुः व च। मत्स्वामिको हि यज्ञः, 'अधियज्ञोऽहमेवात्र (गीता ८।४)' इति हि उक्तम्। तथा न तु माम् अभिजानन्ति तत्त्वेन यथावत्। अतश्च अविधिपूर्वकम् इष्ट्वा यागफलात् च्यवन्ति प्रच्यवन्ते ते।।

येऽपि अन्यदेवताभक्तिमत्त्वेन अविधिपूर्वकं यजन्ते, तेषामपि यागफलं अवश्यंभावि। कथम्? --

।।९.२५।। --

यान्ति गच्छन्ति देवव्रताः देवेषु व्रतं नियमो भक्तिश्च येषां ते देवव्रताः देवान् यान्ति। पितॄन् अग्निष्वात्तादीन् यान्ति पितृव्रताः श्राद्धादिक्रियापराः पितृभक्ताः। भूतानि विनायकमातृगणचतुर्भगिन्यादीनि यान्ति भूतेज्याः भूतानां पूजकाः। यान्ति मद्याजिनः मद्यजनशीलाः वैष्णवाः मामेव यान्ति। समाने अपि आयासे मामेव न भजन्ते अज्ञानात्, तेन ते अल्पफलभाजः भवन्ति इत्यर्थः।।

न केवलं मद्भक्तानाम् अनावृत्तिलक्षणम् अनन्तफलम्, सुखाराधनश्च अहम्। कथम्? --

।।९.२६।। --

पत्रं पुष्पं फलं तोयम् उदकं यः मे मह्यं भक्त्या प्रयच्छति, तत् अहं पत्रादि भक्त्या उपहृतं भक्तिपूर्वकं प्रापितं भक्त्युपहृतम् अश्नामि गृह्णामि प्रयतात्मनः शुद्धबुद्धेः।।

यतः वम्, अतः --

।।९.२७।। --

यत् करोषि स्वतः प्राप्तम्, यत् अश्नासि, यच्च जुहोषि हवनं निर्वर्तयसि श्रौतं स्मार्तं वा, यत् ददासि प्रयच्छसि ब्राह्मणादिभ्यः हिरण्यान्नाज्यादि, यत् तपस्यसि तपः चरसि कौन्तेय, तत् कुरुष्व मदर्पणं मत्समर्पणम्।।

एवं कुर्वतः तव यत् भवति, तत् श्रृणु --

।।९.२८।। --

शुभाशुभफलैः वं शुभाशुभे इष्टानिष्टे फले येषां तानि शुभाशुभफलानि कर्माणि तैः शुभाशुभफलैः कर्मबन्धनैः कर्माण्येव बन्धनानि कर्मबन्धनानि तैः कर्मबन्धनैः वं मदर्पणं कुर्वन् मोक्ष्यसे। सोऽयं संन्यासयोगो नाम, संन्यासश्च असौ मत्समर्पणतया कर्मत्वात् योगश्च असौ इति, तेन संन्यासयोगेन युक्तः आत्मा अन्तःकरणं यस्य तव सः त्वं संन्यासयोगयुक्तात्मा सन् विमुक्तः कर्मबन्धनैः जीवन्नेव पतिते चास्मिन् शरीरे माम् उपैष्यसि आगमिष्यसि।।

रागद्वेषवान् तर्हि भगवान्, यतो भक्तान् अनुगृह्णाति, न इतरान् इति। तत् न --

।।९.२९।। --

समः तुल्यः अहं सर्वभूतेषु। न मे द्वेष्यः अस्ति न प्रियः। अग्निवत् अहम् -- दूरस्थानां यथा अग्निः शीतं न अपनयति, समीपम् उपसर्पतां अपनयति; तथा अहं भक्तान् अनुगृह्णामि, न इतरान्। ये भजन्ति तु माम् ईश्वरं भक्त्या मयि ते -- स्वभावत व, न मम रागनिमित्तम् मयि वर्तन्ते। तेषु च अपि अहं स्वभावत व वर्ते, न इतरेषु। न तावता तेषु द्वेषो मम्।।

श्रृणु मद्भक्तेर्माहात्म्यम् --

।।९.३०।। --

अपि चेत् यद्यपि सुदुराचारः सुष्ठु दुराचारः अतीव कुत्सिताचारोऽपि भजते माम् अनन्यभाक् अनन्यभक्तिः सन्, साधुरेव सम्यग्वृत्त व सः मन्तव्यः ज्ञातव्यः; सम्यक् यथावत् व्यवसितो हि सः, यस्मात् साधुनिश्चयः सः।।

उत्सृज्य च बाह्यां दुराचारताम् अन्तः सम्यग्व्यवसायसामर्थ्यात् --

।।९.३१।। --

क्षिप्रं शीघ्रं भवति धर्मात्मा धर्मचित्तः व। शश्वत् नित्यं शान्तिं च उपशमं निगच्छति प्राप्नोति। श्रृणु परमार्थम्, कौन्तेय प्रतिजानीहि निश्चितां प्रतिज्ञां कुरु, न मे मम भक्तः मयि समर्पितान्तरात्मा मद्भक्तः न प्रणश्यति इति।।

किञ्च --

।।९.३२।। --

मां हि यस्मात् पार्थ व्यपाश्रित्य माम् आश्रयत्वेन गृहीत्वा येऽपि स्युः भवेयुः पापयोनयः पापा योनिः येषां ते पापयोनयः पापजन्मानः। के ते इति, आह -- स्त्रियः वैश्याः तथा शूद्राः तेऽपि यान्ति गच्छन्ति परां प्रकृष्टां गतिम्।।

।।९.३३।। --

किं पुनः ब्राह्मणाः पुण्याः पुण्ययोनयः भक्ताः राजर्षयः तथा राजानश्च ते

षयश्च इति राजर्षयः। यतः वम्, अतः अनित्यं क्षणभङ्गुरम् असुखं च सुखवर्जितम् इमं लोकं मनुष्यलोकं प्राप्य पुरुषार्थसाधनं दुर्लभं मनुष्यत्वं लब्ध्वा भजस्व सेवस्व माम्।।

कथम् --

।।९.३४।। --

मयि वासुदेवे मनः यस्य स त्वं मन्मनाः भव तथा मद्भक्तः भव मद्याजी मद्यजनशीलः भव। माम् व च नमस्कुरु। माम् व ईश्वरम् ष्यसि आगमिष्यसि युक्त्वा समाधाय चित्तम्। वम् आत्मानम्, अहं हि सर्वेषां भूतानाम् आत्मा, परा च गतिः, परम् अयनम्, तं माम् वंभूतम्, ष्यसि इति अतीतेन संबन्धः, मत्परायणः सन् इत्यर्थः।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोवन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
नवमोऽध्यायः।।

BHAGAVADGITA
Sanskrit Commentary - Sri Sankaracharya
Chapter 10
DV

।।१०.१।। --

भूयः व भूयः पुनः हे महाबाहो श्रृणु मे मदीयं परमं प्रकृष्टं निरतिशयवस्तुनः प्रकाशकं वचः वाक्यं यत् परमं ते तुभ्यं प्रीयमाणाय -- मद्वचनात् प्रीयसे त्वम् अतीव अमृतमिव पिबन्, ततः -- वक्ष्यामि हितकाम्यया हितेच्छया।।

किमर्थम् अहं वक्ष्यामि इत्यत आह --

।।१०.२।। --

न मे विदुः न जानन्ति सुरगणाः ब्रह्मादयः। किं ते न विदुः? मम प्रभवं प्रभावं प्रभुशक्त्यतिशयम्, अथवा प्रभवं प्रभवनम् उत्पत्तिम्। नापि महर्षयः भृग्वादयः विदुः। कस्मात् ते न विदुरित्युच्यते -- अहम् आदिः कारणं हि यस्मात् देवानां महर्षीणां च सर्वशः सर्वप्रकारैः।।

किञ्च --

।।१०.३।। --

यः माम् अजम् अनादिं च, यस्मात् अहम् आदिः देवानां महर्षीणां च, न मम अन्यः आदिः विद्यते; अतः अहम् अजः अनादिश्च; अनादित्वम् अजत्वे हेतुः, तं माम् अजम् अनादिं च यः वेत्ति विजानाति लोकमहेश्वरं लोकानां महान्तम् ईश्वरं तुरीयम् अज्ञानतत्कार्यवर्जितम् असंमूढः संमोहवर्जितः सः मर्त्येषु मनुष्येषु, सर्वपापैः सर्वैः पापैः मतिपूर्वामतिपूर्वकृतैः प्रमुच्यते प्रमोक्ष्यते।।

इतश्चाहं महेश्वरो लोकानाम् --

।।१०.४।। --

बुद्धिः अन्तःकरणस्य सूक्ष्माद्यर्थावबोधनसामर्थ्यम्, तद्वन्तं बुद्धिमानिति हि वदन्ति। ज्ञानम् आत्मादिपदार्थानामवबोधः। असंमोहः प्रत्युत्पन्नेषु बोद्धव्येषु विवेकपूर्विका प्रवृत्तिः। क्षमा आक्रुष्टस्य ताडितस्य वा अविकृतचित्तता। सत्यं यथादृष्टस्य यथाश्रुतस्य च आत्मानुभवस्य परबुद्धिसंक्रान्तये तथैव उच्चार्यमाणा वाक् सत्यम् उच्यते। दमः बाह्येन्द्रियोपशमः। शमः अन्तःकरणस्य उपशमः। सुखम् आह्लादः। दुःखं संतापः। भवः उद्भवः। अभावः तद्विपर्ययः। भयं च त्रासः, अभयमेव च तद्विपरीतम्।।

।।१०.५।। --

अहिंसा अपीडा प्राणिनाम्। समता समचित्तता। तुष्टिः संतोषः पर्याप्तबुद्धिर्लाभेषु। तपः इन्द्रियसंयमपूर्वकं शरीरपीडनम्। दानं यथाशक्ति संविभागः। यशः धर्मनिमित्ता कीर्तिः। अयशस्तु अधर्मनिमित्ता अकीर्तिः। भवन्ति भावाः यथोक्ताः बुद्ध्यादयः भूतानां प्राणिनां मत्तः व ईश्वरात् पृथग्विधाः नानाविधाः स्वकर्मानुरूपेण।।

किञ्च --

।।१०.६।। --

महर्षयः सप्त भृग्वादयः पूर्वे अतीतकालसंबन्धिनः, चत्वारः मनवः तथा सावर्णा इति प्रसिद्धाः, ते च मद्भावाः मद्गतभावनाः वैष्णवेन सामर्थ्येन उपेताः, मानसाः मनसैव उत्पादिताः मया

जाताः उत्पन्नाः, येषां मनूनां महर्षीणां च सृष्टिः लोके इमाः स्थावरजङ्गमलक्षणाः प्रजाः।।

।।१०.७।। --

तां यथोक्तां विभूतिं विस्तारं योगं च युक्तिं च आत्मनः घटनम्, अथवा योगैश्वर्यसामर्थ्यं सर्वज्ञत्वं योगजं योगः उच्यते, मम मदीयं योगं यः वेत्ति तत्त्वतः तत्त्वेन यथावदित्येतत्, सः अविकम्पेन अप्रचलितेन योगेन सम्यग्दर्शनस्थैर्यलक्षणेन युज्यते संबध्यते। न अत्र संशयः न अस्मिन् अर्थे संशयः अस्ति।।

कीदृशेन अविकम्पेन योगेन युज्यते इत्युच्यते --

।।१०.८।। --

अहं परं ब्रह्म वासुदेवाख्यं सर्वस्य जगतः प्रभवः उत्पत्तिः। मत्तः व स्थितिनाशक्रियाफलोपभोगलक्षणं विक्रियारूपं सर्वं जगत् प्रवर्तते। इति वं मत्वा भजन्ते सेवन्ते मां बुधाः अवगतपरमार्थतत्त्वाः, भावसमन्विताः भावः भावना परमार्थतत्त्वाभिनिवेशः तेन समन्विताः संयुक्ताः इत्यर्थः।।

किञ्च --

।।१०.९।। --

मच्चित्ताः, मयि चित्तं येषां ते मच्चित्ताः, मद्गतप्राणाः मां गताः प्राप्ताः चक्षुरादयः प्राणाः येषां ते मद्गतप्राणाः, मयि उपसंहृतकरणाः इत्यर्थः। अथवा, मद्गतप्राणाः मद्गतजीवनाः इत्येतत्।

बोधयन्तः अवगमयन्तः परस्परम् अन्योन्यम्, कथयन्तश्च ज्ञानबलवीर्यादिधर्मैः विशिष्टं माम्, तुष्यन्ति च परितोषम् उपयान्ति च रमन्ति च रतिं च प्राप्नुवन्ति प्रियसंगत्येव।।

ये यथोक्तैः प्रकारैः भजन्ते मां भक्ताः सन्तः --

।।१०.१०।। --

तेषां सततयुक्तानां नित्याभियुक्तानां निवृत्तसर्वबाह्यैषणानां भजतां सेवमानानाम्। किम् अर्थित्वादिना कारणेन? नेत्याह -- प्रीतिपूर्वकं प्रीतिः स्नेहः तत्पूर्वकं मां भजतामित्यर्थः। ददामि प्रयच्छामि बुद्धियोगं बुद्धिः सम्यग्दर्शनं मत्तत्त्वविषयं तेन योगः बुद्धियोगः तं बुद्धियोगम्, येन बुद्धियोगेन सम्यग्दर्शनलक्षणेन मां परमेश्वरम् आत्मभूतम् आत्मत्वेन उपयान्ति प्रतिपद्यन्ते। के? ते ये मच्चित्तत्वादिप्रकारैः मां भजन्ते।।

किमर्थम्, कस्य वा, त्वत्प्राप्तिप्रतिबन्धहेतोः नाशकं बुद्धियोगं तेषां त्वद्भक्तानां ददासि इत्यपेक्षायामाह --

।।१०.११।। --

तेषामेव कथं नु नाम श्रेयः स्यात् इति अनुकम्पार्थं दयाहेतोः अहम् अज्ञानजम् अविवेकतः जातं मिथ्याप्रत्ययलक्षणं मोहान्धकारं तमः नाशयामि, आत्मभावस्थः आत्मनः भावः अन्तःकरणाशयः तस्मिन्नेव स्थितः सन् ज्ञानदीपेन विवेकप्रत्ययरूपेण भक्तिप्रसादस्नेहाभिषिक्तेन मद्भावनाभिनिवेशवातेरितेन ब्रह्मचर्यादिसाधनसंस्कारवत्प्रज्ञावर्तिना विरक्तान्तःकरणाधारेण विषयव्यावृत्तचित्तरागद्वेषाकलुषितनिवातापवरकस्थेन नित्यप्रवृत्तैकाग्र्यध्यानजनितसम्यग्दर्शनभास्वता ज्ञानदीपेनेत्यर्थः।।

यथोक्तां भगवतः विभूतिं योगं च श्रुत्वा अर्जन उवाच --

अर्जन उवाच --

।।१०.१२।। --

परं ब्रह्म परमात्मा परं धाम परं तेजः पवित्रं पावनं परमं प्रकृष्टं भवान्। पुरुषं शाश्वतं नित्यं दिव्यं दिवि भवम् आदिदेवं सर्वदेवानाम् आदौ भवम् आदिदेवम् अजं विभुं विभवनशीलम्।।

ईदृशम् --

।।१०.१३।। --

आहुः कथयन्ति त्वाम्

षयः वसिष्ठादयः सर्वे देवर्षिः नारदः तथा। असितः देवलोऽपि वमेवाह, व्यासश्च, स्वयं चैव त्वं च ब्रवीषि मे।।

।।१०.१४।। --

सर्वमेतत् यथोक्तम्

षिभिः त्वया च तत्

तं सत्यमेव मन्ये, यत् मां प्रति वदसि भाषसे हे केशव। न हि ते तव भगवन्
व्यक्तिं प्रभवं विदुः न देवाः, न दानवाः।।

यतः त्वं देवादीनाम् आदिः, अतः --

।।१०.१५।। --
स्वयमेव आत्मना आत्मानं वेत्थ जानासि त्वं निरतिशयज्ञानैश्वर्यबलादिशक्तिमन्तम् ईश्वरं पुरुषोत्तम। भूतानि भावयतीति भूतभावनः, हे भूतभावन। भूतेश भूतानाम् ईशितः। हे देवदेव जगत्पते।।

।।१०.१६।। --
वक्तुं कथयितुम् अर्हसि अशेषेण। दिव्याः हि आत्मविभूतयः। आत्मनो विभूतयो याः ताः वक्तुम् अर्हसि। याभिः विभूतिभिः आत्मनो माहात्म्यविस्तरैः इमान् लोकान् त्वं व्याप्य तिष्ठसि।।

।।१०.१७।। --
कथं विद्यां विजानीयाम् अहं हे योगिन् त्वां सदा परिचिन्तयन्। केषु केषु च भावेषु वस्तुषु चिन्त्यः असि ध्येयः असि भगवन् मया।।

।।१०.१८।। --

विस्तरेण आत्मनः योगं योगैश्वर्यशक्तिविशेषं विभूतिं च विस्तरं ध्येयपदार्थानां हे जनार्दन, अर्दतेः गतिकर्मणः रूपम्, असुराणां देवप्रतिपक्षभूतानां जनानां नरकादिगमयितृत्वात् जनार्दनः अभ्युदयनिःश्रेयसपुरुषार्थप्रयोजनं सर्वैः जनैः याच्यते इति वा। भूयः पूर्वम् उक्तमपि कथय; तृप्तिः परितोषः हि यस्मात् नास्ति मे मम शृण्वतः त्वन्मुखनिःसृतवाक्यामृतम्।।

श्रीभगवानुवाच --

।।१०.१९।। --

हन्त इदानीं ते तव दिव्याः दिवि भवाः आत्मविभूतयः आत्मनः मम विभूतयः याः ताः कथयिष्यामि इत्येतत्। प्राधान्यतः यत्र यत्र प्रधाना या या विभूतिः तां तां प्रधानां प्राधान्यतः कथयिष्यामि अहं कुरुश्रेष्ठ। अशेषतस्तु वर्षशतेनापि न शक्या वक्तुम्, यतः नास्ति अन्तः विस्तरस्य मे मम विभूतीनाम् इत्यर्थः।।

तत्र प्रथममेव तावत् शृणु --

।।१०.२०।। --

अहम् आत्मा प्रत्यगात्मा गुडाकेश, गुडाका निद्रा तस्याः ईशः गुडाकेशः, जितनिद्रः इत्यर्थः; घनकेश इति वा। सर्वभूताशयस्थितः सर्वेषां भूतानाम् आशये अन्तर्हृदि स्थितः अहम् आत्मा प्रत्यगात्मा नित्यं ध्येयः। तदशक्तेन च उत्तरेषु भावेषु चिन्त्यः अहम्; यस्मात् अहम् व आदिः भूतानां कारणं तथा मध्यं च स्थितिः अन्तः प्रलय च।।

एवं च ध्येयोऽहम् --

।।१०.२१।। --

आदित्यानां द्वादशानां विष्णुः नाम आदित्यः अहम्। ज्योतिषां रविः प्रकाशयितृणाम् अंशुमान् रश्मिमान्। मरीचिः नाम मरुतां मरुद्देवताभेदानाम् अस्मि। नक्षत्राणाम् अहं शशी चन्द्रमाः।।

।।१०.२२।। --

वेदानां मध्ये सामवेदः अस्मि। देवानां रुद्रादित्यादीनां वासवः इन्द्रः अस्मि। इन्द्रियाणाम् कादशानां चक्षुरादीनां मनश्च अस्मि संकल्पविकल्पात्मकं मनश्चास्मि। भूतानाम् अस्मि चेतना कार्यकरणसंघाते नित्याभिव्यक्ता बुद्धिवृत्तिः चेतना।।

।।१०.२३।। --

रुद्राणाम् कादशानां शंकरश्च अस्मि। वित्तेशः कुबेरः यक्षरक्षसां यक्षाणां रक्षसां च। वसूनाम् अष्टानां पावकश्च अस्मि अग्निः। मेरुः शिखरिणां शिखरवताम् अहम्।।

।।१०.२४।। --

पुरोधसां च राजपुरोहितानां च मुख्यं प्रधानं मां विद्धि हे पार्थ बृहस्पतिम्। स हि इन्द्रस्येति मुख्यः स्यात् पुरोधाः। सेनानीनां सेनापतीनाम् अहं स्कन्दः देवसेनापतिः। सरसां यानि देवखातानि सरांसि तेषां सरसां सागरः अस्मि भवामि।।

।।१०.२५।। --

महर्षीणां भृगुः अहम्। गिरां वाचां पदलक्षणानाम् कम् अक्षरम् ओंकारः अस्मि। यज्ञानां जपयज्ञः अस्मि, स्थावराणां स्थितिमतां हिमालयः।।

।।१०.२६।। --

अश्वत्थः सर्ववृक्षाणाम्, देवर्षीणां च नारदः देवाः व सन्तः

षित्वं प्राप्ताः मन्त्रदर्शित्वात्ते देवर्षयः, तेषां नारदः अस्मि। गन्धर्वाणां चित्ररथः नाम गन्धर्वः अस्मि। सिद्धानां जन्मनैव धर्मज्ञानवैराग्यैश्वर्यातिशयं प्राप्तानां कपिलो मुनिः।।

।।१०.२७।। --

उच्चैःश्रवसम् अश्वानां उच्चैःश्रवाः नाम अश्वराजः तं मां विद्धि विजानीहि अमृतोद्भवम् अमृतनिमित्तमथनोद्भवम्।`रावतम् इरावत्याः अपत्यं गजेन्द्राणां हस्तीश्वराणाम्, तम् 'मां विद्धि' इति अनुवर्तते। नराणां च मनुष्याणां नराधिपं राजानं मां विद्धि जानीहि।।

।।१०.२८।। --

आयुधानाम् अहं वज्रं दधीच्यस्थिसंभवम्। धेनूनां दोग्ध्रीणाम् अस्मि कामधुक् वसिष्ठस्य सर्वकामानां दोग्ध्री, सामान्या वा कामधुक्। प्रजनः प्रजनयिता अस्मि कंदर्पः कामः सर्पाणां सर्पभेदानाम् अस्मि वासुकिः सर्पराजः।।

।।१०.२९।। --

अनन्तश्च अस्मि नागानां नागविशेषाणां नागराजश्च अस्मि। वरुणो यादसाम् अहम् अब्देवतानां राजा अहम्। पितॄणाम् अर्यमा नाम पितृराज च अस्मि। यमः संयमतां संयमनं कुर्वताम् अहम्।।

।।१०.३०।। --

प्रह्लादो नाम च अस्मि दैत्याना दितिवंश्यानाम्। कालः कलयतां कलनं गणनं कुर्वताम् अहम्। मृगाणां च मृगेन्द्रः सिंहो व्याघ्रो वा अहम्। वैनतेयश्च गरुत्मान् विनतासुतः पक्षिणां पतत्रिणाम्।।

।।१०.३१।। --

पवनः वायुः पवतां पावयितृणाम् अस्मि। रामः शस्त्रभृताम् अहं शस्त्राणां धारयितृणां दाशरथिः रामः अहम्। झषाणां मत्स्यादीनां मकरः नाम जातिविशेषः अहम्। स्रोतसां स्रवन्तीनाम् अस्मि जाह्नवी गङ्गा।।

।।१०.३२।। --

सर्गाणां सृष्टीनाम् आदिः अन्तश्च मध्यं चैव अहम् उत्पत्तिस्थितिलयाः अहम् अर्जुन। भूतानां जीवाधिष्ठितानामेव आदिः अन्तश्च इत्याद्युक्तम् उपक्रमे, इह तु सर्वस्यैव सर्गमात्रस्य इति विशेषः। अध्यात्मविद्या विद्यानां मोक्षार्थत्वात् प्रधानमस्मि। वादः अर्थनिर्णयहेतुत्वात् प्रवदतां प्रधानम्, अतः सः अहम् अस्मि। प्रवक्तृद्वारेण वदनभेदानामेव वादजल्पवितण्डानाम् इह ग्रहणं प्रवदताम् इति।।

।।१०.३३।। --

अक्षराणां वर्णानाम् अकारः वर्णः अस्मि। द्वन्द्वः समासः अस्मि सामासिकस्य च समाससमूहस्य। किञ्च अहमेव अक्षयः अक्षीणः कालः प्रसिद्धः क्षणाद्याख्यः, अथवा परमेश्वरः कालस्यापि कालः अस्मि। धाता अहं कर्मफलस्य विधाता सर्वजगतः विश्वतोमुखः सर्वतोमुखः।।

।।१०.३४।। --

मृत्युः द्विविधः धनादिहरः प्राणहर च; तत्र यः प्राणहरः, स सर्वहरः उच्यते; सः अहम् इत्यर्थः। अथवा, परः ईश्वरः प्रलये सर्वहरणात् सर्वहरः, सः अहम्। उद्भवः उत्कर्षः अभ्युदयः तत्प्राप्तिहेतुश्च अहम्। केषाम्? भविष्यतां भाविकल्याणानाम्, उत्कर्षप्राप्तियोग्यानाम् इत्यर्थः। कीर्तिः श्रीः वाक् च नारीणां स्मृतिः मेधा धृतिः क्षमा इत्येताः उत्तमाः स्त्रीणाम् अहम् अस्मि,

यासाम् आभासमात्रसंबन्धेनापि लोकः कृतार्थमात्मानं मन्यते।।

।।१०.३५।। --

बृहत्साम तथा साम्नां प्रधानमस्मि। गायत्री च्छन्दसाम् अहं गायत्र्यादिच्छन्दोविशिष्टानामृचां गायत्री

क् अहम् अस्मि इत्यर्थः। मासानां मार्गशीर्षः अहम्,

तूनां कुसुमाकरः वसन्तः।।

।।१०.३६।। --

द्यूतम् अक्षदेवनादिलक्षणं छलयतां छलस्य कर्तृणाम् अस्मि। तेजस्विनां तेजः अहम्। जयः अस्मि जेतृणाम्, व्यवसायः अस्मि व्यवसायिनाम्, सत्त्वं सत्त्ववतां सात्त्विकानाम् अहम्।।

।।१०.३७।। --

वृष्णीनां यादवानां वासुदेवः अस्मि अयमेव अहं त्वत्सखा। पाण्डवानां धनंजयः त्वमेव। मुनीनां मननशीलानां सर्वपदार्थज्ञानिनाम् अपि अहं व्यासः, कवीनां क्रान्तदर्शिनाम् उशना कविः अस्मि।।

।।१०.३८।। --

दण्डः दमयतां दमयितृणाम् अस्मि अदान्तानां दमनकारण्। नीतिः अस्मि जिगीषतां जेतुमिच्छताम्। मौनं चैव अस्मि गुह्यानां गोप्यानाम्। ज्ञानं ज्ञानवताम् अहम्।।

।।१०.३९।। --

यच्चापि सर्वभूतानां बीजं प्ररोहकारणम्, तत् अहम् अर्जुन। प्रकरणोपसंहारार्थं विभूतिसंक्षेपमाह -- न तत् अस्ति भूतं चराचरं चरम् अचरं वा, मया विना यत् स्यात् भवेत्। मया अपकृष्टं परित्यक्तं निरात्मकं शून्यं हि तत् स्यात्। अतः मदात्मकं सर्वमित्यर्थः।।

।।१०.४०।। --

न अन्तः अस्ति मम दिव्यानां विभूतीनां विस्तराणां परंतप। न हि ईश्वरस्य सर्वात्मनः दिव्यानां विभूतीनाम् इयत्ता शक्या वक्तुं ज्ञातुं वा केनचित्। ष तु उद्देशतः कदेशेन प्रोक्तः विभूतेः विस्तरः मया।।

।।१०.४१।। --

यद्यत् लोके विभूतिमत् विभूतियुक्तं सत्त्वं वस्तु श्रीमत् ऊर्जितमेव वा श्रीर्लक्ष्मीः तया सहितम् उत्साहोपेतं वा, तत्तदेव अवगच्छ त्वं जानीहि मम ईश्वरस्य तेजोंऽशसंभवं तेजसः अंशः कदेशः

संभवः यस्य तत् तेजोंऽशसंभवमिति अवगच्छ त्वम्।।

अथवा बहुना तेन वमादिना किं ज्ञातेन तव अर्जुन स्यात् सावशेषेण। अशेषतः त्वम् उच्यमानम् अर्थं श्रृणु -- विष्टभ्य विशेषतः स्तम्भनं दृढं कृत्वा इदं कृत्स्नं जगत् कांशेन कावयवेन कपादेन, सर्वभूतस्वरूपेण इत्येतत्; तथा च मन्त्रवर्णः -- 'पादोऽस्य विश्वा भूतानि (तै० आर० ३।१२)' इति; स्थितः अहम् इति।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
दशमोऽध्यायः।।
प

।।१०.४२।। --
अथवा बहुना तेन वमादिना किं ज्ञातेन तव अर्जुन स्यात् सावशेषेण। अशेषतः त्वम् उच्यमानम् अर्थं श्रृणु -- विष्टभ्य विशेषतः स्तम्भनं दृढं कृत्वा इदं कृत्स्नं जगत् कांशेन कावयवेन कपादेन, सर्वभूतस्वरूपेण इत्येतत्; तथा च मन्त्रवर्णः -- 'पादोऽस्य विश्वा भूतानि (तै० आर० ३।१२)' इति; स्थितः अहम् इति।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
दशमोऽध्यायः।।

BHAGAVADGITA
Sanskrit Commentary - Sri Sankaracharya
Chapter 11
DV

।।११.१।। --

मदनुग्रहाय ममानुग्रहार्थं परमं निरतिशयं गुह्यं गोप्यम् अध्यात्मसंज्ञितम् आत्मानात्मविवेकविषयं यत् त्वया उक्तं वचः वाक्यं तेन ते वचसा मोहः अयं विगतः मम, अविवेकबुद्धिः अपगता इत्यर्थः।।

किञ्च --

।।११.२।। --

भवः उत्पत्तिः अप्ययः प्रलयः तौ भवाप्ययौ हि भूतानां श्रुतौ विस्तरशः मया, न संक्षेपतः, त्वत्तः त्वत्सकाशात्, कमलपत्राक्ष कमलस्य पत्रं कमलपत्रं तद्वत् अक्षिणी यस्य तव स त्वं कमलपत्राक्षः हे कमलपत्राक्ष, महात्मनः भावः माहात्म्यमपि च अव्ययम् अक्षयम् 'श्रुतम्' इति अनुवर्तते।।

।।११.३।। --

वमेतत् नान्यथा यथा येन प्रकारेण आत्थ कथयसि त्वम् आत्मानं परमेश्वर। तथापि द्रष्टुमिच्छामि ते तव ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः संपन्नम्`श्वरं वैष्णवं रूपं पुरुषोत्तम।।

।।११.४।। --

मन्यसे चिन्तयसि यदि मया अर्जुनेन तत् शक्यं द्रष्टुम् इति प्रभो, स्वामिन्, योगेश्वर योगिनो योगाः, तेषां ईश्वरः योगेश्वरः, हे योगेश्वर। यस्मात् अहम् अतीव अर्थी द्रष्टुम्, ततः तस्मात् मे मदर्थं दर्शय त्वम् आत्मानम् अव्ययम्।।

एवं चोदितः अर्जुनेन श्री भगवान् उवाच --

।।११.५।। --

पश्य मे पार्थ, रूपाणि शतशः अथ सहस्रशः, अनेकशः इत्यर्थः। तानि च नानाविधानि अनेकप्रकाराणि दिवि भवानि दिव्यानि अप्राकृतानि नानावर्णाकृतीनि च नाना विलक्षणाः नीलपीतादिप्रकाराः वर्णाः तथा आकृतयश्च अवयवसंस्थानविशेषाः येषां रूपाणां तानि नानावर्णाकृतीनि च।।

।।११.६।। -- -

पश्य आदित्यान् द्वादश, वसून् अष्टौ, रुद्रान् कादश, अश्विनौ द्वौ, मरुतः सप्त सप्त गणाः ये तान्। तथा च बहूनि अन्यान्यपि अदृष्टपूर्वाणि मनुष्यलोके त्वया,त्वत्तः अन्येन वा केनचित्, पश्य आश्चर्याणि अद्भुतानि भारत।।

न केवलम् तावदेव --

।।११.७।। --

इह कस्थम् कस्मिन्नेव स्थितं जगत् कृत्स्नं समस्तं पश्य अद्य इदानीं सचराचरं सह चरेण अचरेण च वर्तते मम देहे गुडाकेश। यच्च अन्यत् जयपराजयादि, यत् शङ्कसे, 'यद्वा जयेम यदि वा नो जयेयुः (गीता २।६) ' इति यत् अवोचः, तदपि द्रष्टुं यदि इच्छसि।।

किन्तु --

।।११.८।। --

न तु मां विश्वरूपधरं शक्यसे द्रष्टुम् अनेनैव प्राकृतेन स्वचक्षुषा स्वकीयेन चक्षुषा। येन तु शक्यसे द्रष्टुं दिव्येन, तत् दिव्यं ददामि ते तुभ्यं चक्षुः। तेन पश्य मे योगम्`श्वरम् ईश्वरस्य मम`श्वरं योगं योगशक्त्यतिशयम् इत्यर्थः।।

संजय उवाच --

।।११.९।। --

वं यथोक्तप्रकारेण उक्त्वा ततः अनन्तरं राजन् धृतराष्ट्र, महायोगेश्वरः महांश्च असौ योगेश्वरश्च हरिः नारायणः दर्शयामास दर्शितवान् पार्थाय पृथासुताय परमं रूपं विश्वरूपम् `श्वरम्।।

।।११.१०।। --

अनेकवक्त्रनयनम् अनेकानि वक्त्राणि नयनानि च यस्मिन् रूपे तत् अनेकवक्त्रनयनम्, अनेकाद्भुतदर्शनम् अनेकानि अद्भुतानि विस्मापकानि दर्शनानि यस्मिन् रूपे तत् अनेकाद्भुतदर्शनं रूपम्, तथा अनेकदिव्याभरणम् अनेकानि दिव्यानि आभरणानि यस्मिन् तत् अनेकदिव्याभरणम्, तथा दिव्यानेकोद्यतायुधं दिव्यानि अनेकानि अस्यादीनि उद्यतानि आयुधानि यस्मिन् तत् दिव्यानेकोद्यतायुधम्, 'दर्शयामास' इति पूर्वेण संबन्धः।।

किञ्च --

।।११.११।। --

दिव्यमाल्याम्बरधरं दिव्यानि माल्यानि पुष्पाणि अम्बराणि वस्त्राणि च ध्रियन्ते येन ईश्वरेण तं दिव्यमाल्याम्बरधरम्, दिव्यगन्धानुलेपनं दिव्यं गन्धानुलेपनं यस्य तं दिव्यगन्धानुलेपनम्, सर्वाश्चर्यमयं सर्वाश्चर्यप्रायं देवम् अनन्तं न अस्य अन्तः अस्ति इति अनन्तः तम्, विश्वतोमुखं सर्वतोमुखं सर्वभूतात्मभूतत्वात्, तं दर्शयामास। 'अर्जुनः ददर्श' इति वा अध्याह्रियते।।

या पुनर्भगवतः विश्वरूपस्य भाः, तस्या उपमा उच्यते --

।।११.१२।। --

दिवि अन्तरिक्षे तृतीयस्यां वा दिवि सूर्याणां सहस्रं सूर्यसहस्रं तस्य युगपदुत्थितस्य सूर्यसहस्रस्य या युगपदुत्थिता भाः, सा यदि, सदृशी स्यात् तस्य महात्मनः विश्वरूपस्यैव भासः। यदि वा न स्यात्, ततः विश्वरूपस्यैव भाः अतिरिच्यते इत्यभिप्रायः।।

किञ्च --

।।११.१३।। --

तत्र तस्मिन् विश्वरूपे कस्मिन् स्थितम् कस्थं जगत् कृत्स्नं प्रविभक्तम् अनेकधा देवपितृमनुष्यादिभेदैः अपश्यत् दृष्टवान् देवदेवस्य हरेः शरीरे पाण्डवः अर्जुनः तदा।।

।।११.१४।। --

ततः तं दृष्ट्वा सः विस्मयेन आविष्टः विस्मयाविष्टः हृष्टानि रोमाणि यस्य सः अयं हृष्टरोमा च अभवत् धनंजयः। प्रणम्य प्रकर्षेण नमनं कृत्वा प्रह्वीभूतः सन् शिरसा देवं विश्वरूपधरं कृताञ्जलिः नमस्कारार्थं संपुटीकृतहस्तः सन् अभाषत उक्तवान्।।

कथम्? यत् त्वया दर्शितं विश्वरूपम्, तत् अहं पश्यामीति स्वानुभवमाविष्कुर्वन् अर्जुन उवाच --

अर्जुन उवाच --

।।११.१५।। --

पश्यामि उपलभे हे देव, तव देहे देवान् सर्वान्, तथा भूतविशेषसंघान् भूतविशेषाणां स्थावरजङ्गमानां नानासंस्थानविशेषाणां संघाः भूतविशेषसंघाः तान्, किञ्च -- ब्रह्माणं चतुर्मुखम् ईशम् ईशितारं प्रजानां कमलासनस्थं पृथिवीपद्ममध्ये मेरुकर्णिकासनस्थमित्यर्थः,

षींश्च वसिष्ठादीन् सर्वान्, उरगांश्च वासुकिप्रभृतीन् दिव्यान् दिवि भवान्।।

।।११.१६।। --

अनेकबाहूदरवक्त्रनेत्रम् अनेके बाहवः उदराणि वक्त्राणि नेत्राणि च यस्य तव सः त्वम् अनेकबाहूदरवक्त्रनेत्रः तम् अनेकबाहूदरवक्त्रनेत्रम्। पश्यामि त्वा त्वां सर्वतः सर्वत्र अनन्तरूपम् अनन्तानि रूपाणि अस्य इति अनन्तरूपः तम् अनन्तरूपम्।

न अन्तम्, अन्तः अवसानम्, न मध्यम्, मध्यं नाम द्वयोः कोट्योः अन्तरम्, न पुनः तव आदिम् -- न देवस्य अन्तं पश्यामि, न मध्यं पश्यामि, न पुनः आदिं पश्यामि, हे विश्वेश्वर विश्वरूप।।

किञ्च --

।।११.१७।। --

किरीटिनं किरीटं नाम शिरोभूषणविशेषः तत् यस्य अस्ति सः किरीटी तं किरीटिनम्, तथा गदिनं गदा अस्य विद्यते इति गदी तं गदिनम्, तथा चक्रिणं चक्रम् अस्य अस्तीति चक्री तं चक्रिणं च, तेजोराशिं तेजःपुञ्जं सर्वतोदीप्तिमन्तं सर्वतोदीप्तिः अस्य अस्तीति सर्वतोदीप्तिमान्, तं सर्वतोदीप्तिमन्तं पश्यामि त्वां दुर्निरीक्ष्यं दुःखेन निरीक्ष्यः दुर्निरीक्ष्यः तं दुर्निरीक्ष्यं समन्तात् समन्ततः सर्वत्र दीप्तानलार्कद्युतिम् अनलश्च अर्कश्च अनलार्कौ दीप्तौ अनलार्कौ दीप्तानलार्कौ तयोः दीप्तानलार्कयोः द्युतिरिव द्युतिः तेजः यस्य तव स त्वं दीप्तानलार्कद्युतिः, तं त्वां दीप्तानलार्कद्युतिम् अप्रमेयं न प्रमेयम् अशक्यपरिच्छेदम् इत्येतत्।।

इत व ते योगशक्तिदर्शनात् अनुमिनोमि --

।।११.१८।। --

त्वम् अक्षरं न क्षरतीति, परमं ब्रह्म वेदितव्यं ज्ञातव्यं मुमुक्षुभिः। त्वम् अस्य विश्वस्य समस्तस्य जगतः परं प्रकृष्टं निधानं निधीयते अस्मिन्निति निधानं परः आश्रयः इत्यर्थः। किञ्च, त्वम् अव्ययः न तव व्ययो विद्यते इति अव्ययः, शाश्वतधर्मगोप्ता शश्वद्भवः शाश्वतः नित्यः धर्मः तस्य गोप्ता शाश्वतधर्मगोप्ता। सनातनः चिरंतनः त्वं पुरुषः परमः मतः अभिप्रेतः मे मम।।

किञ्च --

।।११.१९।। --

अनादिमध्यान्तम् आदिश्च मध्यं च अन्तश्च न विद्यते यस्य सः अयम् अनादिमध्यान्तः तं त्वां अनादिमध्यान्तम्, अनन्तवीर्यं न तव वीर्यस्य अन्तः अस्ति इति अनन्तवीर्यः तं त्वाम् अनन्तवीर्यम्, तथा अनन्तबाहुम् अनन्ताः बाहवः यस्य तव सः त्वम्, अनन्तबाहुः तं त्वाम् अनन्तबाहुम्, शशिसूर्यनेत्रं शशिसूर्यौ नेत्रे यस्य तव सः त्वं शशिसूर्यनेत्रः तं त्वां शशिसूर्यनेत्रं चन्द्रादित्यनयनम्, पश्यामि त्वां दीप्तहुताशवक्त्रं दीप्तश्च असौ हुताशश्च वक्त्रं यस्य तव सः त्वं दीप्तहुताशवक्त्रः तं त्वां दीप्तहुताशवक्त्रम्, स्वतेजसा विश्वम् इदं समस्तं तपन्तम्।।

।।११.२०।। --

द्यावापृथिव्योः इदम् अन्तरं हि अन्तरिक्षं व्याप्तं त्वया केन विश्वरूपधरेण दिशश्च सर्वाः व्याप्ताः। दृष्ट्वा उपलभ्य अद्भुतं विस्मापकं रूपम् इदं तव उग्रं क्रूरं लोकानां त्रयं लोकत्रयं प्रव्यथितं भीतं प्रचलितं वा हे महात्मन् अक्षुद्रस्वभाव।।

अथ अधुना पुरा 'यद्वा जयेम यदि वा नो जयेयुः (गीता २।६)' इति अर्जुनस्य यः संशयः आसीत्, तन्निर्णयाय पाण्डवजयम्`कान्तिकं दर्शयामि इति प्रवृत्तो भगवान्। तं पश्यन् आह --

किञ्च --

।।११.२१।। --

अमी हि युध्यमाना योद्धारः त्वा त्वां सुरसंघाः ये अत्र भूभारावताराय अवतीर्णाः वस्वादिदेवसंघाः मनुष्यसंस्थानाः त्वां विशन्ति प्रविशन्तः दृश्यन्ते। तत्र केचित् भीताः प्राञ्जलयः सन्तो गृणन्ति स्तुवन्ति त्वाम् अन्ये पलायनेऽपि अशक्ताः सन्तः। युद्धे प्रत्युपस्थिते उत्पातादिनिमित्तानि उपलक्ष्य स्वस्ति अस्तु जगतः इति उक्त्वा महर्षिसिद्धसंघाः महर्षीणां सिद्धानां च संघाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः संपूर्णाभिः।।

किं चान्यत् --

।।११.२२।। --

रुद्रादित्याः वसवो ये च साध्याः रुद्रादयः गणाः विश्वेदेवाः अश्विनौ च देवौ मरुतश्च ऊष्मपाश्च पितरः, गन्धर्वयक्षासुरसिद्धसंघाः गन्धर्वाः हाहाहूहूप्रभृतयः यक्षाः कुबेरप्रभृतयः असुराः विरोचनप्रभृतयः सिद्धाः कपिलादयः तेषां संघाः गन्धर्वयक्षासुरसिद्धसंघाः, ते वीक्षन्ते पश्यन्ति त्वा त्वां विस्मिताः विस्मयमापन्नाः सन्तः ते व सर्वे।।

यस्मात् --

।।११.२३।। --

रूपं महत् अतिप्रमाणं ते तव बहुवक्त्रनेत्रं बहूनि वक्त्राणि मुखानि नेत्राणि चक्षूंषि च यस्मिन् तत् रूपं बहुवक्त्रनेत्रम्, हे महाबाहो, बहुबाहूरुपादं बहवो बाहवः ऊरवः पादाश्च यस्मिन् रूपे तत् बहुबाहूरुपादम्, किञ्च, बहूदरं बहूनि उदराणि यस्मिन्निति बहूदरम्, बहुदंष्ट्राकरालं बहवीभिः दंष्ट्राभिः करालं विकृतं तत् बहुदंष्ट्राकरालम्, दृष्ट्वा रूपम् ईदृशं लोकाः लौकिकाः प्राणिनः प्रव्यथिताः प्रचलिताः भयेन; तथा अहमपि।।

तत्रेदं कारणम् --

।।११.२४।। --

नभःस्पृशं द्युस्पर्शम् इत्यर्थः, दीप्तं प्रज्वलितम्, अनेकवर्णम् अनेके वर्णाः भयंकराः नानासंस्थानाः यस्मिन् त्वयि तं त्वाम् अनेकवर्णम्, व्यात्ताननं व्यात्तानि विवृतानि आननानि मुखानि यस्मिन् त्वयि तं त्वां व्यात्ताननम्, दीप्तविशालनेत्रं दीप्तानि प्रज्वलितानि विशालानि विस्तीर्णानि नेत्राणि यस्मिन् त्वयि तं त्वां दीप्तविशालनेत्रं दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा प्रव्यथितः प्रभीतः अन्तरात्मा मनः यस्य मम सः अहं प्रव्यथितान्तरात्मा सन् धृतिं धैर्यं न विन्दामि न लभे शमं च उपशमनं मनस्तुष्टिं हे विष्णो।।

कस्मात् --

।।११.२५।। --

दंष्ट्राकरालानि दंष्ट्राभिः करालानि विकृतानि ते तव मुखानि दृष्ट्वैव उपलभ्य कालानलसंनिभानि प्रलयकाले लोकानां दाहकः अग्निः कालानलः तत्सदृशानि कालानलसंनिभानि मुखानि दृष्ट्वेत्येतत्। दिशः पूर्वापरविवेकेन न जाने दिङ्मूढो जातः अस्मि।

अतः न लभे च न उपलभे च शर्म सुखम्। अतः प्रसीद प्रसन्नो भव हे देवेश, जगन्निवास।।

येभ्यो मम पराजयाशङ्का या आसीत् सा च अपगता।

यतः --

।।११.२६।। --

अमी च त्वां धृतराष्ट्रस्य पुत्राः दुर्योधनप्रभृतयः -- 'त्वरमाणाः विशन्ति ' इति व्यवहितेन संबन्धः -- सर्वे सहैव सहिताः अवनिपालसंघैः अवनिं पृथ्वीं पालयन्तीति अवनिपालाः तेषां संघैः, किञ्च भीष्मो द्रोणः सूतपुत्रः कर्णः तथा असौ सह अस्मदीयैरपि धृष्टद्युम्नप्रभृतिभिः योधमुख्यैः योधानां मुख्यैः प्रधानैः सह।।

किञ्च --

।।११.२७।। --

वक्त्राणि मुखानि ते तव त्वरमाणाः त्वरायुक्ताः सन्तः विशन्ति, किंविशिष्टानि मुखानि? दंष्ट्राकरालानि भयानकानि भयंकराणि। किञ्च, केचित् मुखानि प्रविष्टानां मध्ये विलग्नाः दशनान्तरेषु मांसमिव भक्षितं संदृश्यन्ते उपलभ्यन्ते चूर्णितैः चूर्णीकृतैः उत्तमाङ्गैः शिरोभिः।।

कथं प्रविशन्ति मुखानि इत्याह --

।।११.२८।। --

यथा नदीनां स्रवन्तीनां बहवः अनेके अम्बूनां वेगाः अम्बुवेगाः त्वराविशेषाः समुद्रमेव अभिमुखाः

प्रतिमुखाः द्रवन्ति प्रविशन्ति, तथा तद्वत, तव अमी भीष्मादयः नरलोकवीराः मनुष्यलोके शूराः विशन्ति वक्त्राणि अभिविज्वलन्ति प्रकाशमानानि।।

ते किमर्थं प्रविशन्ति कथं च इत्याह --

।।११.२९।। --

यथा प्रदीप्तं ज्वलनम् अग्निं पतङ्गाः पक्षिणः विशन्ति नाशाय विनाशाय समृद्धवेगाः समृद्धः उद्भूतः वेगः गतिः येषां ते समृद्धवेगाः, तथैव नाशाय विशन्ति लोकाः प्राणिनः तवापि वक्त्राणि समृद्धवेगाः।।

त्वं पुनः --

।।११.३०।। --

लेलिह्यसे आस्वादयसि ग्रसमानः अन्तः प्रवेशयन् समन्तात् समन्ततः लोकान् समग्रान् समस्तान् वदनैः वक्त्रैः ज्वलद्भिः दीप्यमानैः तेजोभिः आपूर्य संव्याप्य जगत् समग्रं सह अग्रेण समस्तम् इत्येतत्। किञ्च, भासः दीप्तयः तव उग्राः क्रूराः प्रतपन्ति प्रतापं कुर्वन्ति हे विष्णो व्यापनशील।।

यतः वमुग्रस्वभावः, अतः --

।।११.३१।। --

आख्याहि कथय मे मह्यं कः भवान् उग्ररूपः क्रूराकारः, नमः अस्तु ते तुभ्यं हे देववर देवानां

प्रधान, प्रसीद प्रसादं कुरु। विज्ञातुं विशेषेण ज्ञातुम् इच्छामि भवन्तम् आद्यम् आदौ भवम् आद्यम्, न हि यस्मात् प्रजानामि तव त्वदीयां प्रवृत्तिं चेष्टाम्।।

श्रीभगवानुवाच --

।।११.३२।। --

कालः अस्मि लोकक्षयकृत् लोकानां क्षयं करोतीति लोकक्षयकृत् प्रवृद्धः वृद्धिं गतः। यदर्थं प्रवृद्धः तत् श्रृणु -- लोकान् समाहर्तुं संहर्तुम् इह अस्मिन् काले प्रवृत्तः।

तेऽपि विनापि त्वा त्वां न भविष्यन्ति भीष्मद्रोणकर्णप्रभृतयः सर्वे, येभ्यः तव आशङ्का, ये अवस्थिताः प्रत्यनीकेषु अनीकमनीकं प्रति प्रत्यनीकेषु प्रतिपक्षभूतेषु अनीकेषु योधाः योद्धारः।।

यस्मात् वम् --

।।११.३३।। --

तस्मात् त्वम् उत्तिष्ठ 'भीष्मप्रभृतयः अतिरथाः अजेयाः देवैरपि, अर्जुनेन जिताः' इति यशः लभस्व; केवलं पुण्यैः हि तत् प्राप्यते। जित्वा शत्रून् दुर्योधनप्रभृतीन् भुङ्क्ष्व राज्यं समृद्धम् असपत्नम् अकण्टकम्। मया व ते निहताः निश्चयेन हताः प्राणैः वियोजिताः पूर्वमेव। निमित्तमात्रं भव त्वं हे सव्यसाचिन्, सव्येन वामेनापि हस्तेन शराणां क्षेप्ता सव्यसाची इति उच्यते अर्जुनः।।

।।११.३४।। --

द्रोणं च, येषु येषु योधेषु अर्जुनस्य आशङ्का तांस्तान् व्यपदिशति भगवान्, मया हतानिति। तत्र द्रोणभीष्मयोः तावत् प्रसिद्धम् आशङ्काकारणम्। द्रोणस्तु धनुर्वेदाचार्यः दिव्यास्त्रसंपन्नः, आत्मनश्च विशेषतः गुरुः गरिष्ठः। भीष्मश्च स्वच्छन्दमृत्युः दिव्यास्त्रसंपन्नश्च परशुरामेण द्वन्द्वयुद्धम् अगमत्, न च पराजितः। तथा जयद्रथः, यस्य पिता तपः चरति 'मम पुत्रस्य शिरः भूमौ निपातयिष्यति यः, तस्यापि शिरः पतिष्यति' इति। कर्णोऽपि वासवदत्तया शक्त्या त्वमोघया संपन्नः सूर्यपुत्रः कानीनः यतः, अतः तन्नाम्नैव निर्देशः। मया हतान् त्वं जहि निमित्तमात्रेण। मा व्यथिष्ठाः तेभ्यः भयं मा कार्षीः। युध्यस्व जेतासि दुर्योधनप्रभृतीन् रणे युद्धे सपत्नान् शत्रून्।।

संजय उवाच --

।।११.३५।। -- -

तत् श्रुत्वा वचनं केशवस्य पूर्वोक्तं कृताञ्जलिः सन् वेपमानः कम्पमानः किरीटी नमस्कृत्वा, भूयः पुनः व आह उक्तवान् कृष्णं सगद्गदं भयाविष्टस्य दुःखाभिघातात् स्नेहाविष्टस्य च हर्षोद्भवात्, अश्रुपूर्णनेत्रत्वे सति श्लेष्मणा कण्ठावरोधः; ततश्च वाचः अपाटवं मन्दशब्दत्वं यत् स गद्गदः तेन सह वर्तत इति सगद्गदं वचनम् आह इति वचनक्रियाविशेषणम् तत्। भीतभीतः पुनः पुनः भयाविष्टचेताः सन् प्रणम्य प्रह्वः भूत्वा, 'आह' इति व्यवहितेन संबन्धः।।

अत्र अवसरे संजयवचनं साभिप्रायम्। कथम्? द्रोणादिषु अर्जुनेन निहतेषु अजेयेषु चतुर्षु, निराश्रयः दुर्योधनः निहतः व इति मत्वा धृतराष्ट्रः जयं प्रति निराशः सन् संधिं करिष्यति, ततः शान्तिः उभयेषां भविष्यति इति। तदपि न अश्रौषीत् धृतराष्ट्रः भवितव्यवशात्।।

अर्जुन उवाच --

।।११.३६।। --

स्थाने युक्तम्। किं तत्? तव प्रकीर्त्या त्वन्माहात्म्यकीर्तनेन श्रुतेन, हे हृषीकेश, यत् जगत् प्रहृष्यति प्रहर्षम् उपैति, तत् स्थाने युक्तम्, इत्यर्थः। अथवा विषयविशेषणं स्थाने इति। युक्तः हर्षादिविषयः भगवान्, यतः ईश्वरः सर्वात्मा सर्वभूतसुहृच्च इति। तथा अनुरज्यते अनुरागं च उपैति; तच्च विषये इति व्याख्येयम्। किञ्च, रक्षांसि भीतानि भयाविष्टानि दिशः द्रवन्ति गच्छन्ति; तच्च

स्थाने विषये। सर्वे नमस्यन्ति नमस्कुर्वन्ति च सिद्धसंघाः सिद्धानां समुदायाः कपिलादीनाम्, तच्च स्थाने।।

भगवतो हर्षादिविषयत्वे हेतुं दर्शयति --

।।११.३७।। --

कस्माच्च हेतोः ते तुभ्यं न नमेरन् नमस्कुर्युः हे महात्मन्, गरीयसे गुरुतराय; यतः ब्रह्मणः हिरण्यगर्भस्य अपि आदिकर्ता कारणम् अतः तस्मात् आदिकर्त्रे। कथम् ते न नमस्कुर्युः? अतः हर्षादीनां नमस्कारस्य च स्थानं त्वं अर्हः विषयः इत्यर्थः। हे अनन्त देवेश हे जगन्निवास त्वम् अक्षरं तत् परम्, यत् वेदान्तेषु श्रूयते। किं तत्? सदसत् इति। सत् विद्यमानम्, असत् च यत्र नास्ति इति बुद्धिः; ते उपधानभूते सदसती यस्य अक्षरस्य, यद्द्वारेण सदसती इति उपचर्यते। परमार्थतस्तु सदसतोः परं तत् अक्षरं यत् अक्षरं वेदविदः वदन्ति। तत् त्वमेव, न अन्यत् इति अभिप्रायः।।

पुनरपि स्तौति --

।।११.३८।। --

त्वम् आदिदेवः, जगतः स्रष्ट्टत्वात्। पुरुषः, पुरि शयनात् पुराणः चिरंतनः त्वम् व अस्य विश्वस्य परं प्रकृष्टं निधानं निधीयते अस्मिन् जगत् सर्वं महाप्रलयादौ इति। किञ्च, वेत्ता असि, वेदिता असि सर्वस्यैव वेद्यजातस्य। यत् च वेद्यं वेदनार्हं तच्च असि परं च धाम परमं पदं वैष्णवम्। त्वया ततं व्याप्तं विश्वं समस्तम्, हे अनन्तरूप अन्तो न विद्यते तव रूपाणाम्।।

किञ्च --

।।११.३९।। --

वायुः त्वं यमश्च अग्निः वरुणः अपां पतिः शशाङ्कः चन्द्रमाः प्रजापतिः त्वं कश्यपादिः प्रपितामहश्च पितामहस्यापि पिता प्रपितामहः, ब्रह्मणोऽपि पिता इत्यर्थः। नमो नमः ते तुभ्यम् अस्तु सहस्रकृत्वः। पुनश्च भूयोऽपि नमो नमः ते। बहुशो नमस्कारक्रियाभ्यासावृत्तिगणनं कृत्वसुचा उच्यते। 'पुनश्च' 'भूयोऽपि' इति श्रद्धाभक्त्यतिशयात् अपरितोषम् आत्मनः दर्शयति।।

तथा --

।।११.४०।। --

नमः पुरस्तात् पूर्वस्यां दिशि तुभ्यम्, अथ पृष्ठतः ते पृष्ठतः अपि च ते नमोऽस्तु, ते सर्वत व सर्वासु दिक्षु सर्वत्र स्थिताय हे सर्व। अनन्तवीर्यामितविक्रमः अनन्तं वीर्यम् अस्य, अमितः विक्रमः अस्य। वीर्यं सामर्थ्यं विक्रमः पराक्रमः। वीर्यवानपि कश्चित् शत्रुवधादिविषये न पराक्रमते, मन्दपराक्रमो वा। त्वं तु अनन्तवीर्यः अमितविक्रमश्च इति अनन्तवीर्यामितविक्रमः।

सर्वं समस्तं जगत् समाप्नोषि सम्यक् केन आत्मना व्याप्नोषि यतः, ततः तस्मात् असि भवसि सर्वः त्वम्, त्वया विनाभूतं न किञ्चित् अस्ति इति अभिप्रायः।।

यतः अहं त्वन्माहात्म्यापरिज्ञानात् अपराद्धः, अतः --

।।११.४१।। --

सखा समानवयाः इति मत्वा ज्ञात्वा विपरीतबुद्ध्या प्रसभम् अभिभूय प्रसह्य यत् उक्तं हे कृष्ण हे यादव हे सखेति च अजानता अज्ञानिना मूढेन; किम् अजानता इति आह -- महिमानं माहात्म्यं तव इदम् ईश्वरस्य विश्वरूपम्। 'तव इदं महिमानम् अजानता' इति वैयधिकरण्येन संबन्धः।' तवेमम्' इति पाठः यदि अस्ति, तदा सामानाधिकरण्यमेव। मया प्रमादात् विक्षिप्तचित्ततया, प्रणयेन वापि, प्रणयो नाम स्नेहनिमित्तः विस्रम्भः, तेनापि कारणेन यत् उक्तवान् अस्मि।।

।।११.४२।। --

यच्च अवहासार्थं परिहासप्रयोजनाय असत्कृतः परिभूतः असि भवसि; क्व? विहारशय्यासनभोजनेषु, विहरणं विहारः पादव्यायामः, शयनं शय्या, आसनम् आस्थायिका, भोजनम् अदनम्, इति तेषु विहारशय्यासनभोजनेषु, कः परोक्षः सन् असत्कृतः असि परिभूतः असि; अथवापि हे अच्युत, तत् समक्षम्, तच्छब्दः क्रियाविशेषणार्थः, प्रत्यक्षं वा असत्कृतः असि तत् सर्वम् अपराधजातं क्षामये क्षमां कारये त्वाम् अहम् अप्रमेयं प्रमाणातीतम्।।

यतः त्वम् --

।।११.४३।। --

पिता असि जनयिता असि लोकस्य प्राणिजातस्य चराचरस्य स्थावरजङ्गमस्य। न केवलं त्वम् अस्य जगतः पिता, पूज्यश्च पूजार्हः, यतः गुरुः गरीयान् गुरुतरः। कस्मात् गुरुतरः त्वम् इति आह -- न त्वत्समः त्वत्तुल्यः अस्ति। न हि ईश्वरद्वयं संभवति, अनेकेश्वरत्वे व्यवहारानुपपत्तेः। त्वत्सम व तावत् अन्यः न संभवति; कुतः व अन्यः अभ्यधिकः स्यात् लोकत्रयेऽपि सर्वस्मिन्? अप्रतिमप्रभाव प्रतिमीयते यया सा प्रतिमा, न विद्यते प्रतिमा यस्य तव प्रभावस्य सः त्वम् अप्रतिमप्रभावः, हे अप्रतिमप्रभाव निरतिशयप्रभाव इत्यर्थः।।

यतः वम् --

।।११.४४।। --

तस्मात् प्रणम्य नमस्कृत्य, प्रणिधाय प्रकर्षेण नीचैः धृत्वा कायं शरीरम्, प्रसादये प्रसादं कारये त्वाम् अहम् ईशम् ईशितारम्, ईड्यं स्तुत्यम्। त्वं पुनः पुत्रस्य अपराधं पिता यथा क्षमते, सर्वं सखा इव सख्युः अपराधम्, यथा वा प्रियः प्रियायाः अपराधं क्षमते, वम् अर्हसि हे देव सोढुं प्रसहितुम् क्षन्तुम् इत्यर्थः।।

।।११.४५।। --

अदृष्टपूर्वं न कदाचिदपि दृष्टपूर्वम् इदं विश्वरूपं तव मया अन्यैर्वा, तत् अहं दृष्ट्वा हृषितः अस्मि। भयेन च प्रव्यथितं मनः मे। अतः तदेव मे मम दर्शय हे देव रूपं यत् मत्सखम्। प्रसीद देवेश, जगन्निवास जगतो निवासो जगन्निवासः, हे जगन्निवास।।

।।११.४६।। --

किरीटिनं किरीटवन्तं तथा गदिनं गदावन्तं चक्रहस्तम् इच्छामि त्वां प्रार्थये त्वां द्रष्टुम् अहं तथैव, पूर्ववत् इत्यर्थः।।यतः वम्, तस्मात् तेनैव रूपेण वसुदेवपुत्ररूपेण चतुर्भुजेन, सहस्रबाहो वार्तमानिकेन विश्वरूपेण, भव विश्वमूर्ते ०; उपसंहृत्य विश्वरूपम्, तेनैव रूपेण भव इत्यर्थः।।

अर्जुनं भीतम् उपलभ्य, उपसंहृत्य विश्वरूपम्, प्रियवचनेन आश्वासयन् श्रीभगवान् उवाच -- श्रीभगवानुवाच --

।।११.४७।। --

मया प्रसन्नेन, प्रसादो नाम त्वयि अनुग्रहबुद्धिः, तद्वता प्रसन्नेन मया तव हे अर्जुन, इदं परं रूपं विश्वरूपं दर्शितम् आत्मयोगात् आत्मनः ेश्वर्यस्य सामर्थ्यात्। तेजोमयं तेजःप्रायं विश्वं समस्तम् अनन्तम् अन्तरहितं आदौ भवम् आद्यं यत् रूपं मे मम त्वदन्येन त्वत्तः अन्येन केनचित् न दृष्टपूर्वम्।।

आत्मनः मम रूपदर्शनेन कृतार्थ व त्वं संवृत्तः इति तत् स्तौति --

।।११.४८।। --

न वेदयज्ञाध्ययनैः चतुर्णामपि वेदानाम् अध्ययनैः यथावत् यज्ञाध्ययनैश्च -- वेदाध्ययनैरेव यज्ञाध्ययनस्य सिद्धत्वात् पृथक् यज्ञाध्ययनग्रहणं यज्ञविज्ञानोपलक्षणार्थम् -- तथा न दानैः तुलापुरुषादिभिः, न च क्रियाभिः अग्निहोत्रादिभिः श्रौतादिभिः, न अपि तपोभिः उग्रैः चान्द्रायणादिभिः उग्रैः घोरैः, वंरूपः यथादर्शितं विश्वरूपं यस्य सोऽहम् वंरूपः न शक्यः अहं

नृलोके मनुष्यलोके द्रष्टुं त्वदन्येन त्वत्तः अन्येन कुरुप्रवीर।।

।।११.४९।। --

मा ते व्यथा मा भूत् ते भयम्, मा च विमूढभावः विमूढचित्तता, दृष्ट्वा उपलभ्य रूपं घोरम् ईदृक् यथादर्शितं मम इदम्। व्यपेतभीः विगतभयः, प्रीतमनाश्च सन् पुनः भूयः त्वं तदेव चतुर्भुजं रूपं शङ्खचक्रगदाधरं तव इष्टं रूपम् इदं प्रपश्य।।

संजय उवाच --

।।११.५०।। --

इति वम् अर्जुनं वासुदेवः तथाभूतं वचनम् उक्त्वा, स्वकं वसुदेवस्य गृहे जातं रूपं दर्शयामास दर्शितवान् भूयः पुनः। आश्वासयामास च आश्वासितवान् भीतम् नम्, भूत्वा पुनः सौम्यवपुः प्रसन्नदेहः महात्मा।।

अर्जुन उवाच --

।।११.५१।। --

दृष्ट्वा इदं मानुषं रूपं मत्सखं प्रसन्नं तव सौम्यं जनार्दन, इदानीम्, अधुना अस्मि संवृत्तः संजातः। किम्? सचेताः प्रसन्नचित्तः प्रकृतिं स्वभावं गतश्च अस्मि।।

श्रीभगवानुवाच --

।।११.५२।। --

सुदुर्दर्शं सुष्ठु दुःखेन दर्शनम् अस्य इति सुदुर्दर्शम्, इदं रूपं दृष्टवान् असि यत् मम, देवाः अपि अस्य मम रूपस्य नित्यं सर्वदा दर्शनकाङ्क्षिणः; दर्शनेप्सवोऽपि न त्वमिव दृष्टवन्तः, न द्रक्ष्यन्ति च इति अभिप्रायः।।

कस्मात्? --

।।११.५३।। --

न अहं वेदैः

ग्यजुःसामाथर्ववेदैः चतुर्भिरपि, न तपसा उग्रेण चान्द्रायणादिना, न दानेन गोभूहिरण्यादिना, न च इज्यया यज्ञेन पूजया वा शक्यः वंविधः यथादर्शितप्रकारः द्रष्टुं दृष्टवान् असि मां यथा त्वम्।।

कथं पुनः शक्यः इति उच्यते --

।।११.५४।। --

भक्त्या तु किंविशिष्टया इति आह -- अनन्यया अपृथग्भूतया, भगवतः अन्यत्र पृथक् न कदाचिदपि या भवति सा त्वनन्या भक्तिः। सर्वैरपि करणैः वासुदेवादन्यत् न उपलभ्यते यया, सा अनन्या भक्तिः, तया भक्त्या शक्यः अहम् वंविधः विश्वरूपप्रकारः हे अर्जुन, ज्ञातुं शास्त्रतः। न केवलं ज्ञातुं शास्त्रतः, द्रष्टुं च साक्षात्कर्तुं तत्त्वेन तत्त्वतः, प्रवेष्टुं च मोक्षं च गन्तुं

परंतप।।

अधुना सर्वस्य गीताशास्त्रस्य सारभूतः अर्थः निःश्रेयसार्थः अनुष्ठेयत्वेन समुच्चित्य उच्यते --

।।११.५५।। --

मत्कर्मकृत् मदर्थं कर्म मत्कर्म, तत् करोतीति मत्कर्मकृत्। मत्परमः -- करोति भृत्यः स्वामिकर्म, न तु आत्मनः परमा प्रेत्य गन्तव्या गतिरिति स्वामिनं प्रतिपद्यते; अयं तु मत्कर्मकृत् मामेव परमां गतिं प्रतिपद्यते इति मत्परमः, अहं परमः परा गतिः यस्य सोऽयं मत्परमः। तथा मद्भक्तः मामेव सर्वप्रकारैः सर्वात्मना सर्वोत्साहेन भजते इति मद्भक्तः। सङ्गवर्जितः धनपुत्रमित्रकलत्रबन्धुवर्गेषु सङ्गवर्जितः सङ्गः प्रीतिः स्नेहः तद्वर्जितः। निर्वैरः निर्गतवैरः सर्वभूतेषु शत्रुभावरहितः आत्मनः अत्यन्तापकारप्रवृत्तेष्वपि। यः ईदृशः मद्भक्तः सः माम् ति, अहमेव तस्य परा गतिः, न अन्या गतिः काचित् भवति। अयं तव उपदेशः इष्टः मया उपदिष्टः हे पाण्डव इति।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
एकादशोऽध्यायः।।

BHAGAVADGITA
Sanskrit Commentary - Sri Sankaracharya
Chapter 12
DV

।।१२.१।। --

एवम् इति अतीतानन्तरश्लोकेन उक्तम् अर्थं परामृशति 'मत्कर्मकृत्' इत्यादिना। वं सततयुक्ताः, नैरन्तर्येण भगवत्कर्मादौ यथोक्ते अर्थे समाहिताः सन्तः प्रवृत्ता इत्यर्थः। ये भक्ताः अनन्यशरणाः सन्तः त्वां यथादर्शितं विश्वरूपं पर्युपासते ध्यायन्ति; ये चान्येऽपि त्यक्तसर्वैषणाः संन्यस्तसर्वकर्माणः यथाविशेषितं ब्रह्म अक्षरं निरस्तसर्वोपाधित्वात् अव्यक्तम् अकरणगोचरम्। यत् हि करणगोचरं तत् व्यक्तम् उच्यते, अञ्जेः धातोः तत्कर्मकत्वात्; इदं तु अक्षरं तद्विपरीतम्, शिष्टैश्च उच्यमानैः विशेषणैः विशिष्टम्, तत् ये चापि पर्युपासते, तेषाम् उभयेषां मध्ये के योगवित्तमाः? के अतिशयेन योगविदः इत्यर्थः।।

श्रीभगवान् उवाच -- ये तु अक्षरोपासकाः सम्यग्दर्शिनः निवृत्तैषणाः, ते तावत् तिष्ठन्तु; तान् प्रति यत् वक्तव्यम्, तत् उपरिष्टात् वक्ष्यामः। ये तु इतरे --

श्रीभगवानुवाच --

।।१२.२।। --

मयि विश्वरूपे परमेश्वरे आवेश्य समाधाय मनः, ये भक्ताः सन्तः, मां सर्वयोगेश्वराणाम् अधीश्वरं सर्वज्ञं विमुक्तरागादिक्लेशतिमिरदृष्टिम्, नित्ययुक्ताः अतीतानन्तराध्यायान्तोक्तश्लोकार्थन्यायेन सततयुक्ताः सन्तः उपासते श्रद्धया परया प्रकृष्टया उपेताः, ते मे मम मताः अभिप्रेताः युक्ततमाः इति। नैरन्तर्येण हि ते मच्चित्ततया अहोरात्रम् अतिवाहयन्ति। अतः युक्तं तान् प्रति युक्ततमाः इति वक्तुम्।।

किमितरे युक्ततमाः न भवन्ति? न; किंतु तान् प्रति यत् वक्तव्यम्, तत् श्रृणु --

।।१२.३।। --

ये तु अक्षरम् अनिर्देश्यम्, अव्यक्तत्वात् अशब्दगोचर इति न निर्देष्टुं शक्यते, अतः अनिर्देश्यम्, अव्यक्तं न केनापि प्रमाणेन व्यज्यत इत्यव्यक्तं पर्युपासते परि समन्तात् उपासते। उपासनं नाम यथाशास्त्रम् उपास्यस्य अर्थस्य विषयीकरणेन सामीप्यम् उपगम्य तैलधारावत् समानप्रत्ययप्रवाहेण दीर्घकालं यत् आसनम्, तत् उपासनमाचक्षते। अक्षरस्य विशेषणमाह उपास्यस्य -- सर्वत्रगं व्योमवत् व्यापि अचिन्त्यं च अव्यक्तत्वादचिन्त्यम्। यद्धि करणगोचरम्, तत् मनसापि चिन्त्यम्, तद्विपरीतत्वात् अचिन्त्यम् अक्षरम्, कूटस्थं दृश्यमानगुणम् अन्तर्दोषं वस्तु कूटम्। 'कूटरूपम्' 'कूटसाक्ष्यम्' इत्यादौ कूटशब्दः प्रसिद्धः लोके। तथा च अविद्याद्यनेकसंसारबीजम् अन्तर्दोषवत् मायाव्याकृतादिशब्दवाच्यतया 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' (श्वे० उ० ४।१०) 'मम माया दुरत्यया (गीता ७।१४)' इत्यादौ प्रसिद्धं यत् तत् कूटम्, तस्मिन् कूटे स्थितं कूटस्थं तदध्यक्षतया। अथवा, राशिरिव स्थितं कूटस्थम्। अत व अचलम्। यस्मात् अचलम्, तस्मात् ध्रुवम्, नित्यमित्यर्थः।।

।।१२.४।। --

संनियम्य सम्यक् नियम्य उपसंहृत्य इन्द्रियग्रामम् इन्द्रियसमुदायं सर्वत्र सर्वस्मिन् काले समबुद्धयः समा तुल्या बुद्धिः येषाम् इष्टानिष्टप्राप्तौ ते समबुद्धयः। ते ये वंविधाः ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः। न तु तेषां वक्तव्यं किञ्चित् 'मां ते प्राप्नुवन्ति' इति; 'ज्ञानी त्वात्मैव मे मतम् (गीता ७।१८)' इति हि उक्तम्। न हि भगवत्स्वरूपाणां सतां युक्ततमत्वमयुक्ततमत्वं वा वाच्यम्।।

किं तु --

।।१२.५।। --

क्लेशः अधिकतरः, यद्यपि मत्कर्मादिपराणां क्लेशः अधिक व क्लेशः अधिकतरस्तु अक्षरात्मनां परमात्मदर्शिनां देहाभिमानपरित्यागनिमित्तः। अव्यक्तासक्तचेतसाम् अव्यक्ते आसक्तं चेतः येषां ते अव्यक्तासक्तचेतसः तेषाम् अव्यक्तासक्तचेतसाम्। अव्यक्ता हि यस्मात् या गतिः अक्षरात्मिका दुःखं सा देहवद्भिः देहाभिमानवद्भिः अवाप्यते, अतः क्लेशः अधिकतरः।।

अक्षरोपासकानां यत् वर्तनम्, तत् उपरिष्टाद्वक्ष्यामः --

।।१२.६।। --

ये तु सर्वाणि कर्माणि मयि ईश्वरे संन्यस्य मत्पराः अहं परः येषां ते मत्पराः सन्तः अनन्येनैव अविद्यमानम् अन्यत् आलम्बनं विश्वरूपं देवम् आत्मानं मुक्त्वा यस्य सः अनन्यः तेन अनन्येनैव; केन? योगेन समाधिना मां ध्यायन्तः चिन्तयन्तः उपासते।।

तेषां किम्? --

।।१२.७।। --

तेषां मदुपासनैकपराणाम् अहम् ईश्वरः समुद्धर्ता। कुतः इति आह -- मृत्युसंसारसागरात् मृत्युयुक्तः संसारः मृत्युसंसारः, स व सागर इव सागरः, दुस्तरत्वात्, तस्मात् मृत्युसंसारसागरात् अहं तेषां समुद्धर्ता भवामि न चिरात्। किं तर्हि? क्षिप्रमेव हे पार्थ, मयि

आवेशितचेतसां मयि विश्वरूपे आवेशितं समाहितं चेतः येषां ते मय्यावेशितचेतसः तेषाम्।।

यतः वम्, तस्मात् --

।।१२.८।। --

मयि व विश्वरूपे ईश्वरे मनः संकल्पविकल्पात्मकं आधत्स्व स्थापय। मयि व अध्यवसायं कुर्वतीं बुद्धिम् आधत्स्व निवेशय। ततः ते किं स्यात् इति श्रृणु -- निवसिष्यसि निवत्स्यसि निश्चयेन मदात्मना मयि निवासं करिष्यसि व अतः शरीरपातात् ऊर्ध्वम्। न संशयः संशयः अत्र न कर्तव्यः।।

।।१२.९।। --

अथ वं यथा अवोचं तथा मयि चित्तं समाधातुं स्थापयितुं स्थिरम् अचलं न शक्नोषि चेत्, ततः पश्चात् अभ्यासयोगेन, चित्तस्य कस्मिन् आलम्बने सर्वतः समाहृत्य पुनः पुनः स्थापनम् अभ्यासः, तत्पूर्वको योगः समाधानलक्षणः तेन अभ्यासयोगेन मां विश्वरूपम् इच्छ प्रार्थयस्व आप्तुं प्राप्तुं हे धनंजय।।

।।१२.१०।। --

अभ्यासे अपि असमर्थः असि अशक्तः असि, तर्हि मत्कर्मपरमः भव मदर्थं कर्म मत्कर्म तत्परमः मत्कर्मपरमः, मत्कर्मप्रधानः इत्यर्थः। अभ्यासेन विना मदर्थमपि कर्माणि केवलं कुर्वन् सिद्धिं सत्त्वशुद्धियोगज्ञानप्राप्तिद्वारेण अवाप्स्यसि।।

।।१२.११।। --

अथ पुनः तदपि यत् उक्तं मत्कर्मपरमत्वम्, तत् कर्तुम् अशक्तः असि, मद्योगम् आश्रितः मयि क्रियमाणानि कर्माणि संन्यस्य यत् करणं तेषाम् अनुष्ठानं सः मद्योगः, तम् आश्रितः सन्, सर्वकर्मफलत्यागं सर्वेषां कर्मणां फलसंन्यासं सर्वकर्मफलत्यागं ततः अनन्तरं कुरु यतात्मवान् संयतचित्तः सन् इत्यर्थः।।

इदानीं सर्वकर्मफलत्यागं स्तौति --

।।१२.१२।। --

श्रेयः हि प्रशस्यतरं ज्ञानम्। कस्मात्? अविवेकपूर्वकात् अभ्यासात्। तस्मादपि ज्ञानात् ज्ञानपूर्वकं ध्यानं विशिष्यते। ज्ञानवतो ध्यानात् अपि कर्मफलत्यागः, 'विशिष्यते' इति अनुषज्यते। वं कर्मफलत्यागात् पूर्वविशेषणवतः शान्तिः उपशमः सहेतुकस्य संसारस्य अनन्तरमेव स्यात्, न तु कालान्तरम् अपेक्षते।।

अज्ञस्य कर्मणि प्रवृत्तस्य पूर्वोपदिष्टोपायानुष्ठानाशक्तौ सर्वकर्मणां फलत्यागः श्रेयःसाधनम् उपदिष्टम्, न प्रथममेव। अतश्च '

श्रेयो हि ज्ञानमभ्यासात्' इत्युत्तरोत्तरविशिष्टत्वोपदेशेन सर्वकर्मफलत्यागः स्तूयते, संपन्नसाधनानुष्ठानाशक्तौ अनुष्ठेयत्वेन श्रुतत्वात्। केन साधर्म्येण स्तुतित्वम्? 'यदा सर्वे प्रमुच्यन्ते (क० उ० ६।१४)' इति सर्वकामप्रहाणात् अमृतत्वम् उक्तम्; तत् प्रसिद्धम्। कामाश्च सर्वे श्रौतस्मार्तकर्मणां फलानि। तत्त्यागे च विदुषः ध्याननिष्ठस्य अनन्तरैव शान्तिः इति

सर्वकामत्यागसामान्यम् अज्ञकर्मफलत्यागस्य अस्ति इति तत्सामान्यात् सर्वकर्मफलत्यागस्तुतिः इयं प्ररोचनार्था। यथा अगस्त्येन ब्राह्मणेन समुद्रः पीतः इति इदानींतनाः अपि ब्राह्मणाः ब्राह्मणत्वसामान्यात् स्तूयन्ते, वं कर्मफलत्यागात् कर्मयोगस्य श्रेयःसाधनत्वमभिहितम्।।

अत्र च आत्मेश्वरभेदमाश्रित्य विश्वरूपे ईश्वरे चेतःसमाधानलक्षणः योगः उक्तः, ईश्वरार्थं कर्मानुष्ठानादि च। 'अथैतदप्यशक्तोऽसि (गीता १२।११)' इति अज्ञानकार्यसूचनात् न अभेददर्शिनः अक्षरोपासकस्य कर्मयोगः उपपद्यते इति दर्शयति; तथा कर्मयोगिनः अक्षरोपासनानुपपत्तिम्। 'ते प्राप्नुवन्ति मामेव (गीता १२।४)' इति अक्षरोपासकानां कैवल्यप्राप्तौ स्वातन्त्र्यम् उक्त्वा, इतरेषां पारतन्त्र्यात् ईश्वराधीनतां दर्शितवान् 'तेषामहं समुद्धर्ता (गीता १२।७)' इति। यदि हि ईश्रवस्य आत्मभूताः ते मताः अभेददर्शित्वात्, अक्षरस्वरूपाः व ते इति समुद्धरणकर्मवचनं तान् प्रति अपेशलं स्यात्। यस्माच्च अर्जुनस्य अत्यन्तमेव हितैषी भगवान् तस्य सम्यग्दर्शनानन्वितं कर्मयोगं भेददृष्टिमन्तमेव उपदिशति। न च आत्मानम् ईश्वरं प्रमाणतः बुद्ध्वा कस्यचित् गुणभावं जिगमिषति कश्चित्, विरोधात्। तस्मात् अक्षरोपासकानां सम्यग्दर्शननिष्ठानां संन्यासिनां त्यक्तसर्वैषणानाम् 'अद्वेष्टा सर्वभूतानाम् (गीता १२।१३)' इत्यादिधर्मपूतं साक्षात् अमृतत्वकारणं वक्ष्यामीति प्रवर्तते --

।।१२.१३।। --

अद्वेष्टा सर्वभूतानां न द्वेष्टा, आत्मनः दुःखहेतुमपि न किञ्चित् द्वेष्टि, सर्वाणि भूतानि आत्मत्वेन हि पश्यति। मैत्रः मित्रभावः मैत्री मित्रतया वर्तते इति मैत्रः। करुणः व च, करुणा कृपा दुःखितेषु दया, तद्वान् करुणः, सर्वभूताभयप्रदः, संन्यासी इत्यर्थः। निर्ममः ममप्रत्ययवर्जितः। निरहंकारः निर्गताहंप्रत्ययः। समदुःखसुखः समे दुःखसुखे द्वेषरागयोः अप्रवर्तके यस्य सः समदुःखसुखः। क्षमी क्षमावान्, आक्रुष्टः अभिहतो वा अविक्रियः व आस्ते।।

।।१२.१४।। --

संतुष्टः सततं नित्यं देहस्थितिकारणस्य लाभे अलाभे च उत्पन्नालंप्रत्ययः। तथा गुणवल्लाभे विपर्यये च संतुष्टः। सततं योगी समाहितचित्तः। यतात्मा संयतस्वभावः। दृढनिश्चयः दृढः स्थिरः निश्चयः अध्यवसायः यस्य आत्मतत्त्वविषये स दृढनिश्चयः। मय्यर्पितमनोबुद्धिः संकल्पविकल्पात्मकं मनः, अध्यवसायलक्षणा बुद्धिः, ते मय्येव अर्पिते स्थापिते यस्य संन्यासिनः सः मय्यर्पितमनोबुद्धिः। यः ईदृशः मद्भक्तः सः मे प्रियः। 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः (गीता ७।१७)' इति सप्तमे अध्याये सूचितम्, तत् इह प्रपञ्चते।।

।।१२.१५।। --

यस्मात् संन्यासिनः न उद्विजते न उद्वेगं गच्छति न संतप्यते न संक्षुभ्यति लोकः, तथा लोकात् न उद्विजते च यः, हर्षामर्षभयोद्वेगैः हर्षश्च अमर्षश्च भयं च उद्वेगश्च तैः हर्षामर्षभयोद्वेगैः मुक्तः ०; हर्षः प्रियलाभे अन्तःकरणस्य उत्कर्षः रोमाञ्चनाश्रुपातादिलिङ्गः, अमर्षः असहिष्णुता, भयं त्रासः उद्वेगः उद्विग्नता, तैः मुक्तः यः स च मे प्रियः।।

।।१२.१६।। --

देहेन्द्रियविषयसंबन्धादिषु अपेक्षाविषयेषु अनपेक्षः निःस्पृहः। शुचिः बाह्येन आभ्यन्तरेण च शौचेन संपन्नः। दक्षः प्रत्युत्पन्नेषु कार्येषु सद्यः यथावत् प्रतिपत्तुं समर्थः। उदासीनः न कस्यचित्

मित्रादेः पक्षं भजते यः, सः उदासीनः यतिः। गतव्यथः गतभयः। सर्वारम्भपरित्यागी आरभ्यन्त इति आरम्भाः इहामुत्रफलभोगार्थानि कामहेतूनि कर्माणि सर्वारम्भाः, तान् परित्यक्तुं शीलम् अस्येति सर्वारम्भपरित्यागी यः मद्भक्तः सः मे प्रियः।।

किञ्च --

।।१२.१७।। --

यः न हृष्यति इष्टप्राप्तौ, न द्वेष्टि अनिष्टप्राप्तौ, न शोचति प्रियवियोगे, न च अप्राप्तं काङ्क्षति, शुभाशुभे कर्मणी परित्यक्तुं शीलम् अस्य इति शुभाशुभपरित्यागी भक्तिमान् यः सः मे प्रियः।।

।।१२.१८।। --

समः शत्रौ च मित्रे च, तथा मानापमानयोः पूजापरिभवयोः, शीतोष्णसुखदुःखेषु समः, सर्वत्र च सङ्गविवर्जितः।।

किञ्च --

।।१२.१९।। --

तुल्यनिन्दास्तुतिः निन्दा च स्तुतिश्च निन्दास्तुती ते तुल्ये यस्य सः तुल्यनिन्दास्तुतिः। मौनी मौनवान् संयतवाक्। संतुष्टः येन केनचित् शरीरस्थितिहेतुमात्रेण; तथा च उक्तम् -- 'येन

केनचिदाच्छन्नो येन केनचिदाशितः। यत्र क्वचनशायी स्यात्तं देवा ब्राह्मणं विदुः (महा० शान्ति० २४५।१२)' इति। किञ्च, अनिकेतः निकेतः आश्रयः निवासः नियतः न विद्यते यस्य सः अनिकेतः, अनागारे इत्यादिस्मृत्यन्तरात्। स्थिरमतिः स्थिरा परमार्थविषया यस्य मतिः सः स्थिरमतिः। भक्तिमान् मे प्रियः नरः।।

'अद्वेष्टा सर्वभूतानाम् (गीता १२।१३)' इत्यादिना अक्षरोपासकानां निवृत्तसर्वैषणानां संन्यासिनां परमार्थज्ञाननिष्ठानां धर्मजातं प्रक्रान्तम् उपसंह्रियते --

।।१२.२०।। --

ये तु संन्यासिनः धर्म्यामृतं धर्मादनपेतं धर्म्यं च तत् अमृतं च तत्, अमृतत्वहेतुत्वात्, इदं यथोक्तम्,' अद्वेष्टा सर्वभूतानाम्' इत्यादिना पर्युपासते अनुतिष्ठन्ति श्रद्दधानाः सन्तः मत्परमाः यथोक्तः अहं अक्षरात्मा परमः निरतिशया गतिः येषां ते मत्परमाः, मद्भक्ताः च उत्तमां परमार्थज्ञानलक्षणां भक्तिमाश्रिताः, ते अतीव मे प्रियाः। 'प्रियो हि ज्ञानिनोऽत्यर्थम्' इति यत् सूचितं तत् व्याख्याय इह उपसंहृतम्' भक्तास्तेऽतीव मे प्रियाः' इति। यस्मात् धर्म्यामृतमिदं यथोक्तमनुतिष्ठन् भगवतः विष्णोः परमेश्वरस्य अतीव प्रियः भवति, तस्मात् इदं धर्म्यामृतं मुमुक्षुणा यत्नतः अनुष्ठेयं विष्णोः प्रियं परं धाम जिगमिषुणा इति वाक्यार्थः।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
द्वादशोऽध्यायः।।

BHAGAVADGITA
Sanskrit Commentary - Sri Sankaracharya
Chapter 13
DV

।।१३.१।। -- ग़दृ क्दृश्श्ड्डदद्यड्डद्धद्र

।।१३.२।। --

इदम् इति सर्वनाम्ना उक्तं विशिनष्टि शरीरम् इति। हे कौन्तेय, क्षतत्राणात्, क्षयात्, क्षरणात्, क्षेत्रवद्वा अस्मिन् कर्मफलनिष्पत्तेः क्षेत्रम् इति -- इतिशब्दः वंशब्दपदार्थकः -- क्षेत्रम् इत्येवम् अभिधीयते कथ्यते। तत् शरीरं क्षेत्रं यः वेत्ति विजानाति, आपादतलमस्तकं ज्ञानेन विषयीकरोति, स्वाभाविकेन औपदेशिकेन वा वेदनेन विषयीकरोति विभागशः, तं वेदितारं प्राहुः कथयन्ति क्षेत्रज्ञः इति -- इतिशब्दः वंशब्दपदार्थकः व पूर्ववत् -- क्षेत्रज्ञः इत्येवम् आहुः। के? तद्विदः तौ क्षेत्रक्षेत्रज्ञौ ये विदन्ति ते तद्विदः।।

एवं क्षेत्रक्षेत्रज्ञौ उक्तौ। किम् तावन्मात्रेण ज्ञानेन ज्ञातव्यौ इति? न इति उच्यते --

।।१३.३।। --

क्षेत्रज्ञं यथोक्तलक्षणं चापि मां परमेश्वरम् असंसारिणं विद्धि जानीहि। सर्वक्षेत्रेषु यः क्षेत्रज्ञः ब्रह्मादिस्तम्बपर्यन्तानेकक्षेत्रोपाधिप्रविभक्तः, तं निरस्तसर्वोपाधिभेदं सदसदादिशब्दप्रत्ययागोचरं विद्धि इति अभिप्रायः। हे भारत, यस्मात् क्षेत्रक्षेत्रज्ञेश्वरयाथात्म्यव्यतिरेकेण न ज्ञानगोचरम् अन्यत् अवशिष्टम् अस्ति, तस्मात् क्षेत्रक्षेत्रज्ञयोः ज्ञेयभूतयोः यत् ज्ञानं क्षेत्रक्षेत्रज्ञौ येन ज्ञानेन विषयीक्रियेते, तत् ज्ञानं सम्यग्ज्ञानम् इति मतम् अभिप्रायः मम ईश्वरस्य विष्णोः।।

ननु सर्वक्षेत्रेषु क व ईश्वरः, न अन्यः तद्व्यतिरिक्तः भोक्ता विद्यते चेत्, ततः ईश्वरस्य संसारित्वं प्राप्तम्; ईश्वरव्यतिरेकेण वा संसारिणः अन्यस्य अभावात् संसाराभावप्रसङ्गः। तच्च

उभयमनिष्टम्, बन्धमोक्षतद्धेतुशास्त्रानर्थक्यप्रसङ्गात्, प्रत्यक्षादिप्रमाणविरोधाच्च। प्रत्यक्षेण तावत् सुखदुःखतद्धेतुलक्षणः संसारः उपलभ्यते; जगद्वैचित्र्योपलब्धेश्च धर्माधर्मनिमित्तः संसारः अनुमीयते। सर्वमेतत् अनुपपन्नमात्मेश्वरैकत्वे।।

न; ज्ञानाज्ञानयोः अन्यत्वेनोपपत्तेः -- 'दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता (क० उ० १।२।४)'। तथा च तयोः विद्याविद्याविषययोः फलभेदोऽपि विरुद्धः निर्दिष्टः -- 'श्रेयश्च प्रेयश्च' इति; विद्याविषयः श्रेयः, प्रेयस्तु अविद्याकार्यम् इति। तथा च व्यासः -- 'द्वाविमावथ पन्थानौ (महा० शान्ति० २४१।६)' इत्यादि, 'इमौ द्वावेव पन्थानौ' इत्यादि च। इह च द्वे निष्ठे उक्ते। अविद्या च सह कार्येण हातव्या इति श्रुतिस्मृतिन्यायेभ्यः अवगम्यते। श्रुतयः तावत् -- 'इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः (के० उ० २।५)' 'तमेवं विद्वानमृत इह भवति (नृ० पू० उ० ६)। नान्यः पन्था विद्यतेऽयनाय (श्वे० उ० ३।८)' 'विद्वान्न बिभेति कुतश्चन (तै० उ० २।४)'। अविदुषस्तु -- 'अथ तस्य भयं भवति (तै० उ० २।७), अविद्यायामन्तरे वर्तमानाः (क० उ० १।२।५)' 'ब्रह्म वेद ब्रह्मैव भवति (मु० उ० ३।२।९)' 'अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानाम्' आत्मवित् यः 'स इदं सर्वं भवति (बृह० उ० १।४।१०) '; 'यदा चर्मवत् (श्वे० उ० ६।२०)' इत्याद्याः सहस्रशः। स्मृतयश्च -- 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः (गीता ५।१५)' 'इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः (गीता ५।१९)' 'समं पश्यन् हि सर्वत्र (गीता १३।२८)' इत्याद्याः।

न्यायतश्च -- 'सर्पान्कुशाग्राणि तथोदपानं ज्ञात्वा मनुष्याः परिवर्जयन्ति। अज्ञानतस्तत्र पतन्ति केचिज्ज्ञाने फलं पश्य तथाविशिष्टम् (महा० शा० २०१।१६)'। तथा च -- देहादिषु आत्मबुद्धिः अविद्वान् रागद्वेषादिप्रयुक्तः धर्माधर्मानुष्ठानकृत् जायते म्रियते च इति अवगम्यते; देहादिव्यतिरिक्तात्मदर्शिनः रागद्वेषादिप्रहाणापेक्षधर्माधर्मप्रवृत्त्युपशमात् मुच्यन्ते इति न केनचित् प्रत्याख्यातुं शक्यं न्यायतः। तत्र वं सति, क्षेत्रज्ञस्य ईश्वरस्यैव सतः अविद्याकृतोपाधिभेदतः संसारित्वमिव भवति, यथा देहाद्यात्मत्वमात्मनः। सर्वजन्तूनां हि प्रसिद्धः देहादिषु अनात्मसु आत्मभावः निश्चितः अविद्याकृतः, यथा स्थाणौ पुरुषनिश्चयः, न च तावता पुरुषधर्मः स्थाणोः

भवति, स्थाणुधर्मो वा पुरुषस्य, तथा न चैतन्यधर्मो देहस्य, देहधर्मो वा चेतनस्य सुखदुःखमोहात्मकत्वादिः आत्मनः न युक्तः; अविद्याकृतत्वाविशेषात्, जरामृत्युवत्।।

न, अतुल्यत्वात्; इति चेत् -- स्थाणुपुरुषौ ज्ञेयावेव सन्तौ ज्ञात्रा अन्योन्यस्मिन् अध्यस्तौ अविद्यया; देहात्मनोस्तु ज्ञेयज्ञात्रोरेव इतरेतराध्यासः, इति न समः दृष्टान्तः। अतः देहधर्मः ज्ञेयोऽपि ज्ञातुरात्मनः भवतीति चेत्, न; अचैतन्यादिप्रसङ्गात्। यदि हि ज्ञेयस्य देहादेः क्षेत्रस्य धर्माः सुखदुःखमोहेच्छादयः ज्ञातुः भवन्ति, तर्हि, 'ज्ञेयस्य क्षेत्रस्य धर्माः केचित् आत्मनः भवन्ति अविद्याध्यारोपिताः, जरामरणादयस्तु न भवन्ति' इति विशेषहेतुः वक्तव्यः। 'न भवन्ति' इति अस्ति अनुमानम् -- अविद्याध्यारोपितत्वात् जरामरणादिवत् इति, हेयत्वात्, उपादेयत्वाच्च इत्यादि। तत्र वं सति, कर्तृत्वभोक्तृत्वलक्षणः संसारः ज्ञेयस्थः ज्ञातरि अविद्यया अध्यारोपितः इति, न तेन ज्ञातुः किञ्चित् दुष्यति, यथा बालैः अध्यारोपितेन आकाशस्य तलमलिनत्वादिना।।

एवं च सति, सर्वक्षेत्रेष्वपि सतः भगवतः क्षेत्रज्ञस्य ईश्वरस्य संसारित्वगन्धमात्रमपि नाशङ्क्यम्। न हि क्वचिदपि लोके अविद्याध्यस्तेन धर्मेण कस्यचित् उपकारः अपकारो वा दृष्टः।।

यत्तु उक्तम् -- न समः दृष्टान्तः इति, तत् असत्। कथम्? अविद्याध्यासमात्रं हि दृष्टान्तदार्ष्टान्तिकयोः साधर्म्यं विवक्षितम्। तत् न व्यभिचरति। यत्तु ज्ञातरि व्यभिचरति इति मन्यसे, तस्यापि अनैकान्तिकत्वं दर्शितं जरादिभिः।।

अविद्यावत्त्वात् क्षेत्रज्ञस्य संसारित्वम् इति चेत्, न; अविद्यायाः तामसत्वात्। तामसो हि प्रत्ययः, आवरणात्मकत्वात् अविद्या विपरीतग्राहकः, संशयोपस्थापको वा, अग्रहणात्मको वा; विवेकप्रकाशभावे तदभावात्, तामसे च आवरणात्मके तिमिरादिदोषे सति अग्रहणादेः अविद्यात्रयस्य उपलब्धेः।।

अत्र आह -- वं तर्हि ज्ञातृधर्मः अविद्या। न; करणे चक्षुषि तैमिरिकत्वादिदोषोपलब्धेः। यत्तु मन्यसे -- ज्ञातृधर्मः अविद्या, तदेव च अविद्याधर्मवत्त्वं क्षेत्रज्ञस्य संसारित्वम्; तत्र यदुक्तम् 'ईश्वर व क्षेत्रज्ञः, न संसारी' इत्येतत् अयुक्तमिति -- तत् न; यथा करणे चक्षुषि विपरीतग्राहकादिदोषस्य दर्शनात्। न विपरीतादिग्रहणं तन्निमित्तं वा तैमिरिकत्वादिदोषः ग्रहीतुः, चक्षुषः संस्कारेण तिमिरे अपनीते ग्रहीतुः अदर्शनात् न ग्रहीतुर्धर्मः यथा; तथा सर्वत्रैव अग्रहणविपरीतसंशयप्रत्ययास्तन्निमित्ताः करणस्यैव कस्यचित् भवितुमर्हन्ति, न ज्ञातुः क्षेत्रज्ञस्य। संवेद्यत्वाच्च तेषां प्रदीपप्रकाशवत् न ज्ञातृधर्मत्वम् -- संवेद्यत्वादेव स्वात्मव्यतिरिक्तसंवेद्यत्वम्; सर्वकरणवियोगे च कैवल्ये सर्ववादिभिः अविद्यादिदोषवत्त्वानभ्युपगमात्। आत्मनः यदि क्षेत्रज्ञस्य अग्न्युष्णवत् स्वः धर्मः, ततः न कदाचिदपि तेन वियोगः स्यात्। अविक्रियस्य च व्योमवत् सर्वगतस्य अमूर्तस्य आत्मनः केनचित् संयोगवियोगानुपपत्तेः, सिद्धं क्षेत्रज्ञस्य नित्यमेव ईश्वरत्वम्; 'अनादित्वान्निर्गुणत्वात् (गीता १३।३१)' इत्यादीश्वरवचनाच्च।।

ननु वं सति संसारसंसारित्वाभावे शास्त्रानर्थक्यादिदोषः स्यादिति चेत्, न; सर्वैरभ्युपगतत्वात्। सर्वैर्हि आत्मवादिभिः अभ्युपगतः दोषः न केन परिहर्तव्यः भवति। कथम् अभ्युपगतः इति? मुक्तात्मनां हि संसारसंसारित्वव्यवहाराभावः सर्वैरेव आत्मवादिभिः इष्यते। न च तेषां शास्त्रानर्थक्यादिदोषप्राप्तिः अभ्युपगता। तथा नः क्षेत्रज्ञानाम् ईश्वरैकत्वे सति, शास्त्रानर्थक्यं भवतु; अविद्याविषये च अर्थवत्त्वम् -- यथा द्वैतिनां सर्वेषां बन्धावस्थायामेव शास्त्राद्यर्थवत्त्वम्, न मुक्तावस्थायाम्, वम्।।

ननु आत्मनः बन्धमुक्तावस्थे परमार्थत व वस्तुभूते द्वैतिनां सर्वेषाम्। अतः हेयोपादेयतत्साधनसद्भावे शास्त्राद्यर्थवत्त्वं स्यात्। अद्वैतिनां पुनः, द्वैतस्य अपरमार्थत्वात्, अविद्याकृतत्वात् बन्धावस्थायाश्च आत्मनः अपरमार्थत्वे निर्विषयत्वात्, शास्त्राद्यानर्थक्यम् इति चेत्, न; आत्मनः अवस्थाभेदानुपपत्तेः। यदि तावत् आत्मनः बन्धमुक्तावस्थे, युगपत् स्याताम्,

क्रमेण वा। युगपत् तावत् विरोधात् न संभवतः स्थितिगती इव कस्मिन्। क्रमभावित्वे च, निर्निमित्तत्वे अनिर्मोक्षप्रसङ्गः।

अन्यनिमित्तत्वे च स्वतः अभावात् अपरमार्थत्वप्रसङ्गः। तथा च सति अभ्युपगमहानिः। किञ्च, बन्धमुक्तावस्थयोः पौर्वापर्यनिरूपणायां बन्धावस्था पूर्वं प्रकल्प्या, अनादिमती अन्तवती च; तच्च प्रमाणविरुद्धम्। तथा मोक्षावस्था आदिमती अनन्ता च प्रमाणविरुद्धैव अभ्युपगम्यते। न च अवस्थावतः अवस्थान्तरं गच्छतः नित्यत्वम् उपपादयितुं शक्यम्। अथ अनित्यत्वदोषपरिहाराय बन्धमुक्तावस्थाभेदो न कल्प्यते, अतः द्वैतिनामपि शास्त्रानर्थक्यादिदोषः अपरिहार्य व; इति समानत्वात् न अद्वैतवादिना परिहर्तव्यः दोषः।।

न च शास्त्रानर्थक्यम्, यथाप्रसिद्धाविद्वत्पुरुषविषयत्वात् शास्त्रस्य। अविदुषां हि फलहेत्वोः अनात्मनोः आत्मदर्शनम्, न विदुषाम्; विदुषां हि फलहेतुभ्याम् आत्मनः अन्यत्वदर्शने सति, तयोः अहमिति आत्मदर्शनानुपपत्तेः। न हि अत्यन्तमूढः उन्मत्तादिरपि जलाग्न्योः छायाप्रकाशयोर्वा`कात्म्यं पश्यति; किमुत विवेकी। तस्मात् न विधिप्रतिषेधशास्त्रं तावत् फलहेतुभ्याम् आत्मनः अन्यत्वदर्शिनः भवति। न हि 'देवदत्त, त्वम् इदं कुरु' इति कस्मिंश्चित् कर्मणि नियुक्ते, विष्णुमित्रः 'अहं नियुक्तः' इति तत्रस्थः नियोगं श्रृण्वन्नपि प्रतिपद्यते। वियोगविषयविवेकाग्रहणात् तु उपपद्यते प्रतिपत्तिः; तथा फलहेत्वोरपि।।

ननु प्राकृतसंबन्धापेक्षया युक्तैव प्रतिपत्तिः शास्त्रार्थविषया -- फलहेतुभ्याम् अन्यात्मविषयदर्शनेऽपि सति -- इष्टफलहेतौ प्रवर्तितः अस्मि, अनिष्टफलहेतोश्च निवर्तितः अस्मीति; यथा पितृपुत्रादीनाम् इतरेतरात्मान्यत्वदर्शने सत्यपि अन्योन्यनियोगप्रतिषेधार्थप्रतिपत्तिः। न; व्यतिरिक्तात्मदर्शनप्रतिपत्तेः प्रागेव फलहेत्वोः आत्माभिमानस्य सिद्धत्वात्। प्रतिपन्ननियोगप्रतिषेधार्थो हि फलहेतुभ्याम् आत्मनः अन्यत्वं प्रतिपद्यते, न पूर्वम्। तस्मात् विधिप्रतिषेधशास्त्रम् अविद्वद्विषयम् इति सिद्धम्।।

ननु 'स्वर्गकामो यजेत' 'न कलञ्जं भक्षयेत्' इत्यादौ आत्मव्यतिरेकदर्शिनाम् अप्रवृत्तौ,

केवलदेहाद्यात्मदृष्टीनां च; अतः कर्तुः अभावात् शास्त्रानर्थक्यमिति चेत्, न; यथाप्रसिद्धित व प्रवृत्तिनिवृत्त्युपपत्तेः। ईश्वरक्षेत्रज्ञैकत्वदर्शी ब्रह्मवित् तावत् न प्रवर्तते। तथा नैरात्म्यवाद्यपि नास्ति परलोकः इति न प्रवर्तते। यथाप्रसिद्धितस्तु विधिप्रतिषेधशास्त्रश्रवणान्यथानुपपत्त्या अनुमितात्मास्तित्वः आत्मविशेषानभिज्ञः कर्मफलसंजाततृष्णः श्रद्दधानतया च प्रवर्तते। इति सर्वेषां न प्रत्यक्षम्। अतः न शास्त्रानर्थक्यम्।।

विवेकिनाम् अप्रवृत्तिदर्शनात् तदनुगामिनाम् अप्रवृत्तौ शास्त्रानर्थक्यम् इति चेत्, न; कस्यचिदेव विवेकोपपत्तेः। अनेकेषु हि प्राणिषु कश्चिदेव विवेकी स्यात्, यथेदानीम्। न च विवेकिनम् अनुवर्तन्ते मूढाः, रागादिदोषतन्त्रत्वात् प्रवृत्तेः, अभिचरणादौ च प्रवृत्तिदर्शनात्, स्वाभाव्याच्च प्रवृत्तेः -- 'स्वभावस्तु प्रवर्तते (गीता ५।१४)' इति हि उक्तम्।।

तस्मात् अविद्यामात्रं संसारः यथादृष्टविषयः व। न क्षेत्रज्ञस्य केवलस्य अविद्या तत्कार्यं च। न च मिथ्याज्ञानं परमार्थवस्तु दूषयितुं समर्थम्। न हि ऊषरदेशं स्नेहेन पङ्कीकर्तुं शक्नोति मरीच्युदकम्। तथा अविद्या क्षेत्रज्ञस्य न किञ्चित् कर्तुं शक्नोति। अतश्चेदमुक्तम् -- 'क्षेत्रज्ञं चापि मां विद्धि (गीता १३।२) ', 'अज्ञानेनावृतं ज्ञानम् (गीता ५।१५)' इति च।।

अथ किमिदं संसारिणामिव 'अहमेवम्' 'ममैवेदम्' इति पण्डितानामपि? श्रृणु; इदं तत् पाण्डित्यम्, यत् क्षेत्रे व आत्मदर्शनम्। यदि पुनः क्षेत्रज्ञम् अविक्रियं पश्येयुः, ततः न भोगं कर्म वा आकाङ्क्षेयुः 'मम स्यात् ' इति। विक्रियैव भोगकर्मणी। अथ वं सति, फलार्थित्वात् अविद्वान् प्रवर्तते। विदुषः पुनः अविक्रियात्मदर्शिनः फलार्थित्वाभावात् प्रवृत्त्यनुपपत्तौ कार्यकरणसंघातव्यापारोपरमे निवृत्तिः उपचर्यते।।

इदं च अन्यत् पाण्डित्यं केषाञ्चित् अस्तु -- क्षेत्रज्ञः ईश्वर व। क्षेत्रं च अन्यत् क्षेत्रज्ञस्यैव

विषयः। अहं तु संसारी सुखी दुःखी च। संसारोपरमश्च मम कर्तव्यः क्षेत्रक्षेत्रज्ञविज्ञानेन, ध्यानेन च ईश्वरं क्षेत्रज्ञं साक्षात्कृत्वा तत्स्वरूपावस्थानेनेति। यश्च वं बुध्यते, यश्च बोधयति, नासौ क्षेत्रज्ञः इति। वं मन्वानः यः सः पण्डितापसदः, संसारमोक्षयोः शास्त्रस्य च अर्थवत्त्वं करोमीति; आत्महा स्वयं मूढः अन्यांश्च व्यामोहयति शास्त्रार्थसंप्रदायरहितत्वात्, श्रुतहानिम् अश्रुतकल्पनां च कुर्वन्। तस्मात् असंप्रदायवित् सर्वशास्त्रविदपि मूर्खवदेव उपेक्षणीयः।।

यत्तूक्तम् 'ईश्वरस्य क्षेत्रज्ञैकत्वे संसारित्वं प्राप्नोति, क्षेत्रज्ञानां च ईश्वरैकत्वे संसारिणः अभावात् संसाराभावप्रसङ्गः' इति,

एतौ दोषौ प्रत्युक्तौ 'विद्याविद्ययोः वैलक्षण्याभ्युपगमात्' इति। कथम्? अविद्यापरिकल्पितदोषेण तद्विषयं वस्तु पारमार्थिकं न दुष्यतीति। तथा च दृष्टान्तः दर्शितः -- मरीच्यम्भसा ऊषरदेशो न पङ्कीक्रियते इति। संसारिणः अभावात् संसाराभावप्रसङ्गदोषोऽपि संसारसंसारिणोः अविद्याकल्पितत्वोपपत्त्या प्रत्युक्तः।।

ननु अविद्यावत्त्वमेव क्षेत्रज्ञस्य संसारित्वदोषः। तत्कृतं च सुखित्वदुःखित्वादि प्रत्यक्षम् उपलभ्यते इति चेत्, न; ज्ञेयस्य क्षेत्रधर्मत्वात्, ज्ञातुः क्षेत्रज्ञस्य तत्कृतदोषानुपपत्तेः। यावत् किञ्चित् क्षेत्रज्ञस्य दोषजातम् अविद्यमानम् आसञ्जयसि, तस्य ज्ञेयत्वोपपत्तेः क्षेत्रधर्मत्वमेव, न क्षेत्रज्ञधर्मत्वम्। न च तेन क्षेत्रज्ञः दुष्यति, ज्ञेयेन ज्ञातुः संसर्गानुपपत्तेः। यदि हि संसर्गः स्यात्, ज्ञेयत्वमेव नोपपद्येत। यदि आत्मनः धर्मः अविद्यावत्त्वं दुःखित्वादि च कथं भोः प्रत्यक्षम् उपलभ्यते, कथं वा क्षेत्रज्ञधर्मः। 'ज्ञेयं च सर्वं क्षेत्रं ज्ञातैव क्षेत्रज्ञः' इति अवधारिते, 'अविद्यादुःखित्वादेः क्षेत्रज्ञविशेषणत्वं क्षेत्रज्ञधर्मत्वं तस्य च प्रत्यक्षोपलभ्यत्वम्' इति विरुद्धम् उच्यते अविद्यामात्रावष्टम्भात् केवलम्।।

अत्र आह -- सा अविद्या कस्य इति। यस्य दृश्यते तस्य व। कस्य दृश्यते इति। अत्र उच्यते -- 'अविद्या कस्य दृश्यते? इति प्रश्नः निरर्थकः। कथम्? दृश्यते चेत् अविद्या' तद्वन्तमपि पश्यसि। न च तद्वति उपलभ्यमाने 'सा कस्य?' इति प्रश्नो युक्तः। न हि गोमति उपलभ्यमाने

'गावः कस्य?' इति प्रश्नः अर्थवान् भवति। ननु विषमो दृष्टान्तः। गवां तद्वतश्च प्रत्यक्षत्वात् तत्संबन्धोऽपि प्रत्यक्ष प्रश्नो निरर्थकः। न तथा अविद्या तद्वांश्च प्रत्यक्षौ, यतः प्रश्नः निरर्थकः स्यात्। अप्रत्यक्षेण अविद्यावता अविद्यासंबन्धे ज्ञाते, किं तव स्यात्? अविद्यायाः अनर्थहेतुत्वात् परिहर्तव्या स्यात्। यस्य अविद्या, सः तां परिहरिष्यति। ननु ममैव अविद्या। जानासि तर्हि अविद्यां तद्वन्तं च आत्मानम्। जानामि, न तु प्रत्यक्षेण। अनुमानेन चेत् जानासि, कथं संबन्धग्रहणम्? न हि तव ज्ञातुः ज्ञेयभूतया अविद्यया तत्काले संबन्धः ग्रहीतुं शक्यते, अविद्याया विषयत्वेनैव ज्ञातुः उपयुक्तत्वात्। न च ज्ञातुः अविद्यायाश्च संबन्धस्य यः ग्रहीता, ज्ञानं च अन्यत् तद्विषयं संभवति; अनवस्थाप्राप्तेः। यदि ज्ञात्रापि ज्ञेयसंबन्धो ज्ञायते, अन्यः ज्ञाता कल्प्यः स्यात्, तस्यापि अन्यः, तस्यापि अन्यः इति अनवस्था अपरिहार्या। यदि पुनः अविद्या ज्ञेया, अन्यद्वा ज्ञेयं ज्ञेयमेव। तथा ज्ञातापि ज्ञातैव, न ज्ञेयं भवति। यदा च वम्, अविद्यादुःखित्वाद्यैः न ज्ञातुः क्षेत्रज्ञस्य किञ्चित् दुष्यति।।

ननु अयमेव दोषः, यत् दोषवत्क्षेत्रविज्ञातृत्वम्; न च विज्ञानस्वरूपस्यैव अविक्रियस्य विज्ञातृत्वोपचारात्; यथा उष्णतामात्रेण अग्नेः तप्तिक्रियोपचारः, तद्वत्। यथा अत्र भगवता क्रियाकारकफलात्मत्वाभावः आत्मनि स्वत व दर्शितः -- अविद्याध्यारोपितैः व क्रियाकारकादिः आत्मनि उपचर्यते; तथा तत्र तत्र 'य नं वेत्ति हन्तारम् (गीता २।१९)' 'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः (गीता ३।२७)' 'नादत्ते कस्यचित्पापम् (गीता ५।१५)' इत्यादिप्रकरणेषु दर्शितः। तथैव च व्याख्यातम् अस्माभिः। उत्तरेषु च प्रकरणेषु दर्शयिष्यामः।।

हन्त! तर्हि आत्मनि क्रियाकारकफलात्मतायाः स्वतः अभावे, अविद्यया च अध्यारोपितत्वे, कर्माणि अविद्वत्कर्तव्यान्येव, न विदुषाम् इति प्राप्तम्। सत्यम् वं प्राप्तम्, तदेव च 'न हि देहभृता शक्यम् (गीता १८।११)' इत्यत्र दर्शयिष्यामः। सर्वशास्त्रार्थोपसंहारप्रकरणे च 'समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा (गीता १८।५०)' इत्यत्र विशेषतः दर्शयिष्यामः।

अलम् इह बहुप्रपञ्चनेन, इति उपसंह्रियते।।

'इदं शरीरम् (गीता१३।१)' इत्यादिश्लोकोपदिष्टस्य क्षेत्राध्यायार्थस्य संग्रहश्लोकः अयम् उपन्यस्यते 'तत्क्षेत्रं यच्च (गीता १३।३)' इत्यादि, व्याचिख्यासितस्य हि अर्थस्य संग्रहोपन्यासः न्याय्यः इति --

।।१३.४।। --

यत् निर्दिष्टम् 'इदं शरीरम्' इति तत् तच्छब्देन परामृशति। यच्च इदं निर्दिष्टं क्षेत्रं तत् यादृक् यादृशं स्वकीयैः धर्मैः। च-शब्दः समुच्चयार्थः। यद्विकारि यः विकारः यस्य तत् यद्विकारि, यतः यस्मात् च यत्, कार्यम् उत्पद्यते इति वाक्यशेषः। स च यः क्षेत्रज्ञः निर्दिष्टः सः यत्प्रभावः ये प्रभावाः उपाधिकृताः शक्तयः यस्य सः यत्प्रभाव च। तत् क्षेत्रक्षेत्रज्ञयोः याथात्म्यं यथाविशेषितं समासेन संक्षेपेण मे मम वाक्यतः शृणु, श्रुत्वा अवधारय इत्यर्थः।।

तत् क्षेत्रक्षेत्रज्ञयाथात्म्यं विवक्षितं स्तौति श्रोतृबुद्धिप्ररोचनार्थम् --

।।१३.५।। --

षिभिः वसिष्ठादिभिः बहुधा बहुप्रकारं गीतं कथितम्। छन्दोभिः छन्दांसि

गादीनि तैः छन्दोभिः विविधैः नानाभावैः

नानाप्रकारैः पृथक् विवेकतः गीतम्। किञ्च, ब्रह्मसूत्रपदैश्च व ब्रह्मणः सूचकानि वाक्यानि ब्रह्मसूत्राणि तैः पद्यते गम्यते ज्ञायते इति तानि पदानि उच्यन्ते तैरेव च क्षेत्रक्षेत्रज्ञयाथात्म्यम् 'गीतम्' इति अनुवर्तते। 'आत्मेत्येवोपासीत (बृह० उ० १।४।७)' इत्येवमादिभिः ब्रह्मसूत्रपदैः आत्मा ज्ञायते, हेतुमद्भिः युक्तियुक्तैः विनिश्चितैः निःसंशयरूपैः निश्चितप्रत्ययोत्पादकैः इत्यर्थः।।

स्तुत्या अभिमुखीभूताय अर्जुनाय आह भगवान् --

।।१३.६।। --

महाभूतानि महान्ति च तानि सर्वविकारव्यापकत्वात् भूतानि च सूक्ष्माणि। स्थूलानि तु इन्द्रियगोचरशब्देन अभिधायिष्यन्ते अहंकारः महाभूतकारणम् अहंप्रत्ययलक्षणः। अहंकारकारणं बुद्धिः अध्यवसायलक्षणा। तत्कारणम् अव्यक्तमेव च, न व्यक्तम् अव्यक्तम् अव्याकृतम् ईश्वरशक्तिः 'मम माया दुरत्यया (गीता ७।१४)' इत्युक्तम्। वशब्दः प्रकृत्यवधारणार्थः तावत्येव अष्टधा भिन्ना प्रकृतिः। च-शब्दः भेदसमुच्चयार्थः। इन्द्रियाणि दश, श्रोत्रादीनि पञ्च बुद्ध्युत्पादकत्वात् बुद्धीन्द्रियाणि, वाक्पाण्यादीनि पञ्च कर्मनिर्वर्तकत्वात् कर्मेन्द्रियाणि; तानि दश। कं च; किं तत्? मनः कादशं संकल्पाद्यात्मकम्। पञ्च च इन्द्रियगोचराः शब्दादयो विषयाः। तानि तानि सांख्याः चतुर्विंशतितत्त्वानि आचक्षते।।

।।१३.७।। --

इच्छा, यज्जातीयं सुखहेतुमर्थम्, उपलब्धवान् पूर्वम्, पुनः तज्जातीयमुपलभमानः तमादातुमिच्छति सुखहेतुरिति; सा इयं इच्छा अन्तःकरणधर्मः ज्ञेयत्वात् क्षेत्रम्। तथा द्वेषः,

यज्जातीयमर्थं दुःखहेतुत्वेन अनुभूतवान्, पुनः तज्जातीयमर्थमुपलभमानः तं द्वेष्टि; सोऽयं द्वेषः ज्ञेयत्वात् क्षेत्रमेव। तथा सुखम् अनुकूलं प्रसन्नसत्त्वात्मकं ज्ञेयत्वात् क्षेत्रमेव। दुःखं प्रतिकूलात्मकम्; ज्ञेयत्वात् तदपि क्षेत्रम्। संघातः देहेन्द्रियाणां संहतिः। तस्यामभिव्यक्तान्तःकरणवृत्तिः, तप्त इव लोहपिण्डे अग्निः आत्मचैतन्याभासरसविद्धा चेतना; सा च क्षेत्रं ज्ञेयत्वात्। धृतिः यया अवसादप्राप्तानि देहेन्द्रियाणि ध्रियन्ते; सा च ज्ञेयत्वात् क्षेत्रम्। सर्वान्तःकरणधर्मोपलक्षणार्थम् इच्छादिग्रहणम्। यत उक्तमुपसंहरति तत् क्षेत्रं समासेन सविकारं सह विकारेण महदादिना उदाहृतम् उक्तम्।।

यस्य क्षेत्रभेदजातस्य संहतिः 'इदं शरीरं क्षेत्रम्' इति उक्तम्, तत् क्षेत्रं व्याख्यातं महाभूतादिभेदभिन्नं धृत्यन्तम्। क्षेत्रज्ञः वक्ष्यमाणविशेषणः -- यस्य सप्रभावस्य क्षेत्रज्ञस्य परिज्ञानात् अमृतत्वं भवति, तम् 'ज्ञेयं यत्तत्प्रवक्ष्यामि (गीता १३।१२)' इत्यादिना सविशेषणं स्वयमेव वक्ष्यति भगवान्। अधुना तु तज्ज्ञानसाधनगणममानित्वादिलक्षणम्, यस्मिन् सति तज्ज्ञेयविज्ञाने योग्यः अधिकृतः भवति, यत्परः संन्यासी ज्ञाननिष्ठः उच्यते, तम् अमानित्वादिगणं ज्ञानसाधनत्वात् ज्ञानशब्दवाच्यं विदधाति भगवान् --

।।१३.८।। --

अमानित्वं मानिनः भावः मानित्वमात्मनः श्लाघनम्, तदभावः अमानित्वम्। अदम्भित्वं स्वधर्मप्रकटीकरणं दम्भित्वम्, तदभावः अदम्भित्वम्। अहिंसा अहिंसनं प्राणिनामपीडनम्। क्षान्तिः परापराधप्राप्तौ अविक्रिया। आर्जवम्

जुभावः अवक्रत्वम्। आचार्योपासनं मोक्षसाधनोपदेष्टुः आचार्यस्य शुश्रूषादिप्रयोगेण सेवनम्। शौचं कायमलानां मृज्जलाभ्यां प्रक्षालनम्; अन्तश्च मनसः प्रतिपक्षभावनया रागादिमलानामपनयनं शौचम्। स्थैर्यं स्थिरभावः, मोक्षमार्गे व कृताध्यवसायत्वम्।

आत्मविनिग्रहः आत्मनः अपकारकस्य आत्मशब्दवाच्यस्य कार्यकरणसंघातस्य विनिग्रहः स्वभावेन सर्वतः प्रवृत्तस्य सन्मार्गे व निरोधः आत्मविनिग्रहः।।

किञ्च --

।।१३.९।। --

इन्द्रियार्थेषु शब्दादिषु दृष्टादृष्टेषु भोगेषु विरागभावो वैराग्यम् अनहंकारः अहंकाराभावः व च जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं जन्म च मृत्युश्च जरा च व्याधयश्च दुःखानि च तेषु जन्मादिदुःखान्तेषु प्रत्येकं दोषानुदर्शनम्। जन्मनि गर्भवासयोनिद्वारनिःसरणं दोषः, तस्य अनुदर्शनमालोचनम्। तथा मृत्यौ दोषानुदर्शनम्। तथा जरायां प्रज्ञाशक्तितेजोनिरोधदोषानुदर्शनं परिभूतता चेति। तथा व्याधिषु शिरोरोगादिषु दोषानुदर्शनम्। तथा दुःखेषु अध्यात्माधिभूताधिदैवनिमित्तेषु। अथवा दुःखान्येव दोषः दुःखदोषः तस्य जन्मादिषु पूर्ववत् अनुदर्शनम् -- दुःखं जन्म, दुःखं मृत्युः, दुःखं जरा, दुःखं व्याधयः। दुःखनिमित्तत्वात् जन्मादयः दुःखम्, न पुनः स्वरूपेणैव दुःखमिति। वं जन्मादिषु दुःखदोषानुदर्शनात् देहेन्द्रियादिविषयभोगेषु वैराग्यमुपजायते। ततः प्रत्यगात्मनि प्रवृत्तिः करणानामात्मदर्शनाय। वं ज्ञानहेतुत्वात् ज्ञानमुच्यते जन्मादिदुःखदोषानुदर्शनम्।।

किञ्च -- -

।।१३.१०।। -- -

असक्तिः सक्तिः सङ्गनिमित्तेषु विषयेषु प्रीतिमात्रम्, तदभावः असक्तिः। अनभिष्वङ्गः अभिष्वङ्गाभावः। अभिष्वङ्गो नाम आसक्तिविशेष व अनन्यात्मभावनालक्षणः; यथा अन्यस्मिन् सुखिनि दुःखिनि वा 'अहमेव सुखी, दुःखी च,' जीवति मृते वा 'अहमेव जीवामि मरिष्यामि च'

इति। क्व इति आह -- पुत्रदारगृहादिषु, पुत्रेषु दारेषु गृहेषु आदिग्रहणात् अन्येष्वपि अत्यन्तेष्टेषु दासवर्गादिषु। तच्च उभयं ज्ञानार्थत्वात् ज्ञानमुच्यते। नित्यं च समचित्तत्वं तुल्यचित्तता। क्व? इष्टानिष्टोपपत्तिषु इष्टानामनिष्टानां च उपपत्तयः संप्राप्तयः तासु इष्टानिष्टोपपत्तिषु नित्यमेव तुल्यचित्तता। इष्टोपपत्तिषु न हृष्यति, न कुप्यति च अनिष्टोपपत्तिषु। तच्च तत् नित्यं समचित्तत्वं ज्ञानम्।।

किञ्च --

।।१३.११।। --

मयि च इश्वरे अनन्ययोगेन अपृथक्समाधिना 'न अन्यो भगवतो वासुदेवात् परः अस्ति, अतः स व नः गतिः' इत्येवं निश्चिता अव्यभिचारिणी बुद्धिः अनन्ययोगः, तेन भजनं भक्तिः न व्यभिचरणशीला अव्यभिचारिणी। सा च ज्ञानम्। विविक्तदेशसेवित्वम्, विविक्तः स्वभावतः संस्कारेण वा अशुच्यादिभिः सर्पव्याघ्रादिभिश्च रहितः अरण्यनदीपुलिनदेवगृहादिभिर्विविक्तो देशः, तं सेवितुं शीलमस्य इति विविक्तदेशसेवी, तद्भावः विवक्तदेशसेवित्वम्। विविक्तेषु हि देशेषु चित्तं प्रसीदति यतः ततः आत्मादिभावना विविक्ते उपजायते। अतः विविक्तदेशसेवित्वं ज्ञानमुच्यते। अरतिः अरमणं जनसंसदि, जनानां प्राकृतानां संस्कारशून्यानाम् अविनीतानां संसत् समवायः जनसंसत्; न संस्कारवतां विनीतानां संसत्; तस्याः ज्ञानोपकारकत्वात्। अतः प्राकृतजनसंसदि अरतिः ज्ञानार्थत्वात् ज्ञानम्।।

किञ्च --

।।१३.१२।। --

अध्यात्मज्ञाननित्यत्वम् आत्मादिविषयं ज्ञानम् अध्यात्मज्ञानम्, तस्मिन् नित्यभावः नित्यत्वम्।

अमानित्वादीनां ज्ञानसाधनानां भावनापरिपाकनिमित्तं तत्त्वज्ञानम्, तस्य अर्थः मोक्षः संसारोपरमः; तस्य आलोचनं तत्त्वज्ञानार्थदर्शनम्; तत्त्वज्ञानफलालोचने हि तत्साधनानुष्ठाने प्रवृत्तिः स्यादिति। तत् अमानित्वादितत्त्वज्ञानार्थदर्शनान्तमुक्तं ज्ञानम् इति प्रोक्तं ज्ञानार्थत्वात्। अज्ञानं यत् अतः अस्मात् यथोक्तात् अन्यथा विपर्ययेण। मानित्वं दम्भित्वं हिंसा अक्षान्तिः अनार्जवम् इत्यादि अज्ञानं विज्ञेयं परिहरणाय, संसारप्रवृत्तिकारणत्वात् इति।।

यथोक्तेन ज्ञानेन ज्ञातव्यं किम् इत्याकाङ्क्षायामाह -- 'ज्ञेयं यत्तत् ' इत्यादि। ननु यमाः नियमाश्च अमानित्वादयः। न तैः ज्ञेयं ज्ञायते। न हि अमानित्वादि कस्यचित् वस्तुनः परिच्छेदकं दृष्टम्। सर्वत्रैव च यद्विषयं ज्ञानं तदेव तस्य ज्ञेयस्य परिच्छेदकं दृश्यते। न हि अन्यविषयेण ज्ञानेन अन्यत् उपलभ्यते, यथा घटविषयेण ज्ञानेन अग्निः। नैष दोषः, ज्ञाननिमित्तत्वात् ज्ञानमुच्यते इति हि अवोचाम; ज्ञानसहकारिकारणत्वाच्च --

।।१३.१३।। --

ज्ञेयं ज्ञातव्यं यत् तत् प्रवक्ष्यामि प्रकर्षेण यथावत् वक्ष्यामि। किं फलं तत् इति प्ररोचनेन श्रोतुः अभिमुखीकरणाय आह -- यत् ज्ञेयं ज्ञात्वा अमृतम् अमृतत्वम् अश्नुते, न पुनः म्रियते इत्यर्थः। अनादिमत् आदिः अस्य अस्तीति आदिमत्, न आदिमत् अनादिमत्; किं तत्? परं निरतिशयं ब्रह्म, 'ज्ञेयम्' इति प्रकृतम्।।

अत्र केचित् 'अनादि मत्परम्' इति पदं छिन्दन्ति, बहुव्रीहिणा उक्ते अर्थे मतुपः आनर्थक्यम् अनिष्टं स्यात् इति। अर्थविशेषं च दर्शयन्ति -- अहं वासुदेवाख्या परा शक्तिः यस्य तत् मत्परम् इति। सत्यमेवमपुनरुक्तं स्यात्, अर्थः चेत् संभवति। न तु अर्थः संभवति, ब्रह्मणः सर्वविशेषप्रतिषेधेनैव विजिज्ञापयिषितत्वात् 'न सत्तन्नासदुच्यते' इति। विशिष्टशक्तिमत्त्वप्रदर्शनं विशेषप्रतिषेधश्च इति विप्रतिषिद्धम्। तस्मात् मतुपः बहुव्रीहिणा समानार्थत्वेऽपि प्रयोगः श्लोकपूरणार्थः।।

अमृतत्वफलं ज्ञेयं मया उच्यते इति प्ररोचनेन अभिमुखीकृत्य आह -- न सत् तत् ज्ञेयमुच्यते इति न अपि असत् तत् उच्यते।।

ननु महता परिकरबन्धेन कण्ठरवेण उद्घुष्य 'ज्ञेयं प्रवक्ष्यामि' इति, अननुरूपमुक्तं 'न सत्तन्नासदुच्यते' इति। न, अनुरूपमेव उक्तम्। कथम्? सर्वासु हि उपनिषत्सु ज्ञेयं ब्रह्म 'नेति नेति (बृह० उ० ४।४।२२)' 'अस्थूलमनणु (बृह० उ० ३।३।८)' इत्यादिविशेषप्रतिषेधेनैव निर्दिश्यते, न 'इदं तत् ' इति, वाचः अगोचरत्वात्।।

ननु न तदस्ति, यद्वस्तु अस्तिशब्देन नोच्यते। अथ अस्तिशब्देन नोच्यते, नास्ति तत् ज्ञेयम्। विप्रतिषिद्धं च -- 'ज्ञेयं तत् ', 'अस्तिशब्देन नोच्यते' इति च। न तावन्नास्ति, नास्तिबुद्ध्यविषयत्वात्।।

ननु सर्वाः बुद्धयः अस्तिनास्तिबुद्ध्यनुगताः व। तत्र वं सति ज्ञेयमपि अस्तिबुद्ध्यनुगतप्रत्ययविषयं वा स्यात्, नास्तिबुद्ध्यनुगतप्रत्ययविषयं वा स्यात्। न, अतीन्द्रियत्वेन उभयबुद्ध्यनुगतप्रत्ययाविषयत्वात्। यद्धि इन्द्रियगम्यं वस्तु घटादिकम्, तत् अस्तिबुद्ध्यनुगतप्रत्ययविषयं वा स्यात्, नास्तिबुद्ध्यनुगतप्रत्ययविषयं वा स्यात्। इदं तु ज्ञेयम् अतीन्द्रियत्वेन शब्दैकप्रमाणगम्यत्वात् न घटादिवत् उभयबुद्ध्यनुगतप्रत्ययविषयम् इत्यतः 'न सत्तन्नासत्' इति उच्यते।।

यत्तु उक्तम् -- विरुद्धमुच्यते, 'ज्ञेयं तत्' 'न सत्तन्नासदुच्यते' इति -- न विरुद्धम्, 'अन्यदेव तद्विदितादथो अविदितादधि (के० उ० १।३)' इति श्रुतेः। श्रुतिरपि विरुद्धार्था इति चेत् -- यथा यज्ञाय शालामारभ्य 'यद्यमुष्मिँल्लोकेऽस्ति वा न वेति (तै० सं० ६।१।१)' इत्येवमिति चेत्, न;

विदिताविदिताभ्यामन्यत्वश्रुतेः अवश्यविज्ञेयार्थप्रतिपादनपरत्वात् 'यद्यमुष्मिन्' इत्यादि तु विधिशेषः अर्थवादः। उपपत्तेश्च सदसदादिशब्दैः ब्रह्म नोच्यते इति। सर्वो हि शब्दः अर्थप्रकाशनाय प्रयुक्तः, श्रूयमाणश्च श्रोतृभिः, जातिक्रियागुणसंबन्धद्वारेण संकेतग्रहणसव्यपेक्षः अर्थं प्रत्याययति; न अन्यथा, अदृष्टत्वात्। तत् यथा -- 'गौः' 'अश्वः' इति वा जातितः, 'पचति' 'पठति ' इति वा क्रियातः, 'शुक्लः' 'कृष्णः' इति वा गुणतः, 'धनी' 'गोमान्' इति वा संबन्धतः। न तु ब्रह्म जातिमत्, अतः न सदादिशब्दवाच्यम्। नापि गुणवत्, येन गुणशब्देन उच्येत, निर्गुणत्वात्। नापि क्रियाशब्दवाच्यं निष्क्रियत्वात् 'निष्कलं निष्क्रियं शान्तम् (श्वे० उ० ६।१९)' इति श्रुतेः। न च संबन्धी, कत्वात्। अद्वयत्वात् अविषयत्वात् आत्मत्वाच्च न केनचित् शब्देन उच्यते इति युक्तम्; 'यतो वाचो निवर्तन्ते (तै० उ० २।४।९)' इत्यादिश्रुतिभिश्च।।

सच्छब्दप्रत्ययाविषयत्वात् असत्त्वाशङ्कायां ज्ञेयस्य सर्वप्राणिकरणोपाधिद्वारेण तदस्तित्वं प्रतिपादयन् तदाशङ्कानिवृत्त्यर्थमाह --

।।१३.१४।। --

सर्वतःपाणिपादं सर्वतः पाणयः पादाश्च अस्य इति सर्वतःपाणिपादं तत् ज्ञेयम्। सर्वप्राणिकरणोपाधिभिः क्षेत्रज्ञस्य अस्तित्वं विभाव्यते। क्षेत्रज्ञश्च क्षेत्रोपाधितः उच्यते। क्षेत्रं च पाणिपादादिभिः अनेकधा भिन्नम्। क्षेत्रोपाधिभेदकृतं विशेषजातं मिथ्यैव क्षेत्रज्ञस्य, इति तदपनयनेन ज्ञेयत्वमुक्तम् 'न सत्तन्नासदुच्यते' इति। उपाधिकृतं मिथ्यारूपमपि अस्तित्वाधिगमाय ज्ञेयधर्मवत् परिकल्प्य उच्यते 'सर्वतःपाणिपादम्' इत्यादि। तथा हि संप्रदायविदां वचनम् -- 'अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते' इति। सर्वत्र सर्वदेहावयवत्वेन गम्यमानाः पाणिपादादयः ज्ञेयशक्तिसद्भावनिमित्तस्वकार्याः इति ज्ञेयसद्भावे लिङ्गानि 'ज्ञेयस्य' इति उपचारतः उच्यन्ते। तथा व्याख्येयम् अन्यत्। सर्वतःपाणिपादं तत् ज्ञेयम्। सर्वतोऽक्षिशिरोमुखं सर्वतः अक्षीणि शिरांसि मुखानि च यस्य तत् सर्वतोऽक्षिशिरोमुखम्; सर्वतःश्रुतिमत् श्रुतिः श्रवणेन्द्रियम्, तत् यस्य तत् श्रुतिमत्, लोके प्राणिनिकाये, सर्वम् आवृत्य

संव्याप्य तिष्ठति स्थितिं लभते।।

उपाधिभूतपाणिपादादीन्द्रियाध्यारोपणात् ज्ञेयस्य तद्वत्ताशङ्का मा भूत् इत्येवमर्थः श्लोकारम्भः --

।।१३.१५।। --

सर्वेन्द्रियगुणाभासं सर्वाणि च तानि इन्द्रियाणि श्रोत्रादीनि बुद्धीन्द्रियकर्मेन्द्रियाख्यानि, अन्तःकरणे च बुद्धिमनसी, ज्ञेयोपाधित्वस्य तुल्यत्वात्, सर्वेन्द्रियग्रहणेन गृह्यन्ते। अपि च, अन्तःकरणोपाधिद्वारेणैव श्रोत्रादीनामपि उपाधित्वम् इत्यतः अन्तःकरणबहिष्करणोपाधिभूतैः सर्वेन्द्रियगुणैः अध्यवसायसंकल्पश्रवणवचनादिभिः अवभासते इति सर्वेन्द्रियगुणाभासं सर्वेन्द्रियव्यापारैः व्यापृतमिव तत् ज्ञेयम् इत्यर्थः; 'ध्यायतीव लेलायतीव (बृह० उ० ४।३।७)' इति श्रुतेः। कस्मात् पुनः कारणात् न व्यापृतमेवेति गृह्यते इत्यतः आह -- सर्वेन्द्रियविवर्जितम्, सर्वकरणरहितमित्यर्थः। अतः न करणव्यापारैः व्यापृतं तत् ज्ञेयम्। यस्तु अयं मन्त्रः -- 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः (श्वे० उ० ३।१९)' इत्यादिः, स सर्वेन्द्रियोपाधिगुणानुगुण्यभजनशक्तिमत् तत् ज्ञेयम् इत्येवं प्रदर्शनार्थः, न तु साक्षादेव जवनादिक्रियावत्त्वप्रदर्शनार्थः। 'अन्धो

मणिमविन्दत् (तै० आ० १।११)' इत्यादिमन्त्रार्थवत् तस्य मन्त्रस्य अर्थः। यस्मात् सर्वकरणवर्जितं ज्ञेयम्, तस्मात् असक्तं सर्वसंश्लेषवर्जितम्। यद्यपि वम्, तथापि सर्वभृच्च व। सदास्पदं हि सर्वं सर्वत्र सद्बुद्ध्यनुगमात्। न हि मृगतृष्णिकादयोऽपि निरास्पदाः भवन्ति। अतः सर्वभृत् सर्वं बिभर्ति इति। स्यात् इदं च अन्यत् ज्ञेयस्य सत्त्वाधिगमद्वारम् -- निर्गुणं सत्त्वरजस्तमांसि गुणाः तैः वर्जितं तत् ज्ञेयम्, तथापि गुणभोक्तृ च गुणानां सत्त्वरजस्तमसां शब्दादिद्वारेण सुखदुःखमोहाकारपरिणतानां भोक्तृ च उपलब्धृ च तत् ज्ञेयम् इत्यर्थः।।

किञ्च --

।।१३.१६।। --

बहिः त्वक्पर्यन्तं देहम् आत्मत्वेन अविद्याकल्पितम् अपेक्ष्य तमेव अवधिं कृत्वा बहिः उच्यते। तथा प्रत्यगात्मानमपेक्ष्य देहमेव अवधिं कृत्वा अन्तः उच्यते। 'बहिरन्त च' इत्युक्ते मध्ये अभावे प्राप्ते, इदमुच्यते -- अचरं चरमेव च, यत् चराचरं देहाभासमपि तदेव ज्ञेयं यथा रज्जुसर्पाभासः। यदि अचरं चरमेव च स्यात् व्यवहारविषयं सर्वं ज्ञेयम्, किमर्थम् 'इदम्' इति सर्वैः न विज्ञेयम् इति? उच्यते -- सत्यं सर्वाभासं तत्; तथापि व्योमवत् सूक्ष्मम्। अतः सूक्ष्मत्वात् स्वेन रूपेण तत् ज्ञेयमपि अविज्ञेयम् अविदुषाम्। विदुषां तु, 'आत्मैवेदं सर्वम् (छा० उ० ७।२५।२)' 'ब्रह्मैवेदं सर्वम् (बृ० उ० २।५।१)' इत्यादिप्रमाणतः नित्यं विज्ञातम्। अविज्ञाततया दूरस्थं वर्षसहस्रकोट्यापि अविदुषाम् अप्राप्यत्वात्। अन्तिके च तत्, आत्मत्वात् विदुषाम्।।

किञ्च --

।।१३.१७।। --

अविभक्तं च प्रतिदेहं व्योमवत् तदेकम्। भूतेषु सर्वप्राणिषु विभक्तमिव च स्थितं देहेष्वेव विभाव्यमानत्वात्। भूतभर्तृ च भूतानि बिभर्तीति तत् ज्ञेयं भूतभर्तृ च स्थितिकाले। प्रलयकाले गृसिष्णु ग्रसनशीलम्। उत्पत्तिकाले प्रभविष्णु च प्रभवनशीलं यथा रज्जवादिः सर्पादेः मिथ्याकल्पितस्य।।

किञ्च, सर्वत्र विद्यमानमपि सत् न उपलभ्यते चेत्, ज्ञेयं तमः तर्हि? न। किं तर्हि? --

(१३.१८।। -- -

ज्योतिषाम् आदित्यादीनामपि तत् ज्ञेयं ज्योतिः। आत्मचैतन्यज्योतिषा इद्धानि हि आदित्यादीनि ज्योतींषि दीप्यन्ते, 'येन सूर्यस्तपति तेजसेद्धः' 'तस्य भासा सर्वमिदं विभाति (श्वे० उ० ६।१४)' इत्यादिश्रुतिभ्यः; स्मृतेश्च इहैव -- 'यदादित्यगतं तेजः' इत्यादेः। तमसः अज्ञानात् परम् अस्पृष्टम् उच्यते। ज्ञानादेः दुःसंपादनबुद्ध्या प्राप्तावसादस्य उत्तम्भनार्थमाह -- ज्ञानम् अमानित्वादि; ज्ञेयम् 'ज्ञेयं यत् तत् प्रवक्ष्यामि (गीता १३।१२)' इत्यादिना उक्तम्; ज्ञानगम्यम् ज्ञेयमेव ज्ञातं सत् ज्ञानफलमिति ज्ञानगम्यमुच्यते; ज्ञायमानं तु ज्ञेयम्। तत् तत् त्रयमपि हृदि बुद्धौ सर्वस्य प्राणिजातस्य विष्ठितं विशेषेण स्थिम्। तत्रैव हि त्रयं विभाव्यते।।

यथोक्तार्थोपसंहारार्थः अयं श्लोकः आरभ्यते --

।।१३.१९।। --

इति वं क्षेत्रं महाभूतादि धृत्यन्तं तथा ज्ञानम् अमानित्वादि तत्त्वज्ञानार्थदर्शनपर्यन्तं ज्ञेयं च 'ज्ञेयं यत् तत्' इत्यादि 'तमसः परमुच्यते (गीता १३।१७)' इत्येवमन्तम् उक्तं समासतः संक्षेपतः। तावान् सर्वः हि वेदार्थः गीतार्थश्च उपसंहृत्य उक्तः। अस्मिन् सम्यग्दर्शने कः अधिक्रियते इति उच्यते -- मद्भक्तः मयि ईश्वरे सर्वज्ञे परमगुरौ वासुदेवे समर्पितसर्वात्मभावः यत् पश्यति शृणोति स्पृशति वा 'सर्वमेव भगवान् वासुदेवः' इत्येवंग्रहाविष्टबुद्धिः मद्भक्तः। स तत् यथोक्तं सम्यग्दर्शनं विज्ञाय, मद्भावाय मम भावः मद्भावः परमात्मभावः तस्मै मद्भावाय उपपद्यते मोक्षं गच्छति।।

तत्र सप्तमे ईश्वरस्य द्वे प्रकृती उपन्यस्ते, परापरे क्षेत्रक्षेत्रज्ञलक्षणे; 'एतद्योनीनि भूतानि' इति च उक्तम्। क्षेत्रक्षेत्रज्ञप्रकृतिद्वययोनित्वं कथं भूतानामिति अयमर्थः अधुना उच्यते --

।।१३.२०।। --

प्रकृतिं पुरुषं चैव ईश्वरस्य प्रकृती तौ प्रकृतिपुरुषौ उभावपि अनादि विद्धि, न विद्यते आदिः ययोः तौ अनादी। नित्येश्वरत्वात् ईश्वरस्य तत्प्रकृत्योरपि युक्तं नित्यत्वेन भवितुम्। प्रकृतिद्वयवत्त्वमेव हि ईश्वरस्य ईश्वरत्वम्। याभ्यां प्रकृतिभ्याम् ईश्वरः जगदुत्पत्तिस्थितिप्रलयहेतुः, ते द्वे अनादी सत्यौ संसारस्य कारणम्।।

न आदी अनादी इति तत्पुरुषसमासं केचित् वर्णयन्ति। तेन हि किल ईश्वरस्य कारणत्वं सिध्यति। यदि पुनः प्रकृतिपुरुषावेव नित्यौ स्यातां तत्कृतमेव जगत् न ईश्वरस्य जगतः कर्तृत्वम्। तत् असत्; प्राक् प्रकृतिपुरुषयोः उत्पत्तेः ईशितव्याभावात् ईश्वरस्य अनीश्वरत्वप्रसङ्गात्, संसारस्य निर्निमित्तत्वे अनिर्मोक्षप्रसङ्गात् शास्त्रानर्थक्यप्रसङ्गात् बन्धमोक्षाभावप्रसङ्गाच्च। नित्यत्वे पुनः ईश्वरस्य प्रकृत्योः सर्वमेतत् उपपन्नं भवेत्। कथम्? विकारांश्च गुणांश्चैव वक्ष्यमाणान्विकारान् बुद्ध्यादिदेहेन्द्रियान्तान् गुणांश्च सुखदुःखमोहप्रत्ययाकारपरिणतान् विद्धि जानीहि प्रकृतिसंभवान्, प्रकृतिः ईश्वरस्य विकारकारणशक्तिः त्रिगुणात्मिका माया, सा संभवो येषां विकाराणां गुणानां च तान् विकारान् गुणांश्च विद्धि प्रकृतिसंभवान् प्रकृतिपरिणामान्।।

के पुनः ते विकाराः गुणाश्च प्रकृतिसंभवाः --

।।१३.२१।। --

कार्यकरणकर्तृत्वे -- कार्यं शरीरं करणानि तत्स्थानि त्रयोदश। देहस्यारम्भकाणि भूतानि पञ्च विषयाश्च प्रकृतिसंभवाः विकाराः पूर्वोक्ताः इह कार्यग्रहणेन गृह्यन्ते। गुणाश्च प्रकृतिसंभवाः सुखदुःखमोहात्मकाः करणाश्रयत्वात् करणग्रहणेन गृह्यन्ते। तेषां कार्यकरणानां कर्तृत्वम् उत्पादकत्वं यत् तत् कार्यकरणकर्तृत्वं तस्मिन् कार्यकरणकर्तृत्वे हेतुः कारणम् आरम्भकत्वेन प्रकृतिः उच्यते। वं कार्यकरणकर्तृत्वेन संसारस्य कारणं प्रकृतिः। कार्यकारणकर्तृत्वे इत्यस्मिन्नपि पाठे, कार्यं यत् यस्य विपरिणामः तत् तस्य कार्यं विकारः विकारि कारणं तयोः विकारविकारिणोः कार्यकारणयोः कर्तृत्वे इति। अथवा, षोडश विकाराः कार्यं सप्त प्रकृतिविकृतयः कारणम् तान्येव कार्यकारणान्युच्यन्ते तेषां कर्तृत्वे हेतुः प्रकृतिः उच्यते, आरम्भकत्वेनैव। पुरुषश्च संसारस्य कारणं यथा स्यात् तत् उच्यते -- पुरुषः जीवः क्षेत्रज्ञः भोक्ता इति पर्यायः, सुखदुःखानां भोग्यानां भोक्तृत्वे उपलब्धृत्वे हेतुः उच्यते।।

कथं पुनः अनेन कार्यकरणकर्तृत्वेन सुखदुःखभोक्तृत्वेन च प्रकृतिपुरुषयोः संसारकारणत्वमुच्यते इति, अत्र उच्यते -- कार्यकरणसुखदुःखरूपेण हेतुफलात्मना प्रकृतेः परिणामाभावे, पुरुषस्य च चेतनस्य असति तदुपलब्धृत्वे, कुतः संसारः स्यात्? यदा पुनः कार्यकरणसुखदुःखस्वरूपेण हेतुफलात्मना परिणतया प्रकृत्या भोग्यया पुरुषस्य तद्विपरीतस्य भोक्तृत्वे न अविद्यारूपः संयोगः स्यात्, तदा संसारः स्यात् इति। अतः यत् प्रकृतिपुरुषयोः कार्यकरणकर्तृत्वेन सुखदुःखभोक्तृत्वेन च संसारकारणत्वमुक्तम्, तत् युक्तम्। कः पुनः अयं संसारो नाम? सुखदुःखसंभोगः संसारः। पुरुषस्य च सुखदुःखानां संभोक्तृत्वं संसारित्वमिति।।

यत् पुरुषस्य सुखदुःखानां भोक्तृत्वं संसारित्वम् इति उक्तं तस्य तत् किं निमित्तमिति उच्यते --

।।१३.२२।। --

पुरुषः भोक्ता प्रकृतिस्थः प्रकृतौ अविद्यालक्षणायां कार्यकरणरूपेण परिणतायां स्थितः प्रकृतिस्थः, प्रकृतिमात्मत्वेन गतः इत्येतत्, हि यस्मात्, तस्मात् भुङ्क्ते उपलभते इत्यर्थः। प्रकृतिजान् प्रकृतितः जातान् सुखदुःखमोहाकाराभिव्यक्तान् गुणान् 'सुखी, दुःखी, मूढः, पण्डितः अहम्' इत्येवम्। सत्यामपि अविद्यायां सुखदुःखमोहेषु गुणेषु भुज्यमानेषु यः सङ्गः आत्मभावः संसारस्य सः प्रधानं कारणं जन्मनः, 'सः यथाकामो भवति तत्क्रतुर्भवति (बृह० उ० ४।४।५)' इत्यादिश्रुतेः। तदेतत् आह -- कारणं हेतुः गुणसङ्गः गुणेषु सङ्गः अस्य पुरुषस्य भोक्तुः सदसद्योनिजन्मसु, सत्यश्च असत्यश्च योनयः सदसद्योनयः तासु सदसद्योनिषु जन्मानि सदसद्योनिजन्मानि, तेषु सदसद्योनिजन्मसु विषयभूतेषु कारणं गुणसङ्गः। अथवा, सदसद्योनिजन्मसु अस्य संसारस्य कारणं गुणसङ्गः इति संसारपदमध्याहार्यम्। सद्योनयः देवादियोनयः; असद्योनयः पश्वादियोनयः। सामर्थ्यात् सदसद्योनयः मनुष्ययोनयोऽपि अविरुद्धाः द्रष्टव्याः।।

एतत् उक्तं भवति -- प्रकृतिस्थत्वाख्या अविद्या, गुणेषु च सङ्गः कामः, संसारस्य कारणमिति। तच्च परिवर्जनाय उच्यते। अस्य च निवृत्तिकारणं ज्ञानवैराग्ये ससंन्यासे गीताशास्त्रे प्रसिद्धम्। तच्च ज्ञानं पुरस्तात् उपन्यस्तं क्षेत्रक्षेत्रज्ञविषयम् 'यज्ज्ञात्वामृतमश्नुते' इति। उक्तं च अन्यापोहेन अतद्धर्माध्यारोपेण च।।

तस्यैव पुनः साक्षात् निर्देशः क्रियते --

।।१३.२३।। -- -

उपद्रष्टा समीपस्थः सन् द्रष्टा स्वयम् अव्यापृतः। यथा

त्विग्यजमानेषु यज्ञकर्मव्यापृतेषु तटस्थः अन्यः अव्यापृतः

यज्ञविद्याकुशलः

त्विग्यजमानव्यापारगुणदोषाणाम् ईक्षिता, तद्वच्च कार्यकरणव्यापारेषु अव्यापृतः अन्यः तद्विलक्षणः तेषां कार्यकरणानां सर्वव्यापाराणां सामीप्येन द्रष्टा उपद्रष्टा। अथवा, देहचक्षुर्मनोबुद्ध्यात्मानः द्रष्टारः, तेषां बाह्यः द्रष्टा देहः, ततः आरभ्य अन्तरतमश्च प्रत्यक् समीपे आत्मा द्रष्टा, यतः परः अन्तरतमः नास्ति द्रष्टा; सः अतिशयसामीप्येन द्रष्टृत्वात् उपद्रष्टा स्यात्। यज्ञोपद्रष्टृवद्वा सर्वविषयीकरणात् उपद्रष्टा। अनुमन्ता च, अनुमोदनम् अनुमननं कुर्वत्सु तत्क्रियासु परितोषः, तत्कर्ता अनुमन्ता च। अथवा, अनुमन्ता, कार्यकरणप्रवृत्तिषु स्वयम् अप्रवृत्तोऽपि प्रवृत्त इव तदनुकूलः विभाव्यते, तेन अनुमन्ता। अथवा, प्रवृत्तान् स्वव्यापारेषु तत्साक्षिभूतः कदाचिदपि न निवारयति इति अनुमन्ता। भर्ता, भरणं नाम देहेन्द्रियमनोबुद्धीनां संहतानां चैतन्यात्मपारार्थ्येन निमित्तभूतेन चैतन्याभासानां यत् स्वरूपधारणम्, तत् चैतन्यात्मकृतमेव इति भर्ता आत्मा इति उच्यते। भोक्ता, अग्न्युष्णवत्, नित्यचैतन्यस्वरूपेण बुद्धेः सुखदुःखमोहात्मकाः प्रत्ययाः सर्वविषयविषयाः चैतन्यात्मग्रस्ता इव जायमानाः विभक्ताः विभाव्यन्ते इति भोक्ता आत्मा उच्यते। महेश्वरः, सर्वात्मत्वात् स्वतन्त्रत्वाच्च महान् ईश्वरश्च इति महेश्वरः। परमात्मा, देहादीनां बुद्ध्यन्तानां प्रत्यगात्मत्वेन कल्पितानाम् अविद्यया परमः उपद्रष्टृत्वादिलक्षणः आत्मा इति परमात्मा। 'सोऽन्तः परमात्मा' इत्यनेन शब्देन च अपि उक्तः कथितः श्रुतौ। क्व असौ? अस्मिन् देहे पुरुषः परः अव्यक्तात्, 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः (गीता १५।१७)' इति यः वक्ष्यमाणः।।

'क्षेत्रज्ञं चापि मां विद्धि (गीता १३।२)' इति उपन्यस्तः व्याख्याय उपसंहृतश्च, तमेतं यथोक्तलक्षणम् आत्मानम् --

।।१३.२४।। --

यः वं यथोक्तप्रकारेण वेत्ति पुरुषं साक्षात् अहमिति प्रकृतिं च यथोक्ताम् अविद्यालक्षणां गुणैः स्वविकारैः सह निवर्तिताम् अभावम् आपादितां विद्यया, सर्वथा सर्वप्रकारेण वर्तमानोऽपि सः भूयः पुनः पतिते अस्मिन् विद्वच्छरीरे देहान्तराय न अभिजायते न उत्पद्यते, देहान्तरं न गृह्णाति इत्यर्थः। अपिशब्दात् किमु वक्तव्यं स्ववृत्तस्थो न जायते इति अभिप्रायः।।

ननु, यद्यपि ज्ञानोत्पत्त्यनन्तरं पुनर्जन्माभाव उक्तः, तथापि प्राक् ज्ञानोत्पत्तेः कृतानां कर्मणाम् उत्तरकालभाविनां च, यानि च अतिक्रान्तानेकजन्मकृतानि तेषां च, फलमदत्त्वा नाशो न युक्त इति, स्युः त्रीणि जन्मानि, कृतविप्रणाशो हि न युक्त इति, यथा फले प्रवृत्तानाम् आरब्धजन्मनां कर्मणाम्। न च कर्मणां विशेषः अवगम्यते। तस्मात् त्रिप्रकाराण्यपि कर्माणि त्रीणि जन्मानि आरभेरन्; संहतानि वा सर्वाणि कं जन्म आरभेरन्। अन्यथा कृतविनाशे सति सर्वत्र अनाश्वासप्रसङ्गः, शास्त्रानर्थक्यं च स्यात्। इत्यतः इदमयुक्तमुक्तम् 'न स भूयोऽभिजायते' इति। न; 'क्षीयन्ते चास्य कर्माणि (मु० उ० २।२।८)' 'ब्रह्म वेद ब्रह्मैव भवति (मु० उ० ३।२।९)' 'तस्य तावदेव चिरम् (छा० उ० ६।१४।२)' 'इषीकातूलवत् सर्वाणि कर्माणि प्रदूयन्ते (छा० उ० ५।२४।३)' इत्यादिश्रुतिशतेभ्यः उक्तो विदुषः सर्वकर्मदाहः। इहापि च उक्तः 'यथैधांसि' इत्यादिना सर्वकर्मदाहः, वक्ष्यति च। उपपत्तेश्च -- अविद्याकामक्लेशबीजनिमित्तानि हि कर्माणि जन्मान्तराङ्कुरम् आरभन्ते; इहापि च 'साहंकाराभिसंधीनि कर्माणि फलारम्भकाणि, न इतराणि' इति तत्र तत्र भगवता उक्तम्। 'बीजान्यग्न्युपदग्धानि न रोहन्ति यथा पुनः। ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संपद्यते पुनः' इति च। अस्तु तावत् ज्ञानोत्पत्त्युत्तरकालकृतानां कर्मणां ज्ञानेन दाहः ज्ञानसहभावित्वात्। न तु इह जन्मनि ज्ञानोत्पत्तेः प्राक् कृतानां कर्मणां अतीतजन्मकृतानां च दाहः युक्तः। न; 'सर्वकर्माणि' इति विशेषणात्। ज्ञानोत्तरकालभाविनामेव सर्वकर्मणाम् इति चेत्, न; संकोचे कारणानुपपत्तेः। यत्तु उक्तम् 'यथा वर्तमानजन्मारम्भकाणि कर्माणि न क्षीयन्ते फलदानाय प्रवृत्तान्येव सत्यपि ज्ञाने, तथा अनारब्धफलानामपि कर्मणां क्षयो

न युक्तः' इति, तत् असत्। कथम्? तेषां मुक्तेषुवत् प्रवृत्तफलत्वात्। यथा पूर्वं लक्ष्यवेधाय मुक्तः इषुः धनुषः लक्ष्यवेधोत्तरकालमपि आरब्धवेगक्षयात् पतनेनैव निवर्तते, वं शरीरारम्भकं कर्म शरीरस्थितिप्रयोजने निवृत्तेऽपि, आ संस्कारवेगक्षयात् पूर्ववत् वर्तते व। यथा स व इषुः प्रवृत्तिनिमित्तानारब्धवेगस्तु अमुक्तो धनुषि प्रयुक्तोऽपि उपसंह्रियते, तथा अनारब्धफलानि कर्माणि स्वाश्रयस्थान्येव ज्ञानेन निर्बीजीक्रियन्ते इति, पतिते अस्मिन् विद्वच्छरीरे 'न स भूयोऽभिजायते' इति युक्तमेव उक्तमिति सिद्धम्।।

अत्र आत्मदर्शने उपायविकल्पाः इमे ध्यानादयः उच्यन्ते --

।।१३.२५।। --

ध्यानेन, ध्यानं नाम शब्दादिभ्यो विषयेभ्यः श्रोत्रादीनि करणानि मनसि उपसंहृत्य, मनश्च प्रत्यक्चेतयितरि, काग्रतया यत् चिन्तनं तत् ध्यानम्; तथा, ध्यायतीव बकः, ध्यायतीव पृथिवी, ध्यायन्तीव पर्वताः (छा० उ० ७।६।१) इति उपमोपादानात्। तैलधारावत् संततः अविच्छिन्नप्रत्ययो ध्यानम्; तेन ध्यानेन आत्मनि बुद्धौ पश्यन्ति आत्मानं प्रत्यक्चेतनम् आत्मना स्वेनैव प्रत्यक्चेतनेन ध्यानसंस्कृतेन अन्तःकरणेन केचित् योगिनः। अन्ये सांख्येन योगेन, सांख्यं नाम 'इमे सत्त्वरजस्तमांसि गुणाः मया दृश्या अहं तेभ्योऽन्यः तद्व्यापारसाक्षिभूतः नित्यः गुणविलक्षणः आत्मा' इति चिन्तनम् षः सांख्यो योगः, तेन '
पश्यन्ति आत्मानमात्मना' इति वर्तते। कर्मयोगेन, कर्मैव योगः, ईश्वरार्पणबुद्ध्या अनुष्ठीयमानं घटनरूपं योगार्थत्वात् योगः उच्यते गुणतः; तेन सत्त्वशुद्धिज्ञानोत्पत्तिद्वारेण च अपरे।।

।।१३.२६।। --

अन्ये तु षु विकल्पेषु अन्यतरेणापि वं यथोक्तम् आत्मानम् अजानन्तः अन्येभ्यः आचार्येभ्यः श्रुत्वा 'इदमेव चिन्तयत' इति उक्ताः उपासते श्रद्दधानाः सन्तः चिन्तयन्ति। तेऽपि च अतितरन्त्येव अतिक्रामन्त्येव मृत्युम्, मृत्युयुक्तं संसारम् इत्येतत्। श्रुतिपरायणाः श्रुतिः श्रवणं परम् अयनं गमनं मोक्षमार्गप्रवृत्तौ परं साधनं येषां ते श्रुतिपरायणाः; केवलपरोपदेशप्रमाणाः स्वयं विवेकरहिताः इत्यभिप्रायः। किमु वक्तव्यम् प्रमाणं प्रति स्वतन्त्राः विवेकिनः मृत्युम् अतितरन्ति इति अभिप्रायः।।

क्षेत्रज्ञेश्वरैकत्वविषयं ज्ञानं मोक्षसाधनम् 'यज्ज्ञात्वामृतमश्नुते' इत्युक्तम्, तत् कस्मात् हेतोरिति, तद्धेतुप्रदर्शनार्थं श्लोकः आरभ्यते --

।।१३.२७।। --

यावत् यत् किञ्चित् संजायते समुत्पद्यते सत्त्वं वस्तु; किम् अविशेषेण? नेत्याह -- स्थावरजङ्गमं स्थावरं जङ्गमं च क्षेत्रक्षेत्रज्ञसंयोगात् तत् जायते इत्येवं विद्धि जानीहि भरतर्षभ।।

कः पुनः अयं क्षेत्रक्षेत्रज्ञयोः संयोगः अभिप्रेतः? न तावत् रज्ज्वेव घटस्य अवयवसंश्लेषद्वारकः संबन्धविशेषः संयोगः क्षेत्रेण क्षेत्रज्ञस्य संभवति, आकाशवत् निरवयवत्वात्। नापि समवायलक्षणः तन्तुपटयोरिव क्षेत्रक्षेत्रज्ञयोः इतरेतरकार्यकारणभावानभ्युपगमात् इति, उच्यते -- क्षेत्रक्षेत्रज्ञयोः विषयविषयिणोः भिन्नस्वभावयोः इतरेतरतद्धर्माध्यासलक्षणः संयोगः क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धनः, रज्जुशुक्तिकादीनां तद्विवेकज्ञानाभावात् अध्यारोपितसर्परजतादिसंयोगवत्। सः अयं अध्यासस्वरूपः क्षेत्रक्षेत्रज्ञसंयोगः मिथ्याज्ञानलक्षणः। यथाशास्त्रं क्षेत्रक्षेत्रज्ञलक्षणभेदपरिज्ञानपूर्वकं प्राक् दर्शितरूपात् क्षेत्रात् मुञ्जादिव इषीकां

यथोक्तलक्षणं क्षेत्रज्ञं प्रविभज्य 'न सत्तन्नासदुच्यते' इत्यनेन निरस्तसर्वोपाधिविशेषं ज्ञेयं ब्रह्मस्वरूपेण यः पश्यति, क्षेत्रं च मायानिर्मितहस्तिस्वप्नदृष्टवस्तुगन्धर्वनगरादिवत् 'असदेव सदिव अवभासते' इति वं निश्चितविज्ञानः यः, तस्य यथोक्तसम्यग्दर्शनविरोधात् अपगच्छति मिथ्याज्ञानम्। तस्य जन्महेतोः अपगमात् 'य वं वेत्ति पुरुषं प्रकृतिं च गुणैः सह (गीता १३।२३)' इत्यनेन 'विद्वान् भूयः न अभिजायते' इति यत् उक्तम्, तत् उपपन्नमुक्तम्।।

'न स भूयोऽभिजायते' इति सम्यग्दर्शनफलम् अविद्यादिसंसारबीजनिवृत्तिद्वारेण जन्माभावः उक्तः। जन्मकारणं च अविद्यानिमित्तकः क्षेत्रक्षेत्रज्ञसंयोगः उक्तः; अतः तस्याः अविद्यायाः निवर्तकं सम्यग्दर्शनम् उक्तमपि पुनः शब्दान्तरेण उच्यते --

।।१३.२८।। --

समं निर्विशेषं तिष्ठन्तं स्थितिं कुर्वन्तम्; क्व? सर्वेषु समस्तेषु भूतेषु ब्रह्मादिस्थावरान्तेषु प्राणिषु; कम्? परमेश्वरं देहेन्द्रियमनोबुद्ध्यव्यक्तात्मनः अपेक्ष्य परमेश्वरः, तं सर्वेषु भूतेषु समं तिष्ठन्तम्। तानि विशिनष्टि विनश्यत्सु इति, तं च परमेश्वरम् अविनश्यन्तम् इति, भूतानां परमेश्वरस्य च अत्यन्तवैलक्षण्यप्रदर्शनार्थम्। कथम्? सर्वेषां हि भावविकाराणां जनिलक्षणः भावविकारो मूलम्; जन्मोत्तरकालभाविनः अन्ये सर्वे भावविकाराः विनाशान्ताः; विनाशात् परो न कश्चित् अस्ति भावविकारः, भावाभावात्। सति हि धर्मिणि धर्माः भवन्ति। अतः अन्त्यभावविकाराभावानुवादेन पूर्वभाविनः सर्वे भावविकाराः प्रतिषिद्धाः भवन्ति सह कार्यैः। तस्मात् सर्वभूतैः वैलक्षण्यम् अत्यन्तमेव परमेश्वरस्य सिद्धम्, निर्विशेषत्वम् कत्वं च। यः वं यथोक्तं परमेश्वरं पश्यति, सः पश्यति।।

ननु सर्वोऽपि लोकः पश्यति, किं विशेषणेन इति। सत्यं पश्यति; किं तु विपरीतं पश्यति। अतः विशिनष्टि -- स व पश्यतीति। यथा तिमिरदृष्टिः अनेकं चन्द्रं पश्यति, तमपेक्ष्य कचन्द्रदर्शी विशिष्यते -- स व पश्यतीति; तथा इहापि कम् अविभक्तं यथोक्तं आत्मानं यः

पश्यति, सः विभक्तानेकात्मविपरीतदर्शिभ्यः विशिष्यते -- स व पश्यतीति। इतरे पश्यन्तोऽपि न पश्यन्ति, विपरीतदर्शित्वात् अनेकचन्द्रदर्शिवत् इत्यर्थः।।

यथोक्तस्य सम्यग्दर्शनस्य फलवचनेन स्तुतिः कर्तव्या इति श्लोकः आरभ्यते --

।।१३.२९।। --

समं पश्यन् उपलभमानः हि यस्मात् सर्वत्र सर्वभूतेषु समवस्थितं तुल्यतया अवस्थितम् ईश्वरम्

अतीतानन्तरश्लोकोक्तलक्षणमित्यर्थः। समं पश्यन् किम्? न हिनस्ति हिंसां न करोति आत्मना स्वेनैव स्वमात्मानम्। ततः तदहिंसनात् याति परां प्रकृष्टां गतिं मोक्षाख्याम्।।

ननु नैव कश्चित् प्राणी स्वयं स्वम् आत्मानं हिनस्ति। कथम् उच्यते अप्राप्तम् 'न हिनस्ति' इति? यथा 'न पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे' इत्यादि। नैष दोषः, अज्ञानाम् आत्मतिरस्करणोपपत्तेः। सर्वो हि अज्ञः अत्यन्तप्रसिद्धं साक्षात् अपरोक्षात् आत्मानं तिरस्कृत्य अनात्मानम् आत्मत्वेन परिगृह्य, तमपि धर्माधर्मौ कृत्वा उपात्तम् आत्मानं हत्वा अन्यम् आत्मानम् उपादत्ते नवं तं चैवं हत्वा अन्यमेवं तमपि हत्वा अन्यम् इत्येवम् उपात्तमुपात्तम् आत्मानं हन्ति, इति आत्महा सर्वः अज्ञः। यस्तु परमार्थात्मा, असावपि सर्वदा अविद्यया हत इव, विद्यमानफलाभावात्, इति सर्वे आत्महनः व अविद्वांसः। यस्तु इतरः यथोक्तात्मदर्शी, सः उभयथापि आत्मना आत्मानं न हिनस्ति न हन्ति। ततः याति परां गतिम् यथोक्तं फलं तस्य भवति इत्यर्थः।।

सर्वभूतस्थम् ईश्वरं समं पश्यन् न हिनस्ति आत्मना आत्मानम्' इति उक्तम्। तत् अनुपपन्नं स्वगुणकर्मवैलक्षण्यभेदभिन्नेषु आत्मसु, इत्येतत् आशङ्क्य आह --

।।१३.३०।। --

प्रकृत्या प्रकृतिः भगवतः माया त्रिगुणात्मिका, 'मायां तु प्रकृतिं विद्यात् (श्वे० उ० ४।१०)' इति मन्त्रवर्णात्, तया प्रकृत्यैव च न अन्येन महदादिकार्यकरणाकारपरिणतया कर्माणि वाङ्मनःकायारभ्याणि क्रियमाणानि निर्वर्त्यमानानि सर्वशः सर्वप्रकारैः यः पश्यति उपलभते, तथा आत्मानं क्षेत्रज्ञम् अकर्तारं सर्वोपाधिविवर्जितं सः पश्यति, सः परमार्थदर्शी इत्यभिप्रायः; निर्गुणस्य अकर्तुः निर्विशेषस्य आकाशस्येव भेदे प्रमाणानुपपत्तिः इत्यर्थः।।

पुनरपि तदेव सम्यग्दर्शनं शब्दान्तरेण प्रपञ्चयति --

।।१३.३१।। --

यदा यस्मिन् काले भूतपृथग्भावं भूतानां पृथग्भावं पृथक्त्वम् कस्मिन् आत्मनि स्थितं कस्थम् अनुपश्यति शास्त्राचार्योपदेशम्, अनु आत्मानं प्रत्यक्षत्वेन पश्यति 'आत्मैव इदं सर्वम् (छा० उ० ७।२५।२)' इति, तत व च तस्मादेव च विस्तारं उत्पत्तिं विकासम् 'आत्मतः प्राण आत्मत आशा आत्मतः स्मर आत्मत आकाश आत्मतस्तेज आत्मत आप आत्मत आविर्भावतिरोभावावात्मतोऽन्नम् (छा० उ० ७।२६।१)' इत्येवमादिप्रकारैः विस्तारं यदा पश्यति, ब्रह्म संपद्यते भवति तदा तस्मिन् काले इत्यर्थः।।

एकस्य आत्मानः सर्वदेहात्मत्वे तद्दोषसंबन्धे प्राप्ते, इदम् उच्यते --

।।१३.३२।। -- -

अनादित्वात् अनादेः भावः अनादित्वम्, आदिः कारणम्, तत् यस्य नास्ति तत् अनादि। यद्धि आदिमत् तत् स्वेन आत्मना व्येति; अयं तु अनादित्वात् निरवयव इति कृत्वा न व्येति। तथा निर्गुणत्वात्। सगुणो हि गुणव्ययात् व्येति; अयं तु निर्गुणत्वाच्च न व्येति; इति परमात्मा अयम् अव्ययः; न अस्य व्ययो विद्यते इति अव्ययः। यत वमतः शरीरस्थोऽपि, शरीरेषु आत्मनः उपलब्धिः भवतीति शरीरस्थः उच्यते; तथापि न करोति। तदकरणादेव तत्फलेन न लिप्यते। यो हि कर्ता, सः कर्मफलेन लिप्यते। अयं तु अकर्ता, अतः न फलेन लिप्यते इत्यर्थः।।

कः पुनः देहेषु करोति लिप्यते च? यदि तावत् अन्यः परमात्मनो देही करोति लिप्यते च, ततः इदम् अनुपपन्नम् उक्तं क्षेत्रज्ञेश्वरैकत्वम् 'क्षेत्रज्ञं चापि मां विद्धि (गीता १३।२)' इत्यादि। अथ नास्ति ईश्वरादन्यो देही, कः करोति लिप्यते च? इति वाच्यम्; परो वा नास्ति इति सर्वथा दुर्विज्ञेयं दुर्वाच्यं च इति भगवत्प्रोक्तम् औपनिषदं दर्शनं परित्यक्तं वैशेषिकैः सांख्यार्हतबौद्धैश्च। तत्र अयं परिहारो भगवता स्वेनैव उक्तः 'स्वभावस्तु प्रवर्तते (गीता ५।१४)' इति। अविद्यामात्रस्वभावो हि करोति लिप्यते इति व्यवहारो भवति, न तु परमार्थत कस्मिन् परमात्मनि तत् अस्ति। अतः तस्मिन् परमार्थसांख्यदर्शने स्थितानां ज्ञाननिष्ठानां परमहंसपरिव्राजकानां तिरस्कृताविद्याव्यवहाराणां कर्माधिकारो नास्ति इति तत्र तत्र दर्शितं भगवता।।

किमिव न करोति न लिप्यते इति अत्र दृष्टान्तमाह --

।।१३.३३।। -- -

यथा सर्वगतं व्यापि अपि सत् सौक्ष्म्यात् सूक्ष्मभावात् आकाशं खं न उपलिप्यते न संबध्यते, सर्वत्र अवस्थितः देहे तथा आत्मा

न उपलिप्यते।।

किञ्च --

।।१३.३४।। -- -

यथा प्रकाशयति अवभासयति कः कृत्स्नं लोकम् इमं रविः सविता आदित्यः, तथा तद्वत् महाभूतादि धृत्यन्तं क्षेत्रम् कः सन् प्रकाशयति। कः? क्षेत्री परमात्मा इत्यर्थः। रविदृष्टान्तः अत्र आत्मनः उभयार्थोऽपि भवति -- रविवत् सर्वक्षेत्रेषु क व आत्मा, अलेपकश्च इति।।

समस्ताध्यायार्थोपसंहारार्थः अयं श्लोकः --

।।१३.३५।। -- -

क्षेत्रक्षेत्रज्ञयोः यथाव्याख्यातयोः वं यथाप्रदर्शितप्रकारेण अन्तरम् इतरेतरवैलक्षण्यविशेषं ज्ञानचक्षुषा शास्त्राचार्यप्रसादोपदेशजनितम् आत्मप्रत्ययिकं ज्ञानं चक्षुः, तेन ज्ञानचक्षुषा, भूतप्रकृतिमोक्षं च, भूतानां प्रकृतिः अविद्यालक्षणा अव्यक्ताख्या, तस्याः भूतप्रकृतेः मोक्षणम् अभावगमनं च ये विदुः विजानन्ति, यान्ति गच्छन्ति ते परं परमात्मतत्त्वं ब्रह्म, न पुनः देहं आददते इत्यर्थः।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
त्रयोदशोऽध्यायः।।
श्रीमच्छंकरभगवत्पादविरचितम्
श्रीमद्भगवद्गीताभाष्यम्

BHAGAVADGITA
Sanskrit Commentary - Sri Sankaracharya
Chapter 14
DV

।।१४.१।। --

परं ज्ञानम् इति व्यवहितेन संबन्धः, भूयः पुनः पूर्वेषु सर्वेष्वध्यायेषु असकृत् उक्तमपि प्रवक्ष्यामि। तच्च परं परवस्तुविषयत्वात्। किं तत्? ज्ञानं सर्वेषां ज्ञानानाम् उत्तमम्, उत्तमफलत्वात्। ज्ञानानाम् इति न अमानित्वादीनाम्; किं तर्हि? यज्ञादिज्ञेयवस्तुविषयाणाम् इति। तानि न मोक्षाय, इदं तु मोक्षाय इति परोत्तमशब्दाभ्यां स्तौति श्रोतृबुद्धिरुच्युत्पादनार्थम्। यत् ज्ञात्वा यत् ज्ञानं ज्ञात्वा प्राप्य मुनयः संन्यासिनः मननशीलाः सर्वे परां सिद्धिं मोक्षाख्याम् इतः अस्मात् देहबन्धनात् ऊर्ध्वं गताः प्राप्ताः।।

अस्याश्च सिद्धेः कान्तिकत्वं दर्शयति --

।।१४.२।। --

इदं ज्ञानं यथोक्तमुपाश्रित्य, ज्ञानसाधनम् अनुष्ठाय इत्येतत्, मम परमेश्वरस्य साधर्म्यं मत्स्वरूपताम् आगताः प्राप्ताः इत्यर्थः। न तु समानधर्मता साधर्म्यम्, क्षेत्रज्ञेश्वरयोः भेदानभ्युपगमात् गीताशास्त्रे। फलवादश्च अयं स्तुत्यर्थम् उच्यते। सर्गेऽपि सृष्टिकालेऽपि न उपजायन्ते। न उत्पद्यन्ते। प्रलये ब्रह्मणोऽपि विनाशकाले न व्यथन्ति च व्यथां न आपद्यन्ते, न च्यवन्ति इत्यर्थः।।

क्षेत्रक्षेत्रज्ञसंयोगः ईदृशः भूतकारणम् इत्याह --

।।१४.३।। --

मम स्वभूता मदीया माया त्रिगुणात्मिका प्रकृतिः योनिः सर्वभूतानां कारणम्। सर्वकार्येभ्यो महत्त्वात् भरणाच्च स्वविकाराणां महत् ब्रह्म इति योनिरेव विशिष्यते। तस्मिन् महति ब्रह्मणि योनौ गर्भं हिरण्यगर्भस्य जन्मनः बीजं सर्वभूतजन्मकारणं बीजं दधामि निक्षिपामि क्षेत्रक्षेत्रज्ञप्रकृतिद्वयशक्तिमान् ईश्वरः अहम्, अविद्याकामकर्मोपाधिस्वरूपानुविधायिनं क्षेत्रज्ञं क्षेत्रेण संयोजयामि इत्यर्थः। संभवः उत्पत्तिः सर्वभूतानां हिरण्यगर्भोत्पत्तिद्वारेण ततः तस्मात् गर्भाधानात् भवति हे भारत।।

।।१४.४।। --

देवपितृमनुष्यपशुमृगादिसर्वयोनिषु कौन्तेय, मूर्तयः देहसंस्थानलक्षणाः मूर्छिताङ्गावयवाः मूर्तयः संभवन्ति याः, तासां मूर्तीनां ब्रह्म महत् सर्वावस्थं योनिः कारणम् अहम् ईश्वरः बीजप्रदः गर्भाधानस्य कर्ता पिता।।

के गुणाः कथं बध्नन्तीति, उच्यते --

।।१४.५।। --

सत्त्वं रजः तमः इति वंनामानः। गुणाः इति पारिभाषिकः शब्दः, न रूपादिवत् द्रव्याश्रिताः गुणाः। न च गुणगुणिनोः अन्यत्वमत्र विवक्षितम्। तस्मात् गुणा इव नित्यपरतन्त्राः क्षेत्रज्ञं प्रति अविद्यात्मकत्वात् क्षेत्रज्ञं निबध्नन्तीव। तम् आस्पदीकृत्य आत्मानं प्रतिलभन्ते इति निबध्नन्ति इति उच्यते। ते च प्रकृतिसंभवाः भगवन्मायासंभवाः निबध्नन्ति इव हे महाबाहो, महान्तौ समर्थतरौ आजानुप्रलम्बौ बाहू यस्य सः महाबाहुः, हे महाबाहो देहे शरीरे देहिनं देहवन्तम्

अव्ययम्, अव्ययत्वं च उक्तम् 'अनादित्वात् (गीता १३.३१)' इत्यादिश्लोकेन। ननु 'देही न लिप्यते' इत्युक्तम्। तत कथम् इह निबध्नन्ति इति अन्यथा उच्यते? परिह्रतम् अस्माभिः इवशब्देन निबध्नन्ति इव इति।।

तत्र सत्त्वादीनां सत्त्वस्यैव तावत् लक्षणम् उच्यते --

।।१४.६।। --

निर्मलत्वात् स्फटिकमणिरिव प्रकाशकम् अनामयं निरुपद्रवं सत्त्वं तन्निबध्नाति। कथम्? सुखसङ्गेन 'सुखी अहम्' इति विषयभूतस्य सुखस्य विषयिणि आत्मनि संश्लेषापादनं मृषैव सुखे सञ्जनम् इति। सैषा अविद्या। न हि विषयधर्मः विषयिणः भवति। इच्छादि च धृत्यन्तं क्षेत्रस्यैव विषयस्य धर्मः इति उक्तं भगवता। अतः अविद्ययैव स्वकीयधर्मभूतया विषयविषय्यविवेकलक्षणया अस्वात्मभूते सुखे सञ्जयति इव, आसक्तमिव करोति, असङ्गं सक्तमिव करोति, असुखिनं सुखिनमिव। तथा ज्ञानसङ्गेन च, ज्ञानमिति सुखसाहचर्यात् क्षेत्रस्यैव विषयस्य अन्तःकरणस्य धर्मः, न आत्मनः; आत्मधर्मत्वे सङ्गानुपपत्तेः, बन्धानुपपत्तेश्च। सुखे इव ज्ञानादौ सङ्गः मन्तव्यः। हे अनघ अव्यसन।।

।।१४.७।। --

रजः रागात्मकं रञ्जनात् रागः गैरिकादिवद्रागात्मकं विद्धि जानीहि। तृष्णासङ्गसमुद्भवं तृष्णा अप्राप्ताभिलाषः, आसङ्गः प्राप्ते विषये मनसः प्रीतिलक्षणः संश्लेषः, तृष्णासङ्गयोः समुद्भवं तृष्णासङ्गसमुद्भवम्। तन्निबध्नाति तत् रजः निबध्नाति कौन्तेय कर्मसङ्गेन, दृष्टादृष्टार्थेषु कर्मसु सञ्जनं तत्परता कर्मसङ्गः, तेन निबध्नाति रजः देहिनम्।।

।।१४.८।। --

तमः तृतीयः गुणः अज्ञानजम् अज्ञानात् जातम् अज्ञानजं विद्धि मोहनं मोहकरम् अविवेककरं सर्वदेहिनां सर्वेषां देहवताम्। प्रमादालस्यनिद्राभिः प्रमादश्च आलस्यं च निद्रा च प्रमादालस्यनिद्राः ताभिः प्रमादालस्यनिद्राभिः तत् तमः निबध्नाति भारत।।

पुनः गुणानां व्यापारः संक्षेपतः उच्यते --

।।१४.९।। --

सत्त्वं सुखे सञ्जयति संश्लेषयति, रजः कर्मणि हे भारत सञ्जयति इति अनुवर्तते। ज्ञानं सत्त्वकृतं विवेकम् आवृत्य आच्छाद्य तु तमः स्वेन आवरणात्मना प्रमादे सञ्जयति उत प्रमादः नाम प्राप्तकर्तव्याकरणम्।।

उक्तं कार्यं कदा कुर्वन्ति गुणा इति उच्यते -- -

।।१४.१०।। -- -

रजः तमश्च उभावपि अभिभूय सत्त्वं भवति उद्भवति वर्धते यदा, तदा लब्धात्मकं सत्त्वं स्वकार्यं ज्ञानसुखादि आरभते हे भारत। तथा रजोगुणः सत्त्वं तमश्च व उभावपि अभिभूय वर्धते यदा, तदा कर्म तृष्णादि स्वकार्यम् आरभते। तम आख्यो गुणः सत्त्वं रजश्च उभावपि अभिभूय तथैव वर्धते यदा, तदा ज्ञानावरणादि स्वकार्यम् आरभते।।

यदा यो गुणः उद्भूतः भवति, तदा तस्य किं लिङ्गमिति उच्यते --

।।१४.११।। --

सर्वद्वारेषु, आत्मनः उपलब्धिद्वाराणि श्रोत्रादीनि सर्वाणि करणानि, तेषु सर्वद्वारेषु अन्तःकरणस्य बुद्धेः वृत्तिः प्रकाशः देहे अस्मिन् उपजायते। तदेव ज्ञानम्। यदा वं प्रकाशो ज्ञानाख्यः उपजायते, तदा ज्ञानप्रकाशेन लिङ्गेन विद्यात् विवृद्धम् उद्भूतं सत्त्वम् इति उत अपि।।

रजसः उद्भूतस्य इदं चिह्नम् -- -

।।१४.१२।। -- -

लोभः परद्रव्यादित्सा, प्रवृत्तिः प्रवर्तनं सामान्यचेष्टा, आरम्भः; कस्य? कर्मणाम्। अशमः अनुपशमः, हर्षरागादिप्रवृत्तिः स्पृहा सर्वसामान्यवस्तुविषया तृष्णा -- रजसि गुणे विवृद्धे तानि लिङ्गानि जायन्ते हे भरतर्षभ।।

।।१४.१३।। --

अप्रकाशः अविवेकः, अत्यन्तम् अप्रवृत्तिश्च प्रवृत्त्यभावः तत्कार्यं प्रमादो मोह व च अविवेकः मूढता इत्यर्थः। तमसि गुणे विवृद्धे तानि लिङ्गानि जायन्ते हे कुरुनन्दन।।

मरणद्वारेणापि यत् फलं प्राप्यते, तदपि सङ्गरागहेतुकं सर्वं गौणमेव इति दर्शयन् आह --

।।१४.१४।। --

यदा सत्त्वे प्रवृद्धे उद्भूते तु प्रलयं मरणं याति प्रतिपद्यते देहभृत् आत्मा, तदा उत्तमविदां महदादितत्त्वविदाम् इत्येतत्, लोकान् अमलान् मलरहितान् प्रतिपद्यते प्राप्नोति इत्येतत्।।

।।१४.१५।। --

रजसि गुणे विवृद्धे प्रलयं मरणं गत्वा प्राप्य कर्मसङ्गिषु कर्मासक्तियुक्तेषु मनुष्येषु जायते। तथा तद्वदेव प्रलीनः मृतः तमसि विवृद्धे मूढयोनिषु पश्वादियोनिषु जायते।।

अतीतश्लोकार्थस्यैव संक्षेपः उच्यते -- -

।।१४.१६।। -- -

कर्मणः सुकृतस्य सात्त्विकस्य इत्यर्थः, आहुः शिष्टाः सात्त्विकम् व निर्मलं फलम् इति। रजसस्तु फलं दुःखं राजसस्य कर्मणः इत्यर्थः, कर्माधिकारात् फलम् अपि दुःखम् व, कारणानुरूप्यात् राजसमेव। तथा अज्ञानं तमसः तामसस्य कर्मणः अधर्मस्य पूर्ववत्।।

किं च गुणेभ्यो भवति --

।।१४.१७।। --

सत्त्वात् लब्धात्मकात् संजायते समुत्पद्यते ज्ञानम्, रजसो लोभ व च, प्रमादमोहौ च उभौ तमसो भवतः, अज्ञानमेव च भवति।।

किं च --

।।१४.१८।। --

ऊर्ध्वं गच्छन्ति देवलोकादिषु उत्पद्यन्ते सत्त्वस्थाः सत्त्वगुणवृत्तस्थाः। मध्ये तिष्ठन्ति मनुष्येषु उत्पद्यन्ते राजसाः। जघन्यगुणवृत्तस्थाः जघन्यश्च असौ गुणश्च जघन्यगुणः तमः, तस्य वृत्तं निद्रालस्यादि, तस्मिन् स्थिताः जघन्यगुणवृत्तस्थाः मूढाः अधः गच्छन्ति पश्वादिषु उत्पद्यन्ते तामसाः।।

पुरुषस्य प्रकृतिस्थत्वरूपेण मिथ्याज्ञानेन युक्तस्य भोग्येषु गुणेषु सुखदुःखमोहात्मकेषु 'सुखी दुःखी मूढः अहम् अस्मि' इत्येवंरूपः यः सङ्गः तत्कारणं पुरुषस्य सदसद्योनिजन्मप्राप्तिलक्षणस्य संसारस्य इति समासेन पूर्वाध्याये यत् उक्तम्, तत् इह 'सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः (गीता १४।५)' इति आरभ्य गुणस्वरूपम्, गुणवृत्तम्, स्ववृत्तेन च गुणानां बन्धकत्वम्, गुणवृत्तनिबद्धस्य च पुरुषस्य या गतिः, इत्येतत् सर्वं मिथ्याज्ञानमूलं बन्धकारणं विस्तरेण उक्त्वा, अधुना सम्यग्दर्शनान्मोक्षो वक्तव्यः इत्यत आह भगवान् --

।।१४.१९।। --

न अन्यं कार्यकरणविषयाकारपरिणतेभ्यः गुणेभ्यः कर्तारम् अन्यं यदा द्रष्टा विद्वान् सन् न अनुपश्यति, गुणा व सर्वावस्थाः सर्वकर्मणां कर्तारः इत्येवं पश्यति, गुणेभ्यश्च परं गुणव्यापारसाक्षिभूतं वेत्ति, मद्भावं मम भावं सः द्रष्टा अधिगच्छति।।

कथम् अधिगच्छति इति, उच्यते --

।।१४.२०।। --

गुणान् तान् यथोक्तान् अतीत्य जीवन्नेव अतिक्रम्य मायोपाधिभूतान् त्रीन् देही देहसमुद्भवान् देहोत्पत्तिबीजभूतान् जन्ममृत्युजरादुःखैः जन्म च मृत्युश्च जरा च दुःखानि च जन्ममृत्युजरादुःखानि तैः जीवन्नेव विमुक्तः सन् विद्वान् अमृतम् अश्नुते, वं मद्भावम् अधिगच्छति इत्यर्थः।।

जीवन्नेव गुणान् अतीत्य अमृतम् अश्नुते इति प्रश्नबीजं प्रतिलभ्य, अर्जुन उवाच --

अर्जुन उवाच --

।।१४.२१।। --

कैः लिङ्गैः चिह्नैः त्रीन् तान् व्याख्यातान् गुणान् अतीतः अतिक्रान्तः भवति प्रभो, किमाचारः कः अस्य आचारः इति किमाचारः कथं केन च प्रकारेण तान् त्रीन् गुणान् अतिवर्तते अतीत्य वर्तते।।

गुणातीतस्य लक्षणं गुणातीतत्वोपायं च अर्जुनेन पृष्टः अस्मिन् श्लोके प्रश्नद्वयार्थं प्रतिवचनं श्रीभगवान् उवाच। यत् तावत् 'कैः लिङ्गैः युक्तो गुणातीतो भवति' इति, तत् शृणु --

श्रीभगवानुवाच --

।।१४.२२।। --

प्रकाशं च सत्त्वकार्यं प्रवृत्तिं च रजःकार्यं मोहमेव च तमःकार्यम् इत्येतानि न द्वेष्टि संप्रवृत्तानि सम्यग्विषयभावेन उद्भूतानि -- 'मम तामसः प्रत्ययो जातः, तेन अहं मूढः; तथा राजसी

प्रवृत्तिः मम उत्पन्ना दुःखात्मिका, तेन अहं रजसा प्रवर्तितः प्रचलितः स्वरूपात्; कष्टं मम वर्तते यः अयं मत्स्वरूपावस्थानात् भ्रंशः; तथा सात्त्विको गुणः प्रकाशात्मा मां विवेकित्वम् आपादयन् सुखे च सञ्जयन् बध्नाति' इति तानि द्वेष्टि असम्यग्दर्शित्वेन। तत् वं गुणातीतो न द्वेष्टि संप्रवृत्तानि। यथा च सात्त्विकादिपुरुषः सत्त्वादिकार्याणि आत्मानं प्रति प्रकाश्य निवृत्तानि काङ्क्षति, न तथा गुणातीतो निवृत्तानि काङ्क्षति इत्यर्थः। तत् न परप्रत्यक्षं लिङ्गम्। किं तर्हि? स्वात्मप्रत्यक्षत्वात् आत्मार्थमेव तत् लक्षणम्। न हि स्वात्मविषयं द्वेषमाकाङ्क्षां वा परः पश्यति।।

अथ इदानीम् 'गुणातीतः किमाचारः?' इति प्रश्नस्य प्रतिवचनम् आह --

।।१४.२३।। --

उदासीनवत् यथा उदासीनः न कस्यचित् पक्षं भजते, तथा अयं गुणातीतत्वोपायमार्गेऽवस्थितः आसीनः आत्मवित् गुणैः यः संन्यासी न विचाल्यते विवेकदर्शनावस्थातः। तदेतत् स्फुटीकरोति -- गुणाः कार्यकरणविषयाकारपरिणताः अन्योन्यस्मिन् वर्तन्ते इति यः अवतिष्ठति। छन्दोभङ्गभयात् परस्मैपदप्रयोगः। योऽनुतिष्ठतीति वा पाठान्तरम्। न इङ्गते न चलति, स्वरूपावस्थ व भवति इत्यर्थः।।

किं च --

।।१४.२४।। --

समदुःखसुखः समे दुःखसुखे यस्य सः समदुःखसुखः, स्वस्थः स्वे आत्मनि स्थितः प्रसन्नः, समलोष्टाश्मकाञ्चनः लोष्टं च अश्मा च काञ्चनं च लोष्टाश्मकाञ्चनानि समानि यस्य सः समलोष्टाश्मकाञ्चनः, तुल्यप्रियाप्रियः प्रियं च अप्रियं च प्रियाप्रिये तुल्ये समे यस्य सोऽयं

तुल्यप्रियाप्रियः, धीरः धीमान्, तुल्यनिन्दात्मसंस्तुतिः निन्दा च आत्मसंस्तुतिश्च निन्दात्मसंस्तुती, तुल्ये निन्दात्मसंस्तुती यस्य यतेः सः तुल्यनिन्दात्मसंस्तुतिः।।

किं च --

।।१४.२५।। --

मानापमानयोः तुल्यः समः निर्विकारः; तुल्यः मित्रारिपक्षयोः, यद्यपि उदासीना भवन्ति केचित् स्वाभिप्रायेण, तथापि पराभिप्रायेण मित्रारिपक्षयोरिव भवन्ति इति तुल्यो मित्रारिपक्षयोः इत्याह। सर्वारम्भपरित्यागी, दृष्टादृष्टार्थानि कर्माणि आरभ्यन्ते इति आरम्भाः, सर्वान् आरम्भान् परित्यक्तुं शीलम् अस्य इति सर्वारम्भपरित्यागी, देहधारणमात्रनिमित्तव्यतिरेकेण सर्वकर्मपरित्यागी इत्यर्थः। गुणातीतः सः उच्यते।।

'उदासीनवत् (गीता १४।२३)' इत्यादि 'गुणातीतः स उच्यते (गीता १४।२५)' इत्येतदन्तम् उक्तं यावत् यत्नसाध्यं तावत् संन्यासिनः अनुष्ठेयं गुणातीतत्वसाधनं मुमुक्षोः; स्थिरीभूतं तु स्वसंवेद्यं सत् गुणातीतस्य यतेः लक्षणं भवति इति। अधुना 'कथं च त्रीन्गुणानतिवर्तते?' इत्यस्य प्रश्नस्य प्रतिवचनम् आह --

।।१४.२६।। --

मां च ईश्वरं नारायणं सर्वभूतहृदयाश्रितं यो यतिः कर्मी वा अव्यभिचारेण न कदाचित् यो व्यभिचरति भक्तियोगेन भजनं भक्तिः सैव योगः तेन भक्तियोगेन सेवते, सः गुणान् समतीत्य तान् यथोक्तान् ब्रह्मभूयाय, भवनं भूयः, ब्रह्मभूयाय ब्रह्मभवनाय मोक्षाय कल्पते समर्थो भवति इत्यर्थः।।

कुत तदिति उच्यते --

।।१४.२७।। --

ब्रह्मणः परमात्मनः हि यस्मात् प्रतिष्ठा अहं प्रतितिष्ठति अस्मिन् इति प्रतिष्ठा अहं प्रत्यगात्मा। कीदृशस्य ब्रह्मणः? अमृतस्य

अविनाशिनः अव्ययस्य अविकारिणः शाश्वतस्य च नित्यस्य धर्मस्य धर्मज्ञानस्य ज्ञानयोगधर्मप्राप्यस्य सुखस्य आनन्दरूपस्य ैकान्तिकस्य अव्यभिचारिणः अमृतादिस्वभावस्य परमानन्दरूपस्य परमात्मनः प्रत्यगात्मा प्रतिष्ठा, सम्यग्ज्ञानेन परमात्मतया निश्चीयते। तदेतत् 'ब्रह्मभूयाय कल्पते (गीता १४।२६)' इति उक्तम्। यया च ईश्वरशक्त्या भक्तानुग्रहादिप्रयोजनाय ब्रह्म प्रतिष्ठते प्रवर्तते, सा शक्तिः ब्रह्मैव अहम्, शक्तिशक्तिमतोः अनन्यत्वात् इत्यभिप्रायः। अथवा, ब्रह्मशब्दवाच्यत्वात् सविकल्पकं ब्रह्म। तस्य ब्रह्मणो निर्विकल्पकः अहमेव नान्यः प्रतिष्ठा आश्रयः। किंविशिष्टस्य? अमृतस्य अमरणधर्मकस्य अव्ययस्य व्ययरहितस्य। किं च, शाश्वतस्य च नित्यस्य धर्मस्य ज्ञाननिष्ठालक्षणस्य सुखस्य तज्जनितस्य ैकान्तिकस्य कान्तनियतस्य च, 'प्रतिष्ठा अहम्' इति वर्तते।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
चतुर्दशोऽध्यायः।।

BHAGAVADGITA
Sanskrit Commentary - Sri Sankaracharya
Chapter 15
DV

।।१५.१।। --

ऊर्ध्वमूलं कालतः सूक्ष्मत्वात् कारणत्वात् नित्यत्वात् महत्त्वाच्च ऊर्ध्वम्; उच्यते ब्रह्म अव्यक्तं मायाशक्तिमत्, तत् मूलं अस्येति सोऽयं संसारवृक्षः ऊर्ध्वमूलः। श्रुतेश्च -- 'ऊर्ध्वमूलोऽर्वाक्शाख षोऽश्वत्थः सनातनः (क० उ० २।६।१)' इति। पुराणे च --
'अव्यक्तमूलप्रभवस्तस्यैवानुग्रहोच्छ्रितः। बुद्धिस्कन्धमयश्चैव
इन्द्रियान्तरकोटरः।।महाभूतविशाखश्च विषयैः पत्रवांस्तथा। धर्माधर्मसुपुष्पश्च
सुखदुःखफलोदयः।।आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः। तद्ब्रह्मवनं चैव ब्रह्माचरति
नित्यशः।।तच्छित्त्वा च भित्त्वा च ज्ञानेन परमासिना। ततश्चात्मरतिं प्राप्य तस्मान्नावर्तते पुनः।।'
इत्यादि। तम् ऊर्ध्वमूलं संसारं मायामयं वृक्षम् अधःशाखं महदहंकारतन्मात्रादयः शाखा इव अस्य अधः भवन्तीति सोऽयं अधःशाखः, तम् अधःशाखम्। न श्वोऽपि स्थाता इति अश्वत्थः तं क्षणप्रध्वंसिनम् अश्वत्थं प्राहुः कथयन्ति अव्ययं संसारमायायाः अनादिकालप्रवृत्तत्वात् सोऽयं संसारवृक्षः अव्ययः, अनाद्यन्तदेहादिसंतानाश्रयः हि सुप्रसिद्धः, तम् अव्ययम्। तस्यैव संसारवृक्षस्य इदम् अन्यत् विशेषणम् -- छन्दांसि यस्य पर्णानि, छन्दांसि च्छादनात्

ग्यजुःसामलक्षणानि यस्य संसारवृक्षस्य पर्णानीव पर्णानि। यथा वृक्षस्य परिरक्षणार्थानि पर्णानि, तथा वेदाः संसारवृक्षपरिरक्षणार्थाः, धर्माधर्मतद्धेतुफलप्रदर्शनार्थत्वात्। यथाव्याख्यातं संसारवृक्षं समूलं यः तं वेद सः वेदवित्, वेदार्थवित् इत्यर्थः। न हि समूलात् संसारवृक्षात् अस्मात् ज्ञेयः अन्यः अणुमात्रोऽपि अवशिष्टः अस्ति इत्यतः सर्वज्ञः सर्ववेदार्थविदिति समूलसंसारवृक्षज्ञानं स्तौति।।

तस्य तस्य संसारवृक्षस्य अपरा अवयवकल्पना उच्यते --

।।१५.२।। --

अधः मनुष्यादिभ्यो यावत् स्थावरम् ऊर्ध्वं च यावत् ब्रह्मणः विश्वसृजो धाम इत्येतदन्तं यथाकर्म यथाश्रुतं ज्ञानकर्मफलानि, तस्य वृक्षस्य शाखा इव शाखाः प्रसृताः प्रगताः, गुणप्रवृद्धाः गुणैः सत्त्वरजस्तमोभिः प्रवृद्धाः स्थूलीकृताः उपादानभूतैः, विषयप्रवालाः विषयाः शब्दादयः प्रवालाः इव देहादिकर्मफलेभ्यः शाखाभ्यः अङ्कुरीभवन्तीव, तेन विषयप्रवालाः शाखाः। संसारवृक्षस्य परममूलं उपादानकारणं पूर्वम् उक्तम्। अथ इदानीं कर्मफलजनितरागद्वेषादिवासनाः मूलानीव धर्माधर्मप्रवृत्तिकारणानि अवान्तरभावीनि तानि अधश्च देवाद्यपेक्षया मूलानि अनुसंततानि अनुप्रविष्टानि कर्मानुबन्धीनि कर्म धर्माधर्मलक्षणम् अनुबन्धः पश्चाद्भावि, येषाम् उद्भूतिम् अनु उद्भवति, तानि कर्मानुबन्धीनि मनुष्यलोके विशेषतः। अत्र हि मनुष्याणां कर्माधिकारः प्रसिद्धः।।

यस्तु अयं वर्णितः संसारवृक्षः --

।।१५.३।। --

न रूपम् अस्य इह यथा उपवर्णितं तथा नैव उपलभ्यते, स्वप्नमरीच्युदकमायागन्धर्वनगरसमत्वात्; दृष्टनष्टस्वरूपो हि स इति अत व न अन्तः न पर्यन्तः निष्ठा परसमाप्तिर्वा विद्यते। तथा न च आदिः, 'इतः आरभ्य अयं प्रवृत्तः' इति न केनचित् गम्यते। न च संप्रतिष्ठा स्थितिः मध्यम् अस्य न केनचित् उपलभ्यते। अश्वत्थम् नं यथोक्तं सुविरूढमूलं सुष्ठु विरूढानि विरोहं गतानि सुदृढानि मूलानि यस्य तम् नं सुविरूढमूलम्, असङ्गशस्त्रेण असङ्गः पुत्रवित्तलोकैषणादिभ्यः व्युत्थानं तेन असङ्गशस्त्रेण दृढेन परमात्माभिमुख्यनिश्चयदृढीकृतेन पुनः पुनः विवेकाभ्यासाश्मनिशितेन च्छित्वा संसारवृक्षं सबीजम् उद्धृत्य।।

।।१५.४।। --

ततः पश्चात् यत् पदं वैष्णवं तत् परिमार्गितव्यम्, परिमार्गणम् अन्वेषणं ज्ञातव्यमित्यर्थः। यस्मिन् पदे गताः प्रविष्टाः न निवर्तन्ति न आवर्तन्ते भूयः पुनः संसाराय। कथं परिमार्गितव्यमिति आह -- तमेव च यः पदशब्देन उक्तः आद्यम् आदौ भवम् आद्यं पुरुषं प्रपद्ये इत्येवं परिमार्गितव्यं तच्छरणतया इत्यर्थः। कः असौ पुरुषः इति, उच्यते -- यतः यस्मात् पुरुषात् संसारमायावृक्षप्रवृत्तिः प्रसृता निःसृता,`न्द्रजालिकादिव माया, पुराणी चिरंतनी।।

कथंभूताः तत् पदं गच्छन्तीति, उच्यते --

।।१५.५।। --

निर्मानमोहाः मानश्च मोहश्च मानमोहौ, तौ निर्गतौ येभ्यः ते निर्मानमोहाः मानमोहवर्जिताः। जितसङ्गदोषाः सङ्ग व दोषः सङ्गदोषः, जितः सङ्गदोषः यैः ते जितसङ्गदोषाः। अध्यात्मनित्याः परमात्मस्वरूपालोचननित्याः तत्पराः। विनिवृत्तकामाः विशेषतो निर्लेपेन निवृत्ताः कामाः येषां ते विनिवृत्तकामाः यतयः संन्यासिनः द्वन्द्वैः प्रियाप्रियादिभिः विमुक्ताः सुखदुःखसंज्ञैः परित्यक्ताः गच्छन्ति अमूढाः मोहवर्जिताः पदम् अव्ययं तत् यथोक्तम्।।

तदेव पदं पुनः विशेष्यते --

।।१५.६।। -- -

तत् धाम इति व्यवहितेन धाम्ना संबध्यते। तत् धाम तेजोरूपं पदं न भासयते सूर्यः आदित्यः सर्वावभासनशक्तिमत्त्वेऽपि सति। तथा न शशाङ्कः चन्द्रः, न पावकः न अग्निरपि। यत् धाम वैष्णवं पदं गत्वा प्राप्य न निवर्तन्ते, यच्च सूर्यादिः न भासयते, तत् धाम पदं परमं विष्णोः मम पदम्, यत् गत्वा न निवर्तन्ते (गीता १५।६) इत्युक्तम्।।

ननु सर्वा हि गतिः आगत्यन्ता, 'संयोगाः विप्रयोगान्ताः' इति प्रसिद्धम्। कथम् उच्यते 'तत् धाम गतानां नास्ति निवृत्तिः' इति? श्रृणु तत्र कारणम् --

।।१५.७।। -- -

ममैव परमात्मनः नारायणस्य, अंशः भागः अवयवः कदेशः इति अनर्थान्तरं जीवलोके जीवानां लोके संसारे जीवभूतः कर्ता भोक्ता इति प्रसिद्धः सनातनः चिरंतनः; यथा जलसूर्यकः सूर्यांशः जलनिमित्तापाये सूर्यमेव गत्वा न निवर्तते च तेनैव आत्मना गच्छति, वमेव; यथा घटाद्युपाधिपरिच्छिन्नो घटाद्याकाशः आकाशांशः सन् घटादिनिमित्तापाये आकाशं प्राप्य न निवर्तते। अतः उपपन्नम् उक्तम् 'यद्गत्वा न निवर्तन्ते' इति। ननु निरवयवस्य परमात्मनः कुतः अवयवः कदेशः अंशः इति? सावयवत्वे च विनाशप्रसङ्गः अवयवविभागात्। नैष दोषः, अविद्याकृतोपाधिपरिच्छिन्नः कदेशः अंश इव कल्पितो यतः। दर्शितश्च अयमर्थः क्षेत्राध्याये विस्तरशः। स च जीवो मदंशत्वेन कल्पितः कथं संसरति उत्क्रामति च इति, उच्यते -- मनःषष्ठानि इन्द्रियाणि श्रोत्रादीनि प्रकृतिस्थानि स्वस्थाने कर्णशष्कुल्यादौ प्रकृतौ स्थितानि कर्षति आकर्षति।।

कस्मिन् काले? --

।।१५.८।। --

यच्चापि यदा चापि उत्क्रामति ईश्वरः देहादिसंघातस्वामी जीवः, तदा 'कर्षति' इति श्लोकस्य द्वितीयपादः अर्थवशात् प्राथम्येन संबध्यते। यदा च पूर्वस्मात् शरीरात् शरीरान्तरम् अवाप्नोति तदा गृहीत्वा तानि मनःषष्ठानि इन्द्रियाणि संयाति सम्यक् याति गच्छति। किमिव इति, आह -- वायुः पवनः गन्धानिव आशयात् पुष्पादेः।।

कानि पुनः तानि --

।।१५.९।। --

श्रोत्रं चक्षुः स्पर्शनं च त्वगिन्द्रियं रसनं घ्राणमेव च मनश्च षष्ठं प्रत्येकम् इन्द्रियेण सह, अधिष्ठाय देहस्थः विषयान् शब्दादीन् उपसेवते।।

एवं देहगतं देहात् --

।।१५.१०।। --

उत्क्रामन्तं देहं पूर्वोपात्तं परित्यजन्तं स्थितं वापि देहे तिष्ठन्तं भुञ्जानं वा शब्दादींश्च उपलभमानं गुणान्वितं सुखदुःखमोहाद्यैः गुणैः अन्वितम् अनुगतं संयुक्तमित्यर्थः। वंभूतमपि नम् अत्यन्तदर्शनगोचरप्राप्तं विमूढाः दृष्टादृष्टविषयभोगबलाकृष्टचेतस्तया अनेकधा मूढाः न अनुपश्यन्ति -- अहो कष्टं वर्तते इति अनुक्रोशति च भगवान् --

ये तु पुनः प्रमाणजनितज्ञानचक्षुषः ते नं पश्यन्ति ज्ञानचक्षुषः विविक्तदृष्टयः इत्यर्थः।।

।।१५.११।। --

यतन्तः प्रयत्नं कुर्वन्तः योगिनश्च समाहितचित्ताः नं प्रकृतम् आत्मानं पश्यन्ति 'अयम् अहम् अस्मि' इति उपलभन्ते आत्मनि स्वस्यां बुद्धौ अवस्थितम्। यतन्तोऽपि शास्त्रादिप्रमाणैः, अकृतात्मानः असंस्कृतात्मानः तपसा इन्द्रियजयेन च, दुश्चरितात् अनुपरताः, अशान्तदर्पाः, प्रयत्नं कुर्वन्तोऽपि न नं पश्यन्ति अचेतसः अविवेकिनः।।

यत् पदं सर्वस्य अवभासकमपि अग्न्यादित्यादिकं ज्योतिः न अवभासयते, यत् प्राप्ताश्च मुमुक्षवः पुनः संसाराभिमुखाः न निवर्तन्ते, यस्य च पदस्य उपाधिभेदम् अनुविधीयमानाः जीवाः -- घटाकाशादयः इव आकाशस्य -- अंशाः, तस्य पदस्य सर्वात्मत्वं सर्वव्यवहारास्पदत्वं च विवक्षुः चतुर्भिः श्लोकैः विभूतिसंक्षेपमाह भगवान् --

।।१५.१२।। --

यत् आदित्यगतम् आदित्याश्रयम्। किं तत्? तेजः दीप्तिः प्रकाशः जगत् भासयते प्रकाशयति अखिलं समस्तम्; यत् चन्द्रमसि शशभृति तेजः अवभासकं वर्तते, यच्च अग्नौ हुतवहे, तत् तेजः विद्धि विजानीहि मामकं मदीयं मम विष्णोः तत् ज्योतिः। अथवा, आदित्यगतं तेजः चैतन्यात्मकं ज्योतिः, यच्चन्द्रमसि, यच्च अग्नौ वर्ततेः तत् तेजः विद्धि मामकं मदीयं मम विष्णोः तत् ज्योतिः।।

ननु स्थावरेषु जङ्गमेषु च तत् समानं चैतन्यात्मकं ज्योतिः। तत्र कथम् इदं विशेषणम् -- 'यदादित्यगतम्' इत्यादि। नैष दोषः, सत्त्वाधिक्यात् आविस्तरत्वोपपत्तेः। आदित्यादिषु हि सत्त्वं अत्यन्तप्रकाशम् अत्यन्तभास्वरम्; अतः तत्रैव आविस्तरं ज्योतिः इति तत् विशिष्यते, न तु तत्रैव तत् अधिकमिति। यथा हि श्लोके तुल्येऽपि मुखसंस्थाने न काष्ठकुड्यादौ मुखम् आविर्भवति, आदर्शादौ तु स्वच्छे च तारतम्येन आविर्भवति; तद्वत्।।

किं च --

।।१५.१३।। --

गां पृथिवीम् आविश्य प्रविश्य धारयामि भूतानि जगत् अहम् ओजसा बलेन; यत् बलं कामरागविवर्जितम्ेश्वरं रूपं जगद्विधारणाय पृथिव्याम् आविष्टं येन पृथिवी गुर्वी न अधः पतति न विदीर्यते च। तथा च मन्त्रवर्णः -- 'येन द्यौरुग्रा पृथिवी च दृढा (तै० सं० ४।१।८)' इति, 'स दाधार पृथिवीम् (तै० सं० ४।१।८)' इत्यादिश्च। अतः गामाविश्य च भूतानि चराचराणि धारयामि इति युक्तमुक्तम्। किं च, पृथिव्यां जाताः ओषधीः सर्वाः व्रीहियवाद्याः पुष्णामि पुष्टिमतीः रसस्वादुमतीश्च करोमि सोमो भूत्वा रसात्मकः सोमः सन् रसात्मकः रसस्वभावः। सर्वरसानाम् आकरः सोमः। स हि सर्वरसात्मकः सर्वाः ओषधीः स्वात्मरसान् अनुप्रवेशयन् पुष्णाति।।

किं च --

।।१५.१४।। --

अहमेव वैश्वानरः उदरस्थः अग्निः भूत्वा -- 'अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते (बृ० उ० ५।९।१)' इत्यादिश्रुतेः; वैश्वानरः सन् प्राणिनां प्राणवतां देहम् आश्रितः प्रविष्टः प्राणापानसमायुक्तः प्राणापानाभ्यां समायुक्तः संयुक्तः पचामि पक्तिं करोमि अन्नम् अशनं चतुर्विधं चतुष्प्रकारं भोज्यं भक्ष्यं चोष्यं लेह्यं च। 'भोक्ता वैश्वानरः अग्निः, अग्नेः भोज्यम् अन्नं सोमः, तदेतत् उभयम् अग्नीषोमौ सर्वम्' इति पश्यतः अन्नदोषलेपः न भवति।।

किं च --

।।१५.१५।। --

सर्वस्य च प्राणिजातस्य अहम् आत्मा सन् हृदि बुद्धौ संनिविष्टः। अतः मत्तः आत्मनः सर्वप्राणिनां स्मृतिः ज्ञानं तदपोहनं च अपगमनं च; येषां यथा पुण्यकर्मणां पुण्यकर्मानुरोधेन ज्ञानस्मृती भवतः, तथा पापकर्मणां पापकर्मानुरूपेण स्मृतिज्ञानयोः अपोहनं च अपायनम् अपगमनं च। वेदैश्च सर्वैः अहमेव परमात्मा वेद्यः वेदितव्यः। वेदान्तकृत् वेदान्तार्थसंप्रदायकृत् इत्यर्थः, वेदवित् वेदार्थवित् व च अहम्।।

भगवतः ईश्वरस्य नारायणाख्यस्य विभूतिसंक्षेपः उक्तः विशिष्टोपाधिकृतः 'यदादित्यगतं तेजः (गीता १५।१२)' इत्यादिना।

अथ अधुना तस्यैव क्षराक्षरोपाधिप्रविभक्ततया निरुपाधिकस्य केवलस्य स्वरूपनिर्दिधारयिषया उत्तरे श्लोकाः आरभ्यन्ते। तत्र सर्वमेव अतीतानागतानन्तराध्यायार्थजातं त्रिधा राशीकृत्य आह --

।।१५.१६।। --

द्वौ इमौ पृथग्राशीकृतौ पुरुषौ इति उच्येते लोके संसारे -- क्षरश्च क्षरतीति क्षरः विनाशी इति को राशिः; अपरः पुरुषः अक्षरः तद्विपरीतः, भगवतः मायाशक्तिः, क्षराख्यस्य पुरुषस्य उत्पत्तिबीजम् अनेकसंसारिजन्तुकामकर्मादिसंस्काराश्रयः, अक्षरः पुरुषः उच्यते। कौ तौ पुरुषौ इति आह स्वयमेव भगवान् -- क्षरः सर्वाणि भूतानि, समस्तं विकारजातम् इत्यर्थः। कूटस्थः कूटः राशी राशिरिव स्थितः। अथवा, कूटः माया वञ्चना जिह्मता कुटिलता इति पर्यायाः, अनेकमायावञ्चनादिप्रकारेण स्थितः कूटस्थः, संसारबीजानन्त्यात् न क्षरति इति अक्षरः

उच्यते।।

आभ्यां क्षराक्षराभ्यां अन्यः विलक्षणः क्षराक्षरोपाधिद्वयदोषेण अस्पृष्टः नित्यशुद्धबुद्धमुक्तस्वभावः --

।।१५.१७।। --

उत्तमः उत्कृष्टतमः पुरुषस्तु अन्यः अत्यन्तविलक्षणः आभ्यां परमात्मा इति परमश्च असौ देहाद्यविद्याकृतात्मभ्यः, आत्मा च सर्वभूतानां प्रत्यक्चेतनः, इत्यतः परमात्मा इति उदाहृतः उक्तः वेदान्तेषु। स व विशिष्यते यः लोकत्रयं भूर्भुवःस्वराख्यं स्वकीयया चैतन्यबलशक्त्या आविश्य प्रविश्य बिभर्ति स्वरूपसद्भावमात्रेण बिभर्ति धारयति; अव्ययः न अस्य व्ययः विद्यते इति अव्ययः। कः? ईश्वरः सर्वज्ञः नारायणाख्यः ईशनशीलः।।

यथाव्याख्यातस्य ईश्वरस्य 'पुरुषोत्तमः' इत्येतत् नाम प्रसिद्धम्। तस्य नामनिर्वचनप्रसिद्ध्या अर्थवत्त्वं नाम्नो दर्शयन् 'निरतिशयः अहम् ईश्वरः' इति आत्मानं दर्शयति भगवान् --

।।१५.१८।। --

यस्मात् क्षरम् अतीतः अहं संसारमायावृक्षम् अश्वत्थाख्यम् अतिक्रान्तः अहम् अक्षरादपि संसारमायारूपवृक्षबीजभूतादपि च उत्तमः उत्कृष्टतमः ऊर्ध्वतमो वा, अतः ताभ्यां क्षराक्षराभ्याम् उत्तमत्वात् अस्मि लोके वेदे च प्रथितः प्रख्यातः। पुरुषोत्तमः इत्येवं मां भक्तजनाः विदुः। कवयः काव्यादिषु च इदं नाम निबध्नन्ति। पुरुषोत्तम इत्यनेनाभिधानेनाभिगृणन्ति।।

अथ इदानीं यथानिरुक्तम् आत्मानं यो वेद, तस्य इदं फलम् उच्यते --

।।१५.१९।। --

यः माम् ईश्वरं यथोक्तविशेषणम् वं यथोक्तेन प्रकारेण असंमूढः संमोहवर्जितः सन् जानाति 'अयम् अहम् अस्मि' इति पुरुषोत्तमं सः सर्ववित् सर्वात्मना सर्वं वेत्तीति सर्वज्ञः सर्वभूतस्थं भजति मां सर्वभावेन सर्वात्मतया हे भारत।।

अस्मिन् अध्याये भगवत्तत्त्वज्ञानं मोक्षफलम् उक्त्वा, अथ इदानीं तत् स्तौति --

।।१५.२०।। --

इति तत् गुह्यतमं गोप्यतमम्, अत्यन्तरहस्यं इत्येतत्। किं तत्? शास्त्रम्। यद्यपि गीताख्यं समस्तम् 'शास्त्रम्' उच्यते, तथापि अयमेव अध्यायः इह 'शास्त्रम्' इति उच्यते स्तुत्यर्थं प्रकरणात्। सर्वो हि गीताशास्त्रार्थः अस्मिन् अध्याये समासेन उक्तः। न केवलं गीताशास्त्रार्थ व, किंतु सर्वश्च वेदार्थः इह परिसमाप्तः। 'यस्तं वेद स वेदवित् (गीता १५।१)' 'वेदैश्च सर्वैरहमेव वेद्यः (गीता १५।१५)' इति च उक्तम्। इदम् उक्तं कथितं मया हे अनघ अपाप। तत् शास्त्रं यथादर्शितार्थं बुद्ध्वा बुद्धिमान् स्यात् भवेत् न अन्यथा कृतकृत्यश्च भारत कृतं कृत्यं कर्तव्यं येन सः कृतकृत्यः; विशिष्टजन्मप्रसूतेन ब्राह्मणेन यत् कर्तव्यं तत् सर्वं भगवत्तत्त्वे विदिते कृतं भवेत् इत्यर्थः; न च अन्यथा कर्तव्यं परिसमाप्यते कस्यचित् इत्यभिप्रायः।' सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते (गीता ४।३३)' इति च उक्तम्। 'एतद्धि जन्मसामग्र्यं ब्राह्मणस्य विशेषतः। प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा (मनुस्मृति १२।९३)' इति च मानवं वचनम्। यतः तत् परमार्थतत्त्वं मत्तः श्रुतवान् असि, अतः कृतार्थः त्वं भारत इति।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
पञ्चदशोऽध्यायः।।

BHAGAVADGITA
Sanskrit Commentary - Sri Sankaracharya
Chapter 16
DV

।।१६.१।। --

अभयम् अभीरुता। सत्त्वसंशुद्धिः सत्त्वस्य अन्तःकरणस्य संशुद्धिः संव्यवहारेषु परवञ्चनामायानृतादिपरिवर्जनं शुद्धसत्त्वभावेन व्यवहारः इत्यर्थः।।ज्ञानयोगव्यवस्थितिः ज्ञानं शास्त्रतः आचार्यतश्च आत्मादिपदार्थानाम् अवगमः, अवगतानाम् इन्द्रियाद्युपसंहारेण काग्रतया स्वात्मसंवेद्यतापादनं योगः, तयोः ज्ञानयोगयोः व्यवस्थितिः व्यवस्थानं तन्निष्ठता। षा प्रधाना दैवी सात्त्विकी संपत्। यत्र येषाम् अधिकृतानां या प्रकृतिः संभवति, सात्त्विकी सा उच्यते। दानं यथाशक्ति संविभागः अन्नादीनाम्। दमश्च बाह्यकरणानाम् उपशमः; अन्तःकरणस्य उपशमं शान्तिं वक्ष्यति। यज्ञश्च श्रौतः अग्निहोत्रादिः। स्मार्तश्च देवयज्ञादिः, स्वाध्यायः

ग्वेदाद्यध्ययनम् अदृष्टार्थम्। तपः वक्ष्यमाणं शारीरादि। आर्जवम्

जुत्वं सर्वदा।।

किं च --

।।१६.२।। --

अहिंसा अहिंसनं प्राणिनां पीडावर्जनम्। सत्यम् अप्रियानृतवर्जितं यथाभूतार्थवचनम्। अक्रोधः परैः आक्रुष्टस्य अभिहतस्य वा प्राप्तस्य क्रोधस्य उपशमनम्। त्यागः संन्यासः, पूर्वं दानस्य उक्तत्वात्। शान्तिः अन्तःकरणस्य उपशमः। अपैशुनं अपिशुनता; परस्मै पररन्ध्रप्रकटीकरणं पैशुनम्, तदभावः अपैशुनम्। दया कृपा भूतेषु दुःखितेषु। अलोलुप्त्वम् इन्द्रियाणां विषयसंनिधौ

अविक्रिया। मार्दवं मृदुता अक्रौर्यम्। ह्रीः लज्जा। अचापलम् असति प्रयोजने वाक्पाणिपादादीनाम् अव्यापारयितृत्वम्।।

किं च --

।।१६.३।। --

तेजः प्रागल्भ्यं न त्वग्गता दीप्तिः। क्षमा आक्रुष्टस्य ताडितस्य वा अन्तर्विक्रियानुत्पत्तिः, उत्पन्नायां विक्रियायाम् उपशमन् अक्रोधः इति अवोचाम। इत्थं क्षमायाः अक्रोधस्य च विशेषः। धृतिः देहेन्द्रियेषु अवसादं प्राप्तेषु तस्य प्रतिषेधकः अन्तःकरणवृत्तिविशेषः, येन उत्तम्भितानि करणानि देहश्च न अवसीदन्ति। शौचं द्विविधं मृज्जलकृतं बाह्यम् आभ्यन्तरं च मनोबुद्ध्योः नैर्मल्यं मायारागादिकालुष्याभावः; वं द्विविधं शौचम्। अद्रोहः परजिघांसाभावः अहिंसनम्। नातिमानिता अत्यर्थं मानः अतिमानः, सः यस्य विद्यते सः अतिमानी, तद्भावः अतिमानिता, तदभावः नातिमानिता आत्मनः पूज्यतातिशयभावनाभाव इत्यर्थः। भवन्ति अभयादीनि तदन्तानि संपदं अभिजातस्य। किं विशिष्टां संपदम्? दैवीं देवानां या संपत् ताम् अभिलक्ष्य जातस्य देवविभूत्यर्हस्य भाविकल्याणस्य इत्यर्थः, हे भारत।।

अथ इदानीं आसुरी संपत् उच्यते --

।।१६.४।। --

दम्भः धर्मध्वजित्वम्। दर्पः विद्याधनस्वजनादिनिमित्तः उत्सेकः। अतिमानः पूर्वोक्तः। क्रोधश्च। पारुष्यमेव च परुषवचनम् -- यथा काणम् 'चक्षुष्मान्' विरूपम् 'रूपवान्' हीनाभिजनम् 'उत्तमाभिजनः' इत्यादि। अज्ञानं च अविवेकज्ञानं कर्तव्याकर्तव्यादिविषयमिथ्याप्रत्ययः। अभिजातस्य पार्थ। किम् अभिजातस्येति, आह -- संपदम् आसुरीम् असुराणां संपत् आसुरी

ताम् अभिजातस्य इत्यर्थः।।

अनयोः संपदोः कार्यम् उच्यते --

।।१६.५।। --

दैवी संपत् या, सा विमोक्षाय संसारबन्धनात्। निबन्धाय नियतः बन्धः निबन्धः तदर्थम् आसुरी संपत् मता अभिप्रेता। तथा

राक्षसी च। तत्र वम् उक्ते सति अर्जुनस्य अन्तर्गतं भावम् 'किम् अहम् आसुरसंपद्युक्तः? किं वा दैवसंपद्युक्तः?' इत्येवम् आलोचनारूपम् आलक्ष्य आह भगवान् -- मा शुचः शोकं मा कार्षीः। संपदं दैवीम् अभिजातः असि अभिलक्ष्य जातोऽसि, भाविकल्याणः त्वम् असि इत्यर्थः, हे पाण्डव।।

।।१६.६।। --

द्वौ द्विसंख्याकौ भूतसर्गौ भूतानां मनुष्याणां सर्गौ सृष्टी भूतसर्गौ सृज्येतेति सर्गौ भूतान्येव सृज्यमानानि दैवासुरसंपद्द्वययुक्तानि इति द्वौ भूतसर्गौ इति उच्येते, 'द्वया ह वै प्राजापत्या देवाश्चासुराश्च (बृह० उ० १।३।१)' इति श्रुतेः। लोके अस्मिन्, संसारे इत्यर्थः, सर्वेषां द्वैविध्योपपत्तेः। कौ तौ भूतसर्गौ इति, उच्येते -- प्रकृतावेव दैव आसुर व च। उक्तयोरेव पुनः अनुवादे प्रयोजनम् आह -- दैवः भूतसर्गः 'अभयं सत्त्वसंशुद्धिः (गीता १६।१)' इत्यादिना विस्तरशः विस्तरप्रकारैः प्रोक्तः कथितः, न तु आसुरः विस्तरशः; अतः तत्परिवर्जनार्थम् आसुरं पार्थ, मे मम वचनात् उच्यमानं विस्तरशः श्रृणु अवधारय।।

आ अध्यायपरिसमाप्तेः आसुरी संपत् प्राणिविशेषणत्वेन प्रदर्श्यते, प्रत्यक्षीकरणेन च शक्यते तस्याः परिवर्जनं कर्तुमिति --

।।१६.७।। --

प्रवृत्तिं च प्रवर्तनं यस्मिन् पुरुषार्थसाधने कर्तव्ये प्रवृत्तिः ताम्, निवृत्तिं च तद्विपरीतां यस्मात् अनर्थहेतोः निवर्तितव्यं सा निवृत्तिः तां च, जनाः आसुराः न विदुः न जानन्ति। न केवलं प्रवृत्तिनिवृत्ती व ते न विदुः, न शौचं नापि च आचारः न सत्यं तेषु विद्यते; अशौचाः अनाचाराः मायाविनः अनृतवादिनो हि आसुराः।।

किं च --

।।१६.८।। -- -

असत्यं यथा वयम् अनृतप्रायाः तथा इदं जगत् सर्वम् असत्यम्, अप्रतिष्ठं च न अस्य धर्माधर्मौ प्रतिष्ठा अतः अप्रतिष्ठं च, इति ते आसुराः जनाः जगत् आहुः, अनीश्वरम् न च धर्माधर्मसव्यपेक्षकः अस्य शासिता ईश्वरः विद्यते इति अतः अनीश्वरं जगत् आहुः। किं च, अपरस्परसंभूतं कामप्रयुक्तयोः स्त्रीपुरुषयोः अन्योन्यसंयोगात् जगत् सर्वं संभूतम्। किमन्यत् कामहैतुकं कामहेतुकमेव कामहैतुकम्। किमन्यत् जगतः कारणम्? न किञ्चित् अदृष्टं धर्माधर्मादि कारणान्तरं विद्यते जगतः 'काम व प्राणिनां कारणम्' इति लोकायतिकदृष्टिः इयम्।।

।।१६.९।। --

तां दृष्टिम् अवष्टभ्य आश्रित्य नष्टात्मानः नष्टस्वभावाः विभ्रष्टपरलोकसाधनाः अल्पबुद्धयः विषयविषया अल्पैव बुद्धिः येषां ते अल्पबुद्धयः प्रभवन्ति उद्भवन्ति उग्रकर्माणः क्रूरकर्माणः हिंसात्मकाः। क्षयाय जगतः प्रभवन्ति इति संबन्धः।।जगतः अहिताः, शत्रवः इत्यर्थः।।

ते च --

।।१६.१०।। --

कामम् इच्छाविशेषम् आश्रित्य अवष्टभ्य दुष्पूरम् अशक्यपूरणं दम्भमानमदान्विताः दम्भश्च मानश्च मदश्च दम्भमानमदाः तैः अन्विताः दम्भमानमदान्विताः मोहात् अविवेकतः गृहीत्वा उपादाय असद्ग्राहान् अशुभनिश्चयान् प्रवर्तन्ते लोके अशुचिव्रताः अशुचीनि व्रतानि येषां ते अशुचिव्रताः।।

किं च --

।।१६.११।। --

चिन्ताम् अपरिमेयां च, न परिमातुं शक्यते यस्याः चिन्तायाः इयत्ता सा अपरिमेया, ताम् अपरिमेयाम्, प्रलयान्तां मरणान्ताम् उपाश्रिताः, सदा चिन्तापराः इत्यर्थः। कामोपभोगपरमाः, काम्यन्ते इति कामाः विषयाः शब्दादयः तदुपभोगपरमाः 'अयमेव परमः पुरुषार्थः यः कामोपभोगः' इत्येवं निश्चितात्मानः, तावत् इति निश्चिताः।।

।।१६.१२।। --

आशापाशशतैः आशा व पाशाः तच्छतैः बद्धाः नियन्त्रिताः सन्तः सर्वतः आकृष्यमाणाः, कामक्रोधपरायणाः कामक्रोधौ परम्

अयनम् आश्रयः येषां ते कामक्रोधपरायणाः, ईहन्ते चेष्टन्ते कामभोगार्थं कामभोगप्रयोजनाय न धर्मार्थम्, अन्यायेन परस्वापहरणादिना इत्यर्थः; किम्? अर्थसंचयान् अर्थप्रचयान्।।

ईदृशश्च तेषाम् अभिप्रायः --

।।१६.१३।। --

इदं द्रव्यं अद्य इदानीं मया लब्धम्। इदं च अन्यत् प्राप्स्ये मनोरथं मनस्तुष्टिकरम्। इदं च अस्ति इदमपि मे भविष्यति आगामिनि संवत्सरे पुनः धनं तेन अहं धनी विख्यातः भविष्यामि इति।।

।।१६.१४।। --

असौ देवदत्तनामा मया हतः दुर्जयः शत्रुः। हनिष्ये च अपरान् अन्यान् वराकान् अपि। किम् ते करिष्यन्ति तपस्विनः; सर्वथापि नास्ति मत्तुल्यः। कथम्? ईश्वरः अहम्, अहं भोगी। सर्वप्रकारेण च सिद्धः अहं संपन्नः पुत्रैः नप्तृभिः, न केवलं मानुषः, बलवान् सुखी च अहमेव; अन्ये तु भूमिभारायावितीर्णाः।।

।।१६.१५।। --

आढ्यः धनेन, अभिजनवान् सप्तपुरुषं श्रोत्रियत्वादिसंपन्नः -- तेनापि न मम तुल्यः अस्ति कश्चित्। कः अन्यः अस्ति सदृशः तुल्यः मया ०? किं च, यक्ष्ये यागेनापि अन्यान् अभिभविष्यामि, दास्यामि नटादिभ्यः, मोदिष्ये हर्षं च अतिशयं प्राप्स्यामि, इति वम् अज्ञानविमोहिताः अज्ञानेन विमोहिताः विविधम् अविवेकभावम् आपन्नाः।।

।।१६.१६।। --

अनेकचित्तविभ्रान्ताः उक्तप्रकारैः अनेकैः चित्तैः विविधं भ्रान्ताः अनेकचित्तविभ्रान्ताः, मोहजालसमावृताः मोहः अविवेकः अज्ञानं तदेव जालमिव आवरणात्मकत्वात्, तेन समावृताः। प्रसक्ताः कामभोगेषु तत्रैव निषण्णाः सन्तः तेन उपचितकल्मषाः पतन्ति नरके अशुचौ वैतरण्यादौ।।

।।१६.१७।। --

आत्मसंभाविताः सर्वगुणविशिष्टतया आत्मनैव संभाविताः आत्मसंभाविताः, न साधुभिः। स्तब्धाः अप्रणतात्मानः। धनमानमदान्विताः धननिमित्तः मानः मदश्च, ताभ्यां धनमानमदाभ्याम् अन्विताः। यजन्ते नामयज्ञैः नाममात्रैः यज्ञैः ते दम्भेन धर्मध्वजितया अविधिपूर्वकं विधिविहिताङ्गेतिकर्तव्यतारहितम्।।

।।१६.१८।। --

अहंकारं अहंकरणम् अहंकारः, विद्यमानैः अविद्यमानैश्च गुणैः आत्मनि अध्यारोपितैः 'विशिष्टमात्मानमहम् इति मन्यते', सः अहंकारः अविद्याख्यः कष्टतमः, सर्वदोषाणां मूलं सर्वानर्थप्रवृत्तीनां च, तम्। तथा बलं पराभिभवनिमित्तं कामरागान्वितम्। दर्पं दर्पो नाम यस्य उद्भवे धर्मम् अतिक्रामति सः अयम् अन्तःकरणाश्रयः दोषविशेषः। कामं स्त्र्यादिविषयम्। क्रोधम् अनिष्टविषयम्। तान् अन्यांश्च महतो दोषान् संश्रिताः। किं च ते माम् ईश्वरम् आत्मपरदेहेषु स्वदेहे परदेहेषु च तद्बुद्धिकर्मसाक्षिभूतं मां प्रद्विषन्तः, मच्छासनातिवर्तित्वं प्रद्वेषः, तं कुर्वन्तः अभ्यसूयकाः सन्मार्गस्थानां गुणेषु असहमानाः।।

।।१६.१९।। --

तान् अहं सन्मार्गप्रतिपक्षभूतान् साधुद्वेषिणः द्विषत च मां क्रूरान् संसारेषु व अनेकनरकसंसरणमार्गेषु नराधमान् अधर्मदोषवत्त्वात् क्षिपामि प्रक्षिपामि अजस्रं संततम् अशुभान् अशुभकर्मकारिणः आसुरीष्वेव क्रूरकर्मप्रायासु व्याघ्रसिंहादियोनिषु 'क्षिपामि' इत्यनेन संबन्धः।।

।।१६.२०।। --

आसुरीं योनिम् आपन्नाः प्रतिपन्नाः मूढाः अविवेकिनः जन्मनि जन्मनि प्रतिजन्म तमोबहुलास्वेव योनिषु जायमानाः अधो गच्छन्तो मूढाः माम् ईश्वरम् अप्राप्य अनासाद्य व हे कौन्तेय, ततः तस्मादपि यान्ति अधमां गतिं निकृष्टतमां गतिम्। 'माम् अप्राप्यैव' इति न मत्प्राप्तौ काचिदपि आशङ्का अस्ति, अतः मच्छिष्टसाधुमार्गम् अप्राप्य इत्यर्थः।।

सर्वस्या आसुर्याः संपदः संक्षेपः अयम् उच्यते, यस्मिन् त्रिविधे सर्वः आसुरीसंपद्भेदः

अनन्तोऽपि अन्तर्भवति। यत्परिहारेण परिहृतश्च भवति, यत् मूलं सर्वस्य अनर्थस्य, तत् तत् उच्यते --

।।१६.२१।। --

त्रिविधं त्रिप्रकारं नरकस्य प्राप्तौ इदं द्वारं नाशनम् आत्मनः, यत् द्वारं प्रविशन्नेव नश्यति आत्मा; कस्मैचित् पुरुषार्थाय योग्यो न भवति इत्येतत्, अतः उच्यते 'द्वारं नाशनमात्मनः' इति। किं तत्? कामः क्रोधः तथा लोभः। तस्मात् तत् त्रयं त्यजेत्। यतः तत् द्वारं नाशनम् आत्मनः तस्मात् कामादित्रयमेतत् त्यजेत्।।

त्यागस्तुतिरियम् --

।।१६.२२।। --

तैः विमुक्तः कौन्तेय तमोद्वारैः तमसः नरकस्य दुःखमोहात्मकस्य द्वाराणि कामादयः तैः, तैः त्रिभिः विमुक्तः नरः आचरति अनुतिष्ठति। किम्? आत्मनः श्रेयः। यत्प्रतिबद्धः पूर्वं न आचचार, तदपगमात् आचरति। ततः तदाचरणात् याति परां गतिं मोक्षमपि इति।।

सर्वस्य तस्य आसुरीसंपत्परिवर्जनस्य श्रेयआचरणस्य च शास्त्रं कारणम्। शास्त्रप्रमाणात् उभयं शक्यं कर्तुम्, न अन्यथा। अतः --

।।१६.२३।। --

यः शास्त्रविधिं शास्त्रं वेदः तस्य विधिं कर्तव्याकर्तव्यज्ञानकारणं विधिप्रतिषेधाख्यम् उत्सृज्य त्यक्त्वा वर्तते कामकारतः कामप्रयुक्तः सन्, न सः सिद्धिं पुरुषार्थयोग्यताम् अवाप्नोति, न अपि

अस्मिन् लोके सुखं न अपि परां प्रकृष्टां गतिं स्वर्गं मोक्षं वा।।

।।१६.२४।। --

तस्मात् शास्त्रं प्रमाणं ज्ञानसाधनं ते तव कार्याकार्यव्यवस्थितौ कर्तव्याकर्तव्यव्यवस्थायाम्। अतः ज्ञात्वा बुद्ध्वा शास्त्रविधानोक्तं विधिः विधानं शास्त्रेण विधानं शास्त्रविधानम् 'कुर्यात्, न कुर्यात्' इत्येवंलक्षणम्, तेन उक्तं स्वकर्म यत् तत् कर्तुम् इह अर्हसि, इह इति कर्माधिकारभूमिप्रदर्शनार्थम् इति।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
षोडशोऽध्यायः।।

BHAGAVADGITA
Sanskrit Commentary - Sri Sankaracharya
Chapter 17
DV

।।१७.१।। --

ये केचित् अविशेषिताः शास्त्रविधिं शास्त्रविधानं श्रुतिस्मृतिशास्त्रचोदनाम् उत्सृज्य परित्यज्य यजन्ते देवादीन् पूजयन्ति श्रद्धया अन्विताः श्रद्धया आस्तिक्यबुद्ध्या अन्विताः संयुक्ताः सन्तः -- श्रुतिलक्षणं स्मृतिलक्षणं वा कञ्चित् शास्त्रविधिम् अपश्यन्तः वृद्धव्यवहारदर्शनादेव श्रद्दधानतया ये देवादीन् पूजयन्ति, ते इह 'ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः' इत्येवं गृह्यन्ते। ये पुनः कञ्चित् शास्त्रविधिं उपलभमाना व तम् उत्सृज्य अयथाविधि देवादीन् पूजयन्ति, ते इह 'ये शास्त्रविधिमुत्सृज्य यजन्ते' इति न परिगृह्यन्ते। कस्मात्? श्रद्धया अन्वितत्वविशेषणात्। देवादिपूजाविधिपरं किञ्चित् शास्त्रं पश्यन्त व तत् उत्सृज्य अश्रद्दधानतया तद्विहितायां देवादिपूजायां श्रद्धया अन्विताः प्रवर्तन्ते इति न शक्यं कल्पयितुं यस्मात्, तस्मात् पूर्वोक्ता व 'ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः' इत्यत्र गृह्यन्ते। तेषाम् वंभूतानां निष्ठा तु का कृष्ण सत्त्वम् आहो रजः तमः, किं सत्त्वं निष्ठा अवस्थानम्, आहोस्वित् रजः, अथवा तमः इति। तत् उक्तं भवति -- या तेषां देवादिविषया पूजा, सा किं सात्त्विकी, आहोस्वित् राजसी, उत तामसी इति।।

सामान्यविषयः अयं प्रश्नः न अप्रविभज्य प्रतिवचनम् अर्हतीति श्रीभगवानुवाच --

श्रीभगवानुवाच --

।।१७.२।। --

त्रिविधा त्रिप्रकारा भवति श्रद्धा, यस्यां निष्ठायां त्वं पृच्छसि, देहिनां शरीरिणां सा स्वभावजा; जन्मान्तरकृतः धर्मादिसंस्कारः मरणकाले अभिव्यक्तः स्वभावः उच्यते, ततो जाता स्वभावजा।

सात्त्विकी सत्त्वनिर्वृत्ता देवपूजादिविषया; राजसी रजोनिर्वृत्ता यक्षरक्षःपूजादिविषया; तामसी तमोनिर्वृत्ता प्रेतपिशाचादिपूजाविषया; वं त्रिविधां ताम् उच्यमानां श्रद्धां शृणु अवधारय।।

सा इयं त्रिविधा भवति --

।।१७.३।। --

सत्त्वानुरूपा विशिष्टसंस्कारोपेतान्तःकरणानुरूपा सर्वस्य प्राणिजातस्य श्रद्धा भवति भारत। यदि वं ततः किं स्यादिति, उच्यते -- श्रद्धामयः अयं श्रद्धाप्रायः पुरुषः संसारी जीवः। कथम्? यः यच्छ्रद्धः या श्रद्धा यस्य जीवस्य सः यच्छ्रद्धः स व तच्छ्रद्धानुरूप व सः जीवः।।

ततश्च कार्येण लिङ्गेन देवादिपूजया सत्त्वादिनिष्ठा अनुमेया इत्याह --

।।१७.४।। --

यजन्ते पूजयन्ति सात्त्विकाः सत्त्वनिष्ठाः देवान्, यक्षरक्षांसि राजसाः, प्रेतान् भूतगणांश्च सप्तमातृकादींश्च अन्ये यजन्ते तामसाः जनाः।।

एवं कार्यतो निर्णीताः सत्त्वादिनिष्ठाः शास्त्रविध्युत्सर्गे। तत्र कश्चिदेव सहस्रेषु देवपूजादिपरः सत्त्वनिष्ठो भवति, बाहुल्येन तु रजोनिष्ठाः तमोनिष्ठाश्चैव प्राणिनो भवन्ति। कथम्? --

।।१७.५।। --

अशास्त्रविहितं न शास्त्रविहितम् अशास्त्रविहितं घोरं पीडाकरं प्राणिनाम् आत्मनश्च तपः तप्यन्ते निर्वर्तयन्ति ये तपो जनाः ते च दम्भाहंकारसंयुक्ताः, दम्भश्च अहंकारश्च दम्भाहंकारौ,

ताभ्यां संयुक्ताः दम्भाहंकारसंयुक्ताः, कामरागबलान्विताः कामश्च रागश्च कामरागौ तत्कृतं बलं कामरागबलं तेन अन्विताः कामरागबलान्विताः।।

।।१७.६।। --

कर्शयन्तः कृशीकुर्वन्तः शरीरस्थं भूतग्रामं करणसमुदायम् अचेतसः अविवेकिनः मां चैव तत्कर्मबुद्धिसाक्षिभूतम्

अन्तःशरीरस्थं नारायणं कर्शयन्तः, मदनुशासनाकरणमेव मत्कर्शनम्, तान् विद्धि आसुरनिश्चयान् आसुरो निश्चयो येषां ते आसुरनिश्चयाः तान् परिहरणार्थं विद्धि इति उपदेशः।।

आहाराणां च रस्यस्निग्धादिवर्गत्रयरूपेण भिन्नानां यथाक्रमं सात्त्विकराजसतामसपुरुषप्रियत्वदर्शनम् इह क्रियते रस्यस्निग्धादिषु आहारविशेषेषु आत्मनः प्रीत्यतिरेकेण लिङ्गेन सात्त्विकत्वं राजसत्वं तामसत्वं च बुद्ध्वा रजस्तमोलिङ्गानाम् आहाराणां परिवर्जनार्थं सत्त्वलिङ्गानां च उपादानार्थम्। तथा यज्ञादीनामपि सत्त्वादिगुणभेदेन त्रिविधत्वप्रतिपादनम् इह 'राजसतामसान् बुद्ध्वा कथं नु नाम परित्यजेत्, सात्त्विकानेव अनुतिष्ठेत्' इत्येवमर्थम्। आह --

।।१७.७।। --

आहारस्त्वपि सर्वस्य भोक्तुः प्राणिनः त्रिविधो भवति प्रियः इष्टः, तथा यज्ञः तथा तपः, तथा दानम्। तेषाम् आहारादीनां भेदम् इमं वक्ष्यमाणं शृणु।।

।।१७.८।। --

आयुश्च सत्त्वं च बलं च आरोग्यं च सुखं च प्रीतिश्च आयुःसत्त्वबलारोग्यसुखप्रीतयः तासां विवर्धनाः आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः, ते च रस्याः रसोपेताः, स्निग्धाः स्नेहवन्तः, स्थिराः चिरकालस्थायिनः देहे, हृद्याः हृदयप्रियाः आहाराः सात्त्विकप्रियाः सात्त्विकस्य इष्टाः।।

।।१७.९।। --

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः इत्यत्र अतिशब्दः कट्वादिषु सर्वत्र योज्यः, अतिकटुः अतितीक्ष्णः इत्येवम्। कटुश्च अम्लश्च लवणश्च अत्युष्णश्च तीक्ष्णश्च रूक्षश्च विदाही च ते आहाराः राजसस्य इष्टाः, दुःखशोकामयप्रदाः दुःखं च शोकं च आमयं च प्रयच्छन्तीति दुःखशोकामयप्रदाः।।

।।१७.१०।। --

यातयामं मन्दपक्वम्, निर्वीर्यस्य गतरसशब्देन उक्तत्वात्। गतरसं रसवियुक्तम्, पूति दुर्गन्धि, पर्युषितं च पक्वं सत् रात्र्यन्तरितं च यत्, उच्छिष्टमपि च भुक्तशिष्टम् उच्छिष्टम्, अमेध्यम् अयज्ञार्हम्, भोजनम् ईदृशं तामसप्रियम्।।

अथ इदानीं यज्ञः त्रिविधः उच्यते --

।।१७.११।। --

अफलाकाङ्क्षिभिः अफलार्थिभिः यज्ञः विधिदृष्टः शास्त्रचोदनादृष्टो यः यज्ञः इज्यते निर्वर्त्यते, यष्टव्यमेवेति यज्ञस्वरूपनिर्वर्तनमेव कार्यम् इति मनः समाधाय, न अनेन पुरुषार्थो मम कर्तव्यः इत्येवं निश्चित्य, सः सात्त्विकः यज्ञः उच्यते।।

।।१७.१२।। --

अभिसंधाय तु उद्दिश्य फलं दम्भार्थमपि चैव यत् इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्।।

।।१७.१३।। --

विधिहीनं यथाचोदितविपरीतम्, असृष्टान्नं ब्राह्मणेभ्यो न सृष्टं न दत्तम् अन्नं यस्मिन् यज्ञे सः असृष्टान्नः तम् असृष्टान्नम्, मन्त्रहीनं मन्त्रतः स्वरतो वर्णतो वा वियुक्तं मन्त्रहीनम्, अदक्षिणम् उक्तदक्षिणारहितम्, श्रद्धाविरहितं यज्ञं तामसं परिचक्षते तमोनिर्वृत्तं कथयन्ति।।

अथ इदानीं तपः त्रिविधम् उच्यते -- -

।।१७.१४।। --

देवाश्च द्विजाश्च गुरवश्च प्राज्ञाश्च देवद्विजगुरुप्राज्ञाः तेषां पूजनं देवद्विजगुरुप्राज्ञपूजनम्, शौचम्, आर्जवम्

जुत्वम्, ब्रह्मचर्यम् अहिंसा च शरीरनिर्वर्त्यं शारीरं शरीरप्रधानैः सर्वैरेव कार्यकरणैः कर्त्रादिभिः साध्यं शारीरं तपः उच्यते। 'पञ्चैते तस्य हेतवः (गीता १८।१५)' इति हि वक्ष्यति।।

।।१७.१५।। --

अनुद्वेगकरं प्राणिनाम् अदुःखकरं वाक्यं सत्यं प्रियहितं च यत् प्रियहिते दृष्टादृष्टार्थे। अनुद्वेगकरत्वादिभिः धर्मैः वाक्यं विशेष्यते। विशेषणधर्मसमुच्चयार्थः च-शब्दः। परप्रत्ययार्थं प्रयुक्तस्य वाक्यस्य सत्यप्रियहितानुद्वेगकरत्वानाम् अन्यतमेन द्वाभ्यां त्रिभिर्वा हीनता स्याद्यदि, न तद्वाङ्मयं तपः। तथा सत्यवाक्यस्य इतरेषाम् अन्यतमेन द्वाभ्यां त्रिभिर्वा विहीनतायां न वाङ्मयतपस्त्वम्। तथा प्रियवाक्यस्यापि इतरेषाम् अन्यतमेन द्वाभ्यां त्रिभिर्वा विहीनस्य न वाङ्मयतपस्त्वम्। तथा हितवाक्यस्यापि इतरेषाम् अन्यतमेन द्वाभ्यां त्रिभिर्वा विहीनस्य न वाङ्मयतपस्त्वम्। किं पुनः तत् तपः? यत् सत्यं वाक्यम् अनुद्वेगकरं प्रियं हितं च, तत् तपः वाङ्मयम्; यथा 'शान्तो भव वत्स, स्वाध्यायं योगं च अनुतिष्ठ, तथा ते श्रेयो भविष्यति' इति। स्वाध्यायाभ्यसनं चैव यथाविधि वाङ्मयं तपः उच्यते।।

।।१७.१६।। --

मनःप्रसादः मनसः प्रशान्तिः, स्वच्छतापादनं मनसः प्रसादः, सौम्यत्वं यत् सौमनस्यम् आहुः -- मुखादिप्रसादादिकार्योन्नेया अन्तःकरणस्य वृत्तिः। मौनं वाङ्नियमोऽपि मनःसंयमपूर्वको भवति इति कार्येण कारणम् उच्यते मनःसंयमो मौनमिति। आत्मविनिग्रहः मनोनिरोधः सर्वतः सामान्यरूपः आत्मविनिग्रहः, वाग्विषयस्यैव मनसः संयमः मौनम् इति विशेषः। भावसंशुद्धिः परैः व्यवहारकाले अमायावित्वं भावसंशुद्धिः। इत्येतत् तपः मानसम् उच्यते।।

यथोक्तं कायिकं वाचिकं मानसं च तपः तप्तं नरैः सत्त्वादिगुणभेदेन कथं त्रिविधं भवतीति, उच्यते --

।।१७.१७।। --

श्रद्धया आस्तिक्यबुद्ध्या परया प्रकृष्टया तप्तम् अनुष्ठितं तपः तत् प्रकृतं त्रिविधं त्रिप्रकारं त्र्यधिष्ठानं नरैः अनुष्ठातृभिः अफलाकाङ्क्षिभिः फलाकाङ्क्षारहितैः युक्तैः समाहितैः यत् ईदृशं तपः, तत् सात्त्विकं सत्त्वनिर्वृत्तं परिचक्षते कथयन्ति शिष्टाः।।

।।१७.१८।। --

सत्कारः साधुकारः 'साधुः अयं तपस्वी ब्राह्मणः' इत्येवमर्थम्, मानो माननं प्रत्युत्थानाभिवादनादिः तदर्थम्, पूजा पादप्रक्षालनार्चनाशयितृत्वादिः तदर्थं च तपः सत्कारमानपूजार्थम्, दम्भेन चैव यत् क्रियते तपः तत् इह प्रोक्तं कथितं राजसं चलं कादाचित्कफलत्वेन अध्रुवम्।।

।।१७.१९।। --

मूढग्राहेण अविवेकनिश्चयेन आत्मनः पीडया यत् क्रियते तपः परस्य उत्सादनार्थं विनाशार्थं वा, तत् तामसं तपः उदाहृतम्।।

इदानीं दानत्रैविध्यम् उच्यते --

।।१७.२०।। --

दातव्यमिति वं मनः कृत्वा यत् दानं दीयते अनुपकारिणे प्रत्युपकारासमर्थाय, समर्थायापि निरपेक्षं दीयते, देशे पुण्ये कुरुक्षेत्रादौ, काले संक्रान्त्यादौ, पात्रे च षडङ्गविद्वेदपारग इत्यादौ, तत् दानं सात्त्विकं स्मृतम्।।

।।१७.२१।। --

यत्तु दानं प्रत्युपकारार्थं काले तु अयं मां प्रत्युपकरिष्यति इत्येवमर्थम्, फलं वा अस्य दानस्य मे भविष्यति अदृष्टम् इति, तत् उद्दिश्य पुनः दीयते च परिक्लिष्टं खेदसंयुक्तम्, तत् दानं राजसं स्मृतम्।।

।।१७.२२।। --

अदेशकाले अदेशे अपुण्यदेशे म्लेच्छाशुच्यादिसंकीर्णे अकाले पुण्यहेतुत्वेन अप्रख्याते संक्रान्त्यादिविशेषरहिते अपात्रेभ्य च मूर्खतस्करादिभ्यः, देशादिसंपत्तौ वा असत्कृतं च प्रियवचनपादप्रक्षालनपूजादिरहितम् अवज्ञातं पात्रपरिभवयुक्तं च यत् दानम्, तत् तामसम् उदाहृतम्।।

यज्ञदानतपःप्रभृतीनां साद्गुण्यकरणाय अयम् उपदेशः उच्यते --

।।१७.२३।। --

ॐ तत् सत् इति वं निर्देशः, निर्दिश्यते अनेनेति निर्देशः, त्रिविधो नामनिर्देशः ब्रह्मणः स्मृतः चिन्तितः वेदान्तेषु ब्रह्मविद्भिः। ब्राह्मणाः तेन निर्देशेन त्रिविधेन वेदाश्च यज्ञाश्च विहिताः निर्मिताः पुरा पूर्वम् इति निर्देशस्तुत्यर्थम् उच्यते।।

।।१७.२४।। --

तस्मात् 'ओम् ' इति उदाहृत्य उच्चार्य यज्ञदानतपःक्रियाः यज्ञादिस्वरूपाः क्रियाः प्रवर्तन्ते विधानोक्ताः शास्त्रचोदिताः सततं सर्वदा ब्रह्मवादिनां ब्रह्मवदनशीलानाम्।।

।।१७.२५।। --

तम् इति अनभिसंधाय, 'तत् ' इति ब्रह्माभिधानम् उच्चार्य अनभिसंधाय च यज्ञादिकर्मणः फलं यज्ञतपःक्रियाः यज्ञक्रियाश्च तपःक्रियाश्च यज्ञतपःक्रियाः दानक्रियाश्च विविधाः क्षेत्रहिरण्यप्रदानादिलक्षणाः क्रियन्ते निर्वर्त्यन्ते मोक्षकाङ्क्षिभिः मोक्षार्थिभिः मुमुक्षुभिः।।

ओंतच्छब्दयोः विनियोगः उक्तः। अथ इदानीं सच्छब्दस्य विनियोगः कथ्यते --

।।१७.२६।। --

सद्भावे, असतः सद्भावे यथा अविद्यमानस्य पुत्रस्य जन्मनि, तथा साधुभावे च असद्वृत्तस्य असाधोः सद्वृत्तता साधुभावः तस्मिन् साधुभावे च सत् इत्येतत् अभिधानं ब्रह्मणः प्रयुज्यते अभिधीयते। प्रशस्ते कर्मणि विवाहादौ च तथा सच्छब्दः पार्थ, युज्यते प्रयुज्यते इत्येतत्।।

।।१७.२७।। --

यज्ञे यज्ञकर्मणि या स्थितिः, तपसि च या स्थितिः, दाने च या स्थितिः, सा सत् इति च उच्यते विद्वद्भिः। कर्म च व तदर्थीयं यज्ञदानतपोऽर्थीयम्; अथवा, यस्य अभिधानत्रयं प्रकृतं तदर्थीयं यज्ञदानतपोऽर्थीयम् ईश्वरार्थीयम् इत्येतत्; सत् इत्येव अभिधीयते। तत् तत् यज्ञदानतपआदि कर्म असात्त्विकं विगुणमपि श्रद्धापूर्वकं ब्रह्मणः अभिधानत्रयप्रयोगेण सगुणं सात्त्विकं संपादितं भवति।।

तत्र च सर्वत्र श्रद्धाप्रधानतया सर्वं संपाद्यते यस्मात्, तस्मात् --

।।१७.२८।। --

अश्रद्धया हुतं हवनं कृतम्, अश्रद्धया दत्तं ब्राह्मणेभ्यः, अश्रद्धया तपः तप्तम् अनुष्ठितम्, तथा अश्रद्धयैव कृतं यत् स्तुतिनमस्कारादि, तत् सर्वम् असत् इति उच्यते, मत्प्राप्तिसाधनमार्गबाह्यत्वात् पार्थ। न च तत् बहुलायासमपि प्रेत्य फलाय नो अपि इहार्थम्, साधुभिः निन्दितत्वात् इति।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
सप्तदशोऽध्यायः।।

BHAGAVADGITA
Sanskrit Commentary - Sri Sankaracharya
Chapter 18
DV

।।१८.१।। --

संन्यासस्य संन्यासशब्दार्थस्य इत्येतत्, हे महाबाहो, तत्त्वं तस्य भावः तत्त्वम्, याथात्म्यमित्येतत्, इच्छामि वेदितुं ज्ञातुम्, त्यागस्य च त्यागशब्दार्थस्येत्येतत्, हृषीकेश, पृथक् इतरेतरविभागतः केशिनिषूदन केशिनामा हयच्छद्मा कश्चित् असुरः तं निषूदितवान् भगवान् वासुदेवः, तेन तन्नाम्ना संबोध्यते अर्जुनेन।।

संन्यासत्यागशब्दौ तत्र तत्र निर्दिष्टौ, न निर्लुठितार्थौ पूर्वेषु अध्यायेषु। अतः अर्जुनाय पृष्टवते तन्निर्णयाय भगवान् उवाच --

श्रीभगवानुवाच --

।।१८.२।। --

काम्यानाम् अश्वमेधादीनां कर्मणां न्यासं संन्यासशब्दार्थम्, अनुष्ठेयत्वेन प्राप्तस्य अनुष्ठानम्, कवयः पण्डिताः केचित् विदुः विजानन्ति। नित्यनैमित्तिकानाम् अनुष्ठीयमानानां सर्वकर्मणाम् आत्मसंबन्धितया प्राप्तस्य फलस्य परित्यागः सर्वकर्मफलत्यागः तं प्राहुः कथयन्ति त्यागं त्यागशब्दार्थं विचक्षणाः पण्डिताः। यदि काम्यकर्मपरित्यागः फलपरित्यागो वा अर्थः वक्तव्यः, सर्वथा परित्यागमात्रं संन्यासत्यागशब्दयोः कः अर्थः स्यात्, न घटपटशब्दाविव जात्यन्तरभूतार्थौ।।

ननु नित्यनैमित्तिकानां कर्मणां फलमेव नास्ति इति आहुः। कथम् उच्यते तेषां फलत्यागः, यथा वन्ध्यायाः पुत्रत्यागः? नैष दोषः, नित्यानामपि कर्मणां भगवता फलवत्त्वस्य इष्टत्वात्।

वक्ष्यति हि भगवान् 'अनिष्टमिष्टं मिश्रं च (गीता १८।१२) ' इति 'न तु संन्यासिनाम् (गीता १८।१२)' इति च। संन्यासिनामेव हि केवलं कर्मफलासंबन्धं दर्शयन् असंन्यासिनां नित्यकर्मफलप्राप्तिम् 'भवत्यत्यागिनां प्रेत्य (गीता १८।१२)' इति दर्शयति।।

।।१८.३।। --

त्याज्यं त्यक्तव्यं दोषवत् दोषः अस्य अस्तीति दोषवत्। किं तत्? कर्म बन्धहेतुत्वात् सर्वमेव। अथवा, दोषः यथा रागादिः त्यज्यते, तथा त्याज्यम् इति के कर्म प्राहुः मनीषिणः पण्डिताः सांख्यादिदृष्टिम् आश्रिताः, अधिकृतानां कर्मिणामपि इति। तत्रैव यज्ञदानतपःकर्म ऩ त्याज्यम् इति च अपरे।।

कर्मिणः व अधिकृताः, तान् अपेक्ष्य ते विकल्पाः, न तु ज्ञाननिष्ठान् व्युत्थायिनः संन्यासिनः अपेक्ष्य। 'ज्ञानयोगेन सांख्यानां निष्ठा मया पुरा प्रोक्ता' इति कर्माधिकारात् अपोद्धृताः ये, न तान् प्रति चिन्ता।।

ननु 'कर्मयोगेन योगिनाम् (गीता ३।३)' इति अधिकृताः पूर्वं विभक्तनिष्ठाः अपि इह सर्वशास्त्रार्थोपसंहारप्रकरणे यथा विचार्यन्ते, तथा सांख्या अपि ज्ञाननिष्ठाः विचार्यन्ताम् इति। न, तेषां मोहदुःखनिमित्तत्यागानुपपत्तेः। न कायक्लेशनिमित्तं दुःखं सांख्याः आत्मनि पश्यन्ति, इच्छादीनां क्षेत्रधर्मत्वेनैव दर्शितत्वात्। अतः ते न कायक्लेशदुःखभयात् कर्म परित्यजन्ति। नापि ते कर्माणि आत्मनि पश्यन्ति, येन नियतं कर्म मोहात् परित्यजेयुः। गुणानां कर्म 'नैव किञ्चित्करोमि' इति हि ते संन्यस्यन्ति। 'सर्वकर्माणि मनसा संन्यस्य (गीता ५।१३)' इत्यादिभिः तत्त्वविदः संन्यासप्रकारः उक्तः। तस्मात् ये अन्ये अधिकृताः कर्मणि अनात्मविदः, येषां च मोहनिमित्तः त्यागः संभवति कायक्लेशभयाच्च, ते व तामसाः त्यागिनः राजसाश्च इति

निन्द्यन्ते कर्मिणाम् अनात्मज्ञानां कर्मफलत्यागस्तुत्यर्थम्; 'सर्वारम्भपरित्यागी (गीता १४।२५)' 'मौनी संतुष्टो येन केनचित् (गीता १२।१९)। अनिकेतः स्थिरमतिः (गीता १२।१९)' इति गुणातीतलक्षणे च परमार्थसंन्यासिनः विशेषितत्वात्। वक्ष्यति च 'निष्ठा ज्ञानस्य या परा (गीता १८।५०)' इति। तस्मात् ज्ञाननिष्ठाः संन्यासिनः न इह विवक्षिताः। कर्मफलत्यागः व सात्त्विकत्वेन गुणेन तामसत्वाद्यपेक्षया संन्यासः उच्यते, न मुख्यः सर्वकर्मसंन्यासः।।

सर्वकर्मसंन्यासासंभवे च 'न हि देहभृता' इति हेतुवचनात् मुख्य व इति चेत्, न; हेतुवचनस्य स्तुत्यर्थत्वात्। यथा त्यागाच्छान्तिरनन्तरम् (गीता १२।१२)' इति कर्मफलत्यागस्तुतिरेव यथोक्तानेकपक्षानुष्ठानाशक्तिमन्तम् अर्जुनम् अङ्गं प्रति विधानात्; तथा इदमपि 'न हि देहभृता शक्यम् (गीता १८।११)' इति कर्मफलत्यागस्तुत्यर्थम्; न 'सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नास्ते' इत्यस्य पक्षस्य अपवादः केनचित् दर्शयितुं शक्यः। तस्मात् कर्मणि अधिकृतान् प्रत्येव षः संन्यासत्यागविकल्पः। ये तु परमार्थदर्शिनः सांख्याः, तेषां ज्ञाननिष्ठायामेव सर्वकर्मसंन्यासलक्षणायाम् अधिकारः, न अन्यत्र, इति न ते विकल्पार्हाः। तच्च उपपादितम् अस्माभिः 'वेदाविनाशिनम् (गीता २।२१)' इत्यस्मिन्प्रदेशे, तृतीयादौ च।।

तत्र तेषु विकल्पभेदेषु --

।।१८.४।। --

निश्चयं श्रृणु अवधारय मे मम वचनात्; तत्र त्यागे त्यागसंन्यासविकल्पे यथादर्शिते भरतसत्तम भरतानां साधुतम। त्यागो हि, त्यागसंन्यासशब्दवाच्यो हि यः अर्थः सः क वेति अभिप्रेत्य आह -- त्यागो हि इति। पुरुषव्याघ्र, त्रिविधः त्रिप्रकारः तामसादिप्रकारैः संप्रकीर्तितः शास्त्रेषु सम्यक् कथितः यस्मात् तामसादिभेदेन त्यागसंन्यासशब्दवाच्यः अर्थः अधिकृतस्य कर्मिणः अनात्मज्ञस्य त्रिविधः संभवति, न परमार्थदर्शिनः, इत्ययमर्थः दुर्ज्ञानः, तस्मात् अत्र तत्त्वं न अन्यः वक्तुं

समर्थः। तस्मात् निश्चयं परमार्थशास्त्रार्थविषयम् अध्यवसायम्ेश्वरं मे मत्तः श्रृणु।।

कः पुनः असौ निश्चयः इति, आह --

।।१८.५।। --

यज्ञः दानं तपः इत्येतत् त्रिविधं कर्म न त्याज्यं न त्यक्तव्यम्, कार्यं करणीयम् व तत्। कस्मात्? यज्ञः दानं तपश्चैव पावनानि विशुद्धिकराणि मनीषिणां फलानभिसंधीनाम् इत्येतत्।।

।।१८.६।। --

तान्यपि तु कर्माणि यज्ञदानतपांसि पावनानि उक्तानि सङ्गम् आसक्तिं तेषु त्यक्त्वा फलानि च तेषां परित्यज्य कर्तव्यानि इति अनुष्ठेयानि इति मे मम निश्चितं मतम् उत्तमम्।।

'निश्चयं शृणु मे तत्र (गीता १८।४)' इति प्रतिज्ञाय, पावनत्वं च हेतुम् उक्त्वा, 'एतान्यपि कर्माणि कर्तव्यानि' इत्येतत् 'निश्चितं मतमुत्तमम्' इति प्रतिज्ञातार्थोपसंहार व, न अपूर्वार्थं वचनम्, 'एतान्यपि' इति प्रकृतसंनिकृष्टार्थत्वोपपत्तेः। सासङ्गस्य फलार्थिनः बन्धहेतवः तान्यपि कर्माणि मुमुक्षोः कर्तव्यानि इति अपिशब्दस्य अर्थः। न तु अन्यानि कर्माणि अपेक्ष्य 'एतान्यपि' इति उच्यते।।

अन्ये तु वर्णयन्ति -- नित्यानां कर्मणां फलाभावात् 'सङ्गं त्यक्त्वा फलानि च' इति न उपपद्यते। अतः 'एतान्यपि' इति यानि काम्यानि कर्माणि नित्येभ्यः अन्यानि, तानि अपि

कर्तव्यानि, किमुत यज्ञदानतपांसि नित्यानि इति। तत् असत्, नित्यानामपि कर्मणाम् इह फलवत्त्वस्य उपपादितत्वात् 'यज्ञो दानं तपश्चैव पावनानि (गीता १८।५)' इत्यादिना वचनेन। नित्यान्यपि कर्माणि बन्धहेतुत्वाशङ्कया जिहासोः मुमुक्षोः कुतः काम्येषु प्रसङ्गः? 'दूरेण ह्यवरं कर्म (गीता २।४९)' इति च निन्दितत्वात्, 'यज्ञार्थात् कर्मणोऽन्यत्र (गीता ३।९)' इति च काम्यकर्मणां बन्धहेतुत्वस्य निश्चितत्वात्, 'त्रैगुण्यविषया वेदाः (गीता २।४५)' 'त्रैविद्या मां सोमपाः (गीता ९।१९)' 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति (गीता ९।२१)' इति च, दूरव्यवहितत्वाच्च, न काम्येषु 'एतान्यपि' इति व्यपदेशः।।

तस्मात् अज्ञस्य अधिकृतस्य मुमुक्षोः --

।।१८.७।। --

नियतस्य तु नित्यस्य संन्यासः परित्यागः कर्मणः न उपपद्यते, अज्ञस्य पावनत्वस्य इष्टत्वात्। मोहात् अज्ञानात् तस्य नियतस्य परित्यागः -- नियतं च अवश्यं कर्तव्यम्, त्यज्यते च, इति विप्रतिषिद्धम्; अतः मोहनिमित्तः परित्यागः तामसः परिकीर्तितः मोहश्च तमः इति।।

।।१८.८।। --

दुःखम् इति व यत् कर्म कायक्लेशभयात् शरीरदुःखभयात् त्यजेत्, सः कृत्वा राजसं रजोनिर्वर्त्यं त्यागं नैव त्यागफलं ज्ञानपूर्वकस्य सर्वकर्मत्यागस्य फलं मोक्षाख्यं न लभेत् नैव लभेत।।

कः पुनः सात्त्विकः त्यागः इति, आह --

।।१८.९।। --

कार्यं कर्तव्यम् इत्येव यत् कर्म नियतं नित्यं क्रियते निर्वर्त्यते हे अर्जुन, सङ्गं त्यक्त्वा फलं च व। तत् नित्यानां कर्मणां फलवत्त्वे भगवद्वचनं प्रमाणम् अवोचाम। अथवा, यद्यपि फलं न श्रूयते नित्यस्य कर्मणः, तथापि नित्यं कर्म कृतम् आत्मसंस्कारं प्रत्यवायपरिहारं वा फलं करोति आत्मनः इति कल्पयत्येव अज्ञः। तत्र तामपि कल्पनां निवारयति 'फलं त्यक्त्वा' इत्यनेन। अतः साधु उक्तम् 'सङ्गं त्यक्त्वा फलं च' इति। सः त्यागः नित्यकर्मसु सङ्गफलपरित्यागः सात्त्विकः सत्त्वनिर्वृत्तः मतः अभिप्रेतः।।

ननु कर्मपरित्यागः त्रिविधः संन्यासः इति च प्रकृतः। तत्र तामसो राजसश्च उक्तः त्यागः। कथम् इह सङ्गफलत्यागः तृतीयत्वेन उच्यते? यथा त्रयो ब्राह्मणाः आगताः, तत्र षडङ्गविदौ द्वौ, क्षत्रियः तृतीयः इति तद्वत्। नैष दोषः त्यागसामान्येन स्तुत्यर्थत्वात्। अस्ति हि कर्मसंन्यासस्य फलाभिसंधित्यागस्य च त्यागत्वसामान्यम्। तत्र राजसतामसत्वेन कर्मत्यागनिन्दया कर्मफलाभिसंधित्यागः सात्त्विकत्वेन स्तूयते 'स त्यागः सात्त्विको मतः (गीता १८।९)' इति।।

यस्तु अधिकृतः सङ्गं त्यक्त्वा फलाभिसंधिं च नित्यं कर्म करोति, तस्य फलरागादिना अकलुषीक्रियमाणम् अन्तःकरणं नित्यैश्च कर्मभिः संस्क्रियमाणं विशुध्यति। तत् विशुद्धं प्रसन्नम् आत्मालोचनक्षमं भवति। तस्यैव नित्यकर्मानुष्ठानेन विशुद्धान्तःकरणस्य आत्मज्ञानाभिमुखस्य क्रमेण यथा तन्निष्ठा स्यात्, तत् वक्तव्यमिति आह --

।।१८.१०।। --

न द्वेष्टि अकुशलम् अशोभनं काम्यं कर्म, शरीरारम्भद्वारेण संसारकारणम्, 'किमनेन?'

इत्येवम्। कुशले शोभने नित्ये कर्मणि सत्त्वशुद्धिज्ञानोत्पत्तिनिष्ठाहेतुत्वेन 'मोक्षकारणम् इदम्' इत्येवं न अनुषज्जते अनुषङ्गं प्रीतिं न करोति इत्येतत्। कः पुनः असौ? त्यागी पूर्वोक्तेन सङ्गफलत्यागेन तद्वान् त्यागी, यः कर्मणि सङ्गं त्यक्त्वा तत्फलं च नित्यकर्मानुष्ठायी सः त्यागी। कदा पुनः असौ अकुशलं कर्म न द्वेष्टि, कुशले च न अनुषज्जते इति, उच्यते -- सत्त्वसमाविष्टः यदा सत्त्वेन आत्मानात्मविवेकविज्ञानहेतुना समाविष्टः संव्याप्तः, संयुक्त इत्येतत्। अत व च मेधावी मेधया आत्मज्ञानलक्षणया प्रज्ञया संयुक्तः तद्वान् मेधावी। मेधावित्वादेव च्छिन्नसंशयः छिन्नः अविद्याकृतः संशयः यस्य 'आत्मस्वरूपावस्थानमेव परं निःश्रेयससाधनम्, न अन्यत् किञ्चित्' इत्येवं निश्चयेन च्छिन्नसंशयः।।

यः अधिकृतः पुरुषः पूर्वोक्तेन प्रकारेण कर्मयोगानुष्ठानेन क्रमेण संस्कृतात्मा सन् जन्मादिविक्रियारहितत्वेन निष्क्रियम् आत्मानम् आत्मत्वेन संबुद्धः, सः 'सर्वकर्माणि मनसा संन्यस्य (गीता ५।१३)' नैव कुर्वन् न कारयन् आसीनः नैष्कर्म्यलक्षणां ज्ञाननिष्ठाम् अश्नुते इत्येतत्। पूर्वोक्तस्य कर्मयोगस्य प्रयोजनम् अनेनैव श्लोकेन उक्तम्।।

यः पुनः अधिकृतः सन् देहात्माभिमानित्वेन देहभृत् अज्ञः अबाधितात्मकर्तृत्वविज्ञानतया 'अहं कर्ता' इति निश्चितबुद्धिः तस्य अशेषकर्मपरित्यागस्य अशक्यत्वात् कर्मफलत्यागेन चोदितकर्मानुष्ठाने व अधिकारः, न तत्त्यागे इति तम्, अर्थं दर्शयितुम् आह --

।।१८.११।। --

न हि यस्मात् देहभृता, देहं बिभर्तीति देहभृत्, देहात्माभिमानवान् देहभृत् उच्यते, न विवेकी; स हि 'वेदाविनाशिनम् (गीता २।२१)' इत्यादिना कर्तृत्वाधिकारात् निवर्तितः। अतः तेन देहभृता अज्ञेन न शक्यं त्यक्तुं संन्यसितुं कर्माणि अशेषतः निःशेषेण। तस्मात् यस्तु अज्ञः

अधिकृतः नित्यानि कर्माणि कुर्वन् कर्मफलत्यागी कर्मफलाभिसंधिमात्रसंन्यासी सः त्यागी इति अभिधीयते कर्मी अपि सन् इति स्तुत्यभिप्रायेण। तस्मात् परमार्थदर्शिनैव अदेहभृता देहात्मभावरहितेन अशेषकर्मसंन्यासः शक्यते कर्तुम्।।

किं पुनः तत् प्रयोजनम्, यत् सर्वकर्मसंन्यासात् स्यादिति, उच्यते --

।।१८.१२।। --

अनिष्टं नरकतिर्गयादिलक्षणम्, इष्टं देवादिलक्षणम्, मिश्रम् इष्टानिष्टसंयुक्तं मनुष्यलक्षणं च, तत् त्रिविधं त्रिप्रकारं कर्मणः

धर्माधर्मलक्षणस्य फलं बाह्यानेककारकव्यापारनिष्पन्नं सत् अविद्याकृतम् इन्द्रजालमायोपमं महामोहकरं प्रत्यगात्मोपसर्पि इव -- फल्गुतया लयम् अदर्शनं गच्छतीति फलनिर्वचनम् -- तत् तत् वंलक्षणं फलं भवति अत्यागिनाम् अज्ञानां कर्मिणां अपरमार्थसंन्यासिनां प्रेत्य शरीरपातात् ऊर्ध्वम्। न तु संन्यासिनां परमार्थसंन्यासिनां परमहंसपरिव्राजकानां केवलज्ञाननिष्ठानां क्वचित्। न हि केवलसम्यग्दर्शननिष्ठा अविद्यादिसंसारबीजं न उन्मूलयन्ति कदाचित् इत्यर्थः। अतः परमार्थदर्शिनः व अशेषकर्मसंन्यासित्वं संभवति, अविद्याध्यारोपितत्वात् आत्मनि क्रियाकारकफलानाम्; न तु अज्ञस्य अधिष्ठानादीनि क्रियाकर्तृकारकाणि आत्मत्वेनैव पश्यतः अशेषकर्मसंन्यासः संभवति।।

तदेतत् उत्तरैः श्लोकैः दर्शयति --

।।१८.१३।। --

पञ्च तानि वक्ष्यमाणानि हे महाबाहो, कारणानि निर्वर्तकानि निबोध मे मम इति। उत्तरत्र

चेतःसमाधानार्थम्, वस्तुवैषम्यप्रदर्शनार्थं च। तानि च कारणानि ज्ञातव्यतया स्तौति -- सांख्ये ज्ञातव्याः पदार्थाः संख्यायन्ते यस्मिन् शास्त्रे तत् सांख्यं वेदान्तः। कृतान्ते इति तस्यैव विशेषणम्। कृतम् इति कर्म उच्यते, तस्य अन्तः परिसमाप्तिः यत्र सः कृतान्तः, कर्मान्तः इत्येतत्। 'यावानर्थ उदपाने (गीता २।४६)' 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते (गीता ४।३३)' इति आत्मज्ञाने सञ्जाते सर्वकर्मणां निवृत्तिं दर्शयति। अतः तस्मिन् आत्मज्ञानार्थे सांख्ये कृतान्ते वेदान्ते प्रोक्तानि कथितानि सिद्धये निष्पत्त्यर्थं सर्वकर्मणाम्।।

कानि तानीति, उच्यते --

।।१८.१४।। --

अधिष्ठानम् इच्छाद्वेषसुखदुःखज्ञानादीनाम् अभिव्यक्तेराश्रयः अधिष्ठानं शरीरम्, तथा कर्ता उपाधिलक्षणः भोक्ता, करणं च श्रोत्रादिशब्दाद्युपलब्धये पृथग्विधं नानाप्रकारं तत् द्वादशसंख्यं विविधाश्च पृथक्चेष्टाः वायवीयाः प्राणापानाद्याः दैवं चैव दैवमेव च अत्र तेषु चतुर्षु पञ्चमं पञ्चानां पूरणम् आदित्यादि चक्षुराद्यनुग्राहकम्।।

।।१८.१५।। --

शरीरवाङ्मनोभिः यत् कर्म त्रिभिः तैः प्रारभते निर्वर्तयति नरः, न्याय्यं वा धर्म्यं शास्त्रीयम्, विपरीतं वा अशास्त्रीयम् अधर्म्यं यच्चापि निमिषितचेष्टितादि जीवनहेतुः तदपि पूर्वकृतधर्माधर्मयोरेव कार्यमिति न्याय्यविपरीतयोरेव ग्रहणेन गृहीतम्, पञ्च ते यथोक्ताः तस्य सर्वस्यैव कर्मणो हेतवः कारणानि।।

ननु तानि अधिष्ठानादीनि सर्वकर्मणां निर्वर्तकानि कथम् उच्यते 'शरीरवाङ्मनोभिः यत् कर्म

प्रारभते' इति? नैष दोषः; विधिप्रतिषेधलक्षणं सर्वं कर्म शरीरादित्रयप्रधानम्; तदङ्गतया दर्शनश्रवणादि च जीवनलक्षणं त्रिधैव राशीकृतम् उच्यते शरीरादिभिः आरभते इति। फलकालेऽपि तत्प्रधानैः साधनैः भुज्यते इति पञ्चानामेव हेतुत्वं न विरुध्यते इति।।

।।१८.१६।। --

तत्र इति प्रकृतेन संबध्यते। वं सति वं यथोक्तैः पञ्चभिः हेतुभिः निर्वर्त्ये सति कर्मणि। तत्रैवं सति इति दुर्मतित्वस्य हेतुत्वेन संबध्यते। तत्र तेषु आत्मानन्यत्वेन अविद्यया परिकल्पितैः क्रियमाणस्य कर्मणः 'अहमेव कर्ता' इति कर्तारम् आत्मानं केवलं शुद्धं तु यः पश्यति अविद्वान्; कस्मात्? वेदान्ताचार्योपदेशन्यायैः अकृतबुद्धित्वात् असंस्कृतबुद्धित्वात्; योऽपि देहादिव्यतिरिक्तात्मवादी आत्मानमेव केवलं कर्तारं पश्यति, असावपि अकृतबुद्धिः; अतः अकृतबुद्धित्वात् न सः पश्यति आत्मनः तत्त्वं कर्मणो वा इत्यर्थः। अतः दुर्मतिः, कुत्सिता विपरीता दुष्टा अजस्रं जननमरणप्रतिपत्तिहेतुभूता मतिः अस्य इति दुर्मतिः। सः पश्यन्नपि न पश्यति, यथा तैमिरिकः अनेकं चन्द्रम्, यथा वा अभ्रेषु धावत्सु चन्द्रं धावन्तम्, यथा वा वाहने उपविष्टः अन्येषु धावत्सु आत्मानं धावन्तम्।।

कः पुनः सुमतिः यः सम्यक् पश्यतीति, उच्यते --

।।१८.१७।। --

यस्य शास्त्राचार्योपदेशन्यायसंस्कृतात्मनः न भवति अहंकृतः 'अहं कर्ता' इत्येवंलक्षणः भावः भावना प्रत्ययः -- ते व पञ्च अधिष्ठानादयः अविद्यया आत्मनि कल्पिताः सर्वकर्मणां कर्तारः, न अहम्, अहं तु तद्व्यापाराणां साक्षिभूतः 'अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः (मु० उ०

२।१।२) ' केवलः अविक्रियः इत्येवं पश्यतीति तत् -- बुद्धिः अन्तःकरणं यस्य आत्मनः उपाधिभूता न लिप्यते न अनुशयिनी भवति -- 'इदमहमकार्षम्, तेन अहं नरकं गमिष्यामि' इत्येवं यस्य बुद्धिः न लिप्यते -- सः सुमतिः, सः पश्यति। हत्वा अपि सः इमान् लोकान्, सर्वान् इमान् प्राणिनः इत्यर्थः, न हन्ति हननक्रियां न करोति, न निबध्यते नापि तत्कार्येण अधर्मफलेन संबध्यते।।

ननु हत्वापि न हन्ति इति विप्रतिषिद्धम् उच्यते यद्यपि स्तुतिः। नैष दोषः, लौकिकपारमार्थिकदृष्ट्यपेक्षया तदुपपत्तेः। देहाद्यात्मबुद्ध्या 'हन्ता अहम्' इति लौकिकीं दृष्टिम् आश्रित्य 'हत्वापि' इति आह। यथादर्शितां पारमार्थिकीं दृष्टिम् आश्रित्य 'न हन्ति न निबध्यते' इति। तत् उभयम् उपपद्यते व।।

ननु अधिष्ठानादिभिः संभूय करोत्येव आत्मा, 'कर्तारमात्मानं केवलं तु (गीता १८।१६)' इति केवलशब्दप्रयोगात्। नैष दोषः, आत्मनः अविक्रियस्वभावत्वे अधिष्ठानादिभिः संहतत्वानुपपत्तेः। विक्रियावतो हि अन्यैः संहननं संभवति, संहत्य वा कर्तृत्वं स्यात्। न तु अविक्रियस्य आत्मनः केनचित् संहननम् अस्ति इति न संभूय कर्तृत्वम् उपपद्यते। अतः केवलत्वम् आत्मनः स्वाभाविकमिति केवलशब्दः अनुवादमात्रम्। अविक्रियत्वं च आत्मनः श्रुतिस्मृतिन्यायप्रसिद्धम्। 'अविकार्योऽयमुच्यते (गीता २।२५)' 'गुणैरेव कर्माणि क्रियन्ते' 'शरीरस्थोऽपि न करोति (गीता १३।३१)' इत्यादि असकृत् उपपादितं गीतास्वेव तावत्। श्रुतिषु च ध्यायतीव लेलायतीव इत्येवमाद्यासु। न्यायतश्च -- निरवयवम् अपरतन्त्रम् अविक्रियम् आत्मतत्त्वम् इति राजमार्गः। विक्रियावत्त्वाभ्युपगमेऽपि आत्मनः स्वकीयैव विक्रिया स्वस्य भवितुम् अर्हति, न अधिष्ठानादीनां कर्माणि आत्मकर्तृकाणि स्युः। न हि परस्य कर्म परेण अकृतम् आगन्तुम् अर्हति। यत्तु अविद्यया गमितम्, न तत् तस्य। यथा रजतत्वं न शुक्तिकायाः; यथा वा तलमलिनत्वं बालैः गमितम् अविद्यया, न आकाशस्य, तथा अधिष्ठानादिविक्रियापि तेषामेव, न आत्मनः। तस्मात् युक्तम् उक्तम् 'अहंकृतत्वबुद्धिलेपाभावात् विद्वान् न हन्ति न निबध्यते' इति। 'नायं हन्ति न हन्यते (गीता २।१९)' इति प्रतिज्ञाय 'न जायते (गीता २।२०)' इत्यादिहेतुवचनेन अविक्रियत्वम्

आत्मनः उक्त्वा, 'वेदाविनाशिनम् (गीता २।२१)' इति विदुषः कर्माधिकारनिवृत्तिं शास्त्रादौ संक्षेपतः उक्त्वा, मध्ये प्रसारितां तत्र तत्र प्रसङ्गं कृत्वा इह उपसंहरति शास्त्रार्थपिण्डीकरणाय विद्वान् न हन्ति न निबध्यते इति। वं च सति देहभृत्त्वाभिमानानुपपत्तौ अविद्याकृताशेषकर्मसंन्यासोपपत्तेः संन्यासिनाम् अनिष्टादि त्रिविधं कर्मणः फलं न भवति इति उपपन्नम्; तद्विपर्ययाच्च इतरेषां भवति इत्येतच्च अपरिहार्यम् इति षः गीताशास्त्रार्थः उपसंहृतः। स षः सर्ववेदार्थसारः निपुणमतिभिः पण्डितैः विचार्य प्रतिपत्तव्यः इति तत्र तत्र प्रकरणविभागेन दर्शितः अस्माभिः शास्त्रन्यायानुसारेण।।

अथ इदानीं कर्मणां प्रवर्तकम् उच्यते --

।।१८.१८।। --

ज्ञानं ज्ञायते अनेन इति सर्वविषयम् अविशेषेण उच्यते। तथा ज्ञेयं ज्ञातव्यम्, तदपि सामान्येनैव सर्वम् उच्यते। तथा परिज्ञाता उपाधिलक्षणः अविद्याकल्पितः भोक्ता। इति तत् त्रयम् अविशेषेण सर्वकर्मणां प्रवर्तिका त्रिविधा त्रिप्रकारा कर्मचोदना। ज्ञानादीनां हि त्रयाणां संनिपाते हानोपादानादिप्रयोजनः सर्वकर्मारम्भः स्यात्। ततः पञ्चभिः अधिष्ठानादिभिः आरब्धं वाङ्मनःकायाश्रयभेदेन त्रिधा राशीभूतं त्रिषु करणादिषु संगृह्यते इत्येतत् उच्यते -- करणं क्रियते अनेन इति बाह्यं श्रोत्रादि, अन्तःस्थं बुद्ध्यादि, कर्म ईप्सिततमं कर्तुः क्रियया व्याप्यमानम्, कर्ता करणानां व्यापारयिता उपाधिलक्षणः, इति त्रिविधः त्रिप्रकारः कर्मसंग्रहः, संगृह्यते अस्मिन्निति संग्रहः, कर्मणः संग्रहः कर्मसंग्रहः, कर्म षु हि त्रिषु समवैति, तेन अयं त्रिविधः कर्मसंग्रहः।।

अथ इदानीं क्रियाकारकफलानां सर्वेषां गुणात्मकत्वात् सत्त्वरजस्तमोगुणभेदतः त्रिविधः भेदः वक्तव्य इति आरभ्यते --

।।१८.१९।। --

ज्ञानं कर्म च, कर्म क्रिया, न कारकं पारिभाषिकम् ईप्सिततमं कर्म, कर्ता च निर्वर्तकः क्रियाणां त्रिधा व, अवधारणं गुणव्यतिरिक्तजात्यन्तराभावप्रदर्शनार्थं गुणभेदतः सत्त्वादिभेदेन इत्यर्थः। प्रोच्यते कथ्यते गुणसंख्याने कापिले शास्त्रे तदपि गुणसंख्यानशास्त्रं गुणभोक्तृविषये प्रमाणमेव। परमार्थब्रह्मैकत्वविषये यद्यपि विरुध्यते, तथापि ते हि कापिलाः गुणगौणव्यापारनिरूपणे अभियुक्ताः इति तच्छास्त्रमपि वक्ष्यमाणार्थस्तुत्यर्थत्वेन उपादीयते इति न विरोधः। यथावत् यथान्यायं यथाशास्त्रं शृणु तान्यपि ज्ञानादीनि तद्भेदजातानि गुणभेदकृतानि शृणु, वक्ष्यमाणे अर्थे मनःसमाधिं कुरु इत्यर्थः।।

ज्ञानस्य तु तावत् त्रिविधत्वम् उच्यते --

।।१८.२०।। --

सर्वभूतेषु अव्यक्तादिस्थावरान्तेषु भूतेषु येन ज्ञानेन कं भावं वस्तु -- भावशब्दः वस्तुवाची, कम् आत्मवस्तु इत्यर्थः; अव्ययं न व्येति स्वात्मना स्वधर्मेण वा, कूटस्थम् इत्यर्थः; ईक्षते पश्यति येन झानेन, तं च भावम् अविभक्तं प्रतिदेहं विभक्तेषु देहभेदेषु न विभक्तं तत् आत्मवस्तु, व्योमवत् निरन्तरमित्यर्थः; तत् ज्ञानं साक्षात् सम्यग्दर्शनम् अद्वैतात्मविषयं सात्त्विकं विद्धि इति।।

यानि द्वैतदर्शनानि तानि असम्यग्भूतानि राजसानि तामसानि च इति न साक्षात् संसारोच्छित्तये भवन्ति --

।।१८.२१।। --

पृथक्त्वेन तु भेदेन प्रतिशरीरम् अन्यत्वेन यत् ज्ञानं नानाभावान् भिन्नान् आत्मनः पृथग्विधान्

पृथक्प्रकारान् भिन्नलक्षणान् इत्यर्थः, वेत्ति विजानाति यत् ज्ञानं सर्वेषु भूतेषु, ज्ञानस्य कर्तृत्वासंभवात् येन ज्ञानेन वेत्ति इत्यर्थः, तत् ज्ञानं विद्धि राजसं रजोगुणनिर्वृत्तम्।।

।।१८.२२।। --

यत् (तु गी० में) ज्ञानं कृत्स्नवत् समस्तवत् सर्वविषयमिव कस्मिन् कार्ये देहे बहिर्वा प्रतिमादौ सक्तम् 'एतावानेव आत्मा ईश्वरो वा, न अतः परम् अस्ति' इति, यथा नग्नक्षपणकादीनां शरीरान्तर्वर्ती देहपरिमाणो जीवः, ईश्वरो वा पाषाणदार्वादिमात्रम्, इत्येवम् कस्मिन् कार्ये सक्तम्, अहैतुकं हेतुवर्जितं निर्युक्तिकम्, अतत्त्वार्थवत् अयथाभूतार्थवत्, यथाभूतः अर्थः तत्त्वार्थः, सः अस्य ज्ञेयभूतः अस्तीति तत्त्वार्थवत्, न तत्त्वार्थवत् अतत्त्वार्थवत्; अहैतुकत्वादेव अल्पं च, अल्पविषयत्वात् अल्पफलत्वाद्वा। तत् तामसम् उदाहृतम्। तामसानां हि प्राणिनाम् अविवेकिनाम् ईदृशं ज्ञानं दृश्यते।।

अथ इदानीं कर्मणः त्रैविध्यम् उच्यते --

।।१८.२३।। --

नियतं नित्यं सङ्गरहितम् आसक्तिवर्जितम् अरागद्वेषतःकृतं रागप्रयुक्तेन द्वेषप्रयुक्तेन च कृतं रागद्वेषतःकृतम्, तद्विपरीतम् अरागद्वेषतःकृतम्, अफलप्रेप्सुना फलं प्रेप्सतीति फलप्रेप्सुः फलतृष्णः तद्विपरीतेन अफलप्रेप्सुना कर्त्रा कृतं कर्म यत्, तत् सात्त्विकम् उच्यते।।

।।१८.२४।। --

यत्तु कामेप्सुना कर्मफलप्रेप्सुना इत्यर्थः, कर्म साहंकारेण ('वा' गी०) इति न तत्त्वज्ञानापेक्षया। किं तर्हि? लौकिकश्रोत्रियनिरहंकारापेक्षया। यो हि परमार्थनिरहंकारः आत्मवित्, न तस्य कामेप्सुत्वबहुलायासकर्तृत्वप्राप्तिः अस्ति। सात्त्विकस्यापि कर्मणः अनात्मवित् साहंकारः कर्ता, किमुत राजसतामसयोः। लोके अनात्मविदपि श्रोत्रियो निरहंकारः उच्यते 'निरहंकारः अयं ब्राह्मणः' इति। तस्मात् तदपेक्षयैव 'साहंकारेण वा' इति उक्तम्। पुनःशब्दः पादपूरणार्थः। क्रियते बहुलायासं कर्त्रा महता आयासेन निर्वर्त्यते, तत् कर्म राजसम् उदाहृतम्।।

।।१८.२५।। --

अनुबन्धं पश्चाद्भावि यत् वस्तु सः अनुबन्धः उच्यते तं च अनुबन्धम्, क्षयं यस्मिन् कर्मणि क्रियमाणे शक्तिक्षयः अर्थक्षयो वा स्यात् तं क्षयम्, हिंसां प्राणिबाधां च; अनपेक्ष्य च पौरुषं पुरुषकारम् 'शक्नोमि इदं कर्म समापयितुम्' इत्येवम् आत्मसामर्थ्यम्, इत्येतानि अनुबन्धादीनि अनपेक्ष्य पौरुषान्तानि मोहात् अविवेकतः आरभ्यते कर्म यत्, तत् तामसं तमोनिर्वृत्तम् उच्यते।।

इदानीं कर्तृभेदः उच्यते --

।।१८.२६।। --

मुक्तसङ्गः मुक्तः परित्यक्तः सङ्गः येन सः मुक्तसङ्गः, अनहंवादी न अहंवदनशीलः, धृत्युत्साहसमन्वितः धृतिः धारणम् उत्साहः उद्यमः ताभ्यां समन्वितः संयुक्तः धृत्युत्साहसमन्वितः, सिद्ध्यसिद्ध्योः क्रियमाणस्य कर्मणः फलसिद्धौ असिद्धौ च सिद्ध्यसिद्ध्योः निर्विकारः, केवलं शास्त्रप्रमाणेन प्रयुक्तः न फलरागादिना यः सः निर्विकारः उच्यते। वंभूतः कर्ता यः सः सात्त्विकः उच्यते।।

।।१८.२७।। --

रागी रागः अस्य अस्तीति रागी, कर्मफलप्रेप्सुः कर्मफलार्थी इत्यर्थः, लुब्धः परद्रव्येषु संजाततृष्णः, तीर्थादौ च स्वद्रव्यापरित्यागी वा, हिंसात्मकः परपीडाकरस्वभावः, अशुचिः बाह्याभ्यन्तरशौचवर्जितः, हर्षशोकान्वितः इष्टप्राप्तौ हर्षः अनिष्टप्राप्तौ इष्टवियोगे च शोकः ताभ्यां हर्षशोकाभ्याम् अन्वितः संयुक्तः, तस्यैव च कर्मणः संपत्तिविपत्तिभ्यां हर्षशोकौ स्याताम्, ताभ्यां संयुक्तो यः कर्ता सः राजसः परिकीर्तितः।।

।।१८.२८।। --

अयुक्तः न युक्तः असमाहितः, प्राकृतः अत्यन्तासंस्कृतबुद्धिः बालसमः, स्तब्धः दण्डवत् न नमति कस्मैचित्, शठः मायावी शक्तिगूहनकारी, नैष्कृतिकः परविभेदनपरः, अलसः अप्रवृत्तिशीलः कर्तव्येष्वपि, विषादी विषादवान् सर्वदा अवसन्नस्वभावः, दीर्घसूत्री च कर्तव्यानां दीर्घप्रसारणः, सर्वदा मन्दस्वभावः, यत् अद्य श्वो वा कर्तव्यं तत् मासेनापि न करोति, यश्च वंभूतः, सः कर्ता तामसः उच्यते।।

।।१८.२९।। --

बुद्धेः भेदं धृतेश्चैव भेदं गुणतः सत्त्वादिगुणतः त्रिविधं श्रृणु इति सूत्रोपन्यासः। प्रोच्यमानं कथ्यमानम् अशेषेण निरवशेषतः यथावत् पृथक्त्वेन विवेकतः धनंजय, दिग्विजये मानुषं दैवं च प्रभूतं धनं जितवान्, तेन असौ धनंजयः अर्जुनः।।

।।१८.३०।। --

प्रवृत्तिं च प्रवृत्तिः प्रवर्तनं बन्धहेतुः कर्ममार्गः शास्त्रविहितविषयः, निवृत्तिं च निर्वृत्तिः मोक्षहेतुः संन्यासमार्गः -- बन्धमोक्षसमानवाक्यत्वात् प्रवृत्तिनिवृत्ती कर्मसंन्यासमार्गौ इति अवगम्यते -- कार्याकार्ये विहितप्रतिषिद्धे लौकिके वैदिके वा शास्त्रबुद्धेः कर्तव्याकर्तव्ये करणाकरणे इत्येतत्; कस्य? देशकालाद्यपेक्षया दृष्टादृष्टार्थानां कर्मणाम्। भयाभये बिभेति अस्मादिति भयं चोरव्याघ्रादि, न भयं अभयम्, भयं च अभयं च भयाभये, दृष्टादृष्टविषययोः भयाभययोः कारणे इत्यर्थः। बन्धं सहेतुकं मोक्षं च सहेतुकं या वेत्ति विजानाति बुद्धिः, सा पार्थ सात्त्विकी। तत्र ज्ञानं बुद्धेः वृत्तिः; बुद्धिस्तु वृत्तिमती। धृतिरपि वृत्तिविशेषः व बुद्धेः।।

।।१८.३१।। --

यया धर्मं शास्त्रचोदितम् अधर्मं च तत्प्रतिषिद्धं कार्यं च अकार्यमेव च पूर्वोक्ते व कार्याकार्ये अयथावत् न यथावत् सर्वतः निर्णयेन न प्रजानाति, बुद्धिः सा पार्थ, राजसी।।

।।१८.३२।। --

अधर्मं प्रतिषिद्धं धर्मं विहितम् इति या मन्यते जानाति तमसा आवृता सती, सर्वार्थान् सर्वानेव ज्ञेयपदार्थान् विपरीतांश्च विपरीतानेव विजानाति, बुद्धिः सा पार्थ, तामसी।।

।।१८.३३।। --

धृत्या यया -- अव्यभिचारिण्या इति व्यवहितेन संबन्धः, धारयते; किम्? मनःप्राणेन्द्रियक्रियाः मनश्च प्राणाश्च इन्द्रियाणि च मनःप्राणेन्द्रियाणि, तेषां क्रियाः चेष्टाः, ताः उच्छास्त्रमार्गप्रवृत्तेः धारयते धारयति -- धृत्या हि धार्यमाणाः उच्छास्त्रमार्गविषयाः न भवन्ति -- योगेन समाधिना, अव्यभिचारिण्या, नित्यसमाध्यनुगतया इत्यर्थः। तत् उक्तं भवति -- अव्यभिचारिण्या धृत्या मनःप्राणेन्द्रियक्रियाः धार्यमाणाः योगेन धारयतीति। या वंलक्षणा धृतिः, सा पार्थ, सात्त्विकी।।

।।१८.३४।। --

यया तु धर्मकामार्थान् धर्मश्च कामश्च अर्थश्च धर्मकामार्थाः तान् धर्मकामार्थान् धृत्या यया धारयते मनसि नित्यमेव कर्तव्यरूपान् अवधारयति हे अर्जुन, प्रसङ्गेन यस्य यस्य धर्मादेः धारणप्रसङ्गः तेन तेन प्रसङ्गेन फलाकाङ्क्षी च भवति यः पुरुषः, तस्य धृतिः या, सा पार्थ, राजसी।।

।।१८.३५।। --

यया स्वप्नं निद्रां भयं त्रासं शोकं विषादं विषण्णतां मदं विषयसेवाम् आत्मनः बहुमन्यमानः मत्त इव मदम् व च मनसि नित्यमेव कर्तव्यरूपतया कुर्वन् न विमुञ्चति धारयत्येव दुर्मेधाः कुत्सितमेधाः पुरुषः यः, तस्य धृतिः या, सा तामसी मता।।

गुणभेदेन क्रियाणां कारकाणां च त्रिविधो भेदः उक्तः। अथ इदानीं फलस्य सुखस्य त्रिविधो भेदः उच्यते --

।।१८.३६।। --

सुखं तु इदानीं त्रिविधं शृणु, समाधानं कुरु इत्येतत्, मे मम भरतर्षभ। अभ्यासात् परिचयात् आवृत्तेः रमते रतिं प्रतिपद्यते यत्र यस्मिन् सुखानुभवे दुःखान्तं च दुःखावसानं दुःखोपशमं च निगच्छति निश्चयेन प्राप्नोति।।

।।१८.३७।। --

यत् तत् सुखम् अग्रे पूर्वं प्रथमसंनिपाते ज्ञानवैराग्यध्यानसमाध्यारम्भे अत्यन्तायासपूर्वकत्वात् विषमिव दुःखात्मकं भवति, परिणामे ज्ञानवैराग्यादिपरिपाकजं सुखम् अमृतोपमम्, तत् सुखं सात्त्विकं प्रोक्तं विद्वद्भिः, आत्मनः बुद्धिः आत्मबुद्धिः, आत्मबुद्धेः प्रसादः नैर्मल्यं सलिलस्य इव स्वच्छता, ततः जातं आत्मबुद्धिप्रसादजम्। आत्मविषया वा आत्मावलम्बना वा बुद्धिः आत्मबुद्धिः, तत्प्रसादप्रकर्षाद्वा जातमित्येतत्। तस्मात् सात्त्विकं तत्।।

।।१८.३८।। --

विषयेन्द्रियसंयोगात् जायते यत् सुखम् तत् सुखम् अग्रे प्रथमक्षणे अमृतोपमम् अमृतसमम्, परिणामे विषमिव, बलवीर्यरूपप्रज्ञामेधाधनोत्साहहानिहेतुत्वात् अधर्मतज्जनितनरकादिहेतुत्वाच्च परिणामे तदुपभोगपरिणामान्ते विषमिव, तत् सुखं राजसं स्मृतम्।।

।।१८.३९।। --

यत् अग्रे च अनुबन्धे च अवसानोत्तरकाले च सुखं मोहनं मोहकरम् आत्मनः निद्रालस्यप्रमादोत्थं निद्रा च आलस्यं च प्रमादश्च तेभ्यः समुत्तिष्ठतीति निद्रालस्यप्रमादोत्थम्, तत् तामसम् उदाहृतम्।।

अथ इदानीं प्रकरणोपसंहारार्थः श्लोकः आरभ्यते --

।।१८.४०।। --

न तत् अस्ति तत् नास्ति पृथिव्यां वा मनुष्यादिषु सत्त्वं प्राणिजातम् अन्यद्वा अप्राणि, दिवि देवेषु वा पुनः सत्त्वम्, प्रकृतिजैः प्रकृतितः जातैः भिः त्रिभिः गुणैः सत्त्वादिभिः मुक्तं परित्यक्तं यत् स्यात्, न तत् अस्ति इति पूर्वेण संबन्धः।।

सर्वः संसारः क्रियाकारकफललक्षणः सत्त्वरजस्तमोगुणात्मकः अविद्यापरिकल्पितः समूलः अनर्थः उक्तः, वृक्षरूपकल्पनया च 'ऊर्ध्वमूलम् (गीता १५।१)' इत्यादिना, 'तं च असङ्गशस्त्रेण दृढेन च्छित्त्वा (गीता १५।३) ततः पदं तत्परिमार्गितव्यम् (गीता १५।४)' इति च उक्तम्। तत्र च सर्वस्य त्रिगुणात्मकत्वात् संसारकारणनिवृत्त्यनुपपत्तौ प्राप्तायाम्, यथा तन्निवृत्तिः स्यात् तथा वक्तव्यम्, सर्वश्च गीताशास्त्रार्थः उपसंहर्तव्यः, तावानेव च सर्ववेदस्मृत्यर्थः पुरुषार्थम् इच्छद्भिः अनुष्ठेयः इत्येवमर्थम् 'ब्राह्मणक्षत्रियविशाम्' इत्यादिः आरभ्यते --

।।१८.४१।। --

ब्राह्मणाश्च क्षत्रियाश्च विशश्च ब्राह्मणक्षत्रियविशः, तेषां ब्राह्मणक्षत्रियविशां शूद्राणां च --

शूद्राणाम् असमासकरणम् कजातित्वे सति वेदानधिकारात् -- हे परंतप, कर्माणि प्रविभक्तानि इतरेतरविभागेन व्यवस्थापितानि। केन? स्वभावप्रभवैः गुणैः, स्वभावः ईश्वरस्य प्रकृतिः त्रिगुणात्मिका माया सा प्रभवः येषां गुणानां ते स्वभावप्रभवाः, तैः, शमादीनि कर्माणि प्रविभक्तानि ब्राह्मणादीनाम्। अथवा ब्राह्मणस्वभावस्य सत्त्वगुणः प्रभवः कारणम्, तथा क्षत्रियस्वभावस्य सत्त्वोपसर्जनं रजः प्रभवः, वैश्यस्वभावस्य तमउपसर्जनं रजः प्रभवः, शूद्रस्वभावस्य रजउपसर्जनं तमः प्रभवः, प्रशान्त्यैश्वर्येहामूढतास्वभावदर्शनात् चतुर्णाम्। अथवा, जन्मान्तरकृतसंस्कारः प्राणिनां वर्तमानजन्मनि स्वकार्याभिमुखत्वेन अभिव्यक्तः स्वभावः, सः प्रभवो येषां गुणानां ते स्वभावप्रभवाः गुणाः; गुणप्रादुर्भावस्य निष्कारणत्वानुपपत्तेः। 'स्वभावः कारणम्' इति च कारणविशेषोपादानम्। वं स्वभावप्रभवैः प्रकृतिभवैः सत्त्वरजस्तमोभिः गुणैः स्वकार्यानुरूपेण शमादीनि कर्माणि प्रविभक्तानि।।

ननु शास्त्रप्रविभक्तानि शास्त्रेण विहितानि ब्राह्मणादीनां शमादीनि कर्माणि; कथम् उच्यते सत्त्वादिगुणप्रविभक्तानि इति? नैष दोषः; शास्त्रेणापि ब्राह्मणादीनां सत्त्वादिगुणविशेषापेक्षयैव शमादीनि कर्माणि प्रविभक्तानि, न गुणानपेक्षया, इति शास्त्रप्रविभक्तान्यपि कर्माणि गुणप्रविभक्तानि इति उच्यते।।

कानि पुनः तानि कर्माणि इति, उच्यते --

।।१८.४२।। --

शमः दमश्च यथाव्याख्यातार्थौ, तपः यथोक्तं शारीरादि, शौचं व्याख्यातम्, क्षान्तिः क्षमा, आर्जवम्

जुता व च ज्ञानं विज्ञानम्, आस्तिक्यम् आस्तिकभावः श्रद्दधानता आगमार्थेषु, ब्रह्मकर्म ब्राह्मणजातेः कर्म स्वभावजम् -- यत् उक्तं स्वभावप्रभवैर्गुणैः प्रविभक्तानि इति तदेवोक्तं

स्वभावजम् इति।।

।।१८.४३।। --

शौर्यं शूरस्य भावः, तेजः प्रागल्भ्यम्, धृतिः धारणम्, सर्वावस्थासु अनवसादः भवति यया धृत्या उत्तम्भितस्य, दाक्ष्यं दक्षस्य भावः, सहसा प्रत्युत्पन्नेषु कार्येषु अव्यामोहेन प्रवृत्तिः, युद्धे चापि अपलायनम् अपराङ्मुखीभावः शत्रुभ्यः, दानं देयद्रव्येषु मुक्तहस्तता, ईश्वरभावश्च ईश्वरस्य भावः, प्रभुशक्तिप्रकटीकरणम् ईशितव्यान् प्रति, क्षात्रं कर्म क्षत्रियजातेः विहितं कर्म क्षात्रं कर्म स्वभावजम्।।

।।१८.४४।। --

कृषिगौरक्ष्यवाणिज्यं कृषिश्च गौरक्ष्यं च वाणिज्यं च कृषिगौरक्ष्यवाणिज्यम्, कृषिः भूमेः विलेखनम्, गौरक्ष्यं गाः रक्षतीति गोरक्षः तस्य भावः गौरक्ष्यम्, पाशुपाल्यम् इत्यर्थः, वाणिज्यं वणिक्कर्म क्रयविक्रयादिलक्षणं वैश्यकर्म वैश्यजातेः कर्म वैश्यकर्म स्वभावजम्। परिचर्यात्मकं शुश्रूषास्वभावं कर्म शूद्रस्यापि स्वभावजम्।।

एतेषां जातिविहितानां कर्मणां सम्यगनुष्ठितानां स्वर्गप्राप्तिः फलं स्वभावतः, 'वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण
विशिष्टदेशजातिकुलधर्मायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते' इत्यादिस्मृतिभ्यः (आ. स्मृ. २।२।२।३); पुराणे च वर्णिनाम् आश्रमिणां च लोकफलभेदविशेषस्मरणात्। कारणान्तरात्तु इदं वक्ष्यमाणं फलम् --

।।१८.४५।। --

स्वे स्वे यथोक्तलक्षणभेदे कर्मणि अभिरतः तत्परः संसिद्धिं स्वकर्मानुष्ठानात् अशुद्धिक्षये सति कायेन्द्रियाणां ज्ञाननिष्ठायोग्यतालक्षणां संसिद्धिं लभते प्राप्नोति नरः अधिकृतः पुरुषः; किं स्वकर्मानुष्ठानत व साक्षात् संसिद्धिः? न; कथं तर्हि? स्वकर्मनिरतः सिद्धिं यथा येन प्रकारेण विन्दति, तत् शृणु।।

।।१८.४६।। --

यतः यस्मात् प्रवृत्तिः उत्पत्तिः चेष्टा वा यस्मात् अन्तर्यामिणः ईश्वरात् भूतानां प्राणिनां स्यात्, येन ईश्वरेण सर्वम् इदं ततं जगत् व्याप्तम् स्वकर्मणा पूर्वोक्तेन प्रतिवर्णं तम् ईश्वरम् अभ्यर्च्य पूजयित्वा आराध्य केवलं ज्ञाननिष्ठायोग्यतालक्षणां सिद्धिं विन्दति मानवः मनुष्यः।।

यतः वम्, अतः --

।।१८.४७।। --

श्रेयान् प्रशस्यतरः स्वो धर्मः स्वधर्मः, विगुणोऽपि इति अपिशब्दो द्रष्टव्यः, परधर्मात्। स्वभावनियतं स्वभावेन नियतम्, यदुक्तं स्वभावजमिति, तदेवोक्तं स्वभावनियतम् इति; यथा विषजातस्य कृमेः विषं न दोषकरम्, तथा स्वभावनियतं कर्म कुर्वन् न आप्नोति किल्बिषं पापम्।।

स्वभावनियतं कर्म कुर्वाणो विषजः इव कृमिः किल्बिषं न आप्नोतीति उक्तम्; परधर्मश्च भयावहः इति, अनात्मज्ञश्च 'न हि कश्चित्क्षणमपि अकर्मकृत्तिष्ठति (गीता ३।५)' इति। अतः --

।।१८.४८।। --

सहजं सह जन्मनैव उत्पन्नम्। किं तत्? कर्म कौन्तेय सदोषमपि त्रिगुणात्मकत्वात् न त्यजेत्। सर्वारम्भाः आरभ्यन्त इति आरम्भाः, सर्वकर्माणि इत्येतत्; प्रकरणात् ये केचित् आरम्भाः स्वधर्माः परधर्माश्च, ते सर्वे हि यस्मात् -- त्रिगुणात्मकत्वम् अत्र हेतुः -- त्रिगुणात्मकत्वात् दोषेण धूमेन सहजेन अग्निरिव, आवृताः। सहजस्य कर्मणः स्वधर्माख्यस्य परित्यागेन परधर्मानुष्ठानेऽपि दोषात् नैव मुच्यते; भयावहश्च परधर्मः। न च शक्यते अशेषतः त्यक्तुम् अज्ञेन कर्म यतः, तस्मात् न त्यजेत् इत्यर्थः।।

किम् अशेषतः त्यक्तुम् अशक्यं कर्म इति न त्यजेत्? किं वा सहजस्य कर्मणः त्यागे दोषो भवतीति? किं च अतः? यदि

तावत् अशेषतः त्यक्तुम् अशक्यम् इति न त्याज्यं सहजं कर्म, वं तर्हि अशेषतः त्यागे गुण व स्यादिति सिद्धं भवति। सत्यम् वम्; अशेषतः त्याग व न उपपद्यते इति चेत्, किं नित्यप्रचलितात्मकः पुरुषः, यथा सांख्यानां गुणाः? किं वा क्रियैव कारकम्, यथा बौद्धानां स्कन्धाः क्षणप्रध्वंसिनः? उभयथापि कर्मणः अशेषतः त्यागः न संभवति। अथ तृतीयोऽपि पक्षः -- यदा करोति तदा सक्रियं वस्तु। यदा न करोति, तदा निष्क्रियं तदेव। तत्र वं सति शक्यं कर्म अशेषतः त्यक्तुम्। अयं तु अस्मिन् तृतीये पक्षे विशेषः -- न नित्यप्रचलितं वस्तु, नापि क्रियैव कारकम्। किं तर्हि? व्यवस्थिते द्रव्ये अविद्यमाना क्रिया उत्पद्यते, विद्यमाना च विनश्यति। शुद्धं तत् द्रव्यं शक्तिमत् अवतिष्ठते। इति वम् आहुः काणादाः। तदेव च कारकम् इति। अस्मिन् पक्षे को दोषः इति। अयमेव तु दोषः -- यतस्तु अभागवतं मतम् इदम्। कथं

ज्ञायते? यतः आह भगवान् 'नासतो विद्यते भावः (गीता २।१६)' इत्यादि। काणादानां हि असतः भावः, सतश्च अभावः, इति इदं मतम् अभागवतम्। अभागवतमपि न्यायवच्चेत् को दोषः इति चेत्, उच्यते -- दोषवत्तु इदम्, सर्वप्रमाणविरोधात्। कथम्? यदि तावत् द्व्यणुकादि द्रव्यं प्राक् उत्पत्तेः अत्यन्तमेव असत्, उत्पन्नं च स्थितं कञ्चित् कालं पुनः अत्यन्तमेव असत्त्वम् आपद्यते, तथा च सति असदेव सत् जायते, सदेव असत्त्वम्, आपद्यते, अभावः भावो भवति, भावश्च अभावो भवति; तत्र अभावः जायमानः प्राक् उत्पत्तेः शशविषाणकल्पः समवाय्यसमवायिनिमित्ताख्यं कारणम् अपेक्ष्य जायते इति। न च वम्, अभावः उत्पद्यते, कारणं च अपेक्षते इति शक्यं वक्तुम्, असतां शशविषाणादीनाम् अदर्शनात्। भावात्मकाश्चेत् घटादयः उत्पद्यमानाः, किञ्चित् अभिव्यक्तिमात्रेकारणम् अपेक्ष्य उत्पद्यन्ते इति शक्यं प्रतिपत्तुम्। किं च, असतश्च सतश्च सद्भावे असद्भावे न क्वचित् प्रमाणप्रमेयव्यवहारेषु विश्वासः कस्यचित् स्यात्, 'सत् सदेव असत् असदेव' इति निश्चयानुपपत्तेः।

किं च, उत्पद्यते इति द्व्यणुकादेः द्रव्यस्य स्वकारणसत्तासंबन्धम् आहुः। प्राक् उत्पत्तेश्च असत्, पश्चात् कारणव्यापारम् अपेक्ष्य स्वकारणैः परमाणुभिः सत्तया च समवायलक्षणेन संबन्धेन संबध्यते। संबद्धं सत् कारणसमवेतं सत् भवति। तत्र वक्तव्यं कथम् असतः स्वं कारणं भवेत् संबन्धो वा केनचित् स्यात्? न हि वन्ध्यापुत्रस्य स्वं कारणं संबन्धो वा केनचित् प्रमाणतः कल्पयितुं शक्यते।।

ननु नैवं वैशेषिकैः अभावस्य संबन्धः कल्प्यते। द्व्यणुकादीनां हि द्रव्याणां स्वकारणसमवायलक्षणः संबन्धः सतामेव उच्यते इति। न; संबन्धात् प्राक् सत्त्वानभ्युपगमात्। न हि वैशेषिकैः कुलालदण्डचक्रादिव्यापारात् प्राक् घटादीनाम् अस्तित्वम् इष्यते। न च मृद व घटाद्याकारप्राप्तिम् इच्छन्ति। ततश्च असत व संबन्धः पारिशेष्यात् इष्टो भवति।।

ननु असतोऽपि समवायलक्षणः संबन्धः न विरुद्धः। न; वन्ध्यापुत्रादीनाम् अदर्शनात्। घटादेरेव प्रागभावस्य स्वकारणसंबन्धो भवति न वन्ध्यापुत्रादेः, अभावस्य तुल्यत्वेऽपि इति विशेषः

अभावस्य वक्तव्यः। कस्य अभावः, द्वयोः अभावः, सर्वस्य अभावः, प्रागभावः, प्रध्वंसाभावः, इतरेतराभावः, अत्यन्ताभावः इति लक्षणतो न केनचित् विशेषो दर्शयितुं शक्यः। असति च विशेषे घटस्य प्रागभावः व कुलालदिभिः घटभावम् आपद्यते संबध्यते च भावेन कपालाख्येन, संबद्धश्च सर्वव्यवहारयोग्यश्च भवति, न तु घटस्यैव प्रध्वंसाभावः अभावत्वे सत्यपि, इति प्रध्वंसाद्यभावानां न क्वचित् व्यवहारयोग्यत्वम्, प्रागभावस्यैव द्व्यणुकादिद्रव्याख्यस्य उत्पत्त्यादिव्यवहारार्हत्वम्, इत्येतत् असमञ्जसम्; अभावत्वाविशेषात् अत्यन्तप्रध्वंसाभावयोरिव।।

ननु नैव अस्माभिः प्रागभावस्य भावापत्तिः उच्यते। भावस्यैव तर्हि भावापत्तिः; यथा घटस्य घटापत्तिः, पटस्य वा पटापत्तिः। तदपि अभावस्य भावापत्तिवदेव प्रमाणविरुद्धम्। सांख्यस्यापि यः परिणामपक्षः सोऽपि अपूर्वधर्मोत्पत्तिविनाशाङ्गीकरणात् वैशेषिकपक्षात् न विशिष्यते। अभिव्यक्तितिरोभावाङ्गीकरणेऽपि अभिव्यक्तितिरोभावयोः विद्यमानत्वाविद्यमानत्वनिरूपणे पूर्ववदेव प्रमाणविरोधः। तेन कारणस्यैव संस्थानम् उत्पत्त्यादि इत्येतदपि प्रत्युक्तम्।।

पारिशेष्यात् सत् कमेव वस्तु अविद्यया उत्पत्तिविनाशादिधर्मैः अनेकधा नटवत् विकल्प्यते इति। इदं भागवतं मतम् उक्तम् 'नासतो विद्यते भावः (गीता ३।१६)' इत्यस्मिन् श्लोके, सत्प्रत्ययस्य अव्यभिचारात्, व्यभिचाराच्च इतरेषामिति।।

कथं तर्हि आत्मनः अविक्रियत्वे अशेषतः कर्मणः त्यागः न उपपद्यते इति? यदि वस्तुभूताः गुणाः, यदि वा अविद्याकल्पिताः, तद्धर्मः कर्म, तदा आत्मनि अविद्याध्यारोपितमेव इति अविद्वान् 'न हि कश्चित् क्षणमपि अशेषतः त्यक्तुं शक्नोति' इति उक्तम्। विद्वांस्तु पुनः विद्यया अविद्यायां निवृत्तायां शक्नोत्येव अशेषतः कर्म परित्यक्तुम्, अविद्याध्यारोपितस्य शेषानुपपत्तेः। न हि तैमिरिकदृष्ट्या अध्यारोपितस्य द्विचन्द्रादेः तिमिरापगमेऽपि शेषः अवतिष्ठते। वं च सति इदं वचनम् उपपन्नम् 'सर्वकर्माणि मनसा (गीता ५।१३)' इत्यादि, 'स्वे स्वे कर्मण्यभिरतः संसिद्धिं

लभते नरः (गीता १८।४५)' 'स्वकर्मणा तमभ्यर्च्य सिद्धिं

विन्दति मानवः (गीता १८।४६)' इति च।।

या कर्मजा सिद्धिः उक्ता ज्ञाननिष्ठायोग्यतालक्षणा, तस्याः फलभूता नैष्कर्म्यसिद्धिः ज्ञाननिष्ठालक्षणा च वक्तव्येति श्लोकः आरभ्यते --

।।१८.४९।। --

असक्तबुद्धिः असक्ता सङ्गरहिता बुद्धिः अन्तःकरणं यस्य सः असक्तबुद्धिः सर्वत्र पुत्रदारादिषु आसक्तिनिमित्तेषु, जितात्मा जितः वशीकृतः आत्मा अन्तःकरणं यस्य सः जितात्मा, विगतस्पृहः विगता स्पृहा तृष्णा देहजीवितभोगेषु यस्मात् सः विगतस्पृहः, यः वंभूतः आत्मज्ञः सः नैष्कर्म्यसिद्धिं निर्गतानि कर्माणि यस्मात् निष्क्रियब्रह्मात्मसंबोधात् सः निष्कर्मा तस्य भावः नैष्कर्म्यम्, नैष्कर्म्यं च तत् सिद्धिश्च सा नैष्कर्म्यसिद्धिः, निष्कर्मत्वस्य वा निष्क्रियात्मरूपावस्थानलक्षणस्य सिद्धिः निष्पत्तिः, तां नैष्कर्म्यसिद्धिं परमां प्रकृष्टां कर्मजसिद्धिविलक्षणां सद्योमुक्त्यवस्थानरूपां संन्यासेन सम्यग्दर्शनेन तत्पूर्वकेण वा सर्वकर्मसंन्यासेन अधिगच्छति प्राप्नोति। तथा च उक्तम् -- 'सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नास्ते (गीता ५।१३)' इति।।

पूर्वोक्तेन स्वकर्मानुष्ठानेन ईश्वराभ्यर्चनरूपेण जनितां प्रागुक्तलक्षणां सिद्धिं प्राप्तस्य उत्पन्नात्मविवेकज्ञानस्य केवलात्मज्ञाननिष्ठारूपा नैष्कर्म्यलक्षणा सिद्धिः येन क्रमेण भवति, तत् वक्तव्यमिति आह --

।।१८.५०।। --

सिद्धिं प्राप्तः स्वकर्मणा ईश्वरं समभ्यर्च्य तत्प्रसादजां कायेन्द्रियाणां ज्ञाननिष्ठायोग्यतालक्षणां सिद्धिं प्राप्तः -- सिद्धिं प्राप्तः इति तदनुवादः उत्तरार्थः। किं तत् उत्तरम्, यदर्थः अनुवादः इति, उच्यते -- यथा येन प्रकारेण ज्ञाननिष्ठारूपेण ब्रह्म परमात्मानम् आप्नोति, तथा तं प्रकारं ज्ञाननिष्ठाप्राप्तिक्रमं मे मम वचनात् निबोध त्वं निश्चयेन अवधारय इत्येतत्। किं विस्तरेण? न इति आह -- समासेनैव संक्षेपेणैव हे कौन्तेय, यथा ब्रह्म प्राप्नोति तथा निबोधेति। अनेन या प्रतिज्ञाता ब्रह्मप्राप्तिः, ताम् इदंतया दर्शयितुम् आह -- निष्ठा ज्ञानस्य या परा इति। निष्ठा पर्यवसानं परिसमाप्तिः इत्येतत्। कस्य? ब्रह्मज्ञानस्य या परा। कीदृशी सा? यादृशम् आत्मज्ञानम्। कीदृक् तत्? यादृशः आत्मा। कीदृशः सः? यादृशो भगवता उक्तः, उपनिषद्वाक्यैश्च न्यायतश्च।।

ननु विषयाकारं ज्ञानम्। न ज्ञानविषयः, नापि आकारवान् आत्मा इष्यते क्वचित्। ननु 'आदित्यवर्णम्' 'भारूपः' 'स्वयंज्योतिः' इति आकारवत्त्वम् आत्मनः श्रूयते। न; तमोरूपत्वप्रतिषेधार्थत्वात् तेषां वाक्यानाम् -- द्रव्यगुणाद्याकारप्रतिषेधे आत्मनः तमोरूपत्वे प्राप्ते तत्प्रतिषेधार्थानि 'आदित्यवर्णम् (गीता ८।९)' इत्यादीनि वाक्यानि। 'अरूपम्' इति च विशेषतः रूपप्रतिषेधात्। अविषयत्वाच्च -- 'न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् (श्वे० उ० ४।२०)' 'अशब्दमस्पर्शम् (क० उ० १।३।१५)' इत्यादैः। तस्मात् आत्माकारं ज्ञानम् इति अनुपपन्नम्।।

कथं तर्हि आत्मनः ज्ञानम्? सर्वं हि यद्विषयं यत् ज्ञानम्, तत् तदाकारं भवति। निराकारश्च आत्मा इत्युक्तम्। ज्ञानात्मनोश्च उभयोः निराकारत्वे कथं तद्भावनानिष्ठा इति? न; अत्यन्तनिर्मलत्वातिस्वच्छत्वातिसूक्ष्मत्वोपपत्तेः आत्मनः। बुद्धेश्च आत्मवत् नैर्मल्याद्युपपत्तेः आत्मचैतन्याकाराभासत्वोपपत्तिः। बुद्ध्याभासं मनः, तदाभासानि इन्द्रियाणि, इन्द्रियाभासश्च देहः। अतः लौकिकैः देहमात्रे व आत्मदृष्टिः क्रियते।।

देहचैतन्यवादिनश्च लोकायतिकाः 'चैतन्यविशिष्टः कायः पुरुषः' इत्याहुः। तथा अन्ये इन्द्रियचैतन्यवादिनः, अन्ये मनश्चैतन्यवादिनः, अन्ये बुद्धिचैतन्यवादिनः। ततोऽपि आन्तरम् अव्यक्तम् अव्याकृताख्यम् अविद्यावस्थम् आत्मत्वेन प्रतिपन्नाः केचित्। सर्वत्र बुद्ध्यादिदेहान्ते आत्मचैतन्याभासता आत्मभ्रान्तिकारणम् इत्यतश्च आत्मविषयं ज्ञानं न विधातव्यम्। किं तर्हि? नामरूपाद्यनात्माध्यारोपणनिवृत्तिरेव कार्या, आत्मचैतन्यविज्ञानं कार्यम्, अविद्याध्यारोपितसर्वपदार्थाकारैः विशिष्टतया दृश्यमानत्वात् इति। अत व हि विज्ञानवादिनो बौद्धाः विज्ञानव्यतिरेकेण वस्त्वेव नास्तीति प्रतिपन्नाः, प्रमाणान्तरनिरपेक्षतां च स्वसंविदि तत्वाभ्युपगमेन। तस्मात् अविद्याध्यारोपितनिराकरणमात्रं ब्रह्मणि कर्तव्यम्, न तु ब्रह्मविज्ञाने यत्नः, अत्यन्तप्रसिद्धत्वात्। अविद्याकल्पितनामरूपविशेषाकारापहृतबुद्धीनाम् अत्यन्तप्रसिद्धं सुविज्ञेयम् आसन्नतरम् आत्मभूतमपि, अप्रसिद्धं दुर्विज्ञेयम् अतिदूरम् अन्यदिव च प्रतिभाति अविवेकिनाम्। बाह्याकारनिवृत्तबुद्धीनां तु लब्धगुर्वात्मप्रसादानां न अतः परं सुखं सुप्रसिद्धं सुविज्ञेयं स्वासन्नतरम् अस्ति। तथा चोक्तम् -- 'प्रत्यक्षावगमं धर्म्यम् (गीता ९।२)' इत्यादि।।

केचित्तु पण्डितंमन्याः 'निराकारत्वात् आत्मवस्तु न उपैति बुद्धिः। अतः दुःसाध्या सम्यग्ज्ञाननिष्ठा' इत्याहुः। सत्यम्; वं गुरुसंप्रदायरहितानाम् अश्रुतवेदान्तानाम् अत्यन्तबहिर्विषयासक्तबुद्धीनां सम्यक्प्रमाणेषु अकृतश्रमाणाम्। तद्विपरीतानां तु

लौकिकग्राह्यग्राहकद्वैतवस्तुनि सद्बुद्धिः नितरां दुःसंपाधा, आत्मचैतन्यव्यतिरेकेण वस्त्वन्तरस्य अनुपलब्धेः, यथा च 'एतत् वमेव, न अन्यथा' इति अवोचाम; उक्तं च भगवता 'यस्या जाग्रति भूतानि सा निशा पश्यतो मुनेः (गीता २।६९)' इति। तस्मात् बाह्याकारभेदबुद्धिनिवृत्तिरेव आत्मस्वरूपावलम्बनकारणम्। न हि आत्मा नाम कस्यचित् कदाचित् अप्रसिद्धः प्राप्यः हेयः उपादेयो वा; अप्रसिद्धे हि तस्मिन् आत्मनि स्वार्थाः सर्वाः प्रवृत्तयः व्यर्थाः प्रसज्येरन्। न च देहाद्यचेतनार्थत्वं शक्यं कल्पयितुम्। न च सुखार्थं सुखम्, दुःखार्थं दुःखम्।

आत्मावगत्यवसानार्थत्वाच्च सर्वव्यवहारस्य। तस्मात् यथा स्वदेहस्य परिच्छेदाय न प्रमाणान्तरापेक्षा, ततोऽपि आत्मनः अन्तरतमत्वात् तदवगतिं प्रति न प्रमाणान्तरापेक्षा; इति आत्मज्ञाननिष्ठा विवेकिनां सुप्रसिद्धा इति सिद्धम्।।

येषामपि निराकारं ज्ञानम् अप्रत्यक्षम्, तेषामपि ज्ञानवशेनैव ज्ञेयावगतिरिति ज्ञानम् अत्यन्तप्रसिद्धं सुखादिवदेव इति अभ्युपगन्तव्यम्। जिज्ञासानुपपत्तेश्च -- अप्रसिद्धं चेत् ज्ञानम्, ज्ञेयवत् जिज्ञास्येत। यथा ज्ञेयं घटादिलक्षणं ज्ञानेन ज्ञाता व्याप्तुम् इच्छति, तथा ज्ञानमपि ज्ञानान्तरेण ज्ञातव्यम् आप्तुम् इच्छेत्। न तत् अस्ति। अतः अत्यन्तप्रसिद्धं ज्ञानम्, ज्ञातापि अत व

प्रसिद्धः इति। तस्मात् ज्ञाने यत्नो न कर्तव्यः, किं तु अनात्मनि आत्मबुद्धिनिवृत्तावेव। तस्मात् ज्ञाननिष्ठा सुसंपाद्या।।

सा इयं ज्ञानस्य परा निष्ठा उच्यते, कथं कार्या इति --

।।१८.५१।। --

बुद्ध्या अध्यवसायलक्षणया विशुद्धया मायारहितया युक्तः संपन्नः, धृत्या धैर्येण आत्मानं कार्यकरणसंघातं नियम्य च नियमनं कृत्वा वशीकृत्य, शब्दादीन् शब्दः आदिः येषां तान् विषयान् त्यक्त्वा, सामर्थ्यात् शरीरस्थितिमात्रहेतुभूतान् केवलान् मुक्त्वा ततः अधिकान् सुखार्थान् त्यक्त्वा इत्यर्थः, शरीरस्थित्यर्थत्वेन प्राप्तेषु रागद्वेषौ व्युदस्य च परित्यज्य च।।

ततः --

।।१८.५२।। --

विविक्तसेवी अरण्यनदीपुलिनगिरिगुहादीन् विविक्तान् देशान् सेवितुं शीलम् अस्य इति विविक्तसेवी, लघ्वाशी लघ्वशनशीलः -- विविक्तसेवालघ्वशनयोः निद्रादिदोषनिवर्तकत्वेन चित्तप्रसादहेतुत्वात् ग्रहणम्; यतवाक्कायमानसः वाक् च कायश्च मानसं च यतानि संयतानि यस्य ज्ञाननिष्ठस्य सः ज्ञाननिष्ठः यतिः यतवाक्कायमानसः स्यात्। वम् उपरतसर्वकरणः सन् ध्यानयोगपरः ध्यानम् आत्मस्वरूपचिन्तनम्, योगः आत्मविषये काग्रीकरणम् तौ परत्वेन कर्तव्यौ यस्य सः ध्यानयोगपरः नित्यं नित्यग्रहणं मन्त्रजपाद्यन्यकर्तव्याभावप्रदर्शनार्थम्, वैराग्यं विरागस्य भावः दृष्टादृष्टेषु विषयेषु वैतृष्ण्यं समुपाश्रितः सम्यक् उपाश्रितः नित्यमेव इत्यर्थः।।

किं च --

।।१८.५३।। --

अहंकारम् अहंकरणम् अहंकारः देहादिषु तम्, बलं सामर्थ्यं कामरागसंयुक्तम् -- न इतरत् शरीरादिसामर्थ्यं स्वाभाविकत्वेन तत्त्यागस्य अशक्यत्वात् -- दर्पं दर्पो नाम हर्षानन्तरभावी धर्मातिक्रमहेतुः 'हृष्टो दृप्यति दृप्तो धर्ममतिक्रामति' इति स्मरणात्; तं च, कामम् इच्छां क्रोधं द्वेषं परिग्रहम् इन्द्रियमनोगतदोषपरित्यागेऽपि शरीरधारणप्रसङ्गेन धर्मानुष्ठाननिमित्तेन वा बाह्यः परिग्रहः, प्राप्तः तं च विमुच्य परित्यज्य, परमहंसपरिव्राजको भूत्वा, देहजीवनमात्रेऽपि निर्गतममभावः निर्ममः, अत व शान्तः उपरतः, यः संहृतहर्षायासः यतिः ज्ञाननिष्ठः ब्रह्मभूयाय ब्रह्मभवनाय कल्पते समर्थो भवति।।

अनेन क्रमेण --

।।१८.५४।। --

ब्रह्मभूतः ब्रह्मप्राप्तः प्रसन्नात्मा लब्धाध्यात्मप्रसादस्वभावः न शोचति, किञ्चित् अर्थवैकल्यम्, आत्मनः वैगुण्यं वा उद्दिश्य न शोचति न संतप्यते; न काङ्क्षति, न हि अप्राप्तविषयाकाङ्क्षा ब्रह्मविदः उपपद्यते; अतः ब्रह्मभूतस्य अयं स्वभावः अनूद्यते -- न शोचति न काङ्क्षति इति। 'न हृष्यति' इति वा पाठान्तरम्। समः सर्वेषु भूतेषु, आत्मौपम्येन सर्वभूतेषु सुखं दुःखं वा सममेव पश्यति इत्यर्थः। न आत्मसमदर्शनम् इह, तस्य वक्ष्यमाणत्वात् 'भक्त्या मामभिजानाति (गीता १८।५५)' इति। वंभूतः ज्ञाननिष्ठः, मद्भक्तिं मयि परमेश्वरे भक्तिं भजनं पराम् उत्तमां ज्ञानलक्षणां चतुर्थीं लभते, 'चतुर्विधा भजन्ते माम् (गीता ७।१६)' इति हि उक्तम्।।

ततः ज्ञानलक्षणया --

।।१८.५५।। --

भक्त्या माम् अभिजानाति यावान् अहम् उपाधिकृतविस्तरभेदः, यश्च अहम् अस्मि विध्वस्तसर्वोपाधिभेदः उत्तमः पुरुषः आकाशकल्पः, तं माम् अद्वैतं चैतन्यमात्रैकरसम् अजरम् अभयम् अनिधनं तत्त्वतः अभिजानाति। ततः माम् वं तत्त्वतः ज्ञात्वा विशते तदनन्तरं मामेव ज्ञानानन्तरम्। नात्र ज्ञानप्रवेशक्रिये भिन्ने विवक्षिते 'ज्ञात्वा विशते तदनन्तरम्' इति। किं तर्हि? फलान्तराभावात् ज्ञानमात्रमेव, 'क्षेत्रज्ञं चापि मां विद्धि (गीता १३।२)' इति उक्तत्वात्।।

ननु विरुद्धम् इदम् उक्तम् 'ज्ञानस्य या परा निष्ठा तया माम् अभिजानाति (गीता १८।५०)' इति। कथं विरुद्धम् इति चेत्, उच्यते -- यदैव यस्मिन् विषये ज्ञानम् उत्पद्यते ज्ञातुः, तदैव तं विषयम् अभिजानाति ज्ञाता इति न ज्ञाननिष्ठां ज्ञानावृत्तिलक्षणाम् अपेक्षते इति; अतश्च ज्ञानेन

न अभिजानाति, ज्ञानावृत्त्या तु ज्ञाननिष्ठया अभिजानातीति। नैष दोषः; ज्ञानस्य स्वात्मोत्पत्तिपरिपाकहेतुयुक्तस्य प्रतिपक्षविहीनस्य यत् आत्मानुभवनिश्चयावसानत्वं तस्य निष्ठाशब्दाभिलापात्। शास्त्राचार्योपदेशेन ज्ञानोत्पत्तिहेतुं सहकारिकारणं बुद्धिविशुद्धत्वादि अमानित्वादिगुणं च अपेक्ष्य जनितस्य क्षेत्रज्ञपरमात्मैकत्वज्ञानस्य

कर्तृत्वादिकारकभेदबुद्धिनिबन्धनसर्वकर्मसंन्याससहितस्य स्वात्मानुभवनिश्चयरूपेण यत् अवस्थानम्, सा परा ज्ञाननिष्ठा इति उच्यते। सा इयं ज्ञाननिष्ठा आर्तादिभक्तित्रयापेक्षया परा चतुर्थी भक्तिरिति उक्ता। तया परया भक्त्या भगवन्तं तत्त्वतः अभिजानाति, यदनन्तरमेव ईश्वरक्षेत्रज्ञभेदबुद्धिः अशेषतः निवर्तते। अतः ज्ञाननिष्ठालक्षणतया भक्त्या माम् अभिजानातीति वचनं न विरुध्यते। अत्र च सर्वं निवृत्तिविधायि शास्त्रं वेदान्तेतिहासपुराणस्मृतिलक्षणं न्यायप्रसिद्धम् अर्थवत् भवति -- 'विदित्वा.... व्युत्थायाथ भिक्षाचर्यं चरन्ति (बृह० उ० ३।५।१)' 'तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः (ना० उ० २।७९)' 'न्यास वात्यरेचयत् (ना० उ० २।७८)' इति। 'संन्यासः कर्मणां न्यासः' 'वेदानिमं च लोकममुं च परित्यज्य (आप० ध० १।२३।१३)' 'त्यज धर्ममधर्मं च (महा० शा० ३२९।४०)' इत्यादि। इह च प्रदर्शितानि वाक्यानि। न च तेषां वाक्यानाम् आनर्थक्यं युक्तम्; न च अर्थवादत्वम् स्वप्रकरणस्थत्वात्, प्रत्यगात्माविक्रियस्वरूपनिष्ठत्वाच्च मोक्षस्य। न हि पूर्वसमुद्रं जिगिमिषोः प्रातिलोम्येन प्रत्यक्समुद्रजिगमिषुणा समानमार्गत्वं संभवति। प्रत्यगात्मविषयप्रत्ययसंतानकरणाभिनिवेशश्च ज्ञाननिष्ठा; सा च प्रत्यक्समुद्रगमनवत् कर्मणा सहभावित्वेन विरुध्यते। पर्वतसर्षपयोरिव अन्तरवान् विरोधः प्रमाणविदां निश्चितः। तस्मात् सर्वकर्मसंन्यासेनैव ज्ञाननिष्ठा कार्या इति सिद्धम्।।

स्वकर्मणा भगवतः अभ्यर्चनभक्तियोगस्य सिद्धिप्राप्तिः फलं ज्ञाननिष्ठायोग्यता, यन्निमित्ता ज्ञाननिष्ठा मोक्षफलावसाना सः भगवद्भक्तियोगः अधुना स्तूयते शास्त्रार्थोपसंहारप्रकरणे शास्त्रार्थनिश्चयदार्ढ्याय --

।।१८.५६।। --

सर्वकर्माण्यपि प्रतिषिद्धान्यपि सदा कुर्वाणः अनुतिष्ठन् मद्व्यपाश्रयः अहं वासुदेवः ईश्वरः व्यपाश्रयणं यस्य सः मद्व्यपाश्रयः मय्यर्पितसर्वभावः इत्यर्थः। सोऽपि मत्प्रसादात् मम ईश्वरस्य प्रसादात् अवाप्नोति शाश्वतं नित्यं वैष्णवं पदम् अव्ययम्।।

यस्मात् वम् --

।।१८.५७।। --

चेतसा विवेकबुद्ध्या सर्वकर्माणि दृष्टादृष्टार्थानि मयि ईश्वरे संन्यस्य 'यत् करोषि यदश्नासि (गीता ९।२७)' इति उक्तन्यायेन, मत्परः अहं वासुदेवः परो यस्य तव सः त्वं मत्परः सन् मय्यर्पितसर्वात्मभावः बुद्धियोगं समाहितबुद्धित्वं बुद्धियोगः तं बुद्धियोगम् उपाश्रित्य आश्रयः अनन्यशरणत्वं मच्चित्तः मय्येव चित्तं यस्य तव सः त्वं मच्चित्तः सततं सर्वदा भव।।

।।१८.५८।। --

मच्चितः सर्वदुर्गाणि सर्वाणि दुस्तराणि संसारहेतुजातानि मत्प्रसादात् तरिष्यसि अतिक्रमिष्यसि। अथ चेत् यदि त्वं मदुक्तम् अहंकारात् 'पण्डितः अहम्' इति न श्रोष्यसि न ग्रहीष्यसि, ततः त्वं विनङ्क्ष्यसि विनाशं गमिष्यसि।।

इदं च त्वया न मन्तव्यम् 'स्वतन्त्रः अहम्, किमर्थं परोक्तं करिष्यामि?' इति --

।।१८.५९।। --

यदि चेत् त्वम् अहंकारम् आश्रित्य न योत्स्ये इति न युद्धं करिष्यामि इति मन्यसे चिन्तयसि निश्चयं करोषि, मिथ्या षः व्यवसायः निश्चयः ते तव; यस्मात् प्रकृतिः क्षत्रियस्वभावः त्वां नियोक्ष्यति।।

यस्माच्च --

।।१८.६०।। --

स्वभावजेन शौर्यादिना यथोक्तेन कौन्तेय निबद्धः निश्चयेन बद्धः स्वेन आत्मीयेन कर्मणा कर्तुं न इच्छसि यत् कर्म, मोहात् अविवेकतः करिष्यसि अवशोऽपि परवश व तत् कर्म।।

यस्मात् --

।।१८.६१।। --

ईश्वरः ईशनशीलः नारायणः सर्वभूतानां सर्वप्राणिनां हृद्देशे हृदयदेशे अर्जुन शुक्लान्तरात्मस्वभावः विशुद्धान्तःकरणः -- 'अहश्च कृष्णमहरर्जुनं च (

. सं. ६।९।१)' इति दर्शनात् -- तिष्ठति स्थितिं लभते। तेषु सः कथं तिष्ठतीति, आह -- भ्रामयन् भ्रमणं कारयन् सर्वभूतानि यन्त्रारूढानि यन्त्राणि आरूढानि अधिष्ठितानि इव -- इति इवशब्दः अत्र द्रष्टव्यः -- यथा दारुकृतपुरुषादीनि यन्त्रारूढानि। मायया च्छद्मना भ्रामयन् तिष्ठति इति संबन्धः।।

।।१८.६२।। --

तमेव ईश्वरं शरणम् आश्रयं संसारार्तिहरणार्थं गच्छ आश्रय सर्वभावेन सर्वात्मना हे भारत। ततः तत्प्रसादात् ईश्वरानुग्रहात् परां प्रकृष्टां शान्तिम् उपरतिं स्थानं च मम विष्णोः परमं पदं प्राप्स्यसि शाश्वतं नित्यम्।।

।।१८.६३।। --

इति तत् ते तुभ्यं ज्ञानम् आख्यातं कथितं गुह्यात् गोप्यात् गुह्यतरम् अतिशयेन गुह्यं रहस्यम् इत्यर्थः, मया सर्वज्ञेन ईश्वरेण। विमृश्य विमर्शनम् आलोचनं कृत्वा तत् यथोक्तं शास्त्रम् अशेषेण समस्तं यथोक्तं च अर्थजातं यथा इच्छसि तथा कुरु।।

भूयोऽपि मया उच्यमानं श्रृणु --

।।१८.६४।। --

सर्वगुह्यतमं सर्वेभ्यः गुह्येभ्यः अत्यन्तगुह्यतमम् अत्यन्तरहस्यम्, उक्तमपि असकृत् भूयः पुनः श्रृणु मे मम परमं प्रकृष्टं वचः वाक्यम्। न भयात् नापि अर्थकारणाद्वा वक्ष्याभि; किं तर्हि? इष्टः प्रियः असि मे मम दृढम् अव्यभिचारेण इति कृत्वा ततः तेन कारणेन वक्ष्यामि कथयिष्यामि ते तव हितं परमं ज्ञानप्राप्तिसाधनम्, तद्धि सर्वहितानां हिततमम्।।

किं तत् इति, आह --

।।१८.६५।। --

मन्मनाः भव मच्चित्तः भव। मद्भक्तः भव मद्भजनो भव। मद्याजी मद्यजनशीलो भव। मां नमस्कुरु नमस्कारम् अपि ममैव कुरु। तत्र वं वर्तमानः वासुदेवे व समर्पितसाध्यसाधनप्रयोजनः मामेव ष्यसि आगमिष्यसि। सत्यं ते तव प्रतिजाने, सत्यां प्रतिज्ञां करोमि तस्मिन् वस्तुनि इत्यर्थः; यतः प्रियः असि मे। वं भगवतः सत्यप्रतिज्ञत्वं बुद्ध्वा भगवद्भक्तेः अवश्यंभावि मोक्षफलम् अवधार्य भगवच्छरणैकपरायणः भवेत् इति वाक्यार्थः।।

कर्मयोगनिष्ठायाः परमरहस्यम् ईश्वरशरणताम् उपसंहृत्य, अथ इदानीं कर्मयोगनिष्ठाफलं सम्यग्दर्शनं सर्ववेदान्तसारविहितं वक्तव्यमिति आह --

।।१८.६६।। --

सर्वधर्मान् सर्वे च ते धर्माश्च सर्वधर्माः तान् -- धर्मशब्देन अत्र अधर्मोऽपि गृह्यते, नैष्कर्म्यस्य विवक्षितत्वात्, 'नाविरतो दुश्चरितात् (क० उ० १।२।२४)' 'त्यज धर्ममधर्मं च (महा० शान्ति० ३२९।४०)' इत्यादिश्रुतिस्मृतिभ्यः -- सर्वधर्मान् परित्यज्य संन्यस्य सर्वकर्माणि इत्येतत्। माम् कं सर्वात्मानं समं सर्वभूतस्थितम् ईश्वरम् अच्युतं गर्भजन्मजरामरणवर्जितम् 'अहमेव' इत्येवं शरणं व्रज, न मत्तः अन्यत् अस्ति इति अवधारय इत्यर्थः। अहं त्वा त्वाम् वं निश्चितबुद्धिं सर्वपापेभ्यः सर्वधर्माधर्मबन्धनरूपेभ्यः मोक्षयिष्यामि स्वात्मभावप्रकाशीकरणेन। उक्तं च 'नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता (गीता १०।११)' इति। अतः मा शुचः शोकं मा कार्षीः इत्यर्थः।।

अस्मिन्गीताशास्त्रे परमनिःश्रेयससाधनं निश्चितं किं ज्ञानम्, कर्म वा, आहोस्वित् उभयम्?

इति। कुतः संशयः? 'यज्ज्ञात्वामृतमश्नुते (गीता १३।१२)' 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् (गीता १८।५५)' इत्यादीनि वाक्यानि केवलाज्ज्ञानात् निःश्रेयसप्राप्तिं दर्शयन्ति। 'कर्मण्येवाधिकारस्ते (गीता २।४७)' 'कुरु कर्मैव (गीता ४।१५)' इत्येवमादीनि कर्मणामवश्यकर्तव्यतां दर्शयन्ति। वं ज्ञानकर्मणोः कर्तव्यत्वोपदेशात् समुच्चितयोरपि निःश्रेयसहेतुत्वं स्यात् इति भवेत् संशयः कस्यचित्। किं पुनरत्र मीमांसाफलम्? ननु तदेव -- षामन्यतमस्य परमनिःश्रेयससाधनत्वावधारणम्; अतः विस्तीर्णतरं मीमांस्यम् तत्।।

आत्मज्ञानस्य तु केवल्य निःश्रेयसहेतुत्वम्, भेदप्रत्ययंनिवर्तकत्वेन कैवल्यफलावसानत्वात्। क्रियाकारकफलभेदबुद्धिः अविद्यया आत्मनि नित्यप्रवृत्ता -- 'मम कर्म, अहं कर्तामुष्मै फलायेदं कर्म करिष्यामि' इति इयम् अविद्या अनादिकालप्रवृत्ता। अस्या अविद्यायाः निवर्तकम्, 'अयमहमस्मि केवलोऽकर्ता अक्रियोऽफलः; न मत्तोऽन्योऽस्ति कश्चित्' इत्येवंरूपम् आत्मविषयं ज्ञानम् उत्पद्यमानम्, कर्मप्रवृत्तिहेतुभूतायाः भेदबुद्धेः निवर्तकत्वात्। तु-शब्दः पक्षव्यावृत्त्यर्थः -- न केवलेभ्यः कर्मभ्यः, न च ज्ञानकर्मभ्यां समुच्चिताभ्यां निःश्रेयसप्राप्तिः इति पक्षद्वयं निवर्तयति। अकार्यत्वाच्च निःश्रेयसस्य कर्मसाधनत्वानुपपत्तिः। न हि नित्यं वस्तु कर्मणा ज्ञानेन वा क्रियते। केवलं ज्ञानमपि अनर्थकं तर्हि? न, अविद्यानिवर्तकत्वे सति दृष्टकैवल्यफलावसानत्वात्। अविद्यातमोनिवर्तकस्य ज्ञानस्य दृष्टं कैवल्यफलावसानत्वम्। रज्ज्वादिविषये सर्पाद्यज्ञानतमोनिवर्तकप्रदीपप्रकाशफलवत्। विनिवृत्तसर्पादिविकल्परज्जुकैवल्यावसानं हि प्रकाशफलम्; तथा ज्ञानम्। दृष्टार्थानां च च्छिदिक्रियाग्निमन्थनादीनां व्यापृतकर्त्रादिकारकाणां द्वैधीभावाग्निदर्शनादिफलात् अन्यफले कर्मान्तरे वा व्यापारानुपपत्तिः यथा, तथा दृष्टार्थायां ज्ञाननिष्ठाक्रियायां व्यापृतस्य ज्ञात्रादिकारकस्य आत्मकैवल्यफलात् कर्मान्तरे प्रवृत्तिः अनुपपन्ना इति न ज्ञाननिष्ठा कर्मसहिता

उपपद्यते। भुज्यग्निहोत्रादिक्रियावत्स्यात् इति चेत्, न; कैवल्यफले ज्ञाने क्रियाफलार्थित्वानुपपत्तेः। कैवल्यफले हि ज्ञाने प्राप्ते, सर्वतःसंप्लुतोदकफले कूपतटाकादिक्रियाफलार्थित्वाभाववत्, फलान्तरे तत्साधनभूतायां वा क्रियायाम्

अर्थित्वानुपपत्तिः। न हि राज्यप्राप्तिफले कर्मणि व्यापृतस्य क्षेत्रमात्रप्राप्तिफले व्यापारः उपपद्यते, तद्विषयं वा अर्थित्वम्। तस्मात् न कर्मणोऽस्ति निःश्रेयससाधनत्वम्। न च ज्ञानकर्मणोः समुच्चितयोः। नापि ज्ञानस्य कैवल्यफलस्य कर्मसाहाय्यापेक्षा, अविद्यानिवर्तकत्वेन विरोधात्। न हि तमः तमसः निवर्तकम्। अतः केवलमेव ज्ञानं निःश्रेयससाधनम् इति। न; नित्याकरणे प्रत्यवायप्राप्तेः, कैवल्यस्य च नित्यत्वात्। यत् तावत् केवलाज्ज्ञानात् कैवल्यप्राप्तिः इत्येतत्, तत् असत्; यतः नित्यानां कर्मणां श्रुत्युक्तानाम् अकरणे प्रत्यवायः नरकादिप्राप्तिलक्षणः स्यात्। ननु वं तर्हि कर्मभ्यो मोक्षो नास्ति इति अनिर्मोक्ष व। नैष दोषः; नित्यत्वात् मोक्षस्य। नित्यानां कर्मणाम् अनुष्ठानात् प्रत्यवायस्य अप्राप्तिः, प्रतिषिद्धस्य च अकरणात् अनिष्टशरीरानुपपत्तिः, काम्यानां च वर्जनात् इष्टशरीरानुपपत्तिः, वर्तमानशरीरारम्भकस्य च कर्मणः फलोपभोगक्षये पतिते अस्मिन् शरीरे देहान्तरोत्पत्तौ च कारणाभावात् आत्मनः रागादीनां च अकरणे स्वरूपावस्थानमेव कैवल्यमिति अयत्नसिद्धं कैवल्यम् इति। अतिक्रान्तानेकजन्मान्तरकृतस्य स्वर्गनरकादिप्राप्तिफलस्य अनारब्धकार्यस्य उपभोगानुपपत्तेः क्षयाभावः इति चेत्, न; नित्यकर्मानुष्ठानायासदुःखोपभोगस्य तत्फलोपभोगत्वोपपत्तेः। प्रायश्चित्तवद्वा पूर्वोपात्तदुरितक्षयार्थं नित्यं कर्म। आरब्धानां च कर्मणाम् उपभोगेनैव क्षीणत्वात् अपूर्वाणां च कर्मणाम् अनारम्भे अयत्नसिद्धं कैवल्यमिति। न; 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय (श्वे० उ० ३।८)' इति विद्याया अन्यः पन्थाः मोक्षाय न विद्यते इति श्रुतेः, चर्मवदाकाशवेष्टनासंभववत् अविदुषः मोक्षासंभवश्रुतेः, 'ज्ञानात्कैवल्यमाप्नोति' इति च पुराणस्मृतेः; अनारब्धफलानां पुण्यानां कर्मणां क्षयानुपपत्तेश्च। यथा पूर्वोपात्तानां दुरितानाम् अनारब्धफलानां संभवः, तथा पुण्यानाम् अनारब्धफलानां स्यात्संभवः। तेषां च देहान्तरम् अकृत्वा क्षयानुपपत्तौ मोक्षानुपपत्तिः। धर्माधर्महेतूनां च रागद्वेषमोहानाम् अन्यत्र आत्मज्ञानात् उच्छेदानुपपत्तेः धर्माधर्मोच्छेदानुपपत्तिः। नित्यानां च कर्मणां पुण्यफलत्वश्रुतेः, 'वर्णा आश्रमाश्च स्वकर्मनिष्ठाः (आ० स्मृ० २।२।२।३)' इत्यादिस्मृतेश्च कर्मक्षयानुपपत्तिः।।

ये तु आहुः -- नित्यानि कर्माणि दुःखरूपत्वात् पूर्वकृतदुरितकर्मणां फलमेव, न तु तेषां

स्वरूपव्यतिरेकेण अन्यत् फलम् अस्ति, अश्रुतत्वात्, जीवनादिनिमित्ते च विधानात् इति। न, अप्रवृत्तानां कर्मणां फलदानासंभवात्; दुःखफलविशेषानुपपत्तिश्च स्यात्। यदुक्तं पूर्वजन्मकृतदुरितानां कर्मणां फलं नित्यकर्मानुष्ठानायासदुःखं भुज्यत इति, तदसत्। न हि मरणकाले फलदानाय अनङ्कुरीभूतस्य कर्मणः फलम् अन्यकर्मारब्धे जन्मनि उपभुज्यते इति उपपत्तिः। अन्यथा स्वर्गफलोपभोगाय अग्निहोत्रादिकर्मारब्धे जन्मनि नरककर्मफलोपभोगानुपपत्तिः न स्यात्। तस्य दुरितस्य दुःखविशेषफलत्वानुपपत्तेश्च -- अनेकेषु हि दुरितेषु संभवत्सु भिन्नदुःखसाधनफलेषु नित्यकर्मानुष्ठानायासदुःखमात्रफलेषु कल्प्यमानेषु द्वन्द्वरोगादिबाधनं निर्निमित्तं न हि शक्यते कल्पयितुम्, नित्यकर्मानुष्ठानायासदुःखमेव पूर्वोपात्तदुरितफलं न शिरसा पाषाणवहनादिदुःखमिति। अप्रकृतं च इदम् उच्यते -- नित्यकर्मानुष्ठानायासदुःखं पूर्वकृतदुरितकर्मफलम् इति। कथम्? अप्रसूतफलस्य हि पूर्वकृतदुरितस्य क्षयः न उपपद्यत इति प्रकृतम्। तत्र प्रसूतफलस्य कर्मणः फलं नित्यकर्मानुष्ठानायासदुःखम् आह भवान्, न अप्रसूतफलस्येति। अथ सर्वमेव पूर्वकृतं दुरितं प्रसूतफलमेव इति मन्यते भवान्, ततः नित्यकर्मानुष्ठानायासदुःखमेव फलम् इति विशेषणम् अयुक्तम्। नित्यकर्मविध्यानर्थक्यप्रसङ्गश्च, उपभोगेनैव प्रसूतफलस्य दुरितकर्मणः क्षयोपपत्तेः। किं च, श्रुतस्य नित्यस्य कर्मणः दुःखं चेत् फलम्, नित्यकर्मानुष्ठानायासादेव तत् दृश्यते व्यायामादिवत्; तत् अन्यस्य इति कल्पनानुपपत्तिः। जीवनादिनिमित्ते च विधानात्,

नित्यानां कर्मणां प्रायश्चित्तवत्, पूर्वकृतदुरितफलत्वानुपपत्तिः। यस्मिन् पापकर्मणि निमित्ते यत् विहितं प्रायश्चित्तम् न तु तस्य पापस्य तत् फलम्। अथ तस्यैव पापस्य निमित्तस्य प्रायश्चित्तदुःखं फलम्, जीवनादिनिमित्तेऽपि नित्यकर्मानुष्ठानायासदुःखं जीवनादिनिमित्तस्यैव फलं प्रसज्येत, नित्यप्रायश्चित्तयोः नैमित्तिकत्वाविशेषात्। किं च अन्यत -- नित्यस्य काम्यस्य च अग्निहोत्रादेः अनुष्ठानायासदुःखस्य तुल्यत्वात् नित्यानुष्ठानायासदुःखमेव पूर्वकृतदुरितस्य फलम्, न तु काम्यानुष्ठानायासदुःखम् इति विशेषो नास्तीति तदपि पूर्वकृतदुरितफलं प्रसज्येत। तथा च सति नित्यानां फलाश्रवणात् तद्विधानान्यथानुपपत्तेश्च नित्यानुष्ठानायासदुःखं पूर्वकृतदुरितफलम् इति अर्थापत्तिकल्पना च अनुपपन्ना, वं विधानान्यथानुपपत्तेः

अनुष्ठानायासदुःखव्यतिरिक्तफलत्वानुमानाच्च नित्यानाम्। विरोधाच्च; विरुद्धं च इदम् उच्यते -- नित्यकर्मणि अनुष्ठीयमाने अन्यस्य कर्मणः फलं भुज्यते इति अभ्युपगम्यमाने स व उपभोगः नित्यस्य कर्मणः फलम् इति, नित्यस्य कर्मणः फलाभाव इति च विरुद्धम् उच्यते। किं च, काम्याग्निहोत्रादौ अनुष्ठीयमाने नित्यमपि अग्निहोत्रादि तन्त्रेणैव अनुष्ठितं भवतीति तदायासदुःखेनैव काम्याग्निहोत्रादिफलम् उपक्षीणं स्यात्, तत्तन्त्रत्वात्। अथ काम्याग्निहोत्रादिफलम् अन्यदेव स्वर्गादि, तदनुष्ठानायासदुःखमपि भिन्नं प्रसज्येत। न च तदस्ति, दृष्टविरोधात्; न हि काम्यानुष्ठानायासदुःखात् केवलनित्यानुष्ठानायासदुःखं भिन्नं दृश्यते। किं च अन्यत् -- अविहितमप्रतिषिद्धं च कर्म तत्कालफलम्, न तु शास्त्रचोदितं प्रतिषिद्धं वा तत्कालफलं भवेत्। तदा स्वर्गादिष्वपि अदृष्टफलाशासने उद्यमो न स्यात् -- अग्निहोत्रादीनामेव कर्मस्वरूपाविशेषे अनुष्ठानायासदुःखमात्रेण उपक्षयः नित्यानाम्; स्वर्गादिमहाफलत्वं काम्यानाम्, अङ्गेतिकर्तव्यताद्याधिक्ये तु असति, फलकामित्वमात्रेणेति न शक्यं कव्यापितुं। तस्माच्च न नित्यानां कर्मणाम् अदृष्टफलाभावः कदाचिदपि उपपद्यते। अतश्च अविद्यापूर्वकस्य कर्मणः विद्यैव शुभस्य अशुभस्य वा क्षयकारणम् अशेषतः, न नित्यकर्मानुष्ठानम्। अविद्याकामबीजं हि सर्वमेव कर्म। तथा च उपपादितमविद्वद्विषयं कर्म, विद्वद्विषया च सर्वकर्मसंन्यासपूर्विका ज्ञाननिष्ठा -- 'उभौ तौ न विजानीतः (गीता २।१९)' 'वेदाविनाशिनं नित्यम् (गीता २।२१)' 'ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् (गीता ३।३)' 'अज्ञानां कर्मसङ्गिनाम् (गीता ३।२६) ' 'तत्त्ववित्तु महाबाहो.... गुणा गुणेषु वर्तन्ते इति मत्वा न सज्जते (गीता ३।२८)' 'सर्वकर्माणि मनसा संन्यस्यास्ते (गीता ५।१३)' 'नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित् ', अर्थात् अज्ञः करोमि इति; आरुरुक्षोः कर्म कारणम्, आरूढस्य योगस्थस्य शम व कारणम्; उदाराः त्रयोऽपि अज्ञाः, 'ज्ञानी त्वात्मैव मे मतम् (गीता ७।१८)' 'अज्ञाः कर्मिणः गतागतं कामकामाः लभन्ते'; अनन्याश्चिन्तयन्तो मां नित्ययुक्ताः यथोक्तम् आत्मानम् आकाशकल्पम् उपासते; 'ददामि बुद्धियोगं तं येन मामुपयान्ति ते (गीता १०।१०)', अर्थात् न कर्मिणः अज्ञाः उपयान्ति। भगवत्कर्मकारिणः ये युक्ततमा अपि कर्मिणः अज्ञाः, ते उत्तरोत्तरहीनफलत्यागावसानसाधनाः; अनिर्देश्याक्षरोपासकास्तु 'अद्वेष्टा सर्वभूतानाम् (गीता १२।१३)' इति आध्यायपरिसमाप्ति उक्तसाधनाः क्षेत्राध्यायाद्यध्यायत्रयोक्तज्ञानसाधनाश्च।

अधिष्ठानादिपञ्चकहेतुकसर्वकर्मसंन्यासिनां आत्मैकत्वाकर्तृत्वज्ञानवतां परस्यां ज्ञाननिष्ठायां वर्तमानानां भगवत्तत्त्वविदाम्

अनिष्टादिकर्मफलत्रयं परमहंसपरिव्राजकानामेव लब्धभगवत्स्वरूपात्मैकत्वशरणानां न भवति; भवत्येव अन्येषामज्ञानां कर्मिणामसंन्यासिनाम् इत्येषः गीताशास्त्रोक्तकर्तव्यार्थस्य विभागः।।

अविद्यापूर्वकत्वं सर्वस्य कर्मणः असिद्धमिति चेत्, न; ब्रह्महत्यादिवत्। यद्यपि शास्त्रावगतं नित्यं कर्म, तथापि अविद्यावत व भवति। यथा प्रतिषेधशास्त्रावगतमपि ब्रह्महत्यादिलक्षणं कर्म अनर्थकारणम् अविद्याकामादिदोषवतः भवति, अन्यथा प्रवृत्त्यनुपपत्तेः, तथा नित्यनैमित्तिककाम्यान्यपीति। देहव्यतिरिक्तात्मनि अज्ञाते प्रवृत्तिः नित्यादिकर्मसु अनुपपन्ना इति चेत्, न; चलनात्मकस्य कर्मणः अनात्मकर्तृकस्य 'अहं करोमि' इति प्रवृत्तिदर्शनात्। देहादिसंघाते अहंप्रत्ययः गौणः, न मिथ्या इति चेत्, न; तत्कार्येष्वपि गौणत्वोपपत्तेः। आत्मीये देहादिसंघाते अहंप्रत्ययः गौणः; यथा आत्मीये पुत्रे 'आत्मा वै पुत्रनामासि (तै० सं० २।११)' इति, लोके च 'मम प्राण व अयं गौः' इति, तद्वत्। नैवायं मिथ्याप्रत्ययः। मिथ्याप्रत्ययस्तु स्थाणुपुरुषयोः अगृह्यमाणविशेषयोः। न गौणप्रत्ययस्य मुख्यकार्यार्थता, अधिकरणस्तुत्यर्थत्वात् लुप्तोपमाशब्देन। यथा 'सिंहो देवदत्तः' 'अग्निर्माणवकः' इति सिंह इव अग्निरिव क्रौर्यपैङ्गल्यादिसामान्यवत्त्वात् देवदत्तमाणवकाधिकरणस्तुत्यर्थमेव, न तु सिंहकार्यम् अग्निकार्यं वा गौणशब्दप्रत्ययनिमित्तं किञ्चित्साध्यते; मिथ्याप्रत्ययकार्यं तु अनर्थमनुभवति इति। गौणप्रत्ययविषयं जानाति 'नैष सिंहः देवदत्तः', तथा 'नायमग्निर्माणवकः' इति। तथा गौणेन देहादिसंघातेन आत्मना कृतं कर्म न मुख्येन अहंप्रत्ययविषयेण आत्मना कृतं स्यात्। न हि गौणसिंहाग्निभ्यां कृतं कर्म मुख्यसिंहाग्निभ्यां कृतं स्यात्। न च क्रौर्येण पैङ्गल्येन वा मुख्यसिंहाग्न्योः कार्यं किञ्चित् क्रियते, स्तुत्यर्थत्वेन उपक्षीणत्वात्। स्तूयमानौ च जानीतः 'न अहं सिंहः' 'न अहम् अग्निः' इति; न हि 'सिंहस्य कर्म मम अग्नेश्च' इति। तथा 'न संघातस्य कर्म मम मुख्यस्य आत्मनः' इति प्रत्ययः युक्ततरः स्यात्; न पुनः 'अहं कर्ता मम कर्म' इति। यच्च आहुः 'आत्मीयैः स्मृतीच्छाप्रयत्नैः कर्महेतुभिरात्मा कर्म करोति' इति, न; तेषां

मिथ्याप्रत्ययपूर्वकत्वात्। मिथ्याप्रत्ययनिमित्तेष्टानिष्टानुभूतक्रियाफलजनितसंस्कारपूर्वकाः हि स्मृतीच्छाप्रयत्नादयः। यथा अस्मिन् जन्मनि देहादिसंघाताभिमानरागद्वेषादिकृतौ धर्माधर्मौ तत्फलानुभवश्च, तथा अतीते अतीततरेऽपि जन्मनि इति अनादिरविद्याकृतः संसारः

अतीतोऽनागतश्च अनुमेयः। ततश्च सर्वकर्मसंन्याससहितज्ञाननिष्ठायाम् आत्यन्तिकः संसारोपरम इति सिद्धम्। अविद्यात्मकत्वाच्च देहाभिमानस्य, तन्निवृत्तौ देहानुपपत्तेः संसारानुपपत्तिः। देहादिसंघाते आत्माभिमानः अविद्यात्मकः। न हि लोके 'गवादिभ्योऽन्योऽहम्, मत्तश्चान्ये गवादयः' इति जानन् तान् 'अहम्' इति मन्यते कश्चित्। अजानंस्तु स्थाणौ पुरुषविज्ञानवत् अविवेकतः देहादिसंघाते कुर्यात् 'अहम्' इति प्रत्ययम्, न विवेकतः जानन्। यस्तु 'आत्मा वै पुत्र नामासि (तै. सं. २।११)' इति पुत्रे अहंप्रत्ययः, स तु जन्यजनकसंबन्धनिमित्तः गौणः। गौणेन च आत्मना भोजनादिवत् परमार्थकार्यं न शक्यते कर्तुम्, गौणसिंहाग्निभ्यां मुख्यसिंहाग्निकार्यवत्।।

अदृष्टविषयचोदनाप्रामाण्यात् आत्मकर्तव्यं गौणैः देहेन्द्रियात्मभिः क्रियत व इति चेत्, न; अविद्याकृतात्मत्वात्तेषाम्। न च गौणाः आत्मानः देहन्द्रियादयः; किं तर्हि? मिथ्या प्रत्ययेनैव अनात्मानः सन्तः आत्मत्वमापाद्यन्ते, तद्भावे भावात्, तदभावे च अभावात्। अविवेकिनां हि अज्ञानकाले बालानां दृश्यते 'दीर्घोऽहम्' 'गौरोऽहम्' इति देहादिसंघाते अहंप्रत्ययः। न तु विवेकिनाम् 'अन्योऽहं देहादिसंघातात्' इति जानतां तत्काले देहादिसंघाते अहंप्रत्ययः भवति। तस्मात् मिथ्याप्रत्ययाभावे अभावात् तत्कृत व, न गौणः। पृथग्गृह्यमाणविशेषसामान्ययोर्हि सिंहदेवदत्तयोः अग्निमाणवकयोर्वा गौणः प्रत्ययः शब्दप्रयोगो वा स्यात्, न अगृह्यमाणविशेषसामान्ययोः। यत्तु उक्तम् 'श्रुतिप्रामाण्यात्' इति, तत् न; तत्प्रामाण्यस्य अदृष्टविषयत्वात्। प्रत्यक्षादिप्रमाणानुपलब्धे हि विषये अग्निहोत्रादिसाध्यसाधनसंबन्धे श्रुतेः प्रामाण्यम्, न प्रत्यक्षादिविषये, अदृष्टदर्शनार्थविषयत्वात् प्रामाण्यस्य। तस्मात् न दृष्टमिथ्याज्ञाननिमित्तस्य अहंप्रत्ययस्य देहादिसंघाते गौणत्वं कल्पयितुं शक्यम्। न हि श्रुतिशतमपि 'शीतोऽग्निरप्रकाशो वा' इति ब्रुवत् प्रामाण्यमुपैति। यदि ब्रूयात्

'शीतोऽग्निरप्रकाशो वा' इति, तथापि अर्थान्तरं श्रुतेः विवक्षितं कल्प्यम्, प्रामाण्यान्यथानुपपत्तेः, न तु प्रमाणान्तरविरुद्धं स्ववचनविरुद्धं वा। कर्मणः मिथ्याप्रत्ययवत्कर्तृकत्वात् कर्तुरभावे श्रुतेरप्रामाण्यमिति चेत्, न; ब्रह्मविद्यायामर्थवत्त्वोपपत्तेः।।

कर्मविधिश्रुतिवत् ब्रह्मविद्याविधिश्रुतेरपि अप्रामाण्यप्रसङ्ग इति चेत्, न; बाधकप्रत्ययानुपपत्तेः। यथा ब्रह्मविद्याविधिश्रुत्या आत्मनि अवगते देहादिसंघाते अहंप्रत्ययः बाध्यते, तथा आत्मन्येव आत्मावगतिः न कदाचित् केनचित् कथंचिदपि बाधितुं शक्या, फलाव्यतिरेकादवगतेः, यथा अग्निः उष्णः प्रकाशश्च इति। न च वं कर्मविधिश्रुतेरप्रामाण्यम्, पूर्वपूर्वप्रवृत्तिनिरोधेन उत्तरोत्तरापूर्वप्रवृत्तिजननस्य प्रत्यगात्माभिमुख्येन प्रवृत्त्युत्पादनार्थत्वात्। मिथ्यात्वेऽपि उपायस्य उपेयसत्यतया सत्यत्वमेव स्यात्, यथा अर्थवादानां विधिशेषाणाम्; लोकेऽपि बालोन्मत्तादीनां पयआदौ पाययितव्ये चूडावर्धनादिवचनम्। प्रकारान्तरस्थानां च साक्षादेव वा प्रामाण्यं सिद्धम्, प्रागात्मज्ञानात् देहाभिमाननिमित्तप्रत्यक्षादिप्रामाण्यवत्। यत्तु मन्यसे -- स्वयमव्याप्रियमाणोऽपि आत्मा संनिधिमात्रेण करोति, तदेव मुख्यं कर्तृत्वमात्मनः; यथा राजा युध्यमानेषु योधेषु युध्यत इति प्रसिद्धं स्वयमयुध्यमानोऽपि संनिधानादेव जितः पराजितश्चेति, तथा सेनापतिः वाचैव करोति; क्रियाफलसंबन्धश्च राज्ञः सेनापतेश्च दृष्टः। यथा च

त्विक्कर्म यजमानस्य, तथा देहादीनां कर्म आत्मकृतं स्यात्, फलस्य आत्मगामित्वात्। यथा च भ्रामकस्य लोहभ्रामयितृत्वात् अव्यापृतस्यैव मुख्यमेव कर्तृत्वम्, तथा च आत्मनः इति। तत् असत्; अकुर्वतः कारकत्वप्रसङ्गात्। कारकमनेकप्रकारमिति चेत्, न; राजप्रभृतीनां मुख्यस्यापि कर्तृत्वस्य दर्शनात्। राजा तावत् स्वव्यापारेणापि युध्यते; योधानां च योधयितृत्वे धनदाने च मुख्यमेव कर्तृत्वम्, तथा जयपराजयफलोपभोगे। यजमानस्यापि प्रधानत्यागे दक्षिणादाने च मुख्यमेव कर्तृत्वम्। तस्मात् अव्यापृतस्य कर्तृत्वोपचारो यः, सः गौणः इति अवगम्यते। यदि मुख्यं कर्तृत्वं स्वव्यापारलक्षणं नोपलभ्यते राजयजमानप्रभृतीनाम्, तदा संनिधिमात्रेणापि कर्तृत्वं मुख्यं परिकल्प्येत; यथा भ्रामकस्य लोहभ्रामणेन, न तथा राजयजमानादीनां स्वव्यापार नोपलभ्यते। तस्मात् संनिधिमात्रेण कर्तृत्वं गौणमेव। तथा च सति तत्फलसंबन्धोऽपि गौण व

स्यात्। न गौणेन मुख्यं कार्यं निर्वर्त्यते। तस्मात् असदेव तत् गीयते 'देहादीनां व्यापारेण अव्यापृतः आत्मा कर्ता भोक्ता च स्यात्' इति। भ्रान्तिनिमित्तं तु सर्वम् उपपद्यते, यथा स्वप्ने; मायायां च वम्। न च देहाद्यात्मप्रत्ययभ्रान्तिसंतानविच्छेदेषु सुषुप्तिसमाध्यादिषु कर्तृत्वभोक्तृत्वाद्यनर्थः उपलभ्यते। तस्मात् भ्रान्तिप्रत्ययनिमित्तः व अयं संसारभ्रमः, न तु परमार्थः; इति सम्यग्दर्शनात् अत्यन्त वोपरम इति सिद्धम्।।

सर्वं गीताशास्त्रार्थमुपसंहृत्य अस्मिन्नध्याये, विशेषतश्च अन्ते, इह शास्त्रार्थदाढ्यार्य संक्षेपतः उपसंहारं कृत्वा, अथ इदानीं शास्त्रसंप्रदायविधिमाह --

।।१८.६७।। --

इदं शास्त्रं ते तव हिताय मया उक्तं संसारविच्छित्तये अतपस्काय तपोरहिताय न वाच्यम् इति व्यवहितेन संबध्यते। तपस्विनेऽपि अभक्ताय गुरौ देवे च भक्तिरहिताय कदाचन कस्यांचिदपि अवस्थायां न वाच्यम्। भक्तः तपस्वी अपि सन् अशुश्रूषुः यो भवति तस्मै अपि न वाच्यम्। न च यो मां वासुदेवं प्राकृतं मनुष्यं मत्वा अभ्यसूयति आत्मप्रशंसादिदोषाध्यारोपणेन ईश्वरत्वं मम अजानन् न सहते, असावपि अयोग्यः, तस्मै अपि न वाच्यम्। भगवति अनसूयायुक्ताय तपस्विने भक्ताय शुश्रूषवे वाच्यं शास्त्रम् इति

सामर्थ्यात् गम्यते। तत्र 'मेधाविने तपस्विने वा' इति अनयोः विकल्पदर्शनात् शुश्रूषाभक्तियुक्ताय तपस्विने तद्युक्ताय मेधाविने वा वाच्यम्। शुश्रूषाभक्तिवियुक्ताय न तपस्विने नापि मेधाविने वाच्यम्। भगवति असूयायुक्ताय समस्तगुणवतेऽपि न वाच्यम्। गुरुशुश्रूषाभक्तिमते च वाच्यम् इत्येषः शास्त्रसंप्रदायविधिः।।

संप्रदायस्य कर्तुः फलम् इदानीम् आह --

।।१८.६८।। --

यः इमं यथोक्तं परमं परमनिःश्रेयसार्थं केशवार्जुनयोः संवादरूपं ग्रन्थं गुह्यं गोप्यतमं मद्भक्तेषु मयि भक्तिमत्सु अभिधास्यति वक्ष्यति, ग्रन्थतः अर्थतश्च स्थापयिष्यतीत्यर्थः, यथा त्वयि मया। भक्तेः पुनर्ग्रहणात् भक्तिमात्रेण केवलेन शास्त्रसंप्रदाने पात्रं भवतीति गम्यते। कथम् अभिधास्यति इति, उच्यते -- भक्तिं मयि परां कृत्वा 'भगवतः परमगुरोः अच्युतस्य शुश्रूषा मया क्रियते' इत्येवं कृत्वेत्यर्थः। तस्य इदं फलम् -- मामेव ष्यति मुच्यते व। असंशयः अत्र संशयः न कर्तव्यः।।

किं च --

।।१८.६९।। --

न च तस्मात् शास्त्रसंप्रदायकृतः मनुष्येषु मनुष्याणां मध्ये कश्चित् मे मम प्रियकृत्तमः अतिशयेन प्रियकरः, अन्यः प्रियकृत्तमः, नास्त्येव इत्यर्थः वर्तमानेषु। न च भविता भविष्यत्यपि काले तस्मात् द्वितीयः अन्यः प्रियतरः प्रियकृत्तरः भुवि लोकेऽस्मिन् न भविता।।

योऽपि --

।।१८.७०।। --

अध्येष्यते च पठिष्यति यः इमं धर्म्यं धर्मादनपेतं संवादरूपं ग्रन्थं आवयोः, तेन इदं कृतं स्यात्। ज्ञानयज्ञेन -- विधिजपोपांशुमानसानां यज्ञानां ज्ञानयज्ञः मानसत्वात् विशिष्टतमः इत्यतः तेन ज्ञानयज्ञेन गीताशास्त्रस्य अध्ययनं स्तूयते; फलविधिरेव वा, देवतादिविषयज्ञानयज्ञफलतुल्यम् अस्य फलं भवतीति -- तेन अध्ययनेन अहम् इष्टः पूजितः स्यां भवेयम् इति मे मम मतिः निश्चयः।।

अथ श्रोतुः इदं फलम् --

।।१८.७१।। --

श्रद्धावान् श्रद्दधानः अनसूयश्च असूयावर्जितः सन् इमं ग्रन्थं श्रृणुयादपि यो नरः, अपिशब्दात् किमुत अर्थज्ञानवान्, सोऽपि पापात् मुक्तः शुभान् प्रशस्तान् लोकान् प्राप्नुयात् पुण्यकर्मणाम् अग्निहोत्रादिकर्मवताम्।।

शिष्यस्य शास्त्रार्थग्रहणाग्रहणविवेकबुभुत्सया पृच्छति। तदग्रहणे ज्ञाते पुनः ग्राहयिष्यामि उपायान्तरेणापि इति प्रष्टुः अभिप्रायः। यत्नान्तरं च आस्थाय शिष्यस्य कृतार्थता कर्तव्या इति आचार्यधर्मः प्रदर्शितो भवति --

।।१८.७२।। --

कच्चित् किम् तत् मया उक्तं श्रुतं श्रवणेन अवधारितं पार्थ, त्वया काग्रेण चेतसा चित्तेन? किं वा अप्रमादतः? कच्चित् अज्ञानसंमोहः अज्ञाननिमित्तः संमोहः अविवित्तभावः अविवेकः स्वाभाविकः किं प्रणष्टः? यदर्थः अयं शास्त्रश्रवणायासः तव, मम च उपदेष्टृत्वायासः प्रवृत्तः, ते तुभ्यं हे धनंजय।।

अर्जुन उवाच --

।।१८.७३।। --

नष्टः मोहः अज्ञानजः समस्तसंसारानर्थहेतुः, सागर इव दुरुत्तरः। स्मृतिश्च आत्मतत्त्वविषया लब्धा, यस्याः लाभात् सर्वहृदयग्रन्थीनां विप्रमोक्षः; त्वत्प्रसादात् तव प्रसादात् मया त्वत्प्रसादम् आश्रितेन अच्युत। अनेन मोहनाशप्रश्नप्रतिवचनेन सर्वशास्त्रार्थज्ञानफलम् तावदेवेति निश्चितं दर्शितं भवति, यतः ज्ञानात् मोहनाशः आत्मस्मृतिलाभश्चेति। तथा च श्रुतौ 'अनात्मवित् शोचामि (छा० उ० ७।१।३)' इति उपन्यस्य आत्मज्ञानेन सर्वग्रन्थीनां विप्रमोक्षः उक्तः; 'भिद्यते हृदयग्रन्थिः (मु० उ० २।२।८)' 'तत्र को मोहः कः शोकः कत्वमनुपश्यतः (ई० उ० ७)' इति च मन्त्रवर्णः। अथ इदानीं त्वच्छासने स्थितः अस्मि गतसंदेहः मुक्तसंशयः। करिष्ये वचनं तव। अहं त्वत्प्रसादात् कृतार्थः, न मे कर्तव्यम् अस्ति इत्यभिप्रायः।।

परिसमाप्तः शास्त्रार्थः। अथ इदानीं कथासंबन्धप्रदर्शनार्थं संजयः उवाच --

संजय उवाच --

।।१८.७४।। --

इति वम् अहं वासुदेवस्य पार्थस्य च महात्मनः संवादम् इमं यथोक्तम् अश्रौषं श्रुतवान् अस्मि अद्भुतम् अत्यन्तविस्मयकरं रोमहर्षणं रोमाञ्चकरम्।।

तं च इमम् --

।।१८.७५।। --

व्यासप्रसादात् ततः दिव्यचक्षुर्लाभात् श्रुतवान् इमं संवादं गुह्यतमं परं योगम्, योगार्थत्वात् ग्रन्थोऽपि योगः, संवादम् इमं योगमेव वा योगेश्वरात् कृष्णात् साक्षात् कथयतः स्वयम्, न परम्परया।।

।।१८.७६।। --

हे राजन् धृतराष्ट्र, संस्मृत्य संस्मृत्य प्रतिक्षणं संवादम् इमम् अद्भुतं केशवार्जुनयोः पुण्यम् इमं श्रवणेनापि पापहरं श्रुत्वा हृष्यामि च मुहुर्मुहुः प्रतिक्षणम्।।

।।१८.७७।। --

तच्च संस्मृत्य संस्मृत्य रूपम् अत्यद्भुतं हरेः विश्वरूपं विस्मयो मे महान् राजन्, हृष्यामि च पुनः पुनः।।

किं बहुना --

।।१८.७८।। --

यत्र यस्मिन् पक्षे योगेश्वरः सर्वयोगानाम् ईश्वरः, तत्प्रभवत्वात् सर्वयोगबीजस्य, कृष्णः, यत्र पार्थः यस्मिन् पक्षे धनुर्धरः गाण्डीवधन्वा, तत्र श्रीः तस्मिन् पाण्डवानां पक्षे श्रीः विजयः, तत्रैव भूतिः श्रियो विशेषः विस्तारः भूतिः, ध्रुवा अव्यभिचारिणी नीतिः नयः, इत्येवं मतिः मम इति।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
अष्टादशोऽध्यायः।।

।।श्रीमद्भगवद्गीताशास्त्रं संपूर्णम्।।